कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
मुहुर्तचिंतामणि	—	पुराण	पुर्ण	-	७/12	२८०	संस्कृत	कागद	10			

M - 2824

अथग्रहलाघवसटीकप्रारंभः

श्रीगणेशायनमः ॥ नाकेनाकेशमुख्याः सुरवरनिवहाः सन्ति येऽनंतसंख्यानात्यामाख्यात्यमीषां कथमपि च मनः पूर्वकं वाञ्छदीया ॥ एकं हित्वैकदंतं सकलसुरशिरः संघसंघर्षितांघ्रिं शीघ्रं भक्तेष्टसिद्धिप्रदमिह हि सुरं सादरं तं नमामि ॥१॥ मल्लारिं कुलनायकं रविमुखानूखेटांश्च नत्वा गुरोः स्मृत्वा पादयुगं ह्यवाप्यन्वततः किंचित्सुबोधांशकं ॥ मल्लारिर्ग्रहलाघवस्य कुरुते टीकां सुसद्वासनां यस्माद्ल्पमतिश्च कुंठितमतिः स्यात्पूर्ववैचित्र्यवः ॥२॥ मध्यस्फुटास्तोदयवक्रपूर्वकर्माखिलं यद्गणिते खगोत्थं ॥ जीवाधनुः संश्रयकं विना तन्नस्यादयं निश्चय एव गोले ॥३॥ कथमत्र कृतं विना धनुर्ज्यै खगकर्माखिलमल्पकर्म्मणा ॥ उपपत्तिविचारणाविधौ गणकामंदधियो विमोहिताः ॥४॥ तस्माद्वच्मु पपत्तिमस्य विमलां तन्मोहनाशाय तां ज्ञात्वा मन्मतिकौशलाच्च गणकाः पश्यंतु तुष्यंतु ते ॥ हे वर्योगणका विलोक्य यदिहाशुद्धं च संशोध्यतां किंवा प्रार्थनया परोपकृतिषु स्वाभाविकस्तद्गुणः ॥५॥ ॥अथ हारबंधश्लोकेन गणाधीशः स्तूयते ॥ त्रैकालं कालकालं भज भज रजनीनायको यत्प्रियस्तं जंतो संन्तोषतो हि त्रिनयनजनकं नाकलोकप्रकर्षम् ॥ गेयज्ञं यज्वयज्ञं वरसुरशिरसा सेवितं वित्तविद्यादातारं ताम्रताभं भवभवनवशो नो नरो नम्रनत्या ॥६॥ अस्यलोकःस्यार्थः सुगमः ॥ तथापि बालावबोधार्थं संक्षेपतो मयैवोच्यते ॥ हे जंतो प्राणिन् तं ताम्रताभं सिंदूरवर्णं गणाधीशं हीति निश्चयेन संतोषतो भज भज सेवय सेवयेति ॥ स कः यस्य नम्रनत्या नम्रनमस्कारेण नरः पुरुषः भवः संसारः स एव यद्भवनं तस्य वशः वश्यो नो स्यात् ॥ मुक्त एव स्यादित्यभिप्रायः तमेव विशेषणद्वारा स्तौति ॥ त्रिषु उत्पत्तिस्थितिनाशकालेषु वर्त्तते स तथा त्रिकालावस्थायिनमविनाशिनमित्यर्थः ॥ कालमपि कलयत्याकलयति स तथा ॥ पुनस्सकः ॥ रजनीनायकः रात्रिनाथश्चंद्रमाः यस्य प्रियः सुहृत् ॥ तत्सुहृत्त्वं तु चतुर्थीव्रतादौ प्रसिद्धं ॥ त्रिनयनो जनको यस्य तं शिवतनयमित्यर्थः ॥ यद्वा त्रिनयनस्य जनकं पितरं गणेशं तत्सृष्टिकथने गणेशाच्छंकरोभूदिति गणेशकल्पादौ प्रसिद्धं ॥ नाकलोके स्वर्गलोके प्रकर्षः उत्कर्षो यस्य तं ॥ गेयज्ञं गेयं गायनं जानातीति तथा गायनाद्यसंगीतशास्त्रप्रवर्त्तकं ॥ यज्वयज्ञं यज्वनां यागकर्तॄणां यज्ञं यज्ञरूपं यज्ञांशभोक्तारमित्यर्थः ॥ वरसुरशिरसा वरास्सुराः श्रेष्ठा इंद्रादयः देवास्तेषां शिरसामस्तकेन सेवितं ॥ वित्तविद्यादातारं ॥ वित्तं द्रव्यं विद्याश्चतुर्दश पुराणंन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति ॥ तद्दातारं अभीष्टफलप्रदायकमित्यर्थः ॥ अथ श्रीमज्जलधितटनिकटस्थितनानोपवनविराजितनंदिग्रामाभिधाननगरनिवासिसकलभूपतिसेवितचरणयुगलकमलगणिताटवीविघटनपटुतराखिलदैवविन्मातंगकुंभपीठलुंठनोत्कंठकंठीरवश्रीमदुमारमणचरणद्वयपंकजावासमहामतिवैभवदैववित्केशवदैवज्ञात्मजाः गणेशदैवज्ञवर्य्याः ॥ ग्रहला

घवारभ्यं ग्रहकरणं चिकीर्षवस्तत्रादौ निर्विघ्नेन ग्रंथसमाप्तिप्रचयगमनाभ्यांशिष्टाचारपरिपालनायाशीर्नमस्कारवस्तुनिर्देशात्मकानां मंगलानां मंगलादीनि मंगलमध्यानि मंगलांतानिशास्त्राणि प्रथन्तइतिशिष्टनियमाच्चात्र वस्तुनिर्देशरूपमंगलसहितं ग्रंथारंभं वसंततिलकवृत्तेनाह ॥६॥ श्रुतिर्वेदः जयति सर्वोत्कर्षेणवर्त्तते ॥ तामेव विशेषणद्वारास्तौति किंविशिष्टा केशवस्यविष्णोर्वाक् ॥ यस्य निश्वसितं वेदाइत्याद्युक्तत्वात् ॥ ज्योतिषस्तेजसः प्रकाशकस्य गुणत्रयातीतस्य तेजोरूपस्य परब्रम्हणः प्रबोधोज्ञानं तं जनयत्युत्पादयतीति तथा ॥ मायावेष्टितस्य जंतोर्देहात्ममानिनः ॥ असौ देहो नश्वरः आत्मानित्योव्यापकोनिराकारइत्यादिज्ञानं वैदिककर्मद्वारा श्रवणमनननिदिध्यासनसाक्षात्कारैर्भवतीत्यर्थः ॥ किंकृत्वा ॥ तत्सूक्तकर्मचरणैः ॥ तस्यां श्रुतौ सुष्टु उक्तानि यानि संध्यास्नानदानजपहोमयज्ञादीनि कर्माणि ॥ तेषां चरणैराचरणैः अनुष्ठानैश्चित्तंमनः संशोध्यशुद्धंकृत्वा ॥ यतः मनः शुद्धौ जातायामेवात्मज्ञानं भवति ॥ गहनार्थेन गंभीरार्थेन पूर्णा ॥ अर्थपूर्णाचेत्तर्हिबह्वक्षरा स्यात्तदपिनयतः स्वल्पाक्षरास्वल्पान्यक्षराणि यस्यां सा नन्वर्थपूर्णा स्वल्पाक्षरायाश्रुतिस्तस्याः अर्थावबोधः कस्यापिनस्यात् अर्थावबोधं विनाश्रुत्युक्तकर्माचरणं कथं-

ज्योतिः प्रबोधजननीपरिशोध्यचित्तंतत्सूक्तकर्मचरणैर्गहनार्थपूर्णा स्वल्पाक्षरापिचतदंशकृतैरुपायैर्व्यक्तीकृताजयतिकेशववाक्श्रुतिश्च ॥१॥

स्यात् ॥ अतएवाह तदंशकृतैस्तस्य परमेश्वरस्य येंऽशाः रावणाद्यास्तैः कृताः येउपायाः रावणभाष्यादयस्तैर्व्यक्तीकृता प्रकटीकृता रावणभाष्याद्यवलोकनेन तदुक्तकर्माचरणं सम्यगेव स्यात् इतिविष्णुपक्षे ॥ अथपितृपक्षे केशवस्यपितुर्वाक् ॥ ग्रहकौतुकादिग्रंथरूपाजयतीति तामेवविशेषणद्वारास्तौति ॥ श्रुतिः श्रुतिसमाना ॥ यथा वेदोक्तंकर्मकार्यमेव सत्यत्वात् ॥ तथेयं केशववागपि ॥ ज्योतिषांग्रहनक्षत्रादीनां प्रबोधंज्ञानं जनयतीतितथा किंकृत्वा तस्यांकेशववाचिसूक्तानि यानि ग्रहसाधनादीनि कर्माणि तैश्चित्तं मनः संशोध्यगहनार्थेन पूर्णा ॥ स्वल्पाक्षराच ॥ तदंशाः तच्छिष्याः तैः कृताः येउपायाः टीकाद्याः तैः प्रकटीकृता ॥ अथयथार्थभक्त्या भक्तेः रामस्मरणंकर्त्तव्यंगणकैरपि करणस्मरणंकर्तव्यमित्यादि विषमवृत्तेनाह ॥१॥ हेशिष्य विष्णुरूपं स्मरव्यापनशीलोविष्णुः ॥ तस्यभगवतोरूपं आगमोक्तं चतुर्भुजादि स्मर मनसिधेहि ॥ ननुव्यापकस्यनिराकारस्य परब्रम्हणः रूपमेवनास्ति ॥ कस्यस्मरणंकर्तव्यमिति यदुक्तं श्रीमद्भागवते ॥ ननामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्यसाक्षिणः इत्यादि ॥ एवंसन्देहं केचिदापादयंति ॥ अत्रोच्यते प्रकृतेः परेण निराकारेण इदंविश्वंस्वमाययासृष्टं ॥ मा

यासत्वरजस्तमोगुणात्मिका ॥ तेगुणाः परब्रम्हणि न गुणातीतत्वात् ॥ अत इयंसृष्ट्यादिमायाकेवलंभगवत्सयुक्तैव ॥ परेभगवति नास्त्येव अत इदंआब्रम्हादिपिपीलिकांतं सकलंत्वसत्यं सगुणत्वात् ॥ अत इदं वेदोक्तमखिलं कर्मकांडमसत्यं ॥ यतः यद्यत्कर्म तत्तत् प्राणिसाध्यं ॥ प्राणिनस्तु मायारूपिणो ऽसत्याः ॥ ननु एकेन वेदेन यदुक्तंकर्मकांडं तदसत्यं ॥ ज्ञानकांडमुपनिषद्भागाख्यंसत्यं ॥ एवं कथंस्यात् ॥ उभयोः सत्यत्वमसत्यत्वंवा वक्तव्यं सत्यं ॥ असत्येनैव कर्मकांडेन कल्पितभगवद्रूपादिसेवनेन सत्यस्यव्यापकस्य परब्रम्हणः ज्ञानंभवति ॥ यथामिथ्याभूते प्रतिबिंबे सत्यबिंबानुमापकत्वं ॥ एवंभगवद्रूपं असत्यमपि सत्यमेव कल्पितम् ॥ यथाबालानांप्रथममक्षरज्ञानार्थम् ओंकारशिक्षायां वर्तुलपाषाणादि स्थाप्यते ॥ तद्वन्मायावेष्टितलोकानां सत्यप्राप्त्यर्थं भगवद्रूपं दारुपाषाणमृदादिजनितं चतुर्भुजद्विभुजैकदंतादि कल्प्यते तदपि युक्तं ॥ उक्तंच योगवासिष्ठे ॥ अक्षरावगमलब्धये यथास्थूलवर्तुलदृषत्परिग्रहः शुद्धबुद्धपरिलब्धये तथा दारुमृन्मयशिलामयार्चनम् ॥ इति तदेवविशेषणद्वारेण विशिनष्टि ॥ परिभग्नं कृतशकलंमौर्विकयाजीवयासह ईशस्य शंकरस्यचापं धनुर्येन तत्तथा जनकेनराज्ञास्वगृहे शंकरधनुरानीयेवंप्रतिज्ञाकृ-

परिभग्नसमौर्विकेशचापं दृढगुणहारलसत्सुवृत्तबाहु सुफलप्रदमात्ततनुप्रभंतंतनुस्मररामंकरणंचविष्णुरूपं ॥ २ ॥

ताय एतद्धनुः सज्यंकरिष्यति तस्मैजानकींकन्यांदास्यामीति ॥ एवंभगवतारामेण तत्सज्जीकृत्वा शकलीकृतमिति रामायणादौ प्रसिद्धं ॥ दृढाः गुणारज्जवोयस्मिन् सचासौहारश्च तेन लसत् शोभमानं सुतरांवृत्तौ वर्तुलौ बाहू यस्य तत्तथा सुष्टुफलं मोक्षादितत्प्रकर्षेण ददातीति तथा ॥ आत्ता अंगीकृता तनुः मनुष्यस्यप्रभायेनतत्तथा ॥ मनुष्यदेहधारिणमित्यर्थः ॥ अथकरणपक्षेहेगणककरणंस्मर ॥ तदेवविशेषणद्वारास्तौति ईशं ग्रहकर्तव्यतायां समर्थं यच्चापंमौर्विकयाजीवयासहपरिभग्नं यस्मिन् तत् ॥ अस्मिन्करणेधनुर्ज्ये न कृते इत्यर्थः ॥ दृढाः अपवर्तिता गुणाः हाराः येतैर्लसत्सुष्टु वृत्तबाहू यस्मिन् तत् ॥ अत्रग्रंथे वृत्तंसाधितमस्ति नतुचंद्रमंदकेंद्रं बाहुः भुजः प्रसिद्धः सुफलं ग्रहणादिज्ञानरूपंफलं प्रददाति तथा आत्ता तनुः शंकोः प्रभा छाया यस्मिन् तत्तथा अत्रशंकुछायासाधनमपिकृतमस्तीत्यर्थः ॥ रामं मनोरमं नानाछंदोभिः ॥ अथपूर्वकृतग्रंथेभ्योस्य वैशिष्ट्यंद्योतयन् तदारंभप्रयोजनंच दर्शयन्नाह यतः प्रयोजनादिकथनंविना ग्रंथपठनादौ प्रवृत्तिर्नस्यात् उक्तंच ॥ सिद्धिः श्रोतृप्रवृत्तीनांसंबंधकथनाद्यतः तस्मात्सर्वेषु शास्त्रेषु संबंधः पूर्वमुच्यते ॥ किमेवात्राभिधेयं स्यादिति पृष्टस्तु केनचित् ॥ यदि न प्रोच्यते तस्मै फलशून्यं तु तद्भवेत् ॥ सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ॥ या

वत्सयोजनं नोक्तं तावत्तत्केन गृह्यत इति ॥ इति वृद्धोपदेशं मत्वा वदति ॥२॥ अहं गणेशः तथापि ग्रहप्रकरणं ग्रहाः ग्रहसंबन्धीनि ग्रहणोदयास्तादीनि कर्माणि प्रक्रीयंते साध्यंते यस्मि
न्निति तत्कर्तुं उद्यतः उदयं प्राप्तोस्मि यत्र कल्पादेर्ग्रहानयनं स सिद्धांतः यत्र युगादेर्ग्रहानयनं तत् तंत्रं ॥ यत्र शकात् ग्रहानयनं तत्करणं ग्रहकरणमित्यनेन शकाद्ग्रहानयनं करोमी
तिसूचितं तथापि कथं ॥ यद्यपि उरवः महांतः धीराः गर्गाद्याः ऋषयः भास्कराचार्याद्याचार्याश्च करणानि अकार्षुः चक्रुः परं तेषु ज्यकाधनुरपास्य जीवाधनुषी त्यक्त्वा ग्रहादिदृद्धिर्यस्मा
न्न भवति अस्माद्धेतोः ॥ इदं मया क्रियंते ॥ किंविशिष्टं ज्या जिव्हा चापं धनुः एतत्कर्मभ्यां रहितं ॥ स्फुतरां लघुप्रकारं ॥ स्फुटं स्पष्टार्थं ॥ अथ प्रकृतं ग्रहाणां साधनं तदर्थमहर्गणं वृत्तद्वयेन साध
यति ॥३॥ द्व्यब्धींद्रोनितेति ॥ शाको वर्त्तमानः शालिवाहनशकयातवर्षगणः द्व्यब्धींद्रोनितः द्वौ अब्धयश्चत्वारः इंद्राश्चतुर्दश तैर्द्विचत्वारिंशदधिकचतुर्दशशतैः १४४२ ऊनितो वर्जितः स
न् ग्रंथारंभमारभ्येष्टकालपर्यंतं वर्षसमूहः स्यात् ॥ सईशैः एकादशभिः ११ हत् भक्तः एकस्थं यत्फलं तच्चक्राख्यं चक्रसंज्ञं रविहतशेषकं रविभिर्द्वादशभि १२ र्गुणितं यच्छेषकं तत्
चैत्राद्यैः चैत्रमारभ्येष्टकालपर्यंतं गतमासैर्युक्तं तत् पृथक्स्थाप्यं अमुतः पृथक्स्थात् सदृग्भचक्राद्दृग्भ्यां हन्यते तत् द्वघ्नं एवंभूतं यच्चक्रं तेन सहितादिति ततो दिग्भि १० र्यतात् अमरैर्ल

यद्यप्यकार्षुरुरवः करणानि धीरास्तेषु ज्यकाधनुरपास्य न सिद्धिरस्मात् ॥ ज्याचापकर्मरहितं स्फुलघुप्रकारं कर्तुं ग्रहप्रकरणं स्फुटमुद्यतोस्मि ॥३॥ द्व्यब्धींद्रोनितशक
ईशाप्तफलं स्याच्चक्राख्यं रविहतशेषकं तु युक्तं ॥ चैत्राद्यैः पृथगमुत्तः सदृग्भचक्राद्विगुयुक्तादमरफलाधिमासयुक्तं ॥४॥

षस्त्रिंशद्भि ३३ र्भक्तात् यत्फलं तेऽधिमासाः तैस्त-
त्पृथक्स्थं युक्तं स मासगुणः स्यात् ततस्तत् खत्रिघ्नं त्रिंशा ३० द्गुणं सत् शुद्धप्रतिपदमारभ्य यावत्स इष्टकालपर्यंतं तिथयो गतास्ताभिर्युक् युक्तं कार्यं ततस्तदेव निरग्रचक्रांगांशाढ्यं निरग्रो नि
शेषो नामैकस्थः यश्चक्रस्यागांशाः षडंशास्तेनाढ्यं युक्तं तत्पृथक्स्थाप्यं अमुतः पृथक्स्थात् अब्धिषड्भुलब्धैः अब्धयश्चत्वारः षड्भुं षट् एभिश्चतुष्षष्टिमितैः ६४ र्भक्तात् येलब्धा ऊनाहाः क्षयदि
वसास्तैः पृथक्स्थं वियुतं हीनं अहर्गणः अन्हां दिवसानां सावनानां गणः समूहो भवेत् ॥ सोऽहर्गणः शरैः पंचभिः ५ हमं गुणितं यच्चक्रं तेन युक् युक्तः सप्त ७ नष्टः यच्छेषं तन्मितः अज्ञात्
चंद्रमारभ्य गतस्तद्दिनजो वारः स्यात् ॥ चेन्न तर्हि सोऽहर्गणः वारार्थं सैको निरेको वा कर्त्तव्यः ॥ उक्तं च सिद्धांतशिरोमणौ ॥ अभीष्टवारार्थमहर्गणश्चेत् सैको निरेकस्तिथयोऽपि तद्वदिति ॥ अ
त्रोपपत्तिः ॥ अत्र ग्रंथारंभे द्विचत्वारिंशदधिकचतुर्दशशतमितः १४४२ शकः आसीत् तच्छकमारभ्य ग्रहानयनार्थं अनेन शकेनेष्टशक ऊनीकृतो गतवर्षगणः सौरो जातः ॥ यत्तु उक्तं ॥ वर्षाय
नर्त्तुयुगपूर्वकमत्र सौरादिति ॥ अतस्तेषां वर्षाणां मासीकरणार्थमनुपातः यद्येकस्मिन्वर्षे द्वादश सौरमासा भवंति तदेष्टसौरवर्षैः किमिति ॥ वर्षाणां द्वादशगुणो रूपं हरः तस्याविकृतत्वान्ना

शः अत्र केचिन्मासानांचांद्रत्वभ्रममारोप्य द्वादशमासः संवत्सर इति श्रुतेः वैयधिकरण्यमापादयंते तदसत् अत्र मासाः सौरा एव यतश्चांद्रमासानां वर्षमध्ये सावयवत्वमस्ति अतस्तेन पठिताः सौरास्तु सूर्याद्द्वादशराशिभोगेन द्वादशैव भवंति अतः श्रुतिरियं समीचीना इयं सति आचार्येण बहुषु वर्षेष्वहर्गणबाहुल्यं स्यात् तल्लाघवार्थं शिष्यक्लेशभयार्थं च प्रथमं वर्षाणि यानि तान्येवैकादशतष्टानि कृतानि यल्लब्धं तस्य चक्रसंज्ञा कृता॥ यच्छेषं तद्द्वादशगुणितं सत् मासाः कृताः ते सौरमासाः चक्रादिमारभ्येष्टशाकचैत्रादिपर्यंतं जाताः ततो यन्मासीयोऽहर्गणः साध्यते चैत्रादिमारभ्य तन्मासावधि ये यातमासास्त उक्ता स्तन्मासावधि स्युरिति॥ अत्र क्रियावैषम्यं गणितदुष्टत्वंच दृश्यते॥ यतो वर्षाणि द्वादशगणितानि सौरमासाश्चैत्रादियातमासाश्चांद्राः अन्यजात्योर्योगसंभवः कथंस्यात् अत्र प्रथमं सौरमासेभ्यः अधिमासानानीय सर्वेषु संयोज्य चांद्राः कार्याः तेषु चैत्रादिचांद्रा योज्याः अत्राचार्येण पूर्वं भिन्नजात्योर्योगः कृतः तत्राधिशेषकमधिकं जातं अतोऽधिमासानयने अधिशेषं त्यक्तं अधिकत्वात् तद्यथा चैत्रादिचांद्राणां सौरीकरणार्थमधिशेषं न्यूनीकर्तव्यं यतः एकस्मिन् वर्षे सौरदिनेभ्यश्चांद्रदिनानि एकादशाधिकानि दृश्यंते एवमधिमासाः सावयवा योज्याः अनुपातस्य सावयवत्वात् तत्राधिशेषं योज्यं अत्रोनं तुल्ययोर्द्वैनर्णयो

स्वाग्निघ्नं गततिथियुङ्निरग्रचक्रागांशाढ्यं पृथगसुतोऽब्धिषट्कलब्धैः ।। ऊनाहैर्विसुतमहर्गणो भवेद्वै वारः स्याच्छरहृतचक्रयुग्गणोऽज्ञात्॥५॥

टीका: अतः सौरमासेभ्यः अधिमासानयनं यदि कल्पसौरमासैः ५१८४००००००० कल्पाधिमासाः १९९३३००००० लभ्यंते तदेष्टसौरमासैः किमिति अत्र कल्पाधिमासैः कल्पसौरमासेषु भक्तेषु लब्धं ३२।१६।४। एभिर्मासैरेकोऽधिमासः उक्तंच ब्रम्हसिद्धांते द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा॥ घटिकानांचतुष्केण पतति ह्यधिमासक इति ततोऽनुपातः यद्येभिर्मासैः ३२।१६।४। रेकोऽधिमासस्तदेष्टैः किं अत्राचार्येण सुखार्थं हरस्थाने त्रयस्त्रिंशदेव गृहीताः एवं मासेभ्यः अमरफलाधिमासयुक्तमित्युक्तं अत्र ग्रंथारंभे दशभिर्मासैरधिमासोऽभूत् अतो दिग्युक्तादिति इदं स्थूलं हरस्य स्थूलत्वात् तदंतरं साध्यते॥ एकं चक्रमेकादशवर्षात्मकं तद्द्वादशगुणितं जाता मासाः १३२ तेभ्यः कल्पाद्यनुपातेन जाताः ४।२। त्रयस्त्रिंशद्भक्तेषु जाताः ४ अत्रांतरं एकचक्रे द्विमासतुल्यं ततोऽनुपातः यद्येकस्मिन् चक्रे द्विमासतुल्यमंतरं तदेष्टचक्रैः किं अतः सद्विघ्नचक्रादिति एवमधिमासयुक्ताः सौराश्चांद्रमासगणो जातः ततो दिनीकरणार्थमनुपातः यद्येकमासस्य त्रिंशद्दिनानि तदेष्टमासैः किं अतो मासास्त्रिंशद्गुणाः रूपहरस्याविकृतत्वान्नाशः एवं जाताश्चांद्रदिवसास्ते तन्मासशुक्लप्रतिपदादिपर्यंतं इष्टतिथिकरणार्थं गततिथियुगिति ततोऽनुपातः कल्पचांद्रैः १६०२९९९०००००० कल्पदिनक्षयाः २५०८२५४०००० लभ्यंते तदेष्टचांद्रैः किमिति कल्पादिनक्षयैः क

ल्पचांद्रेषुभक्तेषुलब्धं ६३।५४।३२ यद्येभिर्दिनैरेकोदिनक्षयस्तदेष्टैः किमिति ॥ अत्राचार्येण हरस्थाने चतुषष्टिरेवधृता एवं चतुषष्टिभक्ताः चांद्रादिनक्षयाः स्युरिति अत्रांतरज्ञानं चक्रषड्के वर्षाणि ६६ एषांदिनानि २४४८६ एकत्र ६३।५४।३२ एभिरेकत्र च ६४ एभिर्भक्ते लब्धे फले ३८३।३८२ अवयवस्य त्यागः तेनानुपातः यदिषड्भिश्चक्रैरेकदिनतुल्यमंतरं तदेष्टचक्रैः किमिति अतो निरग्रचक्रागांशायुक्कार्य इत्युपपन्नं एवं दिनक्षयाश्चांद्रेषु ऊनाः कार्याः यतोवर्षमध्ये चांद्रदिवसेभ्यः सावनदिनानि पंचदिनाल्पकानि दृश्यंते अत उक्तं ऊनाहैर्वियुतमिति अत्र दिनक्षयाः सावयवा ग्राह्याः तेनगृहीताः यतः सावयवदिनक्षयोनचांद्रेषु कृतेष्वहर्गणः तिथ्यंतकालीनः स्यात् गततिथियुक्तत्वात् ग्रहाः सूर्योदयिकाः कर्त्तव्याः एवंतिथ्यंतसूर्योदययोर्मध्ये दिनक्षयशेषमेव तत्तेषु योज्यं यतस्तिथ्यन्तादग्रे सूर्योदयः पूर्वं वियोज्यमधुना योज्यं तुल्यत्वात्तयोर्नाशः उक्तंच सिद्धांतशिरोमणौ ॥ तिथ्यंतसूर्योदययोस्तु मध्ये सदैव तिथ्यवमावशेषं ॥ त्यक्तेन तेनोदयकालिकः स्यात्तिथ्यंतकाले द्युगणोऽन्यथात्विति ॥ एवंसावनोऽहर्गणोजातः सप्ततष्टः सन् अब्जाद्वारः स्यात् यथा ग्रंथादौ सोमवारआसीत् अत्र चक्रदिनानि ४०१६ सप्ततष्टानि शेषं ५ तत्रानुपातः यद्येकचक्रे पंचवाराअंतरं तदेष्टचक्रैः किमिति अतः शारहतचक्रयुगिति ॥५॥ एवमहर्गणंप्रसाध्येदानींश्लो

खविधुतानभवास्तरणेर्ध्रुवः खमनलारसबाहुयईश्वराः ॥ सितरुचोभसुखोऽथखगायमौशरकृतागदितोविधुतुंगजः ॥६॥ शैलाद्वौरखशराअगोः क्षितिभुवोभूतत्वदंता
विदः केंद्रस्याब्धिगुणोडवः सुरगुरोः खंषडयमावस्विलाः ॥ शुक्रकेंद्रस्यभृगोः कुशाक्रयमलाराश्यादिकोऽथेशानेः शैलाः पंचकृबोयमाब्धयइमेऽथक्षेपकाः कथ्यते ॥७॥

कद्वयेनध्रुवानाह ॥ खविध्विति शैलाद्वाविति तरणेः सूर्यस्य भसुखः भानि राशयो भसुखे यस्य स तथा राश्याद्यः अयंध्रुवः स्यात् अयं कः खविधुतान भवाः खं शून्यं ० विधुरेकः १ तानान्येकोनपंचाशत् ४९ भवाः एकादश ११ सितरुचः सिताशुभ्रा रुक् दीप्तिर्यस्य तस्य चंद्रस्य ध्रुवः खंशून्यं ० अनलास्त्रयः ३ रसबाहुयः रसाः षट् बाहुयश्चत्वारः एवंषट्चत्वारिंशत् ४६ ईश्वरा ११ अत्र सर्वत्रांकानांवामतोगतिन्यायः ॥ विधुतुंगजः विधोश्चंद्रस्य यत्तुंगमंदोच्चंतस्यध्रुवोगदितउक्तः ॥ खयगाः ग्रहाः नव ९ यमौ द्वौ २ शरकृताः शराः पंचकृताश्चत्वारः एवंपंचचत्वारिंशत् ४५ अगोराहोर्ध्रुवः ॥६॥ शैलाः कुलाचलाः सप्त ७ द्वौ प्रसिद्धौ २ खशराः खंशून्यं शराः पंच एवंपचाशत् ५० क्षितिभुवः क्षितेर्भवतीतिक्षितिभूः तस्य मंगलस्यायं ध्रुवः भूः एकः १ तत्वानि पंचविंशतिः २५ दंताः द्वात्रिंशत् ३२ विदः बुधस्य केंद्रस्यायं ध्रुवः अब्धयश्चत्वारः ४ गुणास्त्रयः ३ उडूनि नक्षत्राणि सप्तविंशतिः २७ सुराणां देवतानां गुरोः बृहस्पतेः ध्रुवः खंशून्यं षडयमाः षट् प्रसिद्धाः यमौ द्वौ एवंषड्विंशतिः २६ वस्विलाः वसवोऽष्टौ इला पृथिवी एका एवमष्टादश १८ भृगोः शुक्रस्य यद्वा केंद्रं शीघ्रकेंद्रं तस्य ध्रुवः कुः एकः १ शाक्रा

क्राश्चतुर्दश १४ यमलौ द्वौ २ शनेरपि राश्याद्यो ऽयं ध्रुवः ॥ शैलाः सप्त ७ पंचध्रुवः पंचदश १५ यमाब्धयः यमौ द्वौ अब्धयः श्चत्वारः एवं द्विचत्वारिंशत् ४२ एते ग्रहध्रुवा राश्याद्याः ॥ अत्रोपपत्तिः। अत्राचार्येण एकादशतष्टानि वर्षाणि कृत्वाहर्गणानयनं कृतं एवं यो ऽहर्गणः स एकादशवर्षमध्यस्थ एव तदुत्पन्नाः ये ग्रहाः ते एकादशवर्षमध्य एव भवंति अतो या वंति चक्राणि भुक्तानि तेषां ग्रहानानीय एतेषु ग्रहेषु प्रक्षिप्य ग्रंथशकादिमारभ्य ग्रहाः स्युरिति ॥ एवमाचार्येण एकमितचक्रादेकादशवर्षात्मकात् ग्रहाः साधिता ते यथा कल्पसौरवर्षैः कल्पग्रहभगणाः तदैकादशवर्षैः कतीति अत्रागतानां भगणानां प्रयोजनाभावात् राश्याद्या एव गृहीताः तेषां ध्रुवसंज्ञा कृतास्थिरत्वात् राश्याद्या एव गृहीताः णामहर्गणं प्रसाध्य पर्वकरणोक्तरीत्या ग्रहाः साधिताः ते ग्रहेषु योज्याः अत्राचार्येण द्वादशराशिशुद्धान्कृत्वा ध्रुवसंज्ञाः कृताः अतो दिनगणागतग्रहेषु ध्रुवा वियोज्या इत्यग्रे उत्क्रम सी चक्रशुद्धत्वात् ॥ अत्र बालावबोधार्थं धूलीकर्म एकादशवर्षाणामयमहर्गणः ४०१६ अतः अयमहर्गणो विश्वगुणस्त्रिरसांकैर्भक्त इत्यादिना जातो मध्यमो रविः ११।२८।१०।५१। अयं द्वादशशुद्धो जातो रविध्रुवः ०।१।४९।११। एवं सर्वेषां ग्रहाणां ध्रुवाः उत्पाद्याः ॥ एवं ध्रुवानुक्त्वा क्षेपकमाह अथेति अथशब्दो नंतरवाचि ध्रुवकथनानंतरं क्षेपकः कथ्यत इत्यर्थः ॥ ७ रुद्रा इति

रुद्रागोब्जाः कुवेदास्तपन इह विधौ शूलिनो गोध्रुवः षट् ॥ तुंगोक्षात्यष्टिदेवास्तमसि खसुडवो ऽष्टाग्नयो ऽथो महीजे दिक्शैलाष्टौ ज्ञकेंद्रे विभकलनवभं पूजिते ऽब्ध्यश्वि
भूपाः शौक्रे केंद्रो गृहाद्यो ऽदिनखलवशनौ गोतिथिस्वर्गतुल्यः ॥ ८ ॥

तपने सूर्ये तपनः सविता रविरित्यभिधानात् गृहाद्यः गृहाणि राशयः आदौ यस्येति राश्याद्यः क्षेपः स्यात् रुद्राः एकादश ११ गोब्जाः गावः नव अब्जः चंद्रः एकः एवमेकोनविंशतिः १९ कुवेदा कुरेकः वेदाश्चत्वारः एकचत्वारिंशत् ४१ इति विधौ चंद्रे शूलिनः एकादश ११ गोध्रुवः एकोनविंशतिः १९ षट्प्रसिद्धाः ६ तुंगे चंद्रमंदोच्चे अक्षाः पंच ५ अत्यष्टयः सप्तदश १७ देवास्त्रयस्त्रिंशत् ३३ तमसि राहौ खं शून्यं ० उडवः सप्तविंशतिः २७ अष्टाग्नयः अष्टत्रिंशत् ३८ अथो राहुक्षेपकथनानंतरं महीजे भौमे दिशो दश १० शैलाः सप्त ७ अष्टौ प्रसिद्धाः ८ ज्ञकेंद्रे बुधशीघ्रकेंद्रे विभकलनवभं विगलाः भकलाः सप्तविंशति कला यस्मात् एवंभूतं यन्नवभं राशिनवकं तत्तेन राश्यष्टकं ८ एकोनत्रिंशद्भागाः २९ त्रयस्त्रिंशत्कला ३३ श्चेति पुजिते गुरौ अब्धयः सप्त ७ अश्विनौ द्वौ २ भूपाः षोडश १६ शौक्रे शुक्रस्येदं तस्मिन् शुक्रकेंद्रे ऽदिनखनव अद्रयः सप्त ७ नखाः विंशतिः २० नव प्रसिद्धाः ९ शनौ गोतिथिस्वर्गतुल्यः गावो नव ९ तिथयः पंचदश १५ स्वर्गाः एकविंशतिः २१ एभिस्तुल्यः शनिक्षेपकः स्यात् अत्र गृहाद्यं इति सर्वत्र संबध्यते अत्रोपपत्तिः ये ऽत्र ग्रहास्ते ग्रंथारंभमारभ्य जाताः अतो ग्रंथारंभग्रहाः अत्र योज्याः ते कल्पादितः स्युरिति तत्साधनं यथा व्याब्धीद्रतुल्यं-

(१४५२

शकं प्रकल्प्य चैत्रशुक्लप्रतिपदि सूर्योदयिकामध्यमाग्रहायस्मात्तस्मात्पक्षाद्ये ये घटंते तत्तत्पक्षेभ्यस्ते तेसाधितास्तेषां क्षेपसंज्ञाकृता यतः क्षिप्यतेऽसौक्षेपः अस्य ग्रहेषुक्षेप्यत्वात् क्षेपत्वं ॥८॥ एवंक्षेपानुक्त्वाक्रमप्राप्तंअहर्गणात्मध्यमग्रहानयनमाह ॥ दिनगणेति दिनगणादहर्गणाद्भवउत्पन्नोवक्ष्यमाणरीत्याऽहर्गणात् साधितोग्रहश्चक्रेण निघ्नोगुणितोयोध्रुवस्तेन ऊनः स्वस्य क्षेपोय उक्तस्तेनयुक्तोदिवसकृतः सूर्यस्य उदये मध्यमः स्यात् लंकायां मध्यमार्कोदयासन्नसमये मध्यमोग्रहः स्यादित्यभिप्रायः उक्तंच सिद्धांतशिरोमणौ ॥ दशशिरः पुरिमध्यमभास्करे क्षितिजसंनिधिगेसति मध्यमइति अयमुदयांतरसंस्कृतः सन्नू लंकामध्यमार्कोदयकालिकोभवति उदयांतरंतु स्वल्पत्वादाचार्येण स्वकमतोनदोषः ॥ तस्य स्वदेशीयकरणार्थं संस्कारमाह निजनिजेति निजं निजं स्वीयं स्वीयं यत्पुरं ग्रहकर्तुर्गणकस्य यन्नगरं तच्च रेखा च अनयोरंतर्मध्येस्थितोवर्तमानोयोयोजनौघः योजनानां समूहस्तस्माद्योरसैः षड्भिः ६ र्लवस्तेन मिताः याः लिप्ताः यत्कलादि द्विस्थं फलं तत् इंदौ चंद्रे स्वं धनं ऋणं हीनं च कार्यं कस्मिन्सति परे प्राक् रेखातः स्वदेशेसतिपश्चिमायां धनं पूर्वस्यामृणमित्यर्थः अत्र पूर्वार्द्धस्योपपत्तिः पूर्वमेवोक्तास्ति उत्तरार्द्धोपपत्तिर्यथा यः कृतोलंकायां मध्यमोग्रहः सस्वदेशीयः कर्त्तव्यः अतोदेशांतरं देयं तद्देशांतरं द्विवि

दिनगणभव खेटश्चक्रनिघ्नध्रुवोनोदिवसकृदुदयेस्वक्षेपयुङ्मध्यमः स्यात् निजनिजपुररेखांतःस्थितोयोजनौघाद्रसलवमितलिप्ताःस्वर्णमिंदौपरेप्राक् ॥९॥

धं पूर्वापरं याम्योत्तरंच याम्योत्तरं यत् तच्चरं तच्च रेखार्कोदयलंकार्कोदययोरंतरं तदग्रेप्रतिपादयिष्यति पूर्वापरं रेखार्कोदयस्वपुरार्कोदययोरंतरं रेखा मध्यरेखा ध्रुवइतिशेषः उक्तंच सिद्धांतशिरोमणौ यल्लंकोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सामध्यरेखाभुवइति अत्ररेखार्कोदयात् स्वार्कोदयः कदाभविष्यतीतिज्ञानार्थमुपायः लंकायामुक्तः परमोभूपरिधिः सप्तारिनंदाब्धितुल्यः ४९६७ मेरौपरिधरभावः मध्येऽनुपातःस यथा लंकायामक्षज्याभावाल्लम्बज्या परमा त्रिज्यातुल्या अतः यदितुत्रिज्यातुल्यया लंबज्यया अयमुक्तोभूपरिधिस्तदेष्टलंबज्यया किमिति लंबज्यायाः सर्वत्र त्रिज्यातोऽल्पत्वात् उक्तात्सर्वत्रोनएव भूपरिधिः स्यात् अतःसुखार्थमष्टचत्वारिंशत् छतमितोगृहीतः ४८०० ततोऽनुपातः यद्येभिः परिधियोजनैः ४८०० र्ग्रहोगतिकलाः क्रामति तदेष्टैः रेखास्वदेशांतरयोजनैः किमिति अत्रायं संस्कारश्चंद्रस्यैव कृतः अन्येषां गतेरल्पत्वात् न कृतः स्वल्पांतरत्वात् कर्मगौरवभयात् स्वक्रमतोनदोषाय उक्तंच सिद्धांतशिरोमणौ ॥ स्वल्पांतरत्वादबहुप्रयोगात्प्रसिद्ध्यभावाच्च बहुप्रयासात् ग्रंथस्य तज्ज्ञैर्गुरुताभयेन यत्त्यज्यतेऽर्थोनसदूषणायेति अतोरेखास्वदेशांतरयोजनानांगति ७९० र्गुणः परिधि ४८०० र्हरः गुणहरौ गुणेनापवर्त्तितौ जातोहरः षट् ६ अत् उक्तं निजनिजेत्यादि ध

नर्णोपपत्तिर्यथा ये ग्रहास्ते मध्यरेखोदयजाः मध्यरेखातः पूर्वदेशे रेखोदयात् पूर्वं सूर्योदयः अतः ऋणं क्रियते रेखायाः पश्चिमदेशे स्थितानां रेखोदयानंतरं स्वार्कोदयः अतो धनं क्रियत इत्युपपन्नं ॥ ९ ॥ ॥ अथ सूर्यबुधशुक्रचंद्रानेकवृत्तेन साधयति ॥ खखनगेति स्वस्याहर्गणस्यैव खनगलवः सप्तत्यंशः तेन हीनो द्युव्रजोऽहर्गणः स एव अर्कज्ञशुक्राः सूर्यबुधशुक्राः भागाद्याः स्युस्तेषामयं संस्कारः लिप्तिकास्तु कलास्तु खतिथिहृतेन गणेन सार्द्धशतभक्ताहर्गणेन ऊना इति एतदुक्तं भवति अहर्गणः सप्तत्या ७० भाज्यः फलं भागाः यच्छेषं तत् षष्ट्या ६० गुण्यं पुनः सप्तत्या ७० भाज्यं फलं कलाः पुनर्यच्छेषं तत् षष्टि ६० गुणं सप्तति ७० भक्तं फलं विकलाः ततोऽहर्गणः सार्द्धशतेन १५० भाज्यः फलं कलाः शेषं षष्टि ६० गुणं सार्द्धशात् १५० भक्तं फलं विकलाः तेन कलादिना तत्फलं हीनं सत् भागाद्या मध्यमाः सूर्यबुधशुक्राः स्युरिति अत्र विकलाः षष्ट्या भाज्याः फलमूर्द्धं कलासु योज्यं कला अपि षष्टिभक्ताः फलं भागेषु योज्यं भागास्त्रिंशद्भक्ताः फलं राशाद्याः स्युः ततः स्वभचक्रहृतः स्वध्रुवकोहीनः कार्यः क्षेपः संयोज्यः ततस्तद्राशयो द्वादशभक्ता भगणाः स्युस्ते प्रयोजनाभावात्त्याज्याः रविराह्वोर्भगणा ग्रहणे पूर्वे आनयनायोपयुक्ताः संति अतस्ते स्थाप्याः अत्रोपपत्तिः ॥ अत्र पूर्वगत्या ग्रहसाधनं कर्त्तव्यं तत्र पूर्वगतिज्ञानोपायो यथा ॥ पूर्वं ब्रम्हणा

खखनगलवहीनो द्युव्रजोऽर्कज्ञशुक्राः खतिथिहृतगणोनो लिप्तिकास्त्वंशकाद्याः गणमनुहृतिरिंदुः खाद्रिभूभागहीनः खमनुहृतगणोनो लिप्तिकास्त्वंशपूर्वः

चैत्रादौ रविवारे भचक्रं क्रांतिमंडलादिवृत्ताढ्यं प्रवहानिले पश्चिमगतौ क्षिप्तं तत्र ग्रहाः प्रवहानिलवशेन भचक्रं भ्रामयित्वा भिन्नभिन्नया पूर्वगत्या स्वस्थानात् किंचित् किंचिच्चलिताः एवं प्रत्यहं विलोक्यमाने ग्रहाणां पूर्वगतिर्भिन्नाभिन्ना दृष्टा अत्र ग्रहानयने कश्चिदुपायो न दृश्यते प्रतिदिनं विलक्षणगतित्वात् तत्रेत्थं ब्रम्हणा विरचितं गोलं चक्रविकलांकितं कृत्वा प्रत्यहं ग्रहा वेधिताः एवमद्यतनश्वस्तनयोरंतरं ग्रहस्य गतिः एवं ग्रहभगणभोगपर्यंतं ग्रहगतीरानीय तासु मध्ये या परमाधिका गतिर्या च परमाल्पा तयोर्योगार्द्धं मध्यगतिः सैवांगीकृता सा दुःसाध्या सूक्ष्माणां विकलाकोट्यंशादीनामलक्ष्यत्वात् सा स्थूला जाता सैवांगीकृता एवं कियत्यपि काले जाते वसिष्ठादिभिर्विलोक्यमाने गतेरंतरं दृष्टं एवमन्यैरपि आर्यभट्टब्रम्हगुप्तभास्कराद्यैस्तथैव युक्त्यागतयो भिन्ना दृष्टास्तेभ्यो भगणा अपि साधितास्ते यथा यद्येकदिनेनैतावती गतिस्तदा कल्पकुदिनैः किमिति एवं सिद्धांते ग्रहभगणाः भिन्नभिन्नाः पाठपठितास्ते तत्कालमेव घटंते स्म इदानीं महदंतरिता दृश्यंते उक्तं च वराहसंहितायां उल्काभावे विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिरिति वसिष्ठसिद्धांऽतेऽपि । इत्थं मांडव्यसंक्षेपादुक्तं शास्त्रं मयोदितं विस्रस्ती रविचंद्राद्यैर्भविष्यति युगे युगे ॥ युगे युगे महति काले विस्रंसनं विस्रस्तिः शिथिलत्वमिति या

वत् उक्तंच सूर्यसिद्धांते ॥ शास्त्रमाद्यं तदेवेदं यत्पूर्वंप्राह भास्करः युगानांपरिवर्त्तेन कालभेदोऽत्र केवलं ब्रम्हसिद्धांतेपि ध्यानग्रहोपदेशात् बीजं ज्ञात्वा स्फुदेवज्ञैः तत्तांस्फुटग्रहेभ्यः कर्त्तव्यो निर्णयादेशाविति अमुनाचार्येणनलिकाबंधेन ग्रहानावेध्य ग्रहांतराणि लक्षितानितद्यथा सौरपक्षीयः सूर्यश्चंद्रोच्चंच नवकालान्यूनः सौरपक्षीयश्चंद्रो घटते आर्यपक्षीयाः भौमगुरुराहवः बुधकेंद्रं ब्रम्हपक्षीयं आर्यपक्षीयःशनिः पंचभागाधिकोघटते शुक्रकेंद्रंतुब्रम्हपक्षीयार्य्यपक्षीययोर्योगार्धतुल्यंघटते अस्मिन्काले एतेदृग्गोचराः एवमग्रेऽपि भविष्यन्महागणकैर्नलिकाबंधादिनाग्रहवेधं कृत्वा अंतराणि लक्षयित्वा ग्रहकरणानि कार्याणीत्यग्रे ग्रंथसमाप्तावाचार्येणाप्युक्तमस्ति अतोऽस्मिन् कालेऽमीएव ग्रहाघटंते एवमनया वर्तमानघटनयाज्ञाता मध्यमा रविगतिर्भागाद्या ०।५९।८।१०।१७।९। तत्रानुपातः यद्येकदिनेनैतावती गतिस्तदाहर्गणेन किमिति अहर्गणस्य गतिर्गुणः अत्रखंडगुणनार्थंगतेरेकं खंडं गत्यपेक्षयाधिकं गृहीतं ०।५९।८।३४।१७।९। अस्यापि एकोधृतः अंतरं ०।०।५१।२५।४२।५१। अनेनाहर्गणोगुण्यः रूपगुणाहर्गणाच्छोध्यः अत्र कर्मगौरवं लाघवार्थमिदं ०।०।५१।२५।४२।५१। यथैकसंख्यं स्यात्तथा केनापिगुण्यं एवं सप्तति ७० गुणिते ऊर्ध्वं रूपं १ निःशेषं भवति अतोगणोरूपगुणः सप्ततिभक्तः फलेनरूपगुणोऽहर्गणोहीनः कार्य्यः यतोऽधिकं गृहीतं उभयत्र रूपतुल्यस्य

नवहृतदिनसंघश्चंद्रतुंगलवाद्यंभवतिखनगभक्तध्रुवजोपेतलिप्तं ॥ श्लोकार्धः ॥

गुणस्याविकृतत्वात् नाशः एवं स्वखनगलवहीनइति अथगतेरपेक्षयाधिकं गृहीतं यत् खंडं ०।०।२४।०।०॥ अनेनगणोगुण्यः फलं रवौ हीनं कार्यं अधिकत्वात् अत्रापि लाघवार्थमिदं खतिथिभिः १५० सवर्णितं जातं कलास्थाने रूपं १ अतः कलाः खतिथिहृतगणोनइति या मध्यमार्कगतिः सैव बुधशुक्रयोर्दृष्टा अतोरविबुधशुक्रा मध्यमास्त एव ॥ अथचंद्रंसाधयति ॥ गणमनुहतिरिति । गणोऽहर्गणः मनवश्चतुर्दश १४ अनयोर्हतिर्नाम चतुर्दशगुणोऽहर्गणः अंशापूर्वोभागाद्यः इंदुश्चंद्रः स्यात् किंविशिष्टः स्वाद्रिभूभागेन स्वसप्तदशां१७शेन हीनः पुनर्लिप्तिकाः कलाः खमनुभिश्चत्वारिंशदधिकशतेन १४० हृतोयोगणस्तेनोनः स कार्यइत्यर्थः ॥ अत्रोपपत्तिः अत्र चंद्रस्यमध्यमागतिः १३।१०।३४।५२।५६।०। अनया गणोगुण्यः तत्रगतेरधिकं खंडं गृहीतं १३।१०।३५।१७।३८।५१। अत्रापि लाघवार्थं पूर्णाश्चतुर्दशगृहीताः अत उक्तं गणमनुहतिरितिइदंचतुर्दशाभ्यः कियदल्पमस्तीति चतुर्दशशुद्धं ०।४९।२४।४२।२१।९ इदंसप्तदशगुणितं जातमूर्ध्वस्थाने १४ अत्रोभयत्र चतुर्दशतुल्यगुणोऽतः स्वाद्रिभूभागहीनइत्युक्तं ततोगतेरपेक्षया यत् गृहीतमधिकंखंडं तदिदं ०।०।२५।४२।५१। खमनुभिः सवर्णितंजातं कलास्थानेरूपंसगुणः खमनवोहरः रूपगुणस्याविकृतत्वात् खमनुहृतगणोनोलिप्तिकास्विति स्वस्वभाव

स्वस्वक्षेपसंस्कारः सर्वेषांग्रहाणांकार्यएव ॥ १० ॥ इतिचंद्रंप्रसाध्येदानींचंद्रोच्चराह्वोः साधनमेकवृत्तेनाह ॥ नवहतेति नवभिः ९ हृतोभक्तोयोदिनसंघोऽहर्गणः सएवलवाद्यंचंद्रतुंगं चंद्रमंदोच्चंभवति किंविशिष्टं खनगैः सप्तत्या ७० भक्तोयोध्रुवजोऽहर्गणस्तेन उपेतायुक्तालिप्ताः कलायस्य तत्तथा गणस्य सप्तत्यंशेन कलाविकलारूपेण युक्तमित्यर्थः अत्रोपपत्तिः मंदोच्चशीघ्रोच्चादिगतिज्ञानं तत्स्थानं चाग्रे स्पष्टीकरणोपपत्तौ सविस्तरं वक्ष्यामः अत्रतु केवलासुच्चगतिमंगीकृत्योपपत्तिरुच्यते तत्र चंद्रोच्चगतिः ०।६।४०।५१।२५।४३। अत्रैकं खंडं गतेर्न्यूनं गृहीतं ०।६।४०। अनेन गणोगुण्यः तत्र लाघवार्थं इदंनव ९ सवर्णितं जातमूर्ध्वस्थानेरूपं १ सगणोऽविकृतत्वात्त्यक्तः अतोनवहृतइत्युक्तं अवशिष्टंखंडं ०।०।५१।२५।४३ इदंसप्तति ७० सवर्णितं जातमूर्ध्वं कलास्थानेरूपं १ अतः खनगभक्तध्रुवजोपेतलिप्तमिति यतः पूर्वखंडं न्यूनंगृहीतमतोयुक्तं एवंचंद्रोच्चं प्रसाध्येदानीं राहुं प्रसाधयति नवकुभिरिषुवेदैरिति नवकुभिः एकोनविंशत्या १९ इषुवेदैश्चइषवः पंचवेदाश्चत्वारः ऋग्वेदाद्याः प्रसिद्धा एभिः पंचचत्वारिंशद्भिः ४५ द्विधा गणात् आप्तात् गणः एकत्र एकोनविंशतिभक्तः अंशादिफलं ग्राह्यं अन्यत्र च पंचचत्वारिंशद्भक्तः फलं कलाद्यं एवं फललवकलिकैक्यं उभयोर्भागादिककलादिकफलयोर्योगः चक्रशकृद्वादश १२ शकृद्भस्ततोध्रुवक्षेपसंस्कृतः अगुः राहुः स्यादित्यर्थः ॥ अत्रोप

नवकुभिरिषुवेदैर्धस्त्रसंघाद्द्विधाप्तात् फललवकलिकैक्यंस्यादगुश्चक्रशकृद्भः ॥ ११ ॥

पत्तिः राहुनामपातः पातोनाम क्रांतिमंडलयोः सन्पातः सूर्योयस्मिन् वृत्ते भ्रमति तत् क्रांतिवृत्तं क्रांतिमंडलात् ग्रहोयावतांतरेण दृश्यते तस्यांतरस्य शरसंज्ञाकृता एवंरविव्यतिरिक्ताः सर्वेग्रहाः क्रांतिमंडलेन भ्रमंति शरतुल्यांतरेणग्रहाः यत्र भ्रमंति तद्वृत्तस्य विमंडलसंज्ञा एवं क्रांतिवृत्तशरवृत्तसम्पातस्य विलोमगतिर्दृष्टा तज्ज्ञानं यथा गोले पूर्वसंपातादन्यसंपातः कियद्भिर्भागैः पृष्ठतोदृष्टस्ते भागाः षष्टि ६० गुणाः कलाः ततोऽनुपातः यद्येभिः संपातद्वयांतरदिनैः एताः अंतरकलाः लभ्यंते तदैकदिनेन कतीति लब्धा पातस्य विलोमगतिः एवं चंद्रपातगतिः अन्येषांग्रहाणां पातसाधनं नोक्तं यतस्तेषां गतिर्वर्षेणापि विकला नलभ्यते अतश्चंद्रपातएवसाध्यते तद्गतिः ०।३।१०।४८।२५।१५। अतोऽनुपातात् अनयागणोगुण्यः अत्र गतेरपेक्षयाऊनं खंडं धृतं ०।३।९।२८।२५।१५। अनेन सावयवेन खंडेन गणोगुण्यइति कर्मगौरवं अतोलाघवार्थं इदमेकोनविंशत्या १९ सवर्णितं जातमूर्द्ध्वस्थानेरूपं १ एवं नवकुभिर्गणोभाज्यः फलं भागाइति अवशिष्टं गतिखंडं ०।०।१।२०।०।० इदं पंचचत्वारिंशतासवर्णितं जातं कलास्थाने रूपं १ अतइषुवेदैर्भक्तइति फलैक्यं कार्यं यतः पूर्वखंडं गतेरूनं धृतं एवंजातः पातः सएवपातं प्रसाध्येदानीं भौमं बुधशीघ्रोच्चं चैकवृत्तेनसाधयति ॥ ११ ॥ दिघ्नइति दिनगणोदिघ्नोदिग्भिर्दशभिर्हन्यते गुण्यते स तथा

एवंभूतोद्विधा स्थानद्वयेस्थाप्यः एकत्रांककुभिः अंकाः नव कुरेकः एवमेकोनविंशत्या १९ भक्तः अन्यत्र च त्रिशैलस्त्रयः प्रसिद्धाः शैलाः सप्त एवं त्रिसप्तत्या ७३ भक्तः फलांशककलाविवरं पूर्वफलमत्रांशाः भागाद्यं द्वितीयं कलाः तयोर्विवरं अंतरं कुजोभौमः स्यात् अत्रोपपत्तिः भौमगतिः ०।३१।२६।३१।३।३६। अत्राधिकं खंडं गृहीतं ०।३१।३४।४४।१२।३६। अनेन गणोगुण्यः अत्र लाघवार्थमिदमेकोनविंशत्यासवर्णितं जाताभागस्थाने दश अत उक्तं द्विघ्नोगणः अंककुभिर्भाज्यइति अस्मात् खंडात् गतिमपास्य शेषं खंडं ०।०।८।१३।९। इदं त्रिसप्तत्यासवर्णितं जाताः कलास्थाने दश १० उभयत्र दशतुल्योगुणो ऽतोद्विघ्नोद्विधेत्युक्तं फलयोरंतरं कार्यं यतः पूर्वखंडगतेरधिकं धृतं एवंभौमसाधनं कृत्वेदानीं बुधशीघ्रकेंद्रसाधनमाह ॥ त्रिघ्नइति त्रिभिर्गुण्यते हन्यते स तथा एवंभूतोयोगणः स खवसुदृग्लवयुक् खस्यत्रिगुणिताहर्गणस्य यो वसुदृग्भिरष्टाविंशत्या २८ लवोभागस्तेन सएव त्रिगुणितोगणोयुग्युक्तः सन् लवादि भागादि ज्ञस्य बुधस्य शीघ्रकेंद्रं स्यात् किंविशिष्टं अहिगुणाप्तगणोनलिप्तं अहयो ऽष्टौ गुणास्त्रयः एवमष्टत्रिंशन्मिती २८ रासोभक्तोयोगणस्तेन ऊनाः लिप्ताः कलायस्येति तत्तथा गणस्याष्टत्रिंशद्भागोद्विस्थः कलादिस्तेन तदूनं कार्यमित्यर्थः अत्रोपपत्तिः बुधशीघ्रकेंद्रगतिः ३।६।२४।८।७।१३। अनयागणोगुण्यइत्येकं खंडं त्रयः ३ त्रिभिर्गुण्यः अतस्त्रि

द्विघ्नोद्विधाद्युगणो ऽककुभिस्त्रिशैलैर्भक्तः फलांशककलाविवरंकुजःस्यात् त्रिघ्नोगणःखवसुदृग्लवयुग्ज्ञशीघ्रकेंद्रंलवाद्यहिगुणाप्तगणोनलिप्तं ॥ १२ ॥ ७

घ्नोगणइति अवशिष्टं खंडं किंचिदधिकं गृहीतं ०।६।२५।४२।५१।२५ अनेन गणोगुण्यइत्यत्रेदमष्टाविंशत्या २८ सवर्णितं भागस्थाने त्रयः ३ उभयत्रापि गुणास्त्रितुल्याः अतः खवसुदृग्लवयुगिति अत्राधिकमेव तत् खंडं ०।०।१।३४।४४।१२। इदं अष्टत्रिंशद्भिः ३८ सवर्णितंजातंकलास्थानरूपं १ तस्याविकृतत्वादहिगुणाप्तगणोनलिप्तमिति पूर्वखंडमधिकं गृहीतं अतइदं हीनंकृतं एवंबुधशीघ्रकेंद्रं प्रसाध्येदानीं गुरुं शक्रशीघ्रकेंद्रं चैकवृत्तेन साधयति ॥१२॥ चक्रपिंडइति चक्रपिंडो ऽहर्गणः अर्कैर्द्वादशभि १२ र्भक्तः सन् लवाद्योभागाद्योगुरुर्बृहस्पतिः स्यात् किंविशिष्टः चक्रपिंडात् अहर्गणात् खशैलैः सप्तत्या ७० आप्तालब्धायालिप्ताः कलाः फलादि द्विस्थं फलं तेन फलेन विहीनोविवर्जितः कार्यइत्यर्थः अत्रोपपत्तिः गुरोर्गतिः ०।४।५९॥८।३५।१७ अनयागणो गुण्यइति अत्रैकं खंडं ०।५ इदं द्वादशभिः १२ सवर्णितं जातं भागस्थानेरूपं १ हरस्थाने द्वादश अतउक्तं चक्रपिंडो ऽर्कभक्तइति अस्माद्गतिमपास्य शेषं ०।०।०।५१।२५।४३। इदं सप्ततिसवर्णितं जातं कलास्थानेरूपं १ हरस्थानेसप्ततिः ७० पूर्वखंडमधिकं गृहीतं अत उक्तं खशैलाप्तलिप्ताविहीनइति ॥ अथ शक्रकेंद्रं साधयति त्रिनिघ्नाच्चक्रपिंडाद्द्विधेति त्रिभि ३ र्हन्यते गुण्यते एवंभूतो योचक्रपिंडो ऽहर्गणस्तस्मात् द्विधा स्थानद्वये स्थापितात् एकत्र अक्षैः पंचभि ५ रन्यत्र च क्षितिभाक्षैः कुरेकः इभाअष्टौ अक्षाएकः एभिरेकाशीत्यधिक

शतमितैरंकैः १८१ अवाप्तांशयोगः अवाप्ताः लब्धाः येअंशास्तेषांयोगोभगोः शुक्रस्य शीघ्रकेंद्रं भवति अत्रोपपत्तिः शुक्रशीघ्रकेंद्रस्य गतिः ०।३६।५९।४०।६।३७ अनयागणोगुण्यः अत्रैकं
खंडं ०।३६ इदंपंचभिः सवर्णि जातं भागस्थाने त्रयं ३ हरस्थानेपंच ५ अतउक्तं त्रिनिघ्नाद्युपिंडात् अक्षभक्तात् अवाप्तांशाइति अवशिष्टंखंडं ०।०।५९।४०।६।३७। इदमेकाशीत्यधिकश-
तेन १८१ सवर्णितं अत्रापि जातं भागस्थाने त्रयं ३ उभयत्रापि गणस्त्रिभिर्गुण्यः एकत्रपंचभि ५ र्भाज्यः एकत्रचैकाशीत्यधिकशतेन १८१ भाज्यः फलैक्यं कार्यमेवयतः पूर्वखंडं न्यून-
गृहीतमस्ति अतएवोक्तं त्रिनिघ्नाद्युपिंडादित्यादि ॥१३॥ अथेदानींश्लोकार्धेनशनिंसाधयति ॥ ॥ खवाग्न्युधृतइति दिनगणोऽहर्गणः खाग्निभिस्त्रिंशद्भिः ३० हृतोभक्तः सन् अंश-
मुखोभागाद्यः शनिः स्यात् किंविशिष्टः षट्पंचभूहृतगणात् षट्पंचाशदधिकशत १५६ भक्ताहर्गणात् याः फललिप्तिकाः यत्फलादि द्विस्थं फलं तेन आढ्योयुक्तः शनिः स्यादित्यर्थः अत्रो-
पपत्तिः शनेर्मध्यमागतिः ०।२।०।२३।४।३७ अनयागत्या अहर्गणोगुण्यइतिअत्रैकंखंडंगृहीतं ०।२ इदंत्रिंशता सवर्णितंभागस्थानेरूपं १ जातं तस्याविकृतत्वात् खवाग्न्युधृतोदिनगणइ-

द्युपिंडोऽर्कभक्तोलवाद्योगुरुःस्यात् द्युपिंडात्खवेदांशसलिप्ताविहीनः त्रिनिघ्नाद्युपिंडाद्विधास्थैःक्षिभाङ्कैरवाप्तांशयोगोभृगोःशीघ्रकेंद्रं १३ खवाग्न्युधृतोदि-
नगणोंशमुखःशनिःस्यात्षट्पंचभूहृतगणात्फललिप्तिकाढ्यः गोक्षागजारविगतिःशशिनोऽभ्रगोश्वाःपंचाग्नयोऽथषडिलाब्धयउच्चभुक्तिः १४ राहो-
स्त्र्यंकुशशिनोऽसृजइंदुरामास्तर्काश्विनोज्ञचलकेंद्रजवोऽर्यहीक्ष्माः॥ त्युपपन्नं एतत्खंडं गतेरपास्य शे ०।०।०।२३।४।३७ इदं षट्पंचाशदधिकशतसवर्णितं जा-
तं कलास्थानेरूपं १ तस्याप्यविकृतत्वात् षट्पंचभूहृतगणादित्युक्तं फलयोर्योगः कार्यो यतः पूर्वखंडं गतेरूनं धृतं अतउक्तं फललिप्तिकाढ्यइति ॥१४॥ एवं रेखार्कोदयकाली-
नान् मध्यमान् ग्रहान् प्रसाध्येदानीं सार्धश्लोकेन मध्यमग्रहाणांदिनगतीः कलाद्यावदति ॥ गोक्षाइति। राहोरिति। इयंकलाद्यारविगतिः गोऽक्षाः गावोनव अक्षाः पंच एवमेको-
नषष्टिः ५९ कलाः गजा अष्टौ ८ विकलाः शशिनश्चंद्रस्येयंगतिः अभ्रगोऽश्वाः अभ्रं शून्यं गावोनव अश्वाः सप्त एवंनवत्यधिकशतसप्तकमिताः ७९० कलाः पंचाग्नयः पंचत्रिं-
शत् ३५ विकलाः अथ शब्दोऽनंतरवाची चंद्रगतिकथनानंतरं इयं उच्चभुक्तिः चंद्रमंदोच्चगतिः षट् ६ कला इलाः एकः अब्धयश्चत्वारः एवमेकचत्वारिंशत् ४१ विकलाः राहोः
इयं गतिः त्रयं ३ कलाः कुशशिनः एकादश ११ विकलाः असृजोभौमस्य इंदुरामाः एकत्रिंशत् ३१ कलाः तर्काश्विनस्तर्काः षट् अश्विनौ द्वौ एवंषड्विंशतिः २६ कलाः ज्ञस्य बुधस्य
यच्चलकेंद्रं शीघ्रकेंद्रं तस्य जवोगतिरियं अर्यहीक्ष्माः अरयः षट् कामक्रोधादयः अहयः अष्टौ क्ष्मा एकः एवंषडशीत्यधिकशतमिताः १८६ कलाः जिनाश्चतुर्विंशति २४ विक-

ला: गुरोर्बृहस्पतेः शराः पंच ५ कलाः खंशून्यं ० विकलाः शुक्रस्ययदाशुक्रकेंद्रंशीघ्रकेंद्रंतस्यगतिः अद्रिगुणाः अद्रयः सप्तगुणास्त्रयः एवंसप्तत्रिंशत ३७ कलाः विकलाभावः शनेर्द्वे
२ कलेतस्यापिविकलाभावः एताः ग्रहणां मध्यमगतयः प्रत्यहं मध्यमाः ग्रहाः एताः कलाः पूर्वगत्याक्रामान्तीतिभावः आसां गतिकलानांज्ञानोपायवासनापूर्वमेव प्रतिपादिता-
स्ति तथापि बालावबोधार्थंविस्तार्योच्यते रूपमहर्गणंप्रकल्प्य सर्वेग्रहाः पूर्वोक्तवन्मध्यमाः साधितास्ता एवगतिकलाः राशिवृत्तस्य एतावतीः कलाः प्रत्यहं प्राच्यांग्रहाः पृथ
क्पृथक् स्वस्व कक्षायां क्रामन्तीतिभावः तत्कथं राशिमंडलंप्रवाहानिलेक्षिप्तं अति वेगेन नियतं पश्चिमाभिमुखं भ्रमति शीघ्रमंदभेदेन भिन्नगत्या ग्रहाविचारन्तीति यद्य
वर्तर्हि तेषांग्रहाणामेकमार्गस्थानां मध्यमगतेःशीघ्रत्वमंदत्वमित्यन्यथात्वं कथं संभवतीति अतः पृथक् पृथङ्मार्गगताभ्रमंतीति भावः गतेर्विसदृशत्वं कस्मादित्युच्यते योहि भू
मेरासन्नः स स्वल्पेन कालेनभगणं भुंक्ते तस्य शीघ्रगतित्वं संभवति योहि दूरगः समहता कालेनेति तस्मात्तस्य मंदगतित्वमिति एकस्मादेकस्मादन्योऽन्योमंदगतिः संभवति
तथाचोक्तं सिद्धांतशिरोमणौ कक्षाः सर्वाः अपि दिविषदांचक्रलिप्तांकितास्तावृत्ते लघ्व्योलघुनि महति स्युर्महत्यश्च लिप्ताः तस्मादेते शशिजभृगुजादित्यभौमेज्यमंदाम

लिप्ताजिनाविकलिकाश्चगुरोः शराः खंशुक्राशुकेंद्रगतिरद्रिगुणाः शनेर्द्वे ॥१५॥

दाक्रांताइव शशधरान्द्यांति यांतः क्रमेणेति एवं ग्रहाणांकक्षाः सप्त ग्रहकक्षोपरि अष्टमं नक्षत्रमंडलं तत्र समाद्वादश राशयः तदशास्ते क्षेत्रांशास्तस्य पूर्वाभिमुखनि
यतगतेरभावः प्रवहानिलाक्षिप्तं पश्चिमाभिमुखमेवपरिभ्रमतीति तदा राश्यांशकलाद्यवयवभोगवशात् ग्रहाणां शीघ्रमंदत्वमुक्तं ननु योहि योजनात्मकोदिनगतिभा
गः स सर्वेषां ग्रहाणांसमान एव अत एवाह भास्करः समा गतिस्तु योजनैर्नभः सदासदाभवेत् कलादिकल्पनावशान्मृदुद्रुता च सा स्मृतेति अत्र भचक्रं एकत्र स्थिरत्वेन स्थातुं न
शक्नोति अतः किंचित् प्राक् पश्चादपि चलतीत्यवगम्यते कस्मात् विषुवायनचिन्होदयस्थानानां नैकत्रावस्थितत्वात् विषुवायनचिन्हानि स्वदेशस्थानादतिक्रांतानि दृश्यंतेतत
दाचक्रं प्रत्यक्चलितं भवति अनागतप्राक्तानि तदाप्राक्चलितमितिज्ञेयं अतउक्तं सूर्यसिद्धांते प्राक्चक्रं चलितं हीने छायार्कात्करणागते अंतरांशैः समावर्त्य पश्चाच्छेषैस्त
थाधिकइति कस्मात्स्थानात्प्राक् पश्चाच्चलितं दृश्यतेयथा यत्रविषयेदक्षिणोत्तरध्रुवौ क्षितिजस्थौ भवतः स निरक्षदेशस्तस्मिन् समं यत्पूर्वापरवृत्तं तद्विषुववृत्तसंज्ञं ततोयस्मि
न्मार्गे रविः पूर्वगत्या द्वादशराशीन् भुंक्ते तद्वृत्तस्यक्रांतिमंडलसंज्ञा कृता एवमुभयोः क्रांतिवृत्तविषुववृत्तयोः षड्भांतरे पातद्वयं वर्त्तते सौ संपातौराशिमंडले मेषादितुलादि

संज्ञौ ज्ञेयौ तयोर्विषुवत्संपातयोः प्रागपरत्र क्षितिजस्थयोस्त्रिभेतद्विषुवद्वृत्ताद्दक्षिणोत्तरतश्चतुर्विंशत्यंशांतरे क्रांतिस्तद्दक्षिणोत्तरवृत्तयोः संपातद्वयं तन्मृगकर्कादिसंज्ञं अनयोरयनचिन्हसंज्ञा कृता एवं विषुवायनचिन्हचतुष्टयंराशिमंडलस्थं प्रत्यग्भ्रमणवशात् क्षितिजे यत्रोदेति तत्र तत्र क्षितिजेऽपि तेषांता एव संज्ञाः कृताः तस्माद्भचक्रं चलितमित्यवगम्यते ॥ यथा सर्वोपरिराशिमंडलं तत्र द्वादशराशीन् समानान् सावयवान् परिकल्प्य भूमध्यात्तदवयवव्यापीनि सूत्राणि संलक्ष्याणि यस्मिन् यस्मिन्सूत्रे स्वकक्षास्थितोग्रहस्तिष्ठतिस तस्मिन् राशौ तदंशाद्यवयवस्थोज्ञेयः॥ एवं श्री ब्रम्हणा राशिचक्रं सनक्षत्रं तदधिष्ठितग्रहकक्षासहितं दक्षिणोत्तरध्रुवयोर्बध्वा तत्र सर्वान् ग्रहान् मेषादिचिन्हसूत्रगान् संस्थाप्य एवंभचक्रं सृष्टाप्रवहानिलस्य पश्चिमाभिमुखभ्रमत्वेनियुक्तं ग्रहास्तु पूर्वाभिमुखभ्रमत्वे नियुक्ताः॥ ततः सर्वे ग्रहाः स्वस्वमार्गप्रत्य-

सौरोर्कोपिविधूच्चमंककलिकोनाब्जोगुरुस्त्वार्यजोसृग्राहूचकजंज्ञकेंद्रकमथार्यसेतुभागःशनिः॥

भ्रमंतोऽपि पूर्वाभिमुखं एकादशसहस्राणि अष्टशतानि च पादानषष्टिसहितानि योजनानि पूर्वाभिमुखं प्रत्यहं गंतुं प्रवृत्ताः॥ उक्तंच सृष्टाभचक्रमित्यादि ॥ तत्र स्व स्वकक्षास्थितलिप्तानां लघुमहत्त्वात् लिप्तावशेन शीघ्रमंदत्वमुच्चवशेन च गतिनामुपपन्नं तत्र भचक्रस्य प्राक्पश्चात् चलनं तेऽयनांशा एवतद्वशेन तत्रस्थितराशीनां विषुवद्वृत्तात् दक्षिणोत्तरदूरासन्नत्वं यावद्भिरंशैर्भवति तेषामंशानांक्रांतिसंज्ञा तत्र क्रांतिवशेन यत्कर्म क्रियते तत्सायनग्रहादेवकर्तुं प्रयुज्यते तेषामवस्थितिरयनांशाः येषांमते राशिचक्रं भचक्रादन्यत्रस्थितं तेषासाधनमेव प्रमाणं स्वस्वगतिकलानामुपपत्तिरेवमपि संक्षिप्तोक्तापूर्वंप्रतिपादितप्रमेयाच्च॥१५॥ अथकस्मिन्पक्षेकोग्रहो घटते इत्येक ८ वृत्तेनाह ॥ सौरोर्कोऽपि विधूच्चमंककलिकोनाब्जोगुरुस्त्वार्यजोऽसृग्राहू च कजं ज्ञकेंद्रकमथार्यसेतुभागः शनिः शौक्रं केंद्रमजार्यमध्यगमितीमे यांति दृक्तुल्यतां सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशत ॥१६॥ ७ ॥ ७ ॥

सौसौरइति अर्कः सूर्यैः सौरः सौरपक्षीयोघटतइति सर्वत्र ॥ विधूच्चमपि सौरपक्षीयं अंककलाभिर्नव ९ कलाभिरूनो ऽब्जश्चंद्रः सौरपक्षीयः ॥ गुरुरार्कजआर्यपक्षीयोगुरुरित्यर्थः अस्तग्राह्य मंगलराहू चार्यपक्षीयौ ॥ केब्रम्हपक्षेजायते तत्तथा एवंभूतंज्ञस्यबुधस्यकेंद्रं ॥ अथशब्दोनंतरवाची आर्ये आर्यपक्षे शनिः सेषुभागः पंच ५ भागयुक्तोघटते शुक्रस्येदं शौक्रं एवं भूतं यत्केंद्रं तत् अजार्यमध्यगं अजोब्रह्मा आर्यः प्रसिद्धः अनयोः पक्षौ तयोर्मध्ये गच्छतीति तथा उभयोः पक्षयोः प्रसाध्य तद्योगार्धतुल्यंघटतइत्यर्थः ॥ इति तेभ्यः पक्षेभ्यः साधिताइमे ग्रहाः दृशितुल्यतां दृग्गणितैक्यं यांति प्राप्नुवंतीति एवंग्रहणोदयास्तजातकादौ ग्रहणांसाधनंबहुभ्योग्रंथेभ्यः कर्त्तव्यमिति जडकर्म्मदृष्ट्वा आचार्योलाघवार्थमसुं ग्रंथंकृतवान् तैर्ग्रहैरिहास्मिन् ग्रंथेसिद्धैः पर्वधर्मनयसत्कार्यादिकं पर्वग्रहणं धर्मायज्ञानुष्ठानैकादशीव्रतादिकः नयोनीतिः राजनीति दंडनीत्यादिकः सत्कार्यं शुभकार्यं व्रतबंधवीवाहादि एभ्यो ग्रंथेभ्यः एतदुत्पन्नतिथ्यादेरेवादिशेत् अयंभावः एकादश्यादिनिर्णयः अस्मादेव तिथेः कार्यः जातकादिषु सर्वत्र ग्रहाः अत्रत्या एव ग्राह्याः यतोयस्मिन् यस्मिन् काले यद्यद्दृग्गणितैक्यकृत्तद्व ग्राह्यं घटमानत्वात् ॥ अत्र शुक्तिर्ग्रहांतरलक्षणोपायश्च पूर्वमेव प्रतिपादितोऽस्ति ॥१६॥ दैवज्ञवर्यस्यदिवाकरस्यसुतेनमल्लारिसमाह्वयेन वृत्तौकृतायांग्रहलाघवस्य

शौक्रंकेंद्रमजार्यमध्यगमितिमेयांतिदृक्तुल्यतांसिद्धैस्तैरिहपर्वधर्मनयसत्कार्यादिकंत्वादिशात ॥१७॥

जातंखगानामिति मध्यकर्म ॥ ॥ इतिश्री गणेशदैवज्ञकृत ग्रहलाघवस्य टीकायां मल्लारिदैवज्ञविरचितायां मध्यमग्रहसाधनाधिकारः प्रथमः ॥ ॥ अथरविचंद्रस्पष्टीकरण पंचांगानयनाधिकारो व्याख्यायते ॥ तत्रादौ भुजकोटिपदार्कमंदोच्चानां साधनमेकवृत्तेनाह ॥ ॥ दोरिति ॥ त्रिभाद्राशित्रया ३ दूनं यत्केंद्रं ग्रहादिवास एवदोर्भुजः स्यात् अंकतोनव ९ राशिभ्योऽधिकंचेत्तदाचक्रतोद्वादशराशिभ्यः शोध्यं भुजः स्यात् भुजोनं भुजेन ऊनं त्रिभं राशित्रयं कोटिः स्यात् त्रित्रिभैस्त्रिभिस्त्रिभी राशिभिरेकैकं पदंस्यात् ॥ तद्यथा प्रथमं राशित्रयं विषमं पदंस्यात् ततोद्वितीयं समपदं ततस्तृतीयं विषमं पदं चतुर्थं समपदमित्यर्थः अत्रोपपत्तिः तत्रादौ दोर्ज्या कोटिज्यास्वरूपमुच्यते समायां भूमौ इष्टत्रिज्याव्यासार्द्धेन वृत्तं दिगंकितं कृत्वा षष्ट्यधिकशत त्रयमितान् ३६० भागानंकयेत् तत्र तिर्यगूर्ध्वरेखेच एवं चतुर्भागाः स्युस्तेषां पदसंज्ञा एवंचक्रे चत्वारि पदानि तत्रैकैकस्मिन्पदे नवति नवति भागाः प्रथमपदे यद्गतं स एवदोः द्वितीये एष्यंदोः एष्यत्वार्थं षड्भशुद्धं उक्तंच सिद्धांतशिरोमणौ ॥ अयुग्मे पदे यातमेष्यंतु युग्मेभुजोबाहुहीनंत्रिभं कोटिरुक्तोति ॥ अत्रदोर्ज्याकोटिज्ये एकपदमध्ये अतोदोस्त्रिभात् शुद्धः कोटिर्भवतीति युक्तमुक्तं ॥ एवंभुजकोटिपदानि प्रसाध्येदानीं सूर्यमंदोच्चं वदति सूर्यमंदोच्च-

मिति सूर्यस्यमंदोच्चं अष्टाद्र्यो ऽष्टसप्तति ७८ मिताभागाभवेत् ॥ राशिद्वयमष्टादशभागा २।१८। इत्यर्थः ॥ अत्रोपपत्तिः अहर्गणात्साधितोयोग्रहः समध्यमः यतो यंत्रवेधेनाकाशे विलोक्यमाने तावान् ग्रहो न दृष्टः किंचिदंतरं दृष्ट प्रत्यह गतेर्विसदृशत्वात् ॥ एवं प्रत्यहं ग्रहान् गोलेन चक्रयंत्रेण वा विध्वा अहर्गणोत्पन्नमध्यमग्रहवेधितस्पष्टग्रहयोरंतराणि साधितानि एवं प्रत्यह ग्रहाणां याम्योत्तरगमनानि क्रांतिमंडलाद्यावद्भागमितानि दृष्टानि तानि शरसंज्ञानि ज्ञातानि एवं परम शर परमाल्पशरयोर्योगार्द्धं मध्यमः शरोज्ञातः ॥ त एव ग्रहाणां शराः अग्रे आचार्येणोदयास्ताधिकारे पठिताः संति ततोऽनुपातेनेष्ट शरः प्रसाधितोऽस्ति स यथा यदि त्रिज्यातुल्यसपातग्रहदोर्ज्या एते शरास्तदे ष्टदोर्ज्यया क इति एवं दोर्ज्या त्रिज्याभक्ता पठितशरगुणा दृष्टशरः स्यात् सोऽपि ग्रहस्थानीयः ग्रहस्थानानि त्रिणि तद्वृत्तानिच मध्यमोग्रहः मंदप्रतिमंडलेऽस्तीति कल्पना मंदस्पष्टोग्रहः शीघ्रप्रतिमंडले भ्रमतीति स्पष्टोग्रहः स्वस्वविमंडलेऽस्तीति कल्प्यते शारः साधितोमंदस्पष्टग्रहात् यतः पाताः प्रतिमंडलस्थावेधिताः संति अतः शराः शीघ्रप्रतिमंडलस्थाग्रहस्थानीयास्तत्र शीघ्रकर्णोव्यासार्द्धं तदग्रे शराः साधितास्ते तु त्रिज्याग्रस्थानीयाः कार्याः ज्यारूपत्वात्

दोस्त्रिभोनंत्रिभोर्ध्वंविशोष्यंरसैश्चकृतोऽकाधिकंस्याद्भुजोनंत्रिभं कोटिरेकैककंत्रित्रिभैःस्यात्सदंसूर्यमंदोच्चमष्टाद्र्योंशाभवेत् ॥१७॥ ॥

अतोद्वितीयोनुपातः यदि शीघ्रकर्णार्द्धे अयंशरस्तदा त्रिज्याग्रे कः पूर्वं त्रिज्या हरः इदानीं गुणः तुल्यत्वात्तयोर्नाशः एवं दोर्ज्या पठितशरगुणा शीघ्रकर्णभक्ता शरः स्यात् शीघ्रकर्णोनामकिं तदुच्यते दोर्ज्याभुजः कोटिज्यांन्त्यफलज्ययोर्मृगकर्क्यादिकेंद्रे यद्योगांतरं सा कोटिः तद्वर्गैक्यपदं कर्णः तस्य कर्णस्य त्रिज्यातः परममूनाधिकं यदंतरं सान्त्यफलज्यैव तद्धनुः परमंफलमित्यर्थः। अत्र शराद्विलोमविधिना कर्णः साधीतः सा यथा दोर्ज्या पठितशरगुणा शीघ्रकर्णेन परमाधिकेन यावद्भज्यते तावत्परमाल्पशरो भवती। परमाल्पशीघ्रकर्णेन यावद्भज्यते तावत्परमाधिकशरो भवति अतोवैपरित्यात् दोर्ज्यात्रिज्यातुल्यात् पठितशरगुणा परमाधीकशरेण परमाल्पशरेण च भक्ता सती क्रमेण परमाल्पपरमाधिकौ शीघ्रकर्णौ लभ्येते उभयत्र त्रिज्यया सहांतरे कृते जाता परमशीघ्रफलज्या तुल्यैव तस्याः धनुः परमं। शीघ्रफलं एवं यद्दिनजाच्छरादेवं शीघ्रफलं साधीतं तद्दिन मध्यग्रहस्पष्टग्रहान्तरमपी ज्ञाते दमंतरं परमफलं शीघ्रफतुल्यं नासीत् अतोऽन्यत्फलं कल्प्यं मध्यस्पष्टान्तरे फल्येगः अस्मात्परमंशीघ्रफलं विशोध्या जातंद्वितीयं फलं तस्य मंदफलसंज्ञाकृता एवं प्रत्यहं विलोक्यमाने। यस्मिन्दिनेपरमं मंदफलं तस्य ग्रहस्य दोर्ज्या त्रीज्याभूत्।-

पुनर्दृष्टिप्रतीत्यर्थं विलोक्यमाने परमफलस्थाने दोर्ज्यांग्रहस्य त्रीज्यातुल्यात् नाभूत् परमफलदिने दोर्ज्या त्रीज्यातुल्यया भवितव्यं परमत्वात्। सा न जाताऽतस्तस्मिन् ग्रहे तथोनंकार्यं। यथा राशित्रयं भुजः स्यात् यन्न्यूनं कार्यं तस्योच्चसंज्ञा मंदफलशिघ्रफलानयने मंदोच्चशिघ्रोच्चसंज्ञे कृते पुनर्विलोक्यमाने तावतोच्चेन परमत्वं न भवती। अतस्तस्योच्चस्य मंदगतीर्ज्ञाता तत्रोपायोयथा अद्यतन श्वस्तन मंदस्पष्टग्रहयोरंतरालं स्पष्टगतीः। एवमुभयोरुच्चयोरंतरं कृत्वानुपातः कृतः स यथा। यद्येभिः परमफलान्तरदिनैः एतावत्यउच्चान्तरकला लभ्यंते तदैकेन दिनेन केती ज्ञाते मंदोच्चशीघ्रोगती। एवं मंदोच्चगतीश्चंद्रास्यैव अन्येषां वर्षेणापी विकला नोत्पद्यते अस्याः गतेः कल्पेउच्चभगणाः पठितास्ते यथा। यद्येकदिनेनैतावती गतीस्तदा कल्पकुदिनैः किमिती एवं प्रसाध्योच्चभगणाः सिद्धाः पाठपठितास्तथैव सुर्यस्य कर्म मंदोच्चभगणाः। ४८०। कल्पसौरवर्षैरेते भगणा लभ्यंते तदा कल्पगताब्दैः किमीती अनुपाताद्ग्रंथादौ रवेर्मंदोच्चं।२।१७।५६।।४१। सत्पभिर्वर्षैः रवेर्मंदोच्चगतीरेका।१।वीकला लभ्यते अतआचार्येण स्थिरत्नीवद्धं बहुकाले ये गणपतीलकाउत्पत्स्यंते ते अनेनैवानुपातेन रचइष्यंती। एवं मंदोच्चशीघ्रोच्चवासना सर्वेषांग्रहाणां संक्षिप्तोक्ता ग्रंथवीस्तरभयात्।।१७।।

मंदोच्चंग्रहवर्जितंनिगदितंकेंद्रंतथाख्यंबुधैः केंद्रेस्यात्स्वमृणंफलंक्रियतुलाद्येऽथोविधेयंरवेः॥ केंद्रंतन्दुजभागखेचरलवोनघ्नानखास्तेपृथक्कृतज्ञांशोनन
गेषुभिःपरिहृतास्तेंशादिकंस्यात्फलं ॥१८॥

एवं सूर्यमंदोच्चमुक्त्वेदानीं केंद्रं सूर्यमंदफलसाधनं चैकवृत्तेनाह ॥ मंदोच्चमिति ॥ ग्रहेणावर्जितंहीनं यन्मंदोच्चं तत्तदाख्यं मंदमेव आख्यानाम यस्येति मंदकेंद्रं बुधैरतींद्रियदृग्भिराचार्यैर्निगदितं प्रोक्तं तुलाद्येलाद्ये केंद्रेक्रियेमेषस्तुला प्रसिद्धा एतदाद्ये केंद्रे फलं मंदफलं शीघ्रफलंवाक्ष्यमाणं स्वमृणं स्यात् एतदुक्तं भवति केंद्रे मेषादिषड्राशिस्थे फलं धनं तुलादिषड्राशिस्थे फलं ऋणं अत्र केंद्रवासना मंदोच्चस्याल्पगतित्वात् ग्रहगतिबाहुल्याच्च मंदोच्चरहितोग्रहः कृतस्तस्य केंद्रसंज्ञा अत्र मुहुर्व्याहृत्तितः केंद्रशब्दस्यार्थो न ज्ञायते केंद्रशब्देन वृत्तस्य मध्यमुच्यते अथ ग्रहस्फुटस्थानं ज्ञातुं बुद्धिमद्भिराद्यैरतींद्रियज्ञैर्यंत्रादि वेधेन वृत्तत्रयं कल्पितं तेषां यानि मध्यचिन्हानि तानि केंद्रसंज्ञानि वृत्तस्य मध्यं किल केंद्रमुक्तमिति भास्कराचार्यवचनात् प्रथमं कक्षावृत्तं तत्परिधौ द्वितीयं मंदनीचोच्चवृत्तं तत्परिधौ तृतीयं शीघ्रनीचोच्चवृत्तं तत्परिधौ ग्रहः स भूमध्याद्राशिमंडलगामिसूत्रस्थो यस्मिन् राश्यवयवे दृश्यते तत्रस्थः स्फुटो ज्ञेयः कक्षापरिधिस्थितमंदनीचोच्च वृत्तपरिधौ शीघ्रनीचोच्चवृत्तमध्यपरिधिज्ञानाय मंदकेंद्रं कल्पितं भूमध्याद्दूरे नीचोच्चवृत्तस्य यः प्रदेशस्तस्योच्चसंज्ञा तदुच्चं यावद्ग्रहाद्विशोध्यते तावन्मंदनीचोच्चवृत्त

योरंतरज्ञानं भवती । तस्मादपि शीघ्रनिचोच्चवृतपरीधावववथितसुदृश्नानाय शीघ्रकेंद्रं कल्पीतं तस्मीन् केंद्रचिन्हे ग्रहस्तीष्ठतितीभावः। यद्यप्यत्र ग्रहभगणापेक्षया मंदोच्चभगणा अल्पाइति मंदोच्चेन हीनोग्रहोमंदकेंद्रमिति वक्तुमुचितं तथापि ग्रहवर्जितमुच्चंकेंद्रमिति यदुक्तं तदपि भगणानां प्रयोजनाभावा द्दोर्ज्यादिसाम्येन फलेऽपि वैलक्षण्याभावादेकोस्त्या मांदचलफलयोर्धनर्णता कथनलाघवाच्च युक्तमेवेतिध्येयं एवं केंद्रवासना अथ केंद्रकथनानंतरं रविमंदफलं साधयति तद्भुजभागखेचरलवोनघ्ना नखाइति तस्य रविमंदकेंद्रस्य येभुजभागास्तेषां यःखेचरलवोनवमांशा ९ स्तेनऊनाये नखाविंशति २०मितास्ते तेनैव नवमांशेन गुण्यास्ततस्ते पृथक् अन्यत्रैकांते स्थाप्यास्तेषां गोंशेन नवमांशेनोनाये नगेषवः सप्तपंचाशत् ५७ तैर्लब्धांशैः परिहृताभक्तास्ते पृथकृस्थाः अंशादिकं भागादिकं रवेमंदफलंस्यात् अत्रोपपत्तिः समायां भूमावभीष्टत्रिज्यामितेन कर्कटेन वृत्तमालिख्येवदिगंकितंकुर्यात् पूर्वात् प्रभृतिमेषादीन् राशीन्परिकल्प्य राशौ च त्रिंशद्भागानंकयेत् ततो ग्रहमंदोच्चं यत्र राशौ भागे लिप्तायां वर्त्तते तत्र चिन्हं कृत्वा ततोभूमध्ये यावद्रेखांकुर्यात् तत्र मध्यात् ग्रहपरममंदफलपरिणतं सूत्रं प्रतीपं निःसार्य चिन्हंकार्यं ततश्चिन्हात्पूर्वं कर्कटेन यद्वृत्तमुत्पद्यते तन्मंदप्रतिमंडलं तस्य यत्रात्युच्चता तत्रोच्चव्यपदेशः एतदपि पूर्वपदत्युच्चतायां राश्यादिभिरंकयेत् एवं स्थिते कक्षायां ग्रहोयत्र वर्त्तते मध्यमस्तत्र चिन्हं कारयेत् ततोहि परममंदफलंज्याव्यासार्द्धेन तत्परिणतेन यद्वृत्तमुत्पद्यते तन्मंदनीचोच्चवृत्तं तद्भागांकितं च ततः प्रतिमंडलोच्चप्रदेशात् तद्वृत्तमनुलोमं ग्रहप्रवेशमानीय ग्रहचिन्हे तस्य मध्यं कारयेत् एवं स्थिते परितः प्रतिमंडलपरिधेश्च संपातोयस्तत्र पारमार्थिकोग्रहः ननुसंपातत्रयं तिष्ठति तेषां मध्ये कतमेनैवं भवितव्यं अत्रोच्यते उच्चरेखायाः कक्षामंडलपरिधेस्त्रयः संपातास्तस्मादतिदूरे मध्यमोग्रहः स्थितस्तावत्येव दूरे प्रतिमंडलगतोच्चतो भुजज्या गृहीता कक्षामंडलप्रतिमंडलयोस्तुल्या भवतिसा भुजज्यास्वमंदपरिधिवृत्ते तच्चापं मंदफलं अत्र रवेर्मंदपरिध्यंशाः १३।४३।४२ अस्मादनुपातः यदि भांश परिधे ३६० स्त्रिज्यामितं १२० व्यासार्द्धं लभ्यते तदा एषां परिधिभागानां किमिति तेषां त्रिज्या १२० गुणोभगणांशा ३६०भागहारः अत्रगुणहारौ गुणेनापवर्त्य हरस्थाने त्रयोलब्धास्तस्मात्त्रिभक्ताः परिधयः परिधानां व्यासार्द्धानां व्यासार्द्धानिस्युः ताः परमफलज्याः एवं रवेः परमफलज्या ४।३४।३४ अस्याधनुः सूर्यस्य परमं मंदफलं २।१०।४५। एवं चंद्रादीनामपि परममंदफलानि साध्यानि इयं फलोपपत्तिः पूर्वोक्तफलयुक्तिमूला अथेष्टफलं साध्यते तत्र त्रिज्यातुल्यया दोर्ज्यया यदेदं परमं मंदफलं तदेष्ट केंद्रदोर्ज्यया किमिति एवमिष्टफलानी साध्यानि तत्राचार्येणास्मिन् ग्रंथे धनुर्ज्ये न साधिते जीवां विना फलादिसिद्धिर्नस्यात् भागेभ्यस्त्रैराशिकासंभवात् वृत्तक्षेत्रे

यत्सरिध्याश्रितं तत्त्रैराशिकेन न सिध्यति वर्गात्मकत्वात् अत एवाह भास्करः वर्गे वर्गपदं घनं घनपदं संत्यज्य यद्गुण्यते तत्त्रैराशिकमिति अतोजीवां विना फलसिद्धिर्न अत्रधनुर्ज्ये न क्रियेते इत्याचार्येण ग्रंथादौ प्रतिज्ञाकृतास्ति फलसिद्धिरिति कृतास्ति तत्र का युक्तिरिति केचिदल्पमतयोऽत्र मुह्यंति अत्रोच्यते तत्राचार्येण जीवाप्रतिफलं खंडैर्विना फलमध्ये साधितमस्ति उक्तंच कोट्यंशवर्गेण तदंघ्रिणा च विधोनयुक्ताः खखभूगजाश्च ८१०० आद्योगुणस्तेन गुणाः खस्सूर्या १२० स्त्वन्योहरस्तेन हृताः क्रमज्याः अथवा भुजभागानां नवांशेन उनाहृताद्वाविंशतिः २२ खार्क १२० मितेव्यासार्द्धे क्रमज्या भवति अत्राचार्येण रविमंदफलानयने त्रिज्या शत १०० मिताधृता तत इष्टजीवा साधिता सा यथा परमभुजांशा नवतिः ९० एषां नवांशेन १० विंशति २० रूना १० ततस्तेनैव हृता जाता त्रिज्या १०० एवमिष्टभागेभ्योऽपि इष्टा जीवा स्यात् अत एवोक्तं तन्दुजभागखेचरलवोनघ्नानखाइति इयं त्रिज्या केन भक्ता परमं मंदफलं स्यात् अतइयमेव परमफलभक्ता जातोहारः सावयवः ४५।५३।२० अत्र लाघवार्थं नगेषवोगृहीताः अत्र हरांतर ११।६।४० मिदं नवभिः सवर्णितं जातमूर्ध्वस्थाने निःशेषं शतं १०० सव त्रिज्या एवं दोर्ज्या नवांशहीननगेषुभिर्भक्ता लब्धं फलं स्यात् अत उक्तं ते पृथगित्यादि अथ धनर्णोप

विधोः केंद्रदोर्भागषष्ठोननिघ्नाः खरामाः पृथक्कुतन्नखांशोनितैश्च रसाक्षैर्हृतास्ते लवाद्यं फलं स्याद्रवींदू स्फुटौ संस्कृतौ स्तश्चताभ्यां ॥ १९ ॥ ७ ॥ ७ ॥

पत्तीमाह। मंदप्रतीमण्डलपरिधेर्मंदोच्चपरीधेश्च संम्पाताद्यत् सूत्रं भूमध्यंनियते तत्कक्षामण्डलपरीधेश्च मध्यमग्रहाद्परेण संपातस्तत्र पारमार्थिकोग्रहः सच मध्यादूनोऽपरेण स्थितत्वात मध्यग्रहस्य कक्षायाः सूत्रयोगस्य च यदंतरं तत्फलं अतस्तेनोनोमध्यमः स्फुटोभवति प्रथमपदे भुजज्या वर्द्धते फलमपि वर्द्धते द्वितीयपदे प्रथमानीतं फलमपिचीयते तच्चाल्पं भवति पदादर्वाक् पदांते च तुल्यं तुल्यत्वात् ऋणधनयोर्नाशो सतिफलाभावस्तृतीयपदे भुक्तस्य भुजज्या भवति तत्रमध्यग्रहप्रदेशे प्रतिमंडलोच्चप्रदेशान्नीचोच्चवृत्तं यावदानीयते तस्य कक्षा परिधेश्च यः संपातः स मध्यग्रहात्पूर्वेणैव भवति तस्य मध्यग्रहस्य चांतरं फलं तेन मध्यमोधिकः सन् स्फुटोभवति स्फुटग्रहात् तृतीयपदे भुजज्या वर्द्धते फलमपि वर्द्धते चतुर्थपदे फलमपचीयते फलांते फलाभावः अतोमेषादिकेंद्रे ऋणं तुलादिकेंद्रे धनमित्युपपन्नं परमिदं मृदूच्चेन हीनोग्रहोमंदकेंद्रमितिपक्षे च कल्प्यते इहतु केंद्रस्यैव व्यस्तत्वाद्धनर्णत्वयोरपि व्यत्यासेन भाव्यं अत उक्तं केंद्रे स्यात्स्वमृणं फलं क्रियतुलाद्यइति ॥१८॥ एवंरविमंदफलं प्रसाध्येदानीमेकवृत्तेन चंद्रफलं साधयति ॥ विधोरिति विधोश्चंद्रस्य यत्केंद्रं तस्य दोष्णोभुजस्य भागास्तेषां षष्ठेन षडंशेन उ-

नारहितानि भागुगुणीतात्र खरामास्त्रिंशत् ।३०। तेपृथक्भिंनस्थानेस्थाप्यातेषां पृथक्स्थानां योनखांशैर्विंशत्यंशस्तेनोनितैः रसाक्षैः षट्पञ्चाशद्भिः ।५६। तेपृथक्स्थाहताभक्ताः संतोलवाद्यंभागाद्यंत्रिस्थं चंद्रमंदफलं स्यात् ताभ्यां स्वस्वमंदफलाभ्यां संस्कृतौ स्पष्टौस्तः अत्रोपपत्तिः परमं चंद्रफलं भागाद्यं ५।१।४० अत्र चंद्रमंदफलानयने त्रिज्या पंचविंशत्यधिकशतद्वयमिताधृता यावद्यावदधिका तावत्तावत् फलस्यसूक्ष्मत्वं अतः सूक्ष्मत्वार्थमेतावती त्रिज्या २२५ परमभागानवतिः ९० अत्रैषां भुजभागानां षडंशेन १५ ऊनास्त्रिंशत् १५ ततस्तेनैव हतापरमदोर्ज्या भवति २२५ एवमिष्टभागभ्योऽपीष्टजीवाभवंति अतउक्तं केंद्रदोर्भागषष्ठोननिघ्नाः खरामाइति ॥ सा त्रिज्या केन भक्ता परमं मंदफलंस्यादिति ज्ञानार्थं परमफलेनैव भक्ता जातोहरः सावयवः ४४।४५।० असौ सावयवोऽतोलाघवार्थं रसाक्षागृहीताः अनयोरंतरं ११।१५।० एतद्विंशत्या २० सवर्णितं त्रिज्याभवति २२५ अतएवोक्तं तन्नखांशोनितैः रसाक्षैस्तद्धृताइति ॥ स्वस्वमंदफलसंस्कृतावेवसूर्येंदुस्फुटौ भवतस्तयोः शीघ्रफलाभावात् ॥१९॥ एवंसूर्यचंद्रयोः स्फुटत्वमुक्त्वेदानींतयोर्गतिस्पष्टीकरणमेकवृत्तेनाह ॥ ॥ केंद्रस्येति केंद्रस्यरवेर्वा चंद्रस्य यन्मंदकेंद्रं तस्य कोटिलवाभुजोनं त्रिभं कोटिस्त

केंद्रस्यकोटिलवखवाश्विलवोननिघ्नारुद्रारवेस्त्रिकुहृताः शशिनोद्विनिघ्नाः स्वाङ्गांशकेनसहिताश्चगतौधनर्णं केंद्रेकुलीरमृग
षड्गतेस्फुटासा २०

स्यालवाः भागास्तेषां यः खाश्विलवो विंशत्यंशस्तेन ऊनाहीना निघ्नागुणिताश्च रुद्राएकादश ११ कार्याः ततस्ते चेद्रवेस्तदा त्रिकुभिस्त्रयोदश १३ भिर्हृताभक्ताः संतोरवेर्गतिफलं कलाद्यंस्यात् शशिनश्चंद्रस्य चेत्तर्हि द्विनिघ्नाद्वाभ्यां विहन्यते गुण्यते तथाभूताः संतः स्वांगांशकेन सहितायुक्ताः स्तच्चंद्रगतेः फलं तत्फलद्वयं स्वस्वमध्यमगतौ कुलीरमृगषड्गते केंद्रे कुलीरः कर्कः मृगोमकरः ततः षड्के धनर्णकार्यं कर्कादिषड्राशिस्थे केंद्रे ऋणं कार्यं सा गतिः स्फुटाभवतीत्यर्थः ॥ अत्रोपपत्तिः ॥ अद्यतनश्वस्तनस्पष्टग्रहयोरंतरं स्पष्टगतिस्तथाद्यतनश्वस्तनयोर्ग्रहफलयोरंतरं गतिफलं तज्ज्ञानार्थमुपायः प्रथमपदादौ भुजज्या शून्यं तत्र ग्रहफलमपिशून्यं तत्रकोटिज्या परमा तत्र गतिफलमपि परमं यथा यथा ग्रहफलस्य वृद्धिस्तथा तथा गतिफलस्यापचयो दृश्यते एवं कोटिज्यायाः परमत्वे गतिफलस्य परमत्वं कोटिज्याभावे गतिफलाभावः अतः केंद्रकोटिज्यातो गतिफलसाधनं कर्तुं युज्यते तद्यथा अत्रोभयत्रापि त्रिज्या सपादेकोनत्रिंशन्मिता ॥२९।१५ धृता तत्साधनं यथा कोटिभागानां परिमाणं ९० नखांशेन ४।३० ऊनारुद्रास्तैस्ताहताजाता त्रिज्या २९।१५। एवमिष्टांशेभ्य इष्टा स्यादेव अतएवोक्तं कोटिलवखाश्विलवोननिघ्नाइति ततोदोर्ज्यातः फलसाधनं रवेः परमं गतिफलं

२।१५ त्रिज्या २१।१५ कैन भक्ता सतीदं स्यादतस्तेनव त्रिज्याभक्ताजातोहरस्त्रयोदश १३ अतोरवेस्त्रिकुत्तनाइति एवं चंद्रस्य परमंगतिफलं ६०।१५ अत्र दोर्ज्याकेनगुणितासतीदंफलं स्यादतस्त्रिज्याभक्तंफलंजातंगुणस्थाने ५।२० अत्रद्वावेवगृहीतौ अतउक्तं शशिनोद्विनिघ्नाइति एवं द्विगुणत्रिज्यायांजातं ५८।३० अस्य परमगतिफलस्य चांतरमिदं १।४५ षड्भिः सवर्णितंजातं तत्तुल्यमेव अतः स्वांगांशकेन सहिताइति तच्चंद्रगतेःफलं तत्फलद्वयंस्वस्वमध्यमगतौदेयं एवंस्फुटागतिः ।। अथधनर्णोपपत्तिः तत्रतावदुच्चोनोग्रहः केंद्रमित्यस्मिन्पक्षे मकरादिकेंद्रेग्रहस्य धनफलस्यापचयान्मृगादिकेंद्रेगतिफलमृणंवर्द्धते मेषादिकेंद्रेग्रहस्यऋणफलवृद्धौ सत्यांमेषादिकेंद्रेगतिफलमृणमपचीयते अतोमृगादिके षड्के केंद्रे गतिफलमृणं कर्क्यादिकेंद्रे ग्रहस्य ऋणफलह्रासेगतेर्धनफलं वर्द्धते तुलादित्रये केंद्रे ग्रहधनफलवृद्धौ गतेः फलमपचीयते अतः कर्क्यादिषड्के धनमितियुक्तं ग्रहोनमुच्चं केंद्रमित्यस्मिन्नपि पक्षेमकरादित्रिके ऋणफलवृद्धिर्मेषादित्रिके धनफलह्रासः अतोमकरादिषड्के गतिफलमृणमेव एवं कर्क्यादिषड्के धनमिति अतोयुक्तमुक्तं धनर्णोकेंद्रेकुलीरमृगषड्कगते इति ।।२०।। ।।एवंरविचंद्रगतिस्पष्टीकरणंकृत्वेदानींपलभांचरखंडकानिचैकवृत्तेनाह ।। ।।मेषादिगइति अयनस्य भागाअयनांशाः अग्रेवक्ष्यमाणास्तैः सह वर्तमानोयुक्तोयः

मेषादिगेसायनभागसूर्येदिनार्द्धभायापलभाभवेत्सा त्रिस्थाहतास्युर्दशभिर्भुजंगैर्दिग्भिश्चरार्द्धानिगुणोद्धृतान्त्या ।।२०।। ७ ।। ७ ।।

सूर्यःस्तस्मिन्सूर्ये मेषादिगे राशिभागकलादिना शून्यमिते सति तस्मिन्दिने दिनार्द्धे मध्यान्हे समभूमौ द्वादशांगुलशंकुर्निवेश्यः शंकुलक्षणमुक्तं भास्करेण ।।समतलमस्तकपरिधिर्भ्रमसिद्धोदंतिदंतजः शंकुरिति ।।एवंतस्यशंकोर्मध्यान्हे भाछाया या भवति सा पलभाभवेदित्यर्थः ।। सापलभा त्रिस्था त्रिषुस्थानेषु तिष्ठतीति त्रिस्थादशभि १० र्भुजंगैरष्टभि ८ र्दिग्भि १० र्हतागुणितास्ततोंऽतिमा गुणैस्त्रिभि ३ रुद्धृता भक्तासती त्रीणिचरखंडकानि भवंति अत्रोपपत्तिः सायनसूर्योयद्दिने मेषादौ तद्दिने सूर्यस्य नाडिकामंडलेस्थितिः नाडिकामंडलं लंकापूर्वपदं अतस्तद्दिने मध्यान्हेलंकायां शंकुछायानास्ति खमध्यस्थितत्वात् अन्यदेशेतु पूर्वापरं सममंडलमतस्तद्दिने ऽपिमध्यान्हे ऽन्यदेशे शंकुच्छायाभवति सैव पलभातस्याः पलभाविषुवतीतिच पर्यायौ एवमत्रैकांगुलां पलभां प्रकल्प्य अक्षप्रभासंगुणितापमज्येत्याद्युक्तप्रकारेण राशित्रयस्य चराणि प्रसाध्य तान्यधोऽधः शुद्धानिजातानिचरखंडानि १०।८।३ ततोऽनुपातः यद्येकांगुलयाक्षप्रभयाएतावन्मितानि चरखंडकानि तदेष्टाक्षप्रभयाकानीति एवमक्षप्रभा त्रिस्था एभिः पृथग्गुणिता हरेणहृतासतीष्टचरखंडानि भवंतीति ।।अत्रैतत्रैराशिकंस्वरूपार्थमंगीकृतं अप्रमाणमपिप्राप्तिः कृता वृत्तक्षेत्रेपरिध्याश्रितत्वात् अतोविरोधः प्रतिभाति स वक्तुं न शक्यते यन्महद्भिराचार्य्यै

ग्र॰ ला॰
१२

रंगीकृतं तद्दोषयुक्तमप्यदुष्टं यावदष्टांगुलाक्षप्रभा तावदंतरं नास्ति ततस्ततः सांतराणि भवंति इति बुद्धिमद्भिर्विलोक्यं ॥२१॥ स्यादिति सायनोऽयनांशयुक्तो यउष्णांशुः सूर्यस्तस्य भुजस्तस्य ऋक्षाणि राशयस्तत्संख्यानि यानि चरार्धानि चरखंडानि तेषां योगो लवैर्भागैर्भोग्यस्य खंडस्य यो घातो गुणनं तस्मात् या खाग्न्याप्तिस्त्रिंशद्भागाप्तिस्तया युक्तः स खंडयोगश्चरं पलात्मकं स्यात् तच्चरं तपने सूर्ये तुलाजषट्के धनर्णं स्यात् तुलादिषट्के धनं मेषादिषट्के ऋणं इदमुदये सूर्योदयकालीनग्रहसाधने अयं विधिरिति ॥ अस्ते सायंकालीनग्रहसाधने अन्यथा उक्तवैपरीत्यं तुलादावृणं मेषादौ धनं ॥ अत्रोपपत्तिः । चरं नाम लंकार्कोदयरेखार्कोदययोरंतरं अतस्तद्दक्षिणोत्तरं तत्साधनायोपायः ॥ अत्र भतिराशिखंडानि संत्यतो भुजराशिमितयोगः कर्तव्यः शेषात्त्रैराशिकं यदि त्रिंशद्भिः ३० भागैरेष्यखंड तुल्यं चरं लभ्यते तदा शेषभागैः किमिति सुगमं अथ धनर्णोपपत्तिः जाताग्रहाल्लंकार्कोदयका

मेषादिगे सायनभागसूर्ये दिनार्द्धभा या पलभा भवेत्सा त्रिस्थाहतास्युर्दशभिर्भुजंगैर्दिग्भिश्चरार्द्धानि गुणोद्धृतान्त्या ॥२१॥
स्यात्सायनोष्णांशुभुजर्क्षसंख्याचरार्द्धयोगो लवभोग्यघातात् खाग्न्याप्तियुक्तस्तु चरं धनर्णं तुलाजषट्के तपनेऽन्यथाऽस्ते ॥२२॥

लीना रेखार्कोदयकालीनाः कार्यास्तत्र लंकायां यत्क्षितिजं तस्योन्मंडलसंज्ञा अन्यदेशीयस्य क्षितिजस्य क्षितिजसंज्ञैव उत्तरगोले उन्मंडलार्कोदयात् पूर्वं क्षितिजार्कोदयस्य भूतत्वात् उन्मंडलास्तात् पश्चात् क्षितिजास्तमयो यतः क्षितिजादुपर्युन्मंडलं अत उत्तरगोले उदये चरमृणं अस्ते च धनं दक्षिणगोले ऽस्माद्विपरीतं तद्यथा उन्मंडलार्कोदयानंतरं न क्षितिजार्कोदयस्य भूतत्वात् उन्मंडलास्तमयात्पूर्वं क्षितिजास्तमयो यतः क्षितिजादध उन्मंडलं अतो दक्षिणगोले उदये चरं धनमस्ते ऋणमित्युपपन्नं ॥२२॥ ॥अथास्य चरस्य संस्कारं सूर्ये दोश्चंद्रे द्युमणिफलसंस्कारमयनांशसाधनं चैकवृत्तेनाह ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

टी॰
१२

देयमिति ॥ तदानीतं चरं पलात्मकं अरुणे सूर्ये विलिप्तिकाख्यं विकलाख्यं देयं तदेव चरं द्विगुणं सत् नवोद्धृतं नव ९ भक्तं मध्येंदौ मध्यमचंद्रे कलाख्यं देयं भासं सप्तविंशति २७ भक्तं यद्भ्रमणिफलं सूर्यस्य मंदफलं तदपि यथागतं धनर्णभागेषु देयं ततः स्वमंदफलं देयं स स्फुटश्चंद्रः स्यात् ॥ अथ सूर्येंदुस्फुटीकरणानंतरं अयनांशान्साधयति शको वर्तमानः शालिवाहनशकः वेदाब्ध्यब्ध्यूनश्चतुश्चत्वारिंशदधिकचतुःशतं ४४४ हीनस्ततः स्वरसद्धृतः षष्टि ६० भक्तोऽयनांशाः स्युः अत्रोपपत्तिः यदानीतं चरं पलात्मकं तद्ग्रहाणां स्वस्वगतिवशाद्देयं तद्यथा यदहोरात्रपलै ३६०० रेभिर्गतिकला लभ्यंते तदेष्टचरपलैः किमिति एवं सर्वेषां ग्रहाणां देयं तत्राचार्येणायं संस्कारो रवींद्वोरेव कृतः अन्येषां स्वल्पगतित्वात् स्वल्पांतरत्वात्त्यक्तः ॥ तत्र रविगतिः षष्टि ६० तुल्या तयापवर्तिते चरपलानि षष्ट्याभाज्यानीति जातं एवं ताः कलाविकलार्थं षष्टिगुणाः षष्टितुल्ययोर्गुणहरयोर्नाशे कृते चरपलतुल्या एव विकला रवौ देया इत्युपपन्नं एवं चरपलानां चंद्रमध्यगति ७९० र्गुणः हरः स एव ३६०० अत्र गुणहरौ गुणार्द्धेनापवर्त्य जातो गुणः २ हरः किंचिदधिका नव ते स्वल्पार्थं नवैव गृहीताः अतो द्विगुणं नव ९ भक्तं चरं चंद्रे कलाख्यं देयमिति युक्तमुक्तं ॥ अथ दोःफलोपपत्तिः देशांतरफलेन स्वदेशमध्यमार्कोदयकालीना ग्रहाः कृताः सूर्यस्य मंदफलेन स्फुटार्कोदयकालीनाः क्रियंते अस्माकं स्फुटार्कोदयेन भवितव्यं मध्यमार्कस्यादृश्यत्वात् ॥ अतस्त्रैराशिकं यदि चक्रकलाभि २१६०० र्नित्यं प्रवाहानिलेन पश्चान्नीयमानाभिर्ग्रहा अहोरात्रवृत्तेन स्वीयगतितुल्याः कलाः स्वव्यापारेण प्रापयंति तदा रविमंदफलकलाभिरपरेण नीयमानाभिः किमिति ॥ फलं ग्रहेषु ऋणधनमतः क्रियते ऋणफले स्फुटार्कस्योनत्वात् ऋणफलेनोनाः संतः स्फुटार्कोदयकालीना भवंति धनफले स्फुटार्काधिकत्वात् मध्यमार्कात् फलेनाधिकाः संतः स्फुटार्कोदयकालिका भवंति एवमत्राचार्येणायं संस्कारश्चंद्रस्यैव कृतः गतिबाहुल्यात् ॥ अन्येषां स्वल्पगतित्वान्नोक्तः एवं रविफलं लवाद्यं षष्टिगुणं कलाद्यं स्यात्तच्चंद्रमध्यमगत्या गुण्यं एवं गुणघातो गुणः ४७।४३।५ चक्रकला २१६०० हारो लवादिफलार्थं षष्टि ६० श्च एवं हरघातो हरः १२९६००० गुणहारौ गुणेनापवर्त्य जातो हरः २७ अत उक्तं भासं च भ्रमणिफलं लव इति ॥ अथायनांशोपपत्तिः इष्टदिने दिनार्द्धे यंत्रादिवेधेन सावयवान्नतांशान्प्रसाध्य तान् नवतेर्विशोध्य शेषांशाक्षांशयोरेकान्यदिशोरंतरं योगं विधाय तेभ्यः क्रांतिभागेभ्यः क्रांतिखंडकस्यासं कुर्यात् स सायनसूर्यस्य भुजः स्यात् तात्कालिकगणितागतस्फुटार्कस्यापि भुजः कार्यस्तद्भुजप्राग्भुजयोरंतरं तेऽयनांशाः यदि गणितागतान्मध्याद्भुजोऽधिकस्तदा ते धनाख्याः ऊनास्तदा ऋणाख्या एव अ-

देयं तच्चरमरुणे विलिप्तिकाख्यं मध्येंदौ द्विगुणनवोद्धृतं कलाख्यं भासं च भ्रमणिफलं लवेऽथ वेदाब्ध्यब्ध्यूनः स्वरसद्धृतः शकोऽयनांशाः ॥२३॥

न्नोपलब्धिरेव वासना ॥ एषां प्रतिवर्षमेकैका कलाउत्पद्यते चतुश्चत्वारिंशादधिकचतुःशत ४४४ मिते शाके ऽयनांशाभावोऽथ तु प्रतिवर्षं कलावृद्धिः अतो वेदाब्ध्यब्ध्यूने शाके यावंति वर्षाणि तावत्य एवायनांशकलास्ताः षष्टिभक्ता भागाः स्युः अतः खरसत्वृदिति चत्वारिंशादधिकचतुर्दशशतवर्षैः १४४० परमायनचलनस्य व्यावृत्तिर्भवति ॥ तत्र यस्मिन् पक्षे कलोपचयस्तस्मिन्पक्षे चतुर्विंशत्यंशाः ॥ परमायनचलनांशाः यस्मिन्पक्षे चतुःपंचाश ५४ द्विकलाउपचीयंते तत्पक्षे सप्तविंशत्यं २७ शाः परमाउत्पद्यंते अष्टादशशत १८०० वर्षमध्ये एवमेषां च यापचयवशात् भागपरवशाच्च धनर्णसंभवः स्यात् ॥२३॥ ॥ एवं स्पष्टार्कोदयकालीनौ स्पष्टौ सूर्यचंद्रौ कृत्वेदानीं तिथिनक्षत्रयोगकरणसाधनं वृत्तद्वयेन करोति ॥ ॥ भक्तू इति । तदिति । विगतो ऽर्कः सूर्यो यस्मादेतं भूतो यो विधुश्चंद्रस्तस्य लवा राशीन् त्रिंशता संगुण्य भागेषु संयोज्य सर्वे भागाः कार्याः ते यमकुभिर्द्वादशभिर्भक्ताः संतो यत्फलं तत्तुल्या याता तिथिः स्यात् यच्छेषं तदपि यातं तद् हरात् द्वादशमितात् पतितं शोधितं सत् भोग्यं स्यात् ॥ तयोर्गतगम्ययोर्विलिप्ताविकलाः भुक्त्योः सूर्यचंद्रगत्योर्यदंतरं तेन भाजिताः लब्धं यातैष्यका घटिकाः क्रमाद्भवंति यातकलाभ्यस्ताः यातघटिकाः पूर्वदिने तस्या एव तिथेर्भुक्तघटिकाः स्युः ॥ एवमेष्यकलाभ्यः एष्याः तस्मिन्दिने-

भक्ताव्यर्कविधोर्लवा यमकुभिर्याता तिथिः स्यात्फलं शेषं यातमिदं हरात्पतितं भोग्यं विलिप्तास्तयोः भुक्त्योरंतरभाजिताश्च घटिका यातैष्यकाः स्युः क्रमात्
पूर्वार्द्धे करणं बवाद्गततिथिर्द्विघ्नाद्रितष्टा भवेत् ॥२४॥ तत्सैकं त्वपरेदले ऽथ शकुनेः स्युः कृष्णभूतोत्तरार्धाच्चाथ विधोश्च सार्कसितगोर्लिप्ताः खखाष्टेहृताः ८००
यातेस्तो भयुती क्रमाद्गगनषट्सिद्धैर्गतैष्ये तयोरिंदोर्भुक्तिहृते जवैक्यविहृते यातैष्यनाड्यः क्रमात् ॥१॥ सूर्योदयमारभ्य तिथेर्घटिकाः स्युरित्यर्थः ॥ अथ करणं साधयति ॥ गततिथिर्द्विघ्नाद्विगुणा अद्रिभिः सप्तभि ७ स्तष्टा भक्ता सती तिथेः पूर्वार्द्धे करणं वर्त्तमानं स्यात् तदेव सैकं एकयुक्तं सत् अपरे दले तिथेरुत्तरार्द्धे स्यात् ॥ अथ स्थिरकरणचतुष्टयस्य निवेशमाह कृष्णभूतोत्तरार्धात् ॥ कृष्णः कृष्णपक्षः तस्य यो भूतश्चतुर्दशी तस्याः उत्तरार्द्धात् शकुनेः प्रभृति चत्वारि करणानि स्युः एतदुक्तं भवति कृष्णपक्षे चतुर्दश्युत्तरार्द्धे शकुनिः अमापूर्वार्द्धे चतुष्पादं अपरार्द्धे नागं । आद्ये प्रतिपद्दले किंस्तुघ्नं नाम करणं एतानि स्थिराणि चत्वारि ॥ अथ करणकथनानंतरं विधोश्चंद्रस्य तथा सार्कसितगोः सूर्यचंद्रयोगस्य लिप्ताः कलाः खखाष्टेहृताः अष्टशत ८०० भक्ताः फलं क्रमात् याते भयुती नक्षत्रयोगौ भवतः चंद्राज्जातं नक्षत्रं योगाद्योग इति । तयोर्नक्षत्रयोगयोर्गतैष्ये यत्शेषं तदेव गतं हरादष्टशतमितात् शोधितं एष्यं । ते षष्टिगुणे नक्षत्रार्थं इंदोश्चंद्रस्य भुक्त्यागत्या हृते भक्ते योगार्थं सूर्यचंद्रयोः जवैक्येन गतियोगेन भक्ते क्रमा

तयोर्यातैष्यानाड्यः स्युरित्यर्थः ॥ अत्रोपपत्तिः ॥ दर्शांते सूर्यचंद्रौ समौ भवतः दर्शः सूर्येंदुसंगम इति स्मरणात् ॥ ततो दर्शांताच्चंद्रो बहुगतित्वादग्रे याति पुनरमांते समौ तयोरंतरे चांद्रमा-
सः दर्शावधिश्चांद्रमः सोहि मासः स्मरणात् तयोरंतरं त्रिंशत्तिथयः त्रिंशत्तिथिभिर्यदि भांशातुल्यं ३६० सूर्यचंद्रांतरं लभ्यते तदैकतिथ्या किमिति ज्ञाता द्वादशभागाः १२ एकति-
थौ सूर्यचंद्रांतरं यदि द्वादशभागतुल्येन रविचंद्रांतरेणैका तिथिः तदेष्टसूर्यचंद्रांतरभागैः कियत्य इति अत्र सूर्यगत्यधिका चंद्रगतिरतो व्यर्कविधोर्लवा यमकुभिर्भक्ता इति त-
तो यच्छेषं तत् यातं ग्रहभुक्तत्वात् ततो हि तद्द्वादशशुद्धं भोग्यं स्यात् एवं ततो घटिकाज्ञानार्थमनुपातः यदि गत्यंतरकलाभिः षष्टिघटिकास्तदा गतैष्यकलाभिः किमिति क-
लाः षष्टिगुणा विकलाः स्युः अतो यातैष्यविकलाः गत्यंतरकलाभक्ताः तिथियातैष्यघटिकाः स्युरित्युपपन्नं अथ करणोपपत्तिः एकतिथौ करणद्वयमित्यागमः ततोऽनुपातः
यद्येकतिथ्या करणद्वयं तदेष्टतिथ्या किमिति अतस्तिथिर्द्विगुणा कदाचित्सा साधिका स्यात् करणानि सप्तैव अतः सप्ततष्टा शेषमितं शकुप्रतिपदादितो गततिथिग्रहणात् किं-
स्तुघ्नादिकं करणं वर्तमानतिथिपूर्वार्द्धगतं स्यात् तद्वशादितो गणनार्थं निरेकं कार्यं वर्तमानत्वार्थं च सैकमिति तुल्ययोर्धनर्णक्षेपयोरेकयोर्नाशे शेषमितमेव वर्तमानतिथिपू-

खमष्टमरुतोऽद्रिभूभुवउदध्यगोर्व्योष्टदृक्कृद्दशोनवनगाश्विनोऽक्षदशनाः शरांगानयः ॥ गुणांकदहनाः खखाब्धयइभागरामाः क्रमान्नवांबुधिदृशोनभःक्षिति
ऋक्ष्वलांकाइमे ॥१॥

र्वार्द्धे वर्त्तमानकरणमिति युक्तं तदेव सैकमुत्तरार्द्धं स्यादिति प्रत्यक्षसिद्धं ॥ शकुन्यादिकरणचतुष्टयसंस्थानमागमप्रमाणकं ॥ अथ नक्षत्रयोगसाधनो-
पपत्तिः ॥ समस्तो भपंजरो द्वादशराशिभिर्व्याप्तस्तथा सप्तविंशतिनक्षत्रैश्च अतो भगणकलानामेकनक्षत्रकरणायानुपातः ॥ यदि सप्तविंशतिनक्षत्रैश्चक्रकला २१६०० भवंति तदै-
कनक्षत्रेण किमिति अतो जाता ऽष्टशतकलाः ८०० अष्टशतकलाभिरेकं नक्षत्रं तदेष्टग्रहकलाभिः कियंतीति लब्धं गतनक्षत्राणि शेषं भुक्तं हरशुद्धं भोग्यं स्यादेव ततोऽन्योऽनुपातः
यदि चंद्रगतिकलाभिः षष्टिघटिकास्तदा गतैष्यकलाभिः का इति कलाः षष्टिगुणाः विकलाः ताश्चंद्रगतिभक्ताः नक्षत्रगतैष्यघटिकाः स्युरित्युपपन्नं अथ योगवासना रविचंद्रयो-
र्मिलितयोर्यन्नक्षत्रं स योग इत्युच्यते अतोऽत्र युक्तिर्नक्षत्रवत् गतगम्यघटिकार्थमनुपातो गतियोगेन कर्तुं युज्यते योगानयनत्वादिति प्रत्यक्षोपपत्तिः दैवज्ञवर्यस्य दिवाकरस्य सु-
तेन मल्लारिसमाह्वयेन ॥ वृत्तौ कृतायां ग्रहलाघवस्य जातो रवींद्वोः स्फुटताधिकारः ॥ इति श्रीसकलागमाचार्यवर्यगणेशदैवज्ञकृतग्रहलाघवस्य टीकायां दैवज्ञवर्यदिवाकरात्म-
जमल्लारिदैवज्ञविरचितायां रविचंद्रस्पष्टीकरणाधिकारो द्वितीयः ॥ ॥ अथ पंचतारास्पष्टीकरणाधिकारो व्याख्यायते ॥ तत्रादौ भौमादीनां सिद्धानि शीघ्रफलानि पंचवृत्तेन वदति ॥

खमिति ॥५ क्षितिफक्षवोभौमस्य चलांकाः शीघ्रफलस्यतेंकाः स्युः खं शून्यं ० अष्टमरुतः अष्टपंचाशत ५८ अद्रिभूफक्षवः सप्तदशाधिकं शतं ११७ उदध्यगोर्व्यः चतुःसप्तत्यधिकं शतं १७४ अष्टदृग्दशाः अष्टाविंशत्यधिकं शतद्वयं २२८ नवनगाश्विनः एकोनाशीत्यधिकं शतद्वयं २७९ अक्षदशनाः पंचविंशत्यधिकत्रिशती ३२५ शरांगाग्नयः पंचषष्ट्यधिकत्रिशती ३६५ गुणांकदहनाः त्रिनवत्यधिकत्रिशती ३९२ खखवाब्धयः चतुःशती ४०० इभांगरामाः अष्टषष्ट्यधिकत्रिशती ३६८ नवांबुधिदृशः एकोनपंचाशदधिकद्विशती २४९ नभः शून्यं।०। एतेभौमस्यविदोः बुधस्य एतेशीघ्रांकाः खंशून्यं।०॥ भूकृता एकचत्वारिंशत् ४१ कुवसव एकाशीतिः ८१ अद्रिभवाः सप्तदशाधिकशतं ११७ खतिथ्यः सार्द्धशतं १५० अष्टाद्रींदवः अष्टसप्तत्यधिकशतं १७८ नवनवक्षितयः एकोनाद्विशती १९९ अर्कपक्षाः द्वादशयुक्तद्विशती २१२ अर्काश्विनस्त एव २१२ शरखगक्षितयः पंचोनद्विशती १९५ अक्षतिथ्यः पंचपंचाशदधिकंशतं १५५ गोष्टौ एकोननवतिः ८९ खंशून्यं० एतेबुधस्य गुरोर्बृहस्पतेः एतेशीघ्रांकाः खंशून्यं० तत्वानि पंचविंशतिः २५ नगाब्धयः सप्तचत्वारिंशात् ४७ अष्टषड्गाः अष्टषष्टिः ६८ पंचेभाः पंचाशीतिः ८५ गजखेचराः अष्टनवतिः ९८ रसाशाः षडधिकंशतं १०६ नगाशाः अष्टोत्तरशतं १०८ द्विदिशाः १०२ द्व्युत्तरशतं नवाहयः एकोननवतिः ८९ षट्षष्टिः ६६ षड्गुणाः षट्त्रिंशत् ३६ नभः शून्यं० एतेगुरोः भृगुजने: शुक्रस्यैतेशीघ्रांकाः खंशून्यं० अग्न्यंगैस्तुल्याः अंकाः त्रिषष्टिः ६३ रसयमक्षुवः षट्त्रिंशात्यधिकशतं १३६ षड्धृतयः षडशीत्यधिकशतं १८६ अश्विसिद्धाः षट्चत्वारिंशत्यधिकद्विशती २४६ पक्षाभ्राग्नयः द्व्यधिकत्रिशती ३०२ उदधिनाराचदहनाः उदधयश्चत्वारः नाराचाः बाणाः पंचदहनाः अग्नयः त्रयः एवंचतुःपंचाशदधिकत्रिशती ३५४ द्विशून्योदन्वंतः द्व्यधिकचतुःशती ४०२ खजलधिकृताः चत्वारिंशदधिकचतुःशती ४४० भूरसकृताः एकषष्ट्यधिकचतुःशती ४६१ त्रिवेदोदन्वंतः त्रिचत्वारिंशदधिकचतुःशती ४४३ रसयमगुणाः षड्विंशत्यधिकत्रिशती ३२६ खंशून्यं।०। एतेशुक्रस्य आर्कैः शनेः एतेशीघ्रांकाः खंशून्यं।० इषुक्षितयः पंचदश १५ गजाश्विनो ऽष्टाविंशतिः २८ गोदहनाः एकोनचत्वारिंशात् ३९ नागकृता अष्टच

खंभूकृताः कुवसवोद्रिभवाः खतिथ्यो ऽष्टाद्रीन्दवोनवनवक्षितयोर्कपक्षाः अर्काश्विनः शरखगक्षितयो ऽक्षतिथ्योगोष्टौखमाशुफलजाः स्युरिमे
विदोंकाः ॥२॥ खंतत्वानिनगाब्धयो ऽष्टषड्गाः पंचभागगजखेचरारसाशाः नागाशाद्विदिशोनवाहयः षट्षष्टिः षड्गुणानभोगुरोः स्युः ॥३॥ खमं
ग्न्यंगैस्तुल्यारसयमक्षुवः षड्धृतयो ऽश्विसिद्धाः पक्षाभ्राग्नयउदधिनाराचदहनाः द्विशून्योदन्वंतः खजलधिकृताभूरसकृतास्त्रिवेदोदन्वंतोरसयम
गुणाः खंभृगुजने: ॥ ४॥

त्वारिंशत् ४८ पयोधिबाणाश्चतुः पंचाशत् ५४ द्विर्द्विवारमगेषुमिताः सप्तपंचाशत् ५७।५७ हुताशबाणास्त्रिपंचाशत् ५३ शरवेदाः पंचचत्वारिंशत् ४५ त्रिगुणास्त्रयस्त्रिंशत्
३३ धृतिरष्टादश १८ खंशून्यं एतेशनेः शीघ्रांकाः अत्रोपपत्तिः। अत्र ग्रहस्पष्टीकरणार्थं ग्रहाणामसकृन्मंदफलानि शीघ्रफलानि प्रसाध्य तत्संस्कृतो ग्रहः स्पष्टो भवति। तद्य
था। प्रथमं शीघ्रफलं प्रसाध्यं। शीघ्रकेंद्रस्य दोर्ज्या कोटिज्ये विधाय ततः कोटिज्यान्त्यफलज्ययोः कर्कमृगादिकेंद्रे अंतरयोगौ क्रमेण स्फुटकोटिः दोर्ज्या भुजः ततस्तत्कृत्योर्यो
गपदमिति शीघ्रकर्णः प्रसाध्यः ततोऽनुपातद्वयात् फलं। यदि त्रिज्यातुल्यया शीघ्रकेंद्रदोर्ज्यया परमं शीघ्रफलज्यातुल्यं फलं लभ्यते तदेष्टया किमिति। ततोऽन्योऽनुपातः
यदि शीघ्रकर्णाग्रे इदं फलं तदा त्रिज्याग्रे किमिति त्रिज्यातुल्ययोर्गुणहरयोर्नाशे शीघ्रकेंद्रदोर्ज्या अंत्यफलज्यागुणा शीघ्रकर्णभक्ता इष्टफलज्या भवतीति। तद्धनुः शीघ्रफ
लं अत्रेदं जडकर्म दृष्ट्वा आचार्येण शीघ्रकेंद्रं पंचदशभागवृध्या प्रकल्प्य शीघ्रफलानि प्रसाध्य तानि सावयवान्यतो दशगुणानि राशिषट्कमध्ये द्वादश सर्वेषां ग्रहाणां पृथक्
पृथगुत्पादितानि। तत्र मंदावबोधार्थं धूलीकर्म प्रतीत्योच्यते। तत्र प्रथमं भौमस्य शीघ्रफलानयनार्थं शून्यं शीघ्रकेंद्रं प्रकल्प्य जातं शीघ्रफलमपि शून्यं भुजाभावात्। एवं द्विती

खमिषुक्षितयोगजाश्विनागोदहनानागकृताः पयोधिबाणाः द्विरगेषुमिताहुताशबाणाः शरवेदास्त्रिगुणा धृतिः खमार्कैः॥ ५ ॥ ॥

यशीघ्रांकोस्त्यतो शीघ्रकेंद्रं पंचदशभागाः १५ अस्य दोर्ज्या ३१ कोटिज्या ११५।३० भौमस्य परमशीघ्रफलज्या ७७ अन्यैर्भास्कराद्यैः भूकुंजरा ८१ उक्ताः अस्मिन्काले आचार्येण ए
तावती ज्ञाता अत इयं कोटिज्या ११५।३० परेणानेन ७७ द्वाभ्यां च गुणिता १७७८७ अनया खखाभ्राब्धिशक्रैः १४४०० युता परकृतिर्युक्ता कृता ३८११६ अत्र परकृतिर्युक्त वकृता कृति
दूनापि कर्त्तव्या एवमस्याः मूलं जातः शीघ्रकर्णः १९५।१७ परेण ७७ दोर्ज्या ३१ गुणिता जाता २३८७ इयं कर्णेन भक्ता जाता १२।१३ अस्याः धनुः शीघ्रफलं भागाद्यं ५०।४८ एतत्साव
यवमतो दशगुणं जातमेकस्थाने ५८ अतो भौमस्यांको द्वितीयोऽष्टमरुत इत्युक्तः एवमग्रेऽपि पंचदशभागवृध्या शीघ्रकेंद्रं प्रकल्प्य सर्वेषां शीघ्रांकाः अत्र दोर्ज्या कोटिज्ये राशित्र
यमध्येऽतो राशित्रयमध्ये षडेव शीघ्रांका वक्तव्याः कथमत्र षड्राशिमध्ये द्वादशोक्ताः उच्यते। इदं शीघ्रफलं कर्णाश्रितं कर्णस्य परमाधिक्यं त्रिभेन भवति किंचिदधिके नैव त्रिभेण
भवति कर्णात्स्वल्पता तु द्वितीयत्रिभे ऊन एव भवति। एवं षड्राशिमध्ये कर्णह्रासवृद्धी अतः शीघ्रफलानयने पदं त्रिभादूनाधिकं भवति तद्यथा। प्रथमं पदं त्रिभं शीघ्रफलांशै
रधिकं द्वितीयं शीघ्रफलांशोनं तृतीयं शीघ्रफलांशोनं चतुर्थं शीघ्रफलाधिकमिति अत एवोक्तं सिद्धांतशिरोमणौ। चापेन शीघ्रांत्यफलज्यकायाः त्रिभं युतोनोनयुतं पदानि।

दोर्ज्ञेषु यातेष्वयुग्मयुग्मइति।अतः षड्राशिमध्ये उक्तानि षड्राशिभागाः अशीत्यधिकशतं।अत एते पंचदशभक्ताः द्वादशैवांकाभवंति॥ एवंशीघ्रफलांकानुक्त्वेदानींतत्कर्नव्यतामेकवृत्तेनाह॥ ॥भौमेति भौमोमंगल आर्किःशनी ईज्योगुरुः एभिर्विहीनोमध्यमरविः।स्वस्य आशुकेंद्रं शीघ्रकेंद्रंभवति विड्गवोः शीघ्रकेंद्रं अहर्गणादुक्तमस्ति।एतत्केंद्रंचेदूर्ध्वं षड्राश्यधिकं तर्हिइनभाद्द्वादशराशिभ्यः।शुद्धंतस्यांशाः।दिनैःपंचदशभि १५र्भक्ताः संतः खादिफलंक्रमात् खंशून्यं आदिर्यस्येति एवंभूतोयः फलक्रमस्तस्माद सौगतांकः अग्यांकेन सह अंतरे क्रियमाणेयः क्षयो वा वृद्धिः स्यात्तया हताद्गुणिताच्छेषाद्बाणकुलब्धिः पंचदशांशोस्तेनक्षये हीनो वृद्धौ युक्तः कार्यः।असौ दिगहृद्दशभक्तः भागाद्यं शीघ्रफलंभवति

भौमार्कीज्यविहीनमध्यमरविः स्यात् स्वाशुकेंद्रंतुविड्गवोरुक्तमिदंरसोर्ध्वमिनभाच्छुद्धंतदंशादिनैः
भक्ताःखादिफलंक्रमादिहगतांकोसौक्षयाद्व्याहताच्छेषाद्बाणकुलब्धिहीनयुग्युयंदिगहृल्लवाद्यंफलं॥ ६॥

तन्मेषादिकेंद्रे धनंतुलादिकेंद्रे ऋणंपूर्वमेवोक्तमस्ति अत्रोपपत्तिः यदिपंचदशभागोरेकः शीघ्रांकस्तदेष्टैः केंद्रभागैः किं एवं यल्लब्धं तन्मितोगतः स्यात् ततः शेषादनुपातः यदिपंचदशभागैः गतैष्यांतरतुल्या ह्रासवृद्धिर्लभ्यते तदा शेषांशैः किमिति फलेन क्षये हीनः वृद्धौ युक्तः गतांकः कार्यएव ततोदशगुणांकाः संत्यतो दशभिर्भक्तोभागाद्यं शीघ्रफलं भवति इत्युपपन्नं॥६॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवं शीघ्रांकानुक्त्वेदानीं मांदांकान् मंदकेंद्रसाधनं च वृत्तद्वयेनाह ॥ ॥खमिति खेंद्रक्षोणीति असृजो भौमस्यैते मांदा मंदफलांकाः स्युः खं शून्यं ० गोश्विनः । एकोनत्रिंशत् २९ अद्रिमरुतः सप्तपंचाशत् ५७ अक्षगजाः पंचाशीतिः ८५ नवाशा नवोत्तरशतं १०९ सिद्धेंदवोश्चतुर्विंशत्यधिकशतं १२४ खदहनक्षितयः त्रिंशदधिकशतं १३० बुधस्यैते खं ० इना द्वादश १२ कुदृशा एकविंशतिः २१ अष्टपक्षाः अष्टाविंशतिः २८ देवास्त्रयस्त्रिंशत् ३३ शरानलमिताः पंचत्रिंशन्मिताः ३५ रसवन्हयः षट्त्रिंशत् ३६ गुरोरेते खं शून्यं ० इंद्राश्चतुर्दश १४ ऋक्षाणि सप्तविंशतिः २७ नवाग्नयः एकोनचत्वारिंशत् ३९ अहयः अष्टौ उदधयश्चत्वारः एवमष्टाचत्वारिंशत् ४८ अक्षाक्षाः पंचपंचाशत् ५५ नगाक्षाः सप्तपंचाशत् ५७ अथ शुक्रस्य अभ्रं शून्यं ० रसाः षट् ६ ईशाः एकादश ११ विश्वे त्रयोदश १३ मनवश्चतुर्दश १४ द्विः द्विवारं बाणचंद्राः पंचदश १५।१५ अथ शनेः खं शून्यं ० गोब्जा एकोनविंशतिः १९ खकृताश्चत्वारिंशत् ४० खषट् षष्टिः ६० नगनगाः सप्तसप्ततिः ७७ गोष्टौ एकोननवतिः ८९ त्रिनंदाः त्रिनवतिः ९३ ग्रहक्रमात् अब्ध्यद्रिषडग्निनागगृहतः शुक्रः कुजाद्भौममारभ्य मंदकेंद्रं स्यात् एतदुक्तं भवति अब्धयश्चत्वारो ४ राशयः भौममंदोच्चं अद्रयः सप्त ७ राशयो बुधस्य षट् ६ गुरोः अग्नयः त्रयः ३ शुक्रस्य नागा अष्टौ ८ राशयः शनेः एवं स्वस्वमंदोच्चात् ग्रहः शोधितो मंद

खंगोऽश्विनोऽद्रिमरुतोऽक्षगजा नवाशाः सिद्धेंदवः खदहनक्षितयोऽसृजोंकाः मांदा बुधस्य खमिनाः कुदृशोऽष्टपक्षा देवाः शरानलमिता रसवन्हयः स्युः ॥७॥ खेंद्र
क्षोणि नवाग्नयोऽहिउदधयोऽक्षाक्षा नगाक्षा गुरोः शुक्रस्याभ्ररसेशविश्वमनवो द्विर्बाणचंद्राः क्रमात् खंगोब्जाः खकृताः खषट् नगनगा गोष्टौ त्रिनंदाः शनेः शुक्रोऽब्ध्य
द्रिषडग्निनागगृहतः स्यान्मंदकेंद्रं कुजात् ॥८॥ ४।७।६।३।८।

केंद्रं भवेदिति। अत्रोपपत्तिः मंदोच्चकेंद्रवासना मंदफलपरमत्वज्ञानवासना च पूर्वमेवोक्ता। अत्र मंदफलानयने राशित्रयमेव पदं गृहीतं तत्कथं कर्णानंगीकारात् अहो अत्र शीघ्रफलार्थे कर्णो गृहीताः। मंदफलार्थं न गृहीताः स कथं कर्णो हि ग्रहकक्षाया व्यासार्द्धं एवं मंदकर्णो मंदप्रतिमंडले व्यासार्द्धं। शीघ्रकर्णः शीघ्रप्रतिमंडले व्यासार्धं। एवं यत्साधितं मंदफलं तन्मध्यमात् मध्यमो मंदप्रतिमंडलेऽतो जातं मंदफलं मंदकर्णाग्रस्थानीयं। अतो मंदफलानयने मंदकर्णोऽपि ग्राह्यः सत्सर्वैरपि नांगीकृतस्तत्र ग्रहकर्णाग्रहणे एकं कारणं वक्तव्यं। शीघ्रफलान्मंदफलस्यानत्वात् स्वल्पांतरत्वात् मंदकर्मणि कर्णो न गृहीताः एवं चेत्तर्हि स्वल्पेऽपि शीघ्रफले कर्णो गृह्यते तदधिके मंदफले न गृह्यते एवं कथं अतोऽत्र युक्त्या हेतुज्ञानं न व भवति फलवासना विचित्रास्ति एतादृशेनैव कर्मणा आकाशे ग्रहस्पष्टत्वं दृश्यते अतः प्रत्यक्षप्रमाणोपलब्ध्या एतत् कृतमिति वक्तव्यं सर्वं निरवद्यं उक्तं च सिद्धांतशिरोमणौ। स्वल्पांतरत्वान्मृदुकर्मणीह कर्णः कृतो नेति च केचिदूचुः नाशंकनी

यंनचलेकिमित्थं यतोविचित्रा फलवासनात्रेति। अत्रत्रिज्यातुल्ययामंदकेंद्रदोर्ज्यया यदि परमं मंदफलं तदेष्टदोर्ज्यया किमिति एवंपंचदशभागदृष्ट्यामंदकेंद्रं प्रकल्प्य अनयायु-
त्या मंदफलानि प्रसाध्यानि तानि सावयवान्यतो दशगुणानि कृत्वा राशित्रयमध्ये ग्रहाणां पृथक् पृथक् षडंकाः मांदाः भवंतीत्युपपन्नं अत्रधूलीकर्म प्रथमांकोभुजाभावा
च्छून्यं। ततः पंचदश १५ भागास्तेषांज्या ३१ भौममंदपरम फलेनगुणिता जाता ३४७।१२ इयं खार्क १२० भक्ताजातं फलं २५४ इदं सावयवत्वाद्दशगुणं २९ जातोभौमस्य द्वि
तीयोमांदांकाः एवंसर्वेषांसर्वेंकाउत्पादनीयाः॥८॥ ॥एवंमांदांकानभिधायेदानीं मंदफलकर्तव्यताप्रकारमेकवृत्तेनाह॥ ॥मृद्विति मृदुकेंद्रस्य ये भुजभागास्तेदिनैः पंचदशभिः
१५आप्ताभक्ताः संतोयत्फलं तन्मितःप्रगतःअंकःस्यात् तेनगतांकेनऊनितोय एष्योंऽकः सपरिशेषोणशषभागैर्हतोगुणिता स्तस्मा द्यादिनाप्तिः पंचदशभागः तेनयुक्तः सगतांकस्त

मृदुकेंद्रभुजांशकादिनाप्ताः फलमंकःप्रगतस्तदूनितैष्यः परिशेषहतोदिनाप्तियुक्तोदशभक्तः फलमंशकादिमांदं ॥ ९॥ ७ ॥
प्राङ्मध्यमेचलफलस्यदलंविदध्यात्तस्माच्चमांदमखिलंविदधीतमध्ये द्राक्केंद्रकेऽपिचविलोममतश्चशीघ्रंसर्वंचतत्रविदधीतभवेत्स्फुटोसौ ॥१०॥

तोदशभक्तः अंशकादिभावादि मंदफलंभवतीत्यर्थः अत्रोपपत्तिरनुपातद्वयेन यदि पंचदशभागैरेकोमांदांकस्तदेष्टैर्मंदकेंद्रांशैः किमिति अतोगतांशादिनाप्तागतांकः स्यादिति
शेषादनुपातः यदिपंचदशभागैरेतावतीगतैष्यांतरतुल्यावृद्धिर्लभ्यते तदाशेषांशैः किमिति। अंकादिगुणिताः संत्यतस्तद्दशभिर्भाज्यं फलंभवतीत्युपपन्नं ॥९॥ एवंशीघ्र
फलमंदफलसाधनमुक्त्वेदानींग्रहेकथंसंस्कार्यमित्येकवृत्तेनाह ॥ ॥प्रागिति॥ प्राक्आदाअहर्गणोत्पन्नमध्यमेग्रहेचलफलस्य शीघ्रफलस्यदलमर्द्धं यथागतधनर्णंप्रदद्यात्
तस्माद्दत्तशीघ्रार्धात् मांदं मांदफलंसाध्यं। तदखिलमपिमंदफलंमध्यमे अहर्गणोत्पन्ने यथागतंविदधीतकुर्वीत। तन्मंदफलं द्राक्केंद्रे शीघ्रकेंद्रेपूर्वकृतेविलोमंविपरीतं धनर्णंदेयं अतोमंदफ
लसंस्कृतशीघ्रकेंद्रात् शीघ्रफलं साध्यं तत् सर्वंतस्मिन् दत्तमंदफले विदधीतकुर्वीत। असौग्रहः स्फुटोभवतीत्यर्थः अत्रोपपत्तिः प्रत्यक्षोपलब्धिरेव ॥१०॥ एवंग्रहस्पष्टत्वमभिधा

येदानीं गतिमंदस्पष्टतामेकवृत्तेनाह ॥ मांदाकांतरमिति आर्किः शनिः असृक् भौमः गुरुर्बृहस्पतिः एषां मंदफलानयने यत् कृतं मांदाकांतरं तत् क्रमेण बाणनगैः पंचसप्तत्या ७५ शरैः पंचभिः ५ स्वरामैस्त्रिंशद्भि ३० र्भक्तं लब्धं कलाद्यं तत् गतिमंदफलं स्यात् विन्दुग्वोः बुधशुक्रयोः मांदाकांतरं द्वि २ हतं सत् आशुगैः पंचभिः ५ उद्धृतं फलं स्यात् तत् प्राग्वत् इतो मध्यगतौ दद्यात् सा मृदुस्फुटा गतिर्भवतीत्यर्थः अत्रोपपत्तिः प्रतिपादितप्रमेयात तथापि किंचिदुच्यते अत्र ग्रहफलाभावे गतिफलं परमं ग्रहफलपरमत्वे गतिफलाभावः ग्रहफलाभावस्तु शुक्रादौ तत्र मांदाकांतरमपि परमं तत्र गतिफलानि मांदानि परमाणि कलादीनि लक्षितानि भौम ५।४८ बुध ४।४८ गुरु २८ शुक्र २।२४ शनि १५ एभ्योऽनुपातः ॥ यदि मांदाकांतरेण प्रथमांकतुल्येन एतानि तदेष्टेन कानीति एवमिष्टमांदाकांतरं एभिः परमफलैर्गुण्यं परममांदाकांतरैः राशांकतुल्यैर्भाज्यं एवं सर्वत्र गुणहरौ गुणेनापवर्तितौ जाताः भौमादीनां हराः-भौ ५ बु २।३० गु ३० शु २।३० श ७५ एवं भौमगुरुशनीनां हराः निरवयवाः अतो मांदाकांतरमेभिर्भाज्यमिति बुधशुक्रयोर्हरा सावयवावतस्तौ द्वि २ सवर्णितौ जातौ समावेव ५ अतस्तयोर्द्विहताशुगोद्धृतमिति एवमेतत् मंदफलं मध्यमगतादेयं सा मंदस्पष्टागतिर्भवतीत्युपपन्नं अत्र गतिफलधनर्णत्ववासना पूर्वोक्तैव ज्ञातव्या अथ गतेः स्पष्टत्वमेकवृत्ते

मांदाकांतरमार्क्यसृग्गुरूणां भक्तं बाणनगैः शरैः स्वरामैः विन्दुग्वोर्द्विहताशुगोद्धृतं तत् दद्यात्प्राग्वदितामृदुस्फुटा सा ॥११॥ भौमात्त्वलांकविवरं शरहृत्स्वबाणां
शाव्यंत्रिहृत्कृतहृतं द्विगुणाक्षभक्तं तद्धीनयुक्क्षयचये तु मृदुस्फुटा स्यात्स्पष्टाथ चेद्बहुरूणात्पतितात्तु वक्रा ॥१२॥

नवदति ॥११॥ भौमादिति। भौमान्मंगलमारभ्य यच्चलांकानां शीघ्रांकानां विवरं द्वितीयशीघ्रफलानयनार्थं कृतमस्ति तत् क्रमात् शरैः पंचभिः हृत् भक्तं भौमस्य स्वबाणांशेन स्वपंचांशेन युक्तं बुधस्य त्रिहृत् त्रि ३ भक्तं गुरोः कृतहृच्चतु ४ र्भक्तं शुक्रस्य द्वि २ हतं द्विगुणं सत् अक्षभक्तं पंच ५ भक्तं शनेः तत् गतेः शीघ्रफलं स्यात् सा मृदुस्फुटा गतिस्तेन फलेन क्षयचये हीन युक्क्षये हीना चये युक्ता सती स्पष्टा भवेत् अथ च ऋणफलं बहुगतेर्नशुध्यति तदा सा गतिरेव फलात् शोध्या शेषं वक्रगतिः स्यादित्यर्थः अत्रोपपत्तिर्गतिमंदफलवत् अत्र शीघ्रफलानंतरं गतेः शीघ्रफलं तत्रानुपातः यदि पंचदशभागकलाप्रमाणेन ९०० इदं शीघ्रांकांतरं तदा शीघ्रकेंद्रगतिकलाप्रमाणेन किमिति ततः शीघ्रांकानां दश १० गुणितत्वात् तद्दशभिर्भाज्यं कलार्थं-च षष्ट्या गुण्यं एवं शीघ्रांकांतरस्य हरघातो हरः ९००० षष्टि ६० र्गुणः गुणहरौ गुणेनापवर्त्य जातो हरः १५० केंद्रगतिर्गुणोऽस्ति अत्र भौमगुरुशुक्राणां केंद्रगतिभिरभिः २८।५४।३७ सार्द्धशते १५० हरे भक्ते जाता हराः ५।३।४. बुधकेंद्रगतिर्गुणाः १८६ अत्र गुणहरौ त्रिंशतापवर्त्तितौ जातो गुणः ६ हरः ५ यो राशिः षड्भि ६ र्गुण्यते पंच ५ भिर्भज्यते सस्वबाणां

शाघ्र एवं भवति । तथा शनेर्गतिः ५७ अत्र गुणहरौ गुणार्द्धेनापवर्त्य जातो गुणः २ हरः ५ अतो द्विहताक्षभक्तं शीघ्रांकांतरं शनेर्गतिफलं स्यादित्युपपन्नं एवमेतत् मंदफलं मंदस्पष्टगतौ देयं स्पष्टा स्यादेव तत्र धनर्णोपपत्तिः अंकांतरे अग्रे चेत् क्षयः तदा ग्रहे स्वल्पफलत्वात् गतिरपि न्यूना अग्रे चेद्वृद्धिस्तदा ग्रहे फलाधिकत्वात् स्पष्टगतिरधिका अतः क्षयवृद्धौ ऋणधनसंयोक्ता चेत् फलं मंदस्पष्टगतेर्न शुद्ध्यति तदा विपरीतशोधनेन विपरीतगतिर्वक्रा गतिर्भवतीत्युपपन्नं वक्रत्ववासनामग्रे सविस्तरां वक्ष्यामः ॥१२॥ ॥अथ भौमशुक्रयोरंत्यशीघ्रांकागमे ग्रहेंतरं भवतीत्यतस्तत्र विशेषफलमेकवृत्तेनाह ॥ ॥ शुक्रेति शुक्रः प्रसिद्धः आरो भौमः एतयोरन्यतरस्य चलभवः शीघ्रफलोत्थः अंकः यदा अंत्यगतः स्यात्तदा ये शेषांशाः पंचदशाप्तकावशिष्टाः शीघ्रकेंद्रभागाः तु अन्यत्र पृथक्स्थाप्याः अक्षभूम्यः पंचदशाभ्यः १५ एकत्र पतिताः शोधिताः तयोः पृथक्स्थभागशोधितभागयोर्मध्ये ये ८ अल्पाः ते ग्राह्यास्ते भृगोः शुक्रस्य त्रि ३ विहृतः त्रिभक्ताः असृजः अक्षैः पंचभि ५ र्भक्ताः भागादि लब्धं ग्राह्यं तत्स्वशीघ्रफलवत् धनर्णं स्पष्टग्रहे देयं तौ भौमशुक्रौ स्फुटौ स्पष्टौ भवतः एवं शीघ्रफलांत्यांकागमे अंत्यांकतुल्यह्रासानुपातात् अंतरं जातं तन्द्वौ भौमशुक्रयोरेवांकबहुत्वादुक्तं अन्येषामप्यंतरमस्ति तत्स्वल्पत्वान्नो

शुक्रारयोश्चलभवोंत्यगतो यदांकः शेषांशकाश्च पतिताः पृथगक्षभूम्यः येल्पा भृगोस्त्रिविहृता असृजोऽक्षभक्ता देयाः स्वशीघ्रफलवत्स्फुटयोः स्फुटौ तौ

क्तं अत्रोपपत्तिः अंत्यांकः पंचषष्ट्यधिकशत १६५ मितशीघ्रकेंद्रभागांते अशीत्यधिकशत १८० भागांते शून्य ० तुल्यः पंचदशभागानां मध्यः सार्द्धाः सप्त ७।३० तेषांतरं भौमस्य १।३० शुक्रस्य २।३० अतो ऽनुपातार्थं सार्द्धसप्तभागाल्पप्रयोजनात् पंचदशशुद्धा भागाः तयोरल्पाः गृहीताः यदि सार्द्धभागैरंतरे भौमशुक्रयोरेते लभ्यंते तदैभिर्भागैः किं उभयत्रापि सार्द्धसप्तहरः स्वस्वांतरे गुणौ गुणहरौ गुणाभ्यामपवर्त्य जातौ हरौ मंगल ५ शुक्र ३ आप्यांते लब्धभागाः भाज्याः फलं शीघ्रफलसंबंधित्वात् स्पष्टयोः शीघ्रफलवद्धनर्णं कार्यमित्युपपन्नं परंतु अनेनापि विशेषफलेन संस्कृतौ भौमशुक्रौ महांतरितौ दृश्येते अंत्यांकबाहुल्यात् अत्र सुधीभिः एकांत्यांकमध्ये त्रीश्चतुरो वा अंकान् कृत्वा शीघ्रफलसिद्धिः कर्त्तव्या फलसाधनार्थं सूत्रं मयोक्तं ॥ कुजसितचपलांकोंत्यस्तदा शेषभागैर्विलंबमितगतांकस्तत्परांकांतरेण ॥ विनिहतनिजेषोपादग्नि ३ भागेनहीनः सप्तदशाविहतः स्यादंशपूर्वं फलं हि ॥१॥ शीघ्रांकाः कुस्कृतस्यगोजिनमिताद्यकेंद्रवोगेंद्रकाः शून्याशाद्विशराश्च खंत्तयपक्षगोस्तर्काश्विरामास्तथा ॥ दस्त्र्यंगाश्विमितागजांबरदृशोब्धीद्रानवाश्वाश्च खं देयं तच्च फलं फलं हि सकलं मंदस्फुटे स्यात् स्फुटः ॥२॥ अथ तत्रैवांत्यांकागमने भौमबुधशुक्रगतीनामपि विशेषमेकवृत्तेनाह ॥ ७ ॥ ७ ॥

कुजेति भौमबुधशुक्राणां शीघ्रांकोयदि अंतिमः स्यात् तदादशभिर्हताशुणितायेपरिशेषांशास्तेनगान्धग्निभक्ताः भौमस्य सप्तभक्ताः बुधस्यापिसप्तभक्ताः शुक्रस्यत्रिभक्ताः यत्फलं कलाद्यं तन्दोमस्य इषुदहनः पंचत्रिंशान्दियुक्तं बुधस्यसप्तगोभिः त्तसनवत्या युक्तं शुक्रस्यत्रिबाणः त्रिपंचाशता ५३ युक्तं तत्तेषां गतेः शीघ्रफलंभवति तदापूर्वंभौमाच्चलांकविवरमित्यादिप्रकारेणानीतं तन्नग्राह्यं अनेनैव फलेनगतिः स्पष्टाचलांकविवरमित्यादिप्रकारेणानकर्त्तव्या। अत्र प्रत्यक्षोपलब्धिरेव वासना ॥१४॥ अथ वक्रमार्गपरिज्ञानार्थं शीघ्रकेंद्रभागान् वृत्तेनैकेनाह ॥ ॥ त्रिनृपैरिति-कुजाद्याः भौमाद्याः पंचग्रहाः क्रमात् एभिः चलकेंद्रभागैः वक्रं वक्रारंभं यांति त्रिनृपैः त्रिषष्ट्यधिकशतेन १६३ शरजि

०	१	२	३	४	५	६
२४१	१९२	१४६	१००	५२	०	भौम
३२६	२६०	२०८	१४४	७१	०	शुक्र

कुजबुधभृगुजानांचेच्चलांकोंतिमस्याद्दशहतपरिशेषांशानगान्धग्निभक्ताः फलमिषुदहनैर्युक्सप्तगोभिस्त्रिबाणैर्भवतिगतिफलंतत्स्यात्तदानैवपूर्वं
॥१४॥ त्रिनृपैःशरजिष्णुभिःशरार्कैःनगभूपैस्त्रिभवैःक्रमात्कुजाद्याः चलकेंद्रलवैःप्रयांतिवक्रंभगणात्तैःपतितैःव्रजंतिमार्गं ॥ १५ ॥ ॥

ष्णुभिः पंचचत्वारिंशदधिकशतेन १४५ शरार्कैः सपादशतेन १२५ नगभूपैः सप्तषष्ट्यधिकशतेन १६७ त्रिभवैः त्रयोदशाधिकशतेन ११३ एतैर्भागैर्भगणात् चक्रभागेभ्यः ३६० पतितैः शेषांशतुल्यस्वभागमार्गं व्रजंतीत्यर्थः अत्रोपपत्तिः ग्रहस्य वक्रारंभेभागारंभेच गतिः शून्यं यदोच्चगतिसमाकेंद्रगतिस्तदेव अत्रग्रहाणांशीघ्रोच्चगतिज्ञानं चास्ति तथास्पष्टकेंद्रगतितुल्यया भवितव्यं अत्रोदाहरणार्थंभौमस्यशीघ्रोच्चगतिः ५९।८ तथा तस्यमध्यमागतिः ३१।२६ केंद्रगतिः २७।४२ इयंतयाशीघ्रफलकोटिज्यया गुण्याशीघ्रकर्णेनभाज्या यथाउच्चगतेःसमास्यात् तच्छीघ्रफलंकस्मात् केंद्रात् सिध्यतीतिविलोमेनशीघ्रकेंद्रंजायते अतस्तेशीघ्रकेंद्रांशाःस्फुटाःउक्ताः तएवचक्रशुद्धाः मार्गस्युः यतश्चक्रमध्येद्विवारंगतेरभावः ॥१५॥ ॥

क्षितिजइति। अथयमः अष्टाविंशत्यंशैः शीघ्रकेंद्रस्य भौमः पूर्वे पूर्वस्यां दिशि उदेति उदयं प्राप्नोति इंद्रैश्चतुर्दशभिः गुरुः रविजः शनिः सप्तचंद्रैः सप्तदशभिः स्वस्वोदयभागसंविहीनैः भगणांशैः कृत्वा अपरत्र पश्चिमायां तेनक्रमेण अस्तं यांतीत्यर्थः अत्रोपपत्तिः पूर्ववत् कक्षानीचोच्चवृत्तप्रतिमंडलानि विनिर्दिशेत् भौमगुरुशनीनां रविः शीघ्रोच्च बुधशुक्रयोरपिसाधितमस्ति अतोरवेः समसूत्रस्थोयदा ग्रहोभवति तदापरमोस्तमयः यदाद्यंतौ कालांशौभवतः अतएवोदयास्तमये रवेरस्तमनानंतरं ग्रहोदृश्यते शीघ्रत्वात् रविरस्तमासादयति तेनपश्चादस्तः उदयेशीघ्रत्वात् रवेरुदयात् प्रथमंदृश्यते तस्मात् प्रागुदयइत्युपपन्नं बुधशुक्रौ तु वक्रिणौ पश्चादस्तं व्रजतः तयोर्विलोमगतित्वाद्रवेः प्राग्गतित्वाच्च अतएववक्रिणोः प्रागुदयः तयोरपरगतित्वाद्रवेः प्राग्गतित्वात् यदाधिकगतीभवतस्तदाशीघ्रत्वात् रविमासादयतः तस्मात्पूर्वास्तः तावेवशीघ्रगतित्वात् सूर्यस्याग्रतोगच्छतः अतएवास्तंगतेऽर्के पश्चिमायां तयोरुदयः उदयास्ताध्याये येकालांशाः उक्ताः स्पष्टार्कात्तदंशांतरिते ग्रहे उदयोऽस्तोवास्यात् स स्थूलः इह य

क्षितिजोऽथयमैरुदेतिपूर्वेगुरुरिंद्रैः रविजस्तुसप्तचंद्रैः स्वस्वोदयभागसंविहीनैर्भगणांशै ३६०रपरत्रयांतिचास्तं ॥१६॥
खशरैश्चजिनैः परेज्ञभृग्वोरुदयोऽस्तोऽक्षदिनैर्नगाद्रिभूमिः उदयोऽक्षनरवैस्त्र्यहींदुभिःप्रागस्तोदिगदहनैश्चषड्गुरैःस्यात्॥१७॥

च्छीघ्रकेंद्रमुक्तं तन्मंदस्पष्टमध्यार्कांतरंस्यात् यथा भौमस्याष्टाविंशतिभागैः एकादशभागाः फलं तैरधिकोभौमोर्काद्यावच्छोध्यते तावत्सप्तदशभागा १७ भवंति अतउक्तावत् केंद्रेउदयः एभिश्चक्रशुद्धैरस्तः स्यात् यतोऽत्रैभिर्भागैः ३३२ फलमेकादश भागाः तैरधिकोर्काद्यावच्छोध्यते तावत्सप्तदशभागांतरंस्यात् एवं सर्वेषां ॥ अथबुधशुक्रयोरुदयास्तकेंद्रांशानेकवृत्तेनाह ॥१६॥ खशरैरिति परेपश्चिमायांदिशिज्ञभृग्वोः बुधशुक्रयोरुदयः खशरः ५० जिनः २४ क्रमात्स्यात् तत्रैवास्तं अक्षदिनैः पंचपंचाशदधिकशतमितैः १५५ नगाद्रिभूभिः सप्तसप्तत्यधिकशतमितैः १७७ प्राक्पूर्वदिशितयोरुदयः अक्षनखैः पंचाधिकशतद्वयेन २०५ त्र्यहींदुभिः त्र्यशीत्यधिकशतेन १८३ तत्रास्तः दिग्दहनैः दशाधिकशतत्रयेण ३१० षड्गुरैः षट्त्रिंशदधिकशतत्रयेण ३२६ स्यादित्यर्थः अत्रोपपत्तिः पूर्वमेवप्रतिपादिता। इदानींवक्रमार्गादिदिनज्ञानमेकवृत्तेनाह ॥१७॥ ७ ॥ ७॥

वक्रोदयादिति वक्रोदयास्तमार्गाणां येगदितांशा उक्तकेंद्रशीघ्रभागाः तेभ्यः अधिकाअल्पाइष्टदिने येकेंद्रभागाः स्युस्तदा तेक्षितिसुतात एभिर्हरैर्भाज्याः इष्टकेंद्रांशोक्तकेंद्रांशांतरांशाः भौमस्य द्विहताबुधस्य त्रिभक्ताः गुरोः साकांशकाः सनवमांशाः शुक्रस्य दशाहताः संतोंगैः षड्भि ६ र्हताभक्ताः शनेः कुभक्ता अविकृता एव आसैर्लब्धैर्दिवसैर्वक्राद्यं वक्रोदयमार्गादिकं गतैष्यं स्यात् चेदिष्टकेंद्रांशाउक्तेभ्यो ऽधिकास्तदागतं अल्पास्तदा गम्यमित्यर्थः अत्रोपपत्तिः सुगमातथापि किंचिदुच्यते उक्तशीघ्रकेंद्रतुल्यं यदाशीघ्रकेंद्रं स्यात्तत्काले उदयास्ताद्यं स्यादेवं ऊनाधिके ऽनुपातः यदिशीघ्रकेंद्रगतिकलाभिरेकं दिनं तदांतरभागकलाभिः किमतोंतरभागानां कलार्थं सर्वत्र षष्टिर्गुणः स्वकेंद्रगतिर्हरः तत्राचार्येण लाघवार्थं स्वल्पांतरत्वात् शीघ्रकेंद्रगतयोमध्यमा एव गृहीताः तत्रभौमस्य शीघ्रकेंद्रगतिः २७।४२ अत्रगुणहरौ हरेणापवर्त्यजातोगुणः २ बुधशीघ्रकेंद्रगतिः १८९।२४ गुणहरौ गुणेनापवर्त्य जातोहरः ३ गुरोः ५४ गुणहरौ षड्भिरपवर्तितौ गुणः १० हरः ९ योराशिर्दशभिर्गुण्यते नवभिर्भज्यते स स्वनवमांशाधिक एव भवति एवंशुक्रस्यशीघ्रकेंद्रगतिः ३७ अत्रगुणहरौ षड्भिरपवर्त्य गुणः १० हरः ६ अतो दशाहतांगहृताः एवंशनेः शीघ्रकेंद्रगतिः ५७।८ गुणहरयोः साम्यात् कुभक्ताइति लब्धैर्दिनैर्वक्राद्यं गतैष्यं स्यादित्युपपन्नं ॥१८॥ अथ बुधशुक्रयोर्मध्यमानि वक्रमार्गोदयास्तादिनानि सिद्धान्त्येकवृत्तेन वदति ॥ ॥पूर्वास्तादिति। पूर्वास्तात् परे पश्चिमा

वक्रोदयादिगदितांशकतो ऽधिकाल्पाः केंद्रांशकाः क्षितिसुतात् द्विगुणास्त्रिभक्ताः साकांशकादशहतांगहृताः कुभक्ताः वक्राद्यमासदिवसैः क्रमशो-
गतैष्यं ॥१८॥ पूर्वास्तादुदयः परे नृजुगतिस्तोयास्तमैंद्र्युद्गमोमार्गो ऽस्तोत्रचदंतदंतदहनाष्टाज्याशादंतैर्दिनैः चांद्रेस्तत्सरतत्सरन्त्वथभृगोस्तद्द्विमा
स्यात्ततो। ऽष्टाभिर्व्यंघ्रियुगांघ्रिणाविचरणैकेनाष्टमासैः क्रमात् ॥१९॥

यामुदयः ततो ऽनृजुगतिर्वक्रं ततस्तोयास्तंपश्चिमास्तं ततः ऐन्द्र्युद्गमः ततोमार्गः ततः पूर्वास्तः चांद्रेः बुधस्य तत्सर तत्परं एभिर्दिनैर्यथाक्रमंस्यात् एतैः कैस्तानेवाह दंता द्वात्रिंशत् ३२ पुनस्त एव ३२ दहनास्त्रयः ३ अष्टिः षोडश १६ अज्याशाः अग्नयस्त्रयः ३ दंताद्वात्रिंशत् ३२ एभिर्दिनैरिति अथभृगोः शुक्रस्य तद्वत् तेनैव क्रमेणैभिर्दिनैरुदयाद्यंस्यात् द्विमास्या मासद्वयेन ततोऽष्टाभिरष्टमासैर्व्यंघ्रिकृवा द्वाविंशतिदिनैः अंघ्रिणादिनाष्टकेनविचरणैकेन द्वाविंशतिदिनैः अष्टमासैः अत्रोपपत्तिः पूर्वास्तशीघ्रकेंद्रांशाः पश्चिमोदयशीघ्रकेंद्रांशकेभ्योयावदंतरितास्तावदंशानांकलाः केंद्रगतिभक्ताः दिनानिस्युः। एवं वक्रमार्गादीनामपितत्तत्केंद्रांतराद्दिनानि स्युरित्युपपन्नं ॥ अथभौमगुरुशनीनामुदयास्तवक्रमार्गादिनानि वृत्तेनाह ॥१९॥ भौमस्येति भौमस्य अस्तात् उदयः ततः कुटिलंवक्रंततः ऋजुत्वं मार्गत्वं मौढ्यमस्तं इदं क्रमात् स्यात् मासैर्वेदैश्चतुर्भिः ४ अथदश १० मितैर्लोचनाभ्यांद्वाभ्यां २ दिग्भिर्दशभिः १० इतिजीवस्यगुरोस्तदेवास्ताद्यं उर्व्या एकमासेन सचरणयुगैः सपादचतुर्मासैः सागरैश्चतुर्भिः सांघ्रि

ग्र॰ ला॰ वेदैः सपादचतुर्भिस्तथार्कैः सांघ्र्यैकेन सपादैकमासेन अर्द्धयुक्तैस्त्रियुगदहनैः सार्द्धत्रिभिः सार्द्धचतुर्भिः सार्द्धत्रिभिः क्रमात्स्यादित्यर्थः एतानि मध्यमानि स्पष्टानि तेभ्यः किंचिदूनाधिका टी॰
१९ नि भवंति स्थूलत्वेन जनव्यवहारार्थमेतान्युक्तानि अत्रोपपत्तिः पूर्वमेव प्रतिपादिता ॥ दैवज्ञवर्यस्य दिवाकरस्य सुतेन मल्लारिसमाह्वयेन ॥ टीकाकृतायां ग्रहलाघवस्य जातः कुजादिस्फुटता
धिकारः ॥२०॥ इति श्रीसकलागमाचार्यवर्यगणेशदैवज्ञकृतग्रहलाघवस्य टीकायां दैवज्ञवर्यदिवाकरात्मजमल्लारिदैवज्ञविरचितायां भौमादिस्पष्टीकरणाधिकारस्तृतीयः ॥३॥ अथ त्रिप्रश्ना
ध्यायो व्याख्यायते ॥ ॥ त्रयः प्रश्ना अत्राधिकारे कथ्यंत इति त्रिप्रश्नः ते के दिग्देशकालास्तेषां परिज्ञानमिति दिग्देशकालादिभिरिष्टसमयादिकमवबुध्यते तदुच्यते तत्रादौ लग्नोपयोगित्वाल्लं
कोदयास्तेभ्यः स्वदेशीयकरणं चैकवृत्तेनाह ॥ ॥ लंकोदया इति। एते विघटिकाः पलात्मकाः लंकोदयाः स्युस्तानेवाह गजभानि अष्टसप्तत्यधिकशतद्वयं २७८ गोकदस्राः एकोनत्रिं
शती २९९ त्रिपक्षदहनाः त्रयोविंशत्यधिकत्रिशती ३२३ एते मेषादीनां त्रयाणां त एवोत्क्रमस्थाः कर्कादित्रयाणां एते चरदलैः स्वदेशीयचरखंडकैः क्रमगोत्क्रमस्थैः हीनान्विताः कार्याः क्रम

भौमस्यास्तादुदयकुटिलर्जुत्वमौढ्यं क्रमात्स्यान्मासैर्वेदैरथदशमितैर्लोचनाभ्यां च दिग्भिः जीवस्योर्व्यासचरणयुगैः सागरैः सांघ्रिवेदैः सांघ्र्येकेन त्रियुगदहनैर
र्द्धयुक्तैस्तथार्कैः ॥२०॥ लंकोदया विघटिका गजभानि गोकदस्रास्त्रिपक्षदहनाः क्रमगोत्क्रमस्थाः हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थैर्मेषादितो घट
तउत्क्रमतस्त्विमे स्युः ॥१॥

स्थैः त्रिभिः क्रमस्थास्त्रयो हीनाः उत्क्रमस्थैस्त्रिभिरुत्क्रमस्थास्त्रयो युक्ताः संतो मेषादितो मेषमारभ्य षण्णां राशीनामुदयाः स्युः एत एवोत्क्रमतो घटतस्तु
लातः षट् उदयाः स्युरित्यर्थः अत्रोपपत्तिः क्रांतिवृत्ते क्षेत्रविभागेन द्वादश राशयस्तुल्यप्रमाणा एव भवंति नाडीवृत्ते कालांशविभागेन सर्वे राशयः उदयंति निरक्षे तन्नाडीवृत्तं समपूर्वा
परं सममंडलवद्भ्रमति क्रांतिमंडलं च दक्षिणोत्तरतस्तिरश्चीनमुदेति क्रांतिवृत्तस्थो मेषो यावत्तिरश्चीन उदेति तावद्विषुवद्वृत्तेष्टाविंशतिभागाः किंचिन्न्यूना एवं सर्वेपि साधनोपायो य
था सिद्धांतोक्तबृहज्ज्यायैव मेषादीनां त्रयाणां स्वक्रांत्यग्रेषु त्रीणि स्वाहोरात्रवृत्तानि विषुवत् उत्तरतो बध्नीयात्। तथा तुलादिकानां विषुववृत्ततो दक्षिणतस्त्रीणि स्वाहोरात्रवृत्ता
नि स्वक्रांत्यग्रेषु बध्नीयात् तत्क्रांतिमंडले मेषांते सूत्रस्यैकं अग्रं बध्वा द्वितीयमग्रं मीनादौ बध्नीयात् एवं वृषमिथुनांतयोः सूत्राग्रे बध्वा तयोर्द्वितीयाग्रके कुंभमकरादौ बध्नीया
त् तेषां सूत्राणां यान्यर्द्धानि तानि क्रमेण मेषवृषमिथुनांतानां जीवास्त एव मीनकुंभमकराणां ततस्ताभिः कर्कटसूत्राद्विषुवत्कल्पनं मध्ये त्रीणि वृत्तानि कृत्वा निष्पादयेत्- १९
तत्र स्वजीवाकर्णः स्वक्रांतिज्यायाम्यांतरा भुजः कोटिरूर्ध्वाधरा न ज्ञायते मेषवृषयोः मिथुनज्यया यद्वृत्तमुत्पद्यते तद्याम्योत्तरवृत्तमेव भवति तत्रैवोर्ध्वाधरा कोटिः स्वाहोरात्र

व्यासार्द्धतुल्या भवति मेषवृषयोरूर्ध्वाकोटिः स्वाहोरात्रेन ज्ञायते तत्परिज्ञानायानुपातद्वयं तद्यथा यदि मिथुनज्या त्रिज्याकर्णस्य मिथुनस्वाहोरात्रवृत्तव्यासार्द्धतुल्योर्ध्वाधरकोटिस्तदा मेषज्याकर्णेन केति ततो व्यासार्द्धवृत्तपरिणामाय द्वितीयं त्रैराशिकं यदि मेषस्य स्वाहोरात्रवृत्ते एतावती कोटिस्तदा त्रिज्यावृत्ते किमिति एवं प्रथमं त्रिज्यागुणो नंतरं हरस्तुल्यत्वात्तयोर्नाशे कृते मिथुनस्वाहोरात्रव्यासार्द्धस्य मेषज्यागुणः मेषस्वाहोरात्रवृत्तव्यासार्द्धं हरः फलं मेषस्य वृत्ते व्यासार्द्धे ऊर्ध्वाकोटिः एवं वृषमिथुनयोः कोटीसाध्ये कोटिफलानां ज्यारूपाणां धनूंषि कर्त्तव्यानि यतो वृत्तगत्या क्रांतिमंडलमुदेति अतो धनुःकरणं मिथुनकोट्या उदयंत्या मेषवृषावप्युदयतः अतो वृषचापं मिथुनचापाद्विशोध्यते मिथुनोदयप्राणाः स्युः मेषोदयप्राणा यथागता एव ते चैते मेषे १६७० वृषे १७९५ मिथुने १९३५ एते षड्भक्ताः पलानि स्युः यतः षड्भिरसुभिरेकं फलं एवं जाता गजभानीत्यादयः मेषज्याकर्णः सन्निहितत्वात् मेषकोट्या उदेति वृषज्याकर्णः किंचिद्विप्रकृष्टत्वात् महत्या वृषकोट्या उदेति मिथुनज्याकर्णो विषुवन्मंडलादतिदूरे स्थितत्वात् तिर्यक्त्वेनातिमहत्या मिथुनकोट्या उदेति ततो मिथुनांतादिष्यां कर्कगद्यंतौ समावतो मिथुनोदयप्राणाः कर्कोदयः स्यात् एवं वृषमेषांतादिष्यां सिंहकन्याद्यंतौ समौ अतो वृषमेषसमौ सिंहकर्कौ द्वितीयमंडलार्द्धस्य विषु

तत्कालार्कः सायनः स्वोदयघ्नाभोग्यांशाः खत्र्यु३०द्धृताभोग्यकालः ॥

यतो दक्षिणेन स्थितत्वात् मेषाद्युदयानामुत्क्रमेणोदयप्राणास्तुल्यादिशुभवंति एवं निरक्षदेशे अन्यथा यदि विषुवद्वृत्ते राशयः स्युस्तदा पंच घटिका राश्युदयाः स्युः राशयश्चापमंडले तस्माद्भिन्नप्राणा राश्युदया निरक्षे स्युः एतत्सर्वं यथास्थिते निरक्षगोले दर्शयेत् ॥ अथ स्वदेशोदयोपपत्तिः अक्षवशाद्विषुवद्वृत्तमपि तिर्यग्भवती तद्वशान्मेषादीनां स्वाहोरात्राण्यपि तिर्यग्भवंति अतो मेषादयः स्वचरार्द्धैर्वियुज्यंते मेषादयस्तिर्यक्कर्णरूपाः कर्णाच्च कोटिरल्पा स्यात् क्रमाच्चरदलहीनाः स्वदेशोदयाः स्युः अतो विषुवन्मंडलपादेन चरदलहीनेनायमपद्वृत्तपादः प्रथमं उदेति कर्कादयः व्यस्तैः चरदलैर्युक्ताः क्रियंते यतस्तेषां विपरीतं तिर्यक्त्वं । ते उत्क्रमचरखंडयुक्ताः कर्कादीनां त्रयाणामुदयाः स्युरिति अतः क्रांतिवृत्तपादो द्वितीयश्चरदलयुक्तेन विषुवद्वृत्तपादे नोदेतीत्युपपन्नं द्वितीयपादवत्तृतीयः प्रथमवत् चतुर्थोपि वृत्तपाद उदेति उक्तं च भास्करीये सिद्धांते मेषाद्यैर्मिथुनांतान्नाडीभिस्तिथिमिताभिरुद्गलये लगति कुजे तदधःस्थे प्रथमं ताभिश्चरोनाभिः १ कन्यांताद्धनुषोंतस्तिथिमितनाडीभिरुद्गते लगति कुजे चोर्ध्वस्थे पश्चात्ताभिश्चराढ्याभिः २ एवमत्र संक्षिप्तोदयोपपत्तिर्विस्तरभयादुक्ता ॥१॥ अथ लग्नसाधनमाह ॥ यस्मिन् काले लग्नं साध्यते तत्कालीनः सूर्यः सायनः अयनांशयुक्तः कार्यः अस्य

सूर्यस्य राशिवशाद्यः स्वदेशीयः उदयस्तेन भोग्यांशाः रवेःस्त्रिंशतच्युताः भुक्तभागाः गुण्याः ते स्वत्र्युद्धृतास्त्रिंशद्भक्ताः संतः कालाद्योरवे भोग्यकालः स्यात् एवं अमुनैव प्रकारेण सायनस्य यातांशैः भुक्तभागैर्यातकालो भुक्तकालः स्यात् स यथा उदयगुणाभुक्तभागास्त्रिंशद्भक्ताः ॥ इति लग्नभुक्तकालार्थमिदमुक्तं भोग्यः कालः इष्टघटीनां पलेभ्यः शोध्यः ततः किंविधेयमित्यत आह ॥२॥ तदनु तदनंतरं ग्रहोदयान् तदग्रराश्युदयान् तस्मात्कालात् जहीहि यावंतः शुध्यंति तावतः शोधयेदित्यर्थः पश्चेषं तत् गगनगुणघ्नं त्रिंशद्गुणं अशुद्धोनोदयेन हृतं भक्तं लवाद्यं भागाद्यं यल्लब्धं तत् अजादिगृहैः अशुद्धपूर्वैः सहितं अशुद्धोदयतः पूर्वं यावंतो मेषादयो राशयस्तेन स्यूर्ध्वस्थाने स्थाप्याः तदयनांशहीनं सत् तात्कालिकं राश्यादिकं लग्नं भवतीति व्याख्या ॥ अत्रोपपत्तिः सुगमा क्रमसिद्धा तथापि किंचिदुच्यते अभीष्टकाले यः क्रांतिमंडलप्रदेशः क्षितिजे लग्नस्तल्लग्नमित्युच्यते उक्तं च सिद्धांते यत्र लग्नमपमंडलं कुजे तद्गृहाद्यमिह लग्नमुच्यते तच्च लग्नमवधेः साध्यं अवधिस्तु रविः तस्य मंडलेस्थि

एवं यातांशैर्भवेद्यातकालो भोग्यः शोध्योभीष्टनाडीपलेभ्यः ॥२॥
तदनु जहीहि ग्रहोदयांश्च शेषं गगनगुणघ्नमशुद्धहृल्लवाद्यं ॥
सहितमजादिगृहैरशुद्धपूर्वैर्भवति विलग्नमदोऽयनांशहीनं ॥ ३॥

तस्मात् सदैव रव्युदये रविरेव लग्नं तस्य पूर्वगतित्वेन तात्कालिकं क्रियते प्रवहाक्षिसमपमंडलं इष्टघटीषु प्रत्यक्चलितं तदा क्षितिजेऽपमंडलप्रदेशो लग्नस्तत्र ज्ञानायोपायः सायनार्केण यद्भोग्यं तत्र कालः साध्यते यदि त्रिंशद्भागैः ३० रव्याक्रांतोदयपलानि लभ्यंते तदा भोग्यभागैः किमिति एवं सत् भोग्यपलानि इष्टघटीपलेभ्यः शोध्यानि ततो यच्छेषं तस्मादुदयाः शोध्याः यावंतः शुध्यंति तावंतः राशयः रवौ योज्याः यतो रविराशितोग्रे लग्नस्यैतावंतो राशयो जाताः ते तु अशुद्धपूर्वा मेषादयो राशय एव भवंति शुद्धशेषपलेभ्योंशानयनवासना सुगमा तद्यथा यदि अशुद्धोदयपलैस्त्रिंशद्भागाः लभ्यंते तदा शेषपलैः किमिति फलं भागादि तदशुद्धपूर्वमेषादिराशियुक्तं लग्नं स्यादेव तत्रायनांशहीनाः कार्याः यतः पूर्वं योजिताः संति पूर्वमुदयग्रहणार्थं अयनांशा योज्या एव यतः सर्वाणि विषुवायनचिन्हानि सायनान्येव ॥ अथ भोग्याल्पकाले लग्नसाधनमाह ॥३॥

भोग्यतो भोग्यकालन्नः अल्पेष्टकालात् खरामाहतात् त्रिंशद्गुणात् स्वोदयेन स्वराश्युदयेन हतात् तस्माद्ये आप्तांशाः लब्धभागास्तद्युक्तोभास्करस्तनुर्लग्नंस्यात् अत्रोपपत्तिः यद्युदयपलैः त्रिंशद्भागास्तदेष्टकालपलैः किमिति सुगमा ॥ अथलग्नादिष्टकालसाधनमाह अर्कभोग्यइति अर्कस्य सायनस्य योभोग्यकालः सः तनोर्लग्नस्य सायनस्य भुक्तकालेन अन्वितः युक्तः ततः युक्ताः मध्योदयाः यत्र स तथा सूर्यस्यराश्युदयादग्रे लग्नराश्युदयात्पूर्वं तउदयास्तद्युक्तः सन् अभीष्टकालोभवेदित्यर्थः अत्रोपपत्तिः इष्टकाले सूर्यादुदयपर्यन्तं इष्टकालोवर्तते रविभोग्यभागानां कालस्तदग्रतो राश्युदयास्ततस्तनुभुक्तकाले तेषां योगइष्टकालो भवतीति सुगमं प्रत्यक्षंगोलेन्वहदृश्यते अथसूर्यलग्ने यदैकराशिस्थे तदेष्टकालानयनमाह ॥४॥ ॥ यदि सायनौ लग्नसूर्यौ एकराशिस्थौ तदा तदंशानां तद्भागानां यदंतरं तेन हतो गुणितो यः स्वोदयः स खाग्निहृत्त्रिंशद्भक्तः इष्टकालः स्यात् इन

भोग्यतोल्पेष्टकालात्खरामाहतात्स्वोदयाप्तांशयुग्भास्करः स्यात्तनुः अर्कभोग्यस्तनोर्भुक्तकालान्वितोयुक्तमध्योदयोभीष्टकालोभवेत् ॥ ४ ॥ ॥·
यदि तनुदिननाथावेकराशौ तदंशांतरहतउदयः स्यात्खाग्निहृत्त्विष्टकालः इनतउदयऊनश्चेत्ससोध्योद्युरात्रान्निशितुसरसभार्कात्स्यात्तनूरिष्टकाले ५

तः सूर्यादुदयोलग्नं चेदूनंतदा सकालः तदंशांतरहत उदयइत्यादिना साधितः कालइत्यर्थः द्युरात्रात्षष्टेः शोध्यः एतदुक्तंभवति अर्कोदयात्पूर्वंकिललग्नमर्कादूनं भवति तत्र कालानयने सायनौ लग्नार्कौयदि भिन्नराशिस्थौ भवतस्तदार्कभोग्यस्तनोर्भुक्तकालान्वित इत्यनेनकालं साधयेत् यदि चैकराशिगौ तदा तदंशांतरहत उदय इत्यादिना कालः समायाति रात्रिशेषः अर्कोदयात् घटिज्ञानार्थं सषष्टेः शोध्यः रात्रिगत घटिज्ञानाय रात्रिमानाद्वा शोध्यः अतएवाहुः शोध्योद्युरात्रादथवारजन्याइति। निशिरात्रौ सरसभार्कात्सषड्भसूर्यात् इष्टकाले तनूर्लग्नं स्यादिति अत्रोपपत्तिः यदित्रिंशद्भिर्भागैः सूर्याधिष्ठितोदयपलानि तदा तयोरंतरांशैः किमिति फलमिष्टकालः स्यात् सूर्याल्लग्नेऊने सूर्योदयात्पूर्वमेव भविष्यति ॥ अतः सफलः षष्टिशुद्धइत्युक्तं रात्रौ लग्नसाधनार्थंरविः सषड्भः कार्यएव यतः प्रागपरत्वक्षितिजयोरंतरे षड्राशयः एवभवंति अत् उदयलग्नं षड्राशियुक्तं अस्तलग्नंभवति यत्

उक्तं सिद्धांते योऽभ्युदेति सममथेन येन तद् सममोस्तमुपयाति तेन च ॥ अथ गोलायनकथनं दिनरात्रिपलांशसाधनमेकवृत्तेनाह ॥५॥ खेचरे सायने ग्रहे क्रियधटरसभे सौम्ययाम्यौ गोलौस्तः मेषादिषड्राशिस्थे उत्तरगोलः तुलादिषड्राशिस्थे दक्षिणगोलः नक्रात् षड्भे मकरादिषड्भे उत्तरायणं कर्कात् षड्भे दक्षिणायनं अत्रोपपत्तिः क्रांत्यभावो यत्र स गोलादिः क्रांत्यभावः सायनभुजाभावे भुजाभावो मेषादौ तुलादौ अतस्तौ गोलसंधी मेषादिषड्राशयः भचक्रे उत्तरार्द्धे संस्थिता उत्तरगोलः तुलादयो दक्षिणार्द्धेतः स दक्षिणगोल इति यत्र परमक्रांतिः स्तु भुजपरमत्वे भुजपरमं त्वं च कर्कादौ मकरादौ च भवत्यत स्तावयनसंधी अथ दिनरात्री साधयति पंचेंदुनाड्यः पंचदशघटिकाः गोलयोः चरपलयुतोनाः उत्तरगोले युक्ताः दक्षिणगोले हीनाः तत् घस्रार्द्धं दिनार्द्धं स्यात् तेन अयुताः खगुणाः त्रिंशत् निशार्द्धं रात्रिदलं स्यात् ते द्विगुणे दिनरात्रिमाने भवत इत्यर्थत एवं सिद्धं अत्रोपपत्तिः निरक्षदेशे अहोरात्रवृत्ते उन्मंडलात् याम्योत्तरवृत्तसंपातं यावत्सदा पंचदशघटिकाः भवंति क्षितिजोन्मंडलयोरेकत्वात् तथा प्रवहाक्षिप्तचक्रस्य समपूर्वापरभ्रमणत्वात् अन्यदेशे क्षितिजोन्मंडलयोर्भिन्नत्वात् तदंतरविनाडीभिः ऊनाधिकाः पंचदशघटिकाः संभवंति उन्मंडलक्षितिजयोरंतरं चरं उक्तं च भास्कराचार्येण उन्मंडलक्ष्मावलयांतराले द्युरात्रवृत्ते चरखं

गोलौस्तः सौम्ययाम्यौ क्रियधटरसभे खेचरे सायने तेन क्रात् कीटाच्च षड्भेथ चरपलयुतोनास्तु पंचेंदुनाड्यः घस्रार्धं गोलयोः स्यात् तदयुतखगुणाः स्यान्निशार्द्धं त्व
थाक्षच्छायेषुघ्न्यक्षभायाः कृतिदशमलवोनायमाशा पलांशाः ॥६॥

इकाल इति उत्तरगोले उन्मंडलादधः क्षितिजं स्थितं तस्माच्चरेणाधिकाः पंचदशघटिकाः क्रियंते तद्दिनार्द्धं स्यात् याम्ये तु उन्मंडलादूर्ध्वं क्षितिजं तस्मात्तदूना एवं दिनदलं स्यात् ततस्तत् त्रिंशच्छुद्धं रात्रिदलं स्यादेव ते द्विगुणे दिनरात्रिमाने क्षितिजादस्तक्षितिजं यावत् अहोरात्रवृत्ते यावत्यो घटिकास्तावद्दिनं क्षितिजादौ विभागादस्तक्षितिजपर्यंतं रात्रिमानं तत्सर्वं गोलोपरि दर्शयेत् वासनामात्रमुक्तं अथेति अक्षछाया पलभा इषुघ्नी पंचगुणा अक्षभायाः कृतेः वर्गस्य योदशमलवस्तेन ऊना सती यमाशा या दक्षिणादिशः पलांशाः अक्षांशाः स्युः अत्रोपपत्तिः यदि फलकर्णे पलभा भुजः तदा त्रिज्या कर्णे कः फलमक्षज्या तद्धनुरक्षांशाः जाताः धनुरानयनवासना पूर्वोक्तैव अत्रैकांगुलां पलभां प्रकल्प्य अक्षांशाः साधिताः ४।५४ यद्येकांगुलया पलभया एते तदेष्टया कः इति एभिः पलांशाः गुण्या इत्यत्रैषां पंचैव गृहीताः अतः पंचगुणपलभा पलांशा इति अधिकं खंडं गृहीतमिदं ०।६ इदं पलभावर्गस्य दशमांशेन समं अतस्तदूना एव कार्याः अधिकस्य गृहीतत्वात् ते सदा दक्षिणा एव यतो लंकातः उत्तरे सममंडलान्नाडिकामंडलं दक्षिणत एव सदा वर्त्तते लंकातो दक्षिणे मनुष्यसंचार एव नास्ति अतस्ते नोक्ताः अथ नतोन्नतसाधनमाह ॥६॥ ७ ॥ ७ ॥ ७ ॥

प्राक्पूर्वकालेयातः युक्तः कालः उन्नतः स्यात् अपरत्र पश्चिमकपाले शेषउर्वरितः उन्नतकालः स्यात् तेनऊनं द्युखंडंदिनार्द्धं नतः कालः स्यात् अत्रोपपत्तिः दिनकरकरनिकरनिहततमसोनभसोवृत्ताकारतेव प्रतिभासते तस्य याम्योत्तरवृत्तमवधिंकृत्वा द्वे कपाले परिकल्पिते तत्र यतस्थोरविरुदयं यातितत्पूर्वकपालं यत्रास्तमुपयाति तत्पश्चिमकपालं यतोरविरेवपूर्वादिदिगभिव्यंजकः ततः पूर्वक्षितिजाद्यावताभीष्टकालेन रविरुन्नतस्तावानुन्नतकाल इत्यभिधीयते अपरकपालेस्तक्षितिजाद्यावान् शेषकालः सउन्नतकालः स्यात् उन्नतंकालं दिनार्धादपास्ययः शेषकालः तेनरविर्मध्यान्हतोन्नतोभवति अपरकपाले रविदिनार्द्धयोरंतरे यः कालः स एवनतो भवति मध्यान्हाद्रवेस्तावता कालेन नतत्वादिति अथाक्षकर्णसाधनमाह अथअक्षछायायाः पलभायाः योवर्गस्तस्य तत्वांशाः पंचविंशत्यंशाः तेनयुक्ताः मार्तंडाः द्वादशअंगुलाद्यः अक्षकर्णः स्यात् अत्रोपपत्तिः पलभाभुजः द्वादशांगुलशंकुः कोटिः पलकर्णः कर्णएवंपलभा वर्गोद्वादशवर्गयुक्तः तस्यमूलं पलकर्णः स्यात् अत्रैकांगुलपलभायां जातः पलकर्णः १२।२।२४ अस्माद्द्वादश

यातःशेषःप्राक्परत्रोन्नतःस्यात्कालस्तेनोनंद्युखंडंनतंस्यात् अक्षछायावर्गतत्वांशयुक्ता मार्तंडाःस्यादंगुलाद्योक्षकर्णः ॥७॥ वेदेशाःशरहृच्चराढ्य
रहिताः सौम्यानुदग्गोलयोर्हारोथोघटिकार्द्धयुक्नतकृतेर्द्व्यंशः समाख्यास्मृतः चेत्सार्द्धत्रिकुतोनतं यदधिकं वेदाहतं तद्द्वियुक् स्पष्टोसौतदयुक्हरस्त्वभि
मतः स्यादक्षकर्णोधृतः ॥८॥

विशोध्यशेषं ०।२।२४ इदंपलभावर्गतत्वांशतुल्यं अतस्तद्युक्ताः द्वादशपलकर्णाः स्यादित्युपपन्नं अथेष्टछायासाधनार्थं हारमाह ॥७॥ वेदेशा चतुर्दशाधिकशततमिताः शरहृच्चरेण पंचभक्तचरेणसौम्यानुदग् गोलयोः आढ्यरहिताः उत्तरगोलेयुक्ताः दक्षिणेरहिताः संतः हारः स्यात् अथहारकथनानंतरं घटिकार्धयुक् त्रिंशल्लवयुक् यन्नतं तस्य याकृतिः तस्याः योद्व्यंशः अर्द्धांशः समाख्यः स्मृतः अत्रोपपत्तिः अत्रगोले अहोरात्रवृत्ते क्षितिजसंपातयोर्बद्धं सूत्रं तदुदयास्तसूत्रं एवमुन्मंडलसंपातयोर्बद्धं तदहोरात्रव्याससूत्रं तदुदयास्तसूत्रयोः अंतरं कुज्यैव अथ याम्योत्तरवृत्तसम्पातयोर्बद्धं तन्मितं तस्य व्याससूत्रं तयोर्व्याससूत्रयोर्यः संपातस्तस्मादुपरितनंखंडं द्युज्या सा उत्तरगोले अधस्तनयाकुज्यया युता यावत् क्रियते तावद्दिनार्द्धे अर्कोदयास्तसूत्रयोरंतरंस्यात् दक्षिणेतु कुज्यया हीना यतः तत्रोदयास्तसूत्रादधः कुज्या यदर्कोदयास्तसूत्रयोरंतरं सान्त्यहृतिरित्युच्यते एवमंत्यापि चरज्यया त्रिज्यायुतोनादिनार्द्धान्त्यास्यात् अहोरात्रव्यासार्द्धं त्रिज्यातुल्यैरंकैरंक्यते तावत् त्रिज्यातुल्यं भवति तैरंकैर्यावत् कुज्या गुण्यते तावच्चरज्यातुल्याभवति अतश्चरज्ययात्रिज्यायुतोनान्त्यासंज्ञाभवति नान्त्याहृत्योः क्षेत्रसंस्थानभेदः किंतु अंकानां गुरुलघुता

त् केवलः संख्याकृतोभेदइत्युपपन्नं तत्र तावत् अंत्यार्थं चरज्यासाध्या सा यथा चरपलानि षष्टिभक्तानि नाड्यः स्युः ताः षड्गुणाः भागाः स्युः तेद्विगुणाः जीवा अत्र चरपलानांहरः ६० गुणहृयघातोगुणः १२ गुणहरयोर्गुणेनापवर्त्तितयोः लब्धाः पंच अत उक्तं शरत्हृच्चरेणेति शरत्हृच्चरं चरज्या जाता तया त्रिज्यासौम्ययाम्यगोलयोः क्रमेण युतोनाकार्या अत्राचार्येण त्रिज्यावेदेशमिता धृता अतोवेदेशाइति एवंजातादिनार्द्धांत्या तस्याः हरसंज्ञाकृता इयंदिनार्द्धांत्या नतोत्क्रमज्यया हीना सतीष्टांत्या स्यत् एवमत्र नतोत्क्रमज्या घटिकार्धयुक्तस्य नतस्य वर्गेण दलितेन तुल्या भवती। अत्रप्रतीत्यर्थं कल्पीतं नतं ।५। इदं षड्गुणमंशाः ।३०। एषां खार्के ।१२०। मिते व्यासार्द्धे उत्क्रमज्या ।१६। यदिखार्के मिते व्यासार्द्धे इयं तदा वेदेरतुल्ये केतिजाताः ।१५।१२। घटिकार्धसंयुक्तंनतं ५।३० अस्यवर्गः ३०।१५ तदर्धं १५।७ एवंस्वल्पांतरा जाता नतोत्क्रमज्यैव तस्याः समसंज्ञाकृता चेन्नतं सार्द्धत्रयोदशाधिकं स्यात्तदा तत्सार्द्धत्रयोदशहीनं कृत्वा यदधिकं तद्वेदैश्चतुर्भिः अहतं गुणितं तेन वियुक्तं हीनः समाख्यः स्फुटः स्यात् तेनसमाख्येनअयुक्हीनः हरः अक्षकर्णेन उधृतोभक्तः इष्टहरः स्यादित्यर्थः अत्रोपपत्तिः अत्र समाभिधायानतोत्क्रमज्या साधिता सा सार्द्धत्रयोदशनतपर्यंतं भवति ततः परं सांतरा

दिघ्नाक्षमात्स्वहतचरंस्वगुणाद्विनिघ्नंस्वेष्वंशयुग्युगभवान्वितमत्रभाज्यः कर्णोगुलादिकइहेष्टहरात्सभाज्यः कर्णार्कवर्गविवरात्सदभिष्टभास्यात् ॥९॥

अत्रकल्पितंनतं १४।३० अस्यनतस्य वेदेशात्तुल्याइति ११४ त्रिज्यायासुत्क्रमाज्या १०८।३० घटिकार्धयुक्तनतस्य १५ वर्गोद्धासः ११२।३० अत्रानयोरंतरं चत्वारः ४ तदंतरमेकघटिकायां चतुर्मितं तत्रानुपातः यद्येकघटिकायां चत्वारोनंतरं तदेष्टेन सार्धत्रयोदशाधिकेन नतेन किमिति फलं हीनंकार्यं अधिकभूतत्वात् ततस्तेन हीनोहरइष्टहरः स्यात् यतोनतोत्क्रमज्याहीनादिनार्द्धांत्या इष्टांत्या भवति सा इष्टहरसंज्ञा अत्राक्षकर्णभजने युक्तिस्त्वनुपदमेव स्पष्टीकरिष्यते अथभाज्यसाधनमाह ॥८॥ दिग्घ्नाक्षभया दशगुणपलभया हतं चरं स्वगुणं वर्जितं ततोद्विनिघ्नं द्विगुणंसत् स्वेषं शकेन स्वपंचमांशेनयुक्तं ततोयुगभवैः अन्वितंसत् भाज्यो भवति अत्रोपपत्तिः अथभाज्यस्वरूपमुच्यते इष्टहरसंज्ञेष्टान्त्या ज्ञातास्ति तस्याः हृतिकरणायानुपातः त्रिज्यावृत्ते इयमंत्या तदा द्युज्यावृत्ते केतिजाते ष्टहृतिः पलकर्णेद्वादशकोटिस्तदेष्टहृतिकूर्णे केतिजाता इष्टशंकुः शंकुकोटौ कर्णस्त्रिज्या तदा द्वादशकोटौ कइति जातइष्टकर्णः एवमत्रत्रिज्यावर्गस्य पलकर्णोगुणः द्युज्येष्टांत्या घातोहरः तेन त्रिज्यावर्गोद्युज्याभक्तः फलस्य भाज्यसंज्ञाकृता तत्र परमाल्पद्युज्यया १०८।४० त्रिज्यावर्गेभक्तेजातः परमोभाज्यः ३१।२० खार्कमितेव्यासार्द्धे ।य तदा वेदेशमिते कइति जातोभाज्यः

१२४।४५ सभाज्यपलकर्णगुणा इष्टांत्याभक्तः कार्यः तत्र पलकर्णेष गुणेन गुणहरापवर्तितौ एवं पलकर्णे भक्ते ष्टांत्येवेष्टहरसंज्ञा कृता अतइष्टहरा सभाज्य इष्टकर्णः स्यादित्युपपन्नं अस्यसाधनप्रक्रियाद्युज्याक्रांतिज्याकुर्याभिर्विनान सिध्यति तत्प्रक्रियागौरवं अतोऽनुकल्पेन दिघ्नास्तभयेत्यादिनाभाज्योज्ञातः अनुकल्पः स यथा एकांगलपलभायां खंडत्रययोगः परमंचरं २१।२० इदंदशगुणपलभाभक्तं २।८ वर्गितं ४।३३ द्विगुणं ९।६ इदंखपंचाशयुतं १०।५५ वेदेशयुतं स एव भाज्य इति प्रतीतः अयं भाज्योहरहतोऽभीष्टकर्णोभवति इतियुक्तिः पूर्वमेवोक्ता कर्णार्कवर्गविवरात्कर्णवर्गद्वादशवर्गांतरान्मूलं इष्टभा इष्टछायास्यात् अस्योपपत्तिः छायाभुजः द्वादशांगुलशंकुः कोटिः छायाकर्णः कर्णः अतः कोटिकर्णयोर्वर्गांतरमूलं छाया भवतीत्युपपन्नं अथेष्टछायातोविलोमविधिनाकर्णाद्यानयनमाह ॥९॥ अर्कभाकृतियुतेः पदं द्वादशवर्गछायावर्गयोगान्मूलं कर्णःस्यात् तेन कर्णेन भक्तोभाज्यःअभीष्टहरःस्यात् तस्याः पलकर्णेनसह योघातोगुणनं तेनमध्योहरोरहितःद्विगुणितः द्विगुणितःस

कर्णःस्यात्पदमर्कभाकृतियुतेस्तद्भक्तभाज्योहरोभीष्टस्तत्पलकर्णघातरहितोमध्योहरोद्व्याहतः चेद्वेदांकधराधिकः पृथग्गतोवेदांकभूना
द्गुणासाढ्यस्तस्य पदं घटीमुखनतं स्यादर्धनाडीवियुक् ॥१०॥ चत्वारिंशदशीतिरद्रिकुभवः कक्षेंदवोभूधृतीषड्खाक्षीणिजिनाश्विनोंगविकृतीखा
ब्ध्यश्विनःसायनात् खेटाद्दोर्लवदिग्लवप्रमगतोंकोसौतदूनागताच्छेषघ्नाद्दशलब्धियुक्दशहृतोंशाद्यो ऽपमः स्यात् स्वदिक् ॥११॥

चेद्वेदांकधराधिकः षड्नशतद्वयाधिकः तदा पृथक्स्थाप्यः अतोस्माद्वेदांकभूनात् पृथक्स्थात् नागुणाप्तिः तया आढ्यः कार्यः नोचेद्यथास्थित एव तस्यमूलं घटीमुखं घटिकादिकं नतं स्यात् परंतु तन्नतमर्धनाड्या त्रिंशत्पलैर्वियुक् हीनं कार्यमित्यर्थः अत्रोपपत्तिः विलोमविधिना प्रसिद्धैव ॥अथ क्रांतिसाधनमाह ॥१०॥ सायनात् अयनांशयुक्तात्खेटात् ग्रहात् दोर्लवा भुजभागास्तेषां दिग्लवोदशमांशः तेन प्रमः संमितः गतः अंकः स्यात् ततस्तेन गतांकेन ऊनात् आगतात् अग्रांकात् शेषघ्नात् शेषांशगुणितात् यादशलब्धिः तया गतांकाः युक् युक्तः ततोदशभक्तः अंशाद्यः भागाद्यः स्वदिक् सायनग्रहगोलदिक् अपमः क्रांतिः स्यात् चत्वारिंशत् ४० अशीतिः ८० अद्रिकुभवः सप्तदशाधिकशतं ११७ कक्षेंदवः एकपंचाशदधिकशतं १५१ भूधृती एकाशीत्यधिकशतं १८१ षड्खाक्षिणी २०६ षडधिकशतद्वयं जिनाश्विनः चतुर्विंशत्यधिकशतद्वयं २२४ अंगविकृतीषट्त्रिंशदधिकशतद्वयं २३६ खाब्ध्यश्विनः चत्वारिंशदधिकशतद्वयं २४० एतेनदांकास्युरिति अत्रोपपत्तिः ग्रहो यो भगोलेविषुवद्वृत्ताद्दक्षिणोत्तरगमनंकरोति ते

क्रांत्यंशाः क्रमणं क्रांतिः तस्य अंशा इत्यन्वर्थं नाम विषुवद्वृत्तं यद्वृत्तं तन्निरक्षसमं पूर्वापरमित्यर्थः मेषतुलादिस्थो ग्रहस्तस्मिन् वृत्ते तिष्ठन् भ्रमति मेषादयः षड् तस्योत्तरार्द्धे तुलादिका दक्षिणा एव नतु मेषादिषड्राशयः उत्तरतश्चैकत्रावतिष्ठंतो भ्रमतीति किंतु मेषादिराशित्रयं यावत् प्रतिक्षणमुत्तरतः क्रमेण चतुर्विंशत्यंशान् यावदहोरात्रवृत्ते परिभ्रमन् गच्छति ततः परावर्त्य राशित्रयं कन्यांतं यावत्तेनैव मार्गेण पुनस्तदेव विषुवद्वृत्तमाश्रयति एवं तुलादेर्दक्षिणत एव राशित्रयं गत्वा पुनस्तेनैव पथा परावर्त्य तदेव विषुवद्वृत्तं मेषादिस्थ एवाश्रयति एवं भगोले नहि कुत्रस्थक्रांतिनिश्चितिपरिभाषा एवं सूर्यस्य अन्योन्यं ग्रहनक्षत्राणां स्वस्वविमंडलानुगतत्वात् गोलार्धयोर्वैपरीत्यसंभवः स्यादिति तद्यथा विषुवद्वृत्तात् क्रांतिवृत्तं तिरश्चीनं वर्त्तते तयोर्मेषतुलादौ संपातद्वयं तत्र क्रांत्यभावः मकरकर्कटादौ परमं दक्षिणोत्तरं चतुर्विंशत्यंशांतरं तत्र क्रांतेः परमत्वं एवं तिरश्चीनात् क्रांतिमंडलादपि ग्रहमंडलं तिरश्चीनं वर्त्तते तयोः स्वक्षेपपाते सषड्भे च संपातौ तस्मात्त्रिभेन्तरे परमं विक्षेपांशतुल्यं दक्षिणोत्तरमंतरं विक्षेपः एवं पृथक् ग्रहनक्षत्राणां विमंडलानि तिरश्चीनानि वर्त्तंते तत्क्षेपवशात् गोलान्यत्वसंभवः स्यादित्युपपन्नं तदुक्तं सिद्धांतशिरोमणौ ॥ नाडीकामंडलात्तिर्यगेवापमः क्रांतिवृत्तावधिः क्रांतिवृत्ताच्छरः क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाडिकावृत्तखेटांतरालेऽपमः १ अतः शरसंस्कृता स्पष्टा क्रांतिः स्यादित्यग्रे आचार्येणाप्युक्तमस्ति

षट् षडिषूदधिदृक्कुभिरर्धैः खेटभुजांशदिनांशमितैक्यं शेषहतैष्यदिनांशयुतं वांशाद्यपमः सुखसंव्यवहृत्यै ॥ १२॥ ७ ॥ ७ ॥

अत्र गुणकभुजकोपपत्तिर्यथा यदि त्रिज्यातुल्यभुजज्यया परमक्रांतिज्या तदेष्टदोर्ज्यया किमिति फलं क्रांतिज्या तद्धनुः क्रांतिः स्यात् अत्राचार्येण लाघवार्थं दशदशभुजभागानां अनेनैव विधिना क्रांत्यंशाः साधिताः ते सावयवाः जाताः अतो दशगुणाः कला पठिताः ततोंतरेऽनुपाताः यदि दशभिर्भागैरेको लभ्यते तदेष्टांशैः किमिति फलमितो गतांकः स्यात् शेषादैष्यानुपातः यदि दशभिर्भागैर्गतैष्यांतरं लभ्यते तदा शेषांशैः किमिति फलं गतांके युक्तं कार्यं सा क्रांतिः स्यात् परं दशगुणास्ततो दशभक्तेत्युपपन्नं अथ लाघवार्थं स्थूलक्रांतिसाधनमाह ॥ ११॥ एभिरर्धैः खंडैः कृत्वा खेटस्य सायनग्रहस्य ये भुजांशाः भुजभागाः तेषां ये दिनांशाः पंचदशांशाः तन्मितखंडैक्यं कार्यं तच्छेषेण हतं यत् ऐष्यं भोग्यखंडं तस्य ये दिनांशाः पंचदशांशाः तेन युतं तत् अंशादि अपमः भागादिक्रांतिः सुखेन संव्यवहृतिः व्यवहारः तदर्थं स्यात् अत्रोपपत्तिः अत्र तु पंचदशभागानां क्रांतयो भागादिकाः साधिताः तत्रानुपातः यदि पंचदशभागैरेकं खंडं तदा भुजभागैः किमिति लब्धं गतखंडानां योगमिता क्रांतिः शेषादनुपातः पंचदशांशैर्यदि भोग्यखंडं ल

भ्यते तदा शेषांशैः किमिति फलं गतखंडयोगे योज्यं क्रांतिः स्यात् परं सास्थूला खंडभागोनाधिककला परित्यागादित्युपपन्नं अथानंतरानीत क्रांतिभागेभ्यो वैपरीत्येन भुजभागानयनमाह ॥१२॥ ततस्तस्मादपमात् दलानि षडित्यादीनि यावंतिशुद्ध्यंति तावंतिशोधयेत् तिथिभिः पंचदशभिः हन्यतेगुण्यते यच्छेषं तदैष्येन भोग्यखंडेन हृत्भक्तं तिष्ठं लब्धं तिथिघ्नया पंचदशगुणया शुद्धखंडसंख्यया युतंसत् दोर्लवाः भुजभागाः भवंतीत्यर्थः अत्रविलोमविधिरेववासनाप्रत्यक्षसिद्धास्ति यद्यनेन प्रकारेण प्रगानीत सूक्ष्मक्रांतितोदोर्लवाः साध्यंते तदा किंचित्सांतराभवंति अपमखंडानां स्थूलत्वात् अतस्तत्रत्यखंडैर्दोर्लवार्थं व्यस्तविधिना प्रकारांतरंचिंत्यं तद्यथा दशाहतापमात्त्यजेद्दलानि शेषमैष्यहृत् विशुद्ध संख्यया युतं दशाहतं भुजांशकाइति अथखेटज्ञाने दिनमानादेव क्रांतिसाधनंस्थूलं स्वयुक्तिदर्शनार्थमाह ॥१३॥ द्युदलंदिनार्धं तिथयः पंचदशतयोर्वियोगः षष्टिगुणः पलानिस्युः तच्चरंनिजेनस्वीयेन गजभागेन अष्टांशेन उपेतंयुक्तं ततः अक्षप्रभयाआप्तंभक्तंतेदिनकृतः सूर्यस्य अपमस्य क्रांतेः भागाः स्युः ते तत्त्व कलाभिः पंचविंशतिकलाभिः

ततोदलानिशोधयेत्तिथिघ्नशेषमैष्यहृत्तिथिघ्नशुद्धसंख्ययायुतंभवंतिदोर्लवाः ॥१३॥ द्युदलतिथिवियोगस्तद्दिनाड्यश्चरंस्यादथनिजगजभागोपेतम
क्षप्रभाप्तं दिनकृदपमभागास्तत्वलिप्तायुताः स्युर्द्युदलकृशपृथुत्वेतेक्रमाद्याम्यसौम्याः ॥१४॥

युक्ताः कार्याः द्युदलस्य पंचदशघटिकाभ्यो न्यूनाधिकत्वे क्रमात् याम्यसौम्याः कृशत्वेयाम्याः अधिकत्वेसौम्याइत्यर्थः अत्रोपपत्तिः दिनार्द्धपंचदशांतरंपलीकृतंचरपलानि स्युः एवंचरपलानि पंचभक्तानि चरज्येति युक्तिः पूर्वंप्रतिपादितास्ति ततस्त्रिज्यावृत्ते इयंचरज्या तदा द्युज्या वृत्ते का लब्धं कुज्या अत्र द्युज्यास्थूलत्वात् सार्द्धद्वादशाधिकशतमिताधृता एवंपलभाभुजे द्वादश कोटिः तदा कुज्याभुजे का कोटिरिति जाता क्रांतिज्या तद्धनुः करणार्थं द्वौहरः स्थूलत्वादंगीकृतः एवं चरपलानां जातोगुणघातो गुणः १३५० हरघातोहरः १२०० पलभाहरस्तु वर्त्तत एवगुणहरौ खतिथिभि १५०रपवर्तितौ गुणस्थानेजातः ९ हरस्थानेष्टौ ८ योराशिर्नवभिर्गुण्यते अष्टभिर्भज्यतेसः स्वाष्टांशयुक्त एवभवति अतउक्तंचरंनिजगजभागोपेतमक्षप्रभाप्तमिति सा स्थूला क्रांतिरतः पंचविंशतिकला युक्ता सती सूक्ष्मासन्नाद्दृष्टा दक्षिणोपपत्तिर्यथा दिनदलं दक्षिणगोले पंचदशघटिकाभ्यो न्यूनमस्ति अतः कृशेयाम्याः उत्तरगोलेदिनदलं पंचदशाधिकं अतः पृथुत्वे सौम्याइत्युपपन्नं अथदिनार्द्धेनतांशोन्नतांशसाधनमाह ॥१४॥

७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७॥

ग्रहस्यक्रांतिः अक्षांशाः स्वदेशीयाः एतदुत्पन्नायासंस्कृतिः सा नतांशाः स्युः अत्रैकदिशोर्योगः भिन्नदिशोरंतरमितिसंस्कृतिः तैर्नतांशैर्हीनानवतिः उन्नतांशाः स्युः परं ते दिनमध्यभवाः नत्विष्टकाले क्रांत्यक्षसंस्कारोनतांशाः ततोपि तेभ्यः उन्नतभागेभ्यः लघुखंडकैः षडित्यादिभिः येक्रांत्यंशाः स्युः स्तेषांपरइतिसंज्ञा अत्र पराख्यार्थं-याक्रांतिः यंत्रभागानां च क्रांतिः सा अयनांशात् तत्रैव कार्या अस्योपपत्तिः प्रत्यक्षसिद्धास्ति तथाप्युच्यते विषुवद्वृत्ताद्दक्षिणोत्तरतः परमक्रांत्यंशैः क्रांतिवृत्तं भवति रवौ क्रांतिवृत्ते भ्रमति सति ध्रुवाग्रवृत्तं दक्षिणोत्तरवृत्ते दिनार्द्धे यत्र लग्नं तस्मात्स्वदेशात् स्वस्वस्तिकपर्यंतं नतांशाः स्वस्वस्तिकान्तैर्भागैर्दिनार्द्धे सूर्योवर्त्तत एवेत्यर्थः दक्षिणोत्तरवृत्तक्षितिजसंयोगाद्दिनार्द्धे यैर्भागैरुन्नतस्तेउन्नतांशाः स्वध्रुवाग्रवृत्तविषुवन्मंडलमध्ये क्रांत्यंशाः स्वस्वस्तिकात् ध्रुवाग्रवृत्तपर्यंतं नतांशाः दक्षिणगोले क्रांत्यक्षांशयोगे कृते सति स्वस्वस्तिकात् ध्रुवाग्रवृत्तपर्यंतं दक्षिणा नतांशाः उत्तरगोले क्रांत्यक्षयोरंतरे कृते सति उत्तरा दक्षिणा वा नतांशाः। यदोत्तरक्रांतिरक्षांशेभ्यो न्यूना तदाक्षांशेभ्यः क्रांतौ शोधितायां दक्षिणतो ध्रुवाग्रवृत्तं नतं स्यात् तदा दक्षिणा नतांशाः यदाधिका तदा क्रांत्यंशेभ्योक्षांशेषु शोधितेषु स्वस्वस्तिकादुत्तरतो ध्रुवाग्रवृत्तं नतं स्यात् तदो

क्रांत्यक्षजसंस्कृतिर्नतांशास्तद्धीना नवतिः स्युरुन्नतांशाः दिनमध्यभवास्ततोपि ये स्युः क्रांत्यंशा लघुखंडकैः पराख्यः ॥१५॥ नवतिगुणि
तमिमसुन्नतं द्युदलहृतं फलभागतोपमः कथितपरगुणस्तदुद्धृता रविनवषट्श्रवणोथवा भवेत् ॥१६॥

त्तरा नतांशाः स्युः अत उक्तं क्रांत्यक्षजसंस्कृतिरिति अत्रोन्नतांशज्जीवाया उपयोगोस्ति इष्टकर्णसाधनार्थं अतोत्राचार्येण त्रिज्या चतुर्विंशतिमिता धृता ततः पंचदशभागानां खंडान्युत्पादितानि तानि तु क्रांतेर्लघुखंडान्येव अत उन्नतांशानां क्रांतिः कार्येत्युक्तं तस्याः परसंज्ञा कृता अथान्यथा लाघवेनेष्टकर्णं साधयति ॥१५॥ इष्टं उन्नतं घटिकाद्यं नवति द्युदलेन हृतं फलं यद्भागाद्यं ततः अपमः क्रांतिः सोपमः कथितेन पराख्येन गुण्यः ततस्तेन रविनवषट् उद्धृताः भक्ताः अथवामकारांतरेण श्रवणः इष्टकर्णो भवतीत्यर्थः अत्रोपपत्तिः उन्नतघटिकानां भागकरणार्थमनुपातः यदि द्युदलघटीभिर्नवत्यंशाः तदेष्टोन्नतघटीभिः किमिति जाताः भागाः तेषां ज्या कार्या अतोपमः ज्याकर्ण इति अत्र ज्या क्रांतितुल्यैव धृतास्ति ततोन्योनुपातः यदि परसंज्ञोन्नतांशज्याकोटौ त्रिज्या २४ कर्णः तदा द्वादशकोटौ कः कर्णः एवं द्वादशसिद्धघातो भाज्यः २८८ पराख्यो हारः एवं जातो दिनार्द्धकर्णः अन्योप्यनुपातः यदि त्रिज्यातुल्यया उन्नतघटिज्यया २४ अयं दिनार्द्धकर्णस्तदेष्टोन्नतघटिज्यया किमिति एवं लब्धमिष्टकर्णः अत्र व्यस्तत्रैराशिकं यतः सर्वदा दिनार्द्धकर्णादिष्टकर्णेनाधिकेनैव भ

वितव्यं अतश्चतुर्विंशतिगुणाः एवं भाज्यांके चतुर्विंशतिगुणे जातः सिद्धो भाज्यांकः ६९१२ अस्य पराख्यः उन्नतघटीजातोपमश्च ३ अतोपमः परगुणः तदुद्धृता रविनवषडि
त्युपपन्नं अथ वास्तविधिना इष्टकर्णादुन्नतघटिकाज्ञानमाह ॥१६॥ तरणीनवरसाः श्रवसा इष्टकर्णेन हृताः ततस्ते परेणापि हृताः लब्धं अपरमः क्रांतिर्भवेत् ततः ततो
दलानिशोधयेदित्यादिना ये भुजांशाः ते दिनदलेन गुणिताः नवतिहृताः अथवा इष्टमुन्नतं इष्टोन्नतघटिकाः स्युरित्यर्थः अत्र विलोमविधिरेव वासना अथ यंत्रवेधितो
न्नतभागेभ्यः कालज्ञानं कथयति ॥१७॥ अभिमता इष्टा ये यंत्रभागाः स्युः ततो योपमोसौ चतुर्विंशतिगुणः ततः परेण हृत् यल्लब्धं फलं तस्माद्ये भुजभागाः ते द्युदलगुणाः

तरणिनवरसाः श्रवोद्धृताः परविहृता अपमो भवेत्ततः दिनदलागुणिता भुजांशकानवतिहृता अथवेष्टमुन्नतं ॥१७॥ अभि
मतयंत्रलवास्ततोपमोसौ जिननिघ्नः परहृत्ततो भुजांशाः द्युदलघ्नाः खनवोद्धृताः कपाले प्राक्पश्चाद्घटिकाः क्रमाद्गतैष्याः ॥१८॥

खनवभिः नवत्या उद्धृताः भक्ताः फलं प्राक्कपाले गताः पश्चिमे एष्याः दिनशेषा घटिकाः स्युरित्यर्थः अत्रोपपत्तिर्यथा अत्र यंत्रांशानामपमः पराख्यव्यासार्द्धतः स्थितोस्ति
धनुःकरणार्थं त्रिज्याव्यासार्द्धस्थानीयः कार्यः अतोनुपातः यदि पराख्ये व्यासार्द्धे अयं यंत्रांशापमस्तदा चतुर्विंशतिमितत्रिज्याव्यासार्द्धे कः अतो जिनघ्नः परहृदिति ततो-
धनुःकरणार्थं भुजांशा इति घटीज्ञानार्थमनुपातः यदि नवतिभागैर्द्युदलतुल्याः घटिकाः तदैभिर्भागैः किमिति अतो द्युदलघ्नाः खनवोद्धृता इति यद्वा परपर्यायदिनार्द्धशंकु
नाजिनगुल्योन्नतघटिज्या लभ्यते तदेष्टयंत्रापमसमेष्टशंकुना किमिति इष्टोन्नतनाडीजन्यभागज्या भवति तच्चापमिष्टोन्नतनाडीजन्यभागाः ततो घटीज्ञानंतु द्युदलानुपा

ते नेति सर्वमवदातं अथोन्नतघटिभ्यो विलोमेन यंत्रभागान् कथयति ॥१८॥ रवांकै र्नवत्याहन्यंते गुण्यंते एवंभूताः याः उन्नत घटिकाः ता दिनार्द्धेन भक्ताः संतो भागाः स्युस्तेभ्यो भागेभ्यो ये अपमजांशकाः क्रांत्यंशाः स्युस्ते परेण गुण्याः ततः सिद्धैश्चतुर्विंशत्या आप्ताः भक्ताः लब्धं यत्ततः निगदितवत् ये भुजांशाः स्युस्ते तस्मिन् काले यंत्रजाः उन्नताः अंशाः भागाः स्युरित्यर्थः अत्रोपपत्तिः पूर्वोक्तवैपरीत्येन सुगमा अथ यंत्रांशेभ्यः इष्टकर्णसाधनमिष्टकर्णाद्यंत्रांशसाधनमेकवृत्तेनाह ॥१९॥ यंत्रलवेभ्यः उत्थाः उत्पन्नाः ये क्रांतिभागास्ते आप्ताः भक्ताः वस्विभदस्राः इह इष्टकर्णः स्यात् ॥ अत्रोपपत्तिः परमक्रांतिभागाः २४ परमाल्पेन द्वादशतुल्येनेष्टकर्णेन गुणिताः जातो भाज्यः २८८ स भाज्यः परमक्रांत्या यावत् भज्यते तावत्परमाल्पेष्टकर्णो भवति । एवमिष्टयंत्रभागक्रांत्या भाज्यमाने इष्टकर्णो भवत्येवेति । अथ कर्णेन हृता वस्विभदस्राः अपमः क्रांतिः स्यात् अतोस्याः क्रांतेर्बाहुभागाः ते वा प्रकारांतरेण यंत्रभागाः स्युरित्यर्थः ॥ अत्र व्यस्तविधिरेव वासना अथ सर्वत्र नलिकाबंधादि कुंडमंडपादिविधौ च

रवांकघ्नोन्नतघटिकादिनार्द्धभक्ताभागाः स्युस्तदपमजांशकाः परघ्नाः ॥ सिद्धाप्तानिगदितवत्ततो भुजांशास्तत्काले स्युरि-
तिच यंत्रजोन्नतांशाः ॥१९॥ यंत्रलवोत्थक्रांतिलवाप्तावस्विभदस्राः २८८ स्यादिह कर्णः ॥ कर्णहृतास्ते स्यादपमो तो बाहुलवाः स्यु-
र्यंत्रलवा वा २०॥ वृत्ते सम भूगते तु केंद्रस्थितशंकोः क्रमशो विशत्यपैति ॥ छायाग्रमिहापराच पूर्वा ताभ्यां सिद्धातिमरूदिक्च याम्या ॥२१॥

दिक्साधनोपयोगोस्त्यतो दिक्साधनं कथयति ॥२०॥ जलवत्समीकृतायां भूमौ वृत्ते भीष्टकर्कटेन कृते सति केंद्रस्थितस्य वृत्तमध्यस्थस्य शंकोर्द्वादशांगुलस्य छायाग्रं क्रमशो विशति इह अपरा पश्चिमदिक् स्यात् यत्रापैति दिनशेषकाले वृत्ताद्यत्र बहिर्गच्छति तत्र चिन्हे पूर्वदिक् ताभ्यां पश्चिमपूर्वदिग्भ्यां सिद्धो यः तिमिर्मत्स्यः तस्मान्मुखमत्स्यमुखपुच्छसूत्रात् उत्तरा याम्या दक्षिणा स्यात् एवं यद्दिने त्रिंशन्मितमेव दिनमानं तद्दिवस एवामुना प्रकारेण दिक्साधनमन्यथा तु भुजं विना दिक्साधनं न भवति अत्रोपपत्तिः अत्र दिशस्तु प्रतिदेशं भिन्ना न तु प्रतिकालं तासां भिन्नत्वे हेतुरुच्यते यस्मिंस्थाने सूर्योस्ति तदृजुमार्गो हि पूर्वापरा तत्साधनोपायो यथा मध्यसूत्रोदयास्तसूत्रयो र्यदंतरं ज्यारूपं सा अग्रा ततः अग्रात् शंकुमूलपर्यंतं यदंतरं तत् शंकुतलं एवमग्राशंकुतलयोर्योगांतरं भुजः स भुजो मध्यसूत्राद्यया दिशि दे यः सा वै याम्योत्तरा दिक् तस्मात्स्यात्पूर्वापरेति अत्र नाडिकामंडलस्थो ग्रहो यद्दिने भवति तद्दिवस एव दिक्साधनं युक्तमस्ति अतोत्र नाडिकामंडलस्थे ग्रहे चरज्या क्रांतिज्याग्राणामभावः

अग्राभावात् शकुंतलस्यतुल्या एवभुजः समध्यसूत्राद्देय इत्यत्र यत्र छायाप्रवेशनिर्गमस्थानं तत्रैवभवति यतोहि लघुक्षेत्रे शकुंतलं पलभातुल्यं तद्यथा द्वादशकोटौ कइतिजातं शकुंतलं तन्महाशंकुस्थानीयं लघुनिछाया क्षेत्रे द्वादशतुल्यैवकोटिः तत्रत्य करणायानुपातः महाशंकुकोटाविदंशकुंतलं तदा द्वादशकोटौ किमिति एवं शंकुतुल्ययो द्वादशतुल्ययोर्गुणहरयोर्नाशे जातापलभैव अतोहि छाया प्रवेशनिर्गमस्थाने पूर्वापरे तन्मत्स्याद्दक्षिणोत्तरे इतिशोभनमुक्तं ॥ अथनाडिकामंडलादन्यत्र यस्मिन् कस्मिंश्चिद्दिवसेदिक्साधनार्थंभुजमानयति ॥ २१॥ वाशब्दः प्रकारांतरसूची अर्कस्य ये क्रांतिलवास्तेषामक्षकर्णस्य च यानिहतिः परस्परगुणनं सा भाकर्णेन छाया कर्णेन कर्णःस्यात्सदमकंभाकृतियुतेरिति साधितेन निघ्नीगुणिता ततो नभोक्षाग्निभिः ३५० पंचशदधिकशतत्रयेण आप्ता भक्ता सति रविदिक्सूर्योयस्मिन् गोले वर्तते तद्दिक्भुजः स्यात् सभुजोमध्यमः यमदिशाया दक्षिणदिशाया द्विघ्नयाद्विगुणयाक्षभयासंस्कृतः सन् स्फुटोभवतिसभुजः केंद्रेभोत्थवृत्तौ छायोत्पादितवृत्ते भाग्रात् छायाग्रात् प्रवेशकालीनात् वा निर्गमकालीनात् पूर्णं

यार्कक्रांतिलवाक्षकर्णनिहतीर्भाकर्णनिघ्नीनभोक्षाग्न्याप्तारविदिक्भुजोयमदिशाद्विघ्नाक्षभासंस्कृतः ॥ केंद्रेभोत्थवृत्तौसपूर्णगुणवद्भाग्रात्प्रदेयो
भवेत्याम्योदक्सभुजार्धकेंद्रनिहितारज्जुस्तुपूर्वापरा ॥२२॥

गुणवत् यथासंपूर्णज्यादीयते तद्वद्देयः भाग्राद्दीयमानभुजमित शलाकाया अग्रंयथा वृत्तपरिधौलगति तथा देयमित्यर्थः सा याम्योत्तरा भवति भुजार्थभुजमध्यः केंद्रं वृत्तमध्यं अनयोर्मध्येमिलिता या रज्जुः सा पूर्वापरा अत्रोपपत्तिः अत्र भुजलक्षणंतु पूर्वमेव प्रतिपादितं तत्साधनंयथा तत्रादावग्रासाध्यते कुज्याभुजः क्रांतिज्याकोटिः अग्राकर्णइति त्र्यस्रं क्षेत्रंतथान्च पलभाभुजः द्वादशाकोटिः पलकर्णः कर्णइति अस्मात्साध्यते तत्रानुपातः यदि द्वादशकोटौ पलकर्णः कर्णः तदा क्रांतिज्या कोटौकः कर्णइति अग्रास्यात् क्रांतिः किंचिदधिकेनद्वयेन गुणिता क्रांतिज्यासा पलकर्णगुणा द्वादशभक्ता अग्रा सा त्रिज्या व्यासार्द्धे ततोनुपातः यदि त्रिज्या वृत्ते इयं अग्रा तदा छाया कर्णवृत्ते का अतः छायाकर्णोगुणः त्रिज्याहरः तत् इयमग्राद्विगुणा कार्या यतः संपूर्णजीवावतत् वृत्तमध्येभुजोदेयोस्ति एवं क्रांतिः पलकर्णगुणाकार्या ततः सिद्धोगुणद्वयघातो गुणः ४१४ हरघातोहरः १४४० गुणहरौगुणेनापवर्तितौ लब्धाः हरस्थाने ३५० अतउक्तकर्मक्रांतिलवाक्षकर्णनिहतिरिति साग्रा शकुंतलेनसंस्कार्या तत्र लघुक्षेत्रे शकुंतलं पलभातुल्यं तदग्रायां संस्कार्यं अग्राया द्विगुणितत्वात् इदमपि द्विगुणंकार्यं अत उक्तं यमदिशाद्विघ्नाक्षभासंस्कृत इति स भुजः भाग्राद्दत्तोयाम्योदक् स्यात् भुजस्यद्विगुणत्वात् भुजमध्यकेंद्रोपरिनीयमानारज्जु

पूर्वापरेत्यर्थत एवसिद्धं अथतुरीययंत्रात् दिक्साधनार्थं दिगंशान् साधयति ॥२२॥

द्युमानखगुणांतरंशिवगुणंदिनेल्पाधिकेह्यपागुदगथानुदग्भवतियत्रभागापमः वसुघ्न्यभयसंस्कृतिर्भवतियंत्रभागांतरोद्भवापमहृता
ततोभुजलवादिगंशाःस्मृताः॥२३॥

द्युमानं प्रसिद्धं खगुणाः त्रिंशत् अनयोर्यदंतरंतत् शिवगुणमेकादशगुणितं तत्दिनेऽल्पाधिके अपाक् उदक्स्यात् त्रिंशदल्पे दिनमानेदक्षिणं अधिकेसतिउत्तरंफलंस्यात् अथशब्दोनंतरवाची यंत्रभागानांअपमः क्रांतिःसदा अनुदक् दक्षिणेति उभयोर्द्वयोः संस्कृतिः वसुघ्नी अष्टगुणासती ततोभवति यंत्रभागानांचयदंतरं तदुद्भवः तस्मादुत्पन्नःयः अपमः तेन साहृता ततः फलात् येभुजलवाः तेदिशांअंशाः दिक्साधनार्थमेतेंशाः स्युरित्यर्थः येतेदिगंशाः यंत्रोत्पन्नाः एवेति अत्रोपपत्तिः अत्रस्वक्षितिजेनक्रांशाः भुज्याः ततः पूर्वस्वस्तिकेष्टदिक्विवरे येभागाः तेदिगंशास्तज्ज्यादिग्ज्या एवंपश्चिमस्वस्तिकेपि तत्साधनयथा अग्राकर्णवृत्तीयाकार्या सापलभया संस्कार्यासभुजः स्यात् ततःसत्रिज्यात्तृतीयः कार्यः सादिग्ज्याभवति तत्रादावग्रा साध्यते द्युमानखगुणांतरंदलितं चरघटिकाः ततःषष्टिगुणाः पलानि ततस्तच्चरं नवगुणंपलभाभक्तं अष्टभक्तक्रांत्यंशाइतियुक्तिः पूर्वमुक्तास्ति एवंद्युमानखगुणांतरस्यशिवगुणघातोगुणः २७० असौपलभाचहरः साक्रांति छायाकर्णगुणा पलकर्णगुणा खखाद्रिभक्ताभुजो भवति इत्यग्रेवक्ष्यति सभुजः त्रिज्यया गुण्यः छायया भक्तःदिग्ज्याभवति एवमत्र छायाकर्णपलकर्णावपि गुणौखखाद्रीनामष्टानांच घातोहरः ५६०० चतुर्विंशतिमितत्रिज्या गुणघातगुणाज्जातो गुणः ६४८० अत्रछाया कर्णछाये साध्ये यदि शंकुकोटौ त्रिज्याकर्णः तदाद्वादशकोटौकः कर्णइति तथाच दृग्ज्याभुजोयदिशंकुकोटौ कइति जाताछाया एवमत्र छायया भज्यमानेछायाकर्णेन गुण्यमाने छेदांशविपर्यासे शंकुतुल्ययो स्तथाद्वादशतुल्ययोर्गुणहरयोर्नाशेकृते पूर्वं त्रिज्यागुणोनतांशज्याहरः अत्र पलकर्णोगुणः पलभाहरोस्ति अत्रपलभाचतुर्मिताकल्पितास्वल्पांतरत्वात् त्रिपंचपलभायामपिस्यात् अन्यत्रग्रंथसंचारासंभवः लाघवेन युक्तिदर्शनार्थं स्थूलमंगीकृतमतोनदोषाय एवंचतुर्मितायांपलभायांपलकर्णः १२।३९ अयंपलभया सषडंशत्रय ३।१० गुणितया तुल्योभवति अतः पलकर्णपलभयोर्गुणहरयोर्नाशे तस्य सषडंश त्रयंगुणः ३।१० एवंसषडंशत्रयचतुर्विंशतिमितत्रिज्याघातेन ७६ गुणितः पूर्वगुणघातो गुणः ४१।२४।८० अयंहरः ५६०० गुणहरौ हरेणापवर्त्य जातोगुणः ८८ अतोत्र द्युमानखगुणांतरं गुणेनानेन गुण्यं नतांशापमेन भाज्यं एवमत्र द्युमानखगुणांतरं शिवगुणितं कृतं अष्टगुणस्य त्यागः य-

नोग्रिमफलस्य शंकुतलाख्यस्यच अष्टोगुणोस्ति नतांशापम एवहरः अतः फलसंस्कार एवाष्टगुणो नतांशापम भक्तइति वदिष्यति तद्यथा अत्रास्यामग्रायां शंकुतलमपि त्रिज्यागुणितं छायया भक्तं संस्कार्यं दिग्ज्यास्यात् तत्र शंकुतलं पलभा ४ छायया भाज्यमित्यत्रापि छाया साध्या शंकुकोटौ दृग्ज्याभुजः द्वादशकोटौ कः इतिजाता छाया अनयाभज्यमाने छेदांशविपर्यासे दृग्ज्या द्वादशाच हरः शंकोः पलभाचतुर्विंशतिमितत्रिज्याच गुणः अतोगुणघातोगुणः १६ गुणहरयोर्गुणेनापवर्तितयोर्जातो गुणः ८ नतांशापमोहरः इदं फलं सदा दक्षिणं पलभायाः दक्षिणत्वात् अतोत्र यंत्रांशापम एव द्युमानखगुणांतरेण संस्कृतः यतस्तस्यापि तौ गुणहरौ वर्तेते अतः फलसंस्कृतिरेवाष्टभिर्गुण्या नतांशापमेन भाज्येत्युपपन्नं यंत्रांशाहीननवत्यंशापम एव नतांशापम इति प्रत्यक्षं सिद्धं अत्र पूर्व फलस्याग्रासंज्ञस्योत्तरदक्षिणोपपत्तिर्यथा दक्षिणगोले ऽग्रा दक्षिणा तत्र दिनं त्रिंशदल्पं तथोत्तरगोले उत्तराग्रा तत्र दिनं त्रिंशदधिकं अतो दिनेल्पाधिके इति अपागुदगित्युपपन्नं एवमत्रोत्पन्ना दिग्ज्या तस्याः धनुः दिगंशाः स्युरतोहिततो भुजलवा दिगंशा इत्युक्तं अथ तैर्दिगंशैः यंत्रात्कथं दिक्साधनं भवति तदाह ॥२३॥ जलवत्समीकृतायां भूमौ तुरीययंत्रे

समभूविनिहिते तुरीययंत्रे स्पृशति यथा च दिगंशकाग्रकेंद्रे अवलंबविभोत्थकेंद्रसंस्थेषीकाभाथ दिशोत्र यंत्रगाः स्युः ॥२४॥ क्रांति
स्फुटाभिमतकर्णगुणाक्षकर्णनिघ्नी खखाद्रि ७०० हृदपक्रमदिग्भुजः स्यात् संस्कारितोयमदिशाक्षभया स्फुटोसौ तद्वर्गभाकृति
वियोगपदं च कोटिः ॥२५॥

निहिते सति स्थापिते सति दिगंशाः यावंतः स्युस्तदग्रचिन्हमेव केंद्रं तस्मिन् अवलंबकस्य विभा छाया तदुत्थकेंद्रसंस्थायाः ईषिकायाः छाया यथा स्पृशति तथा यंत्रे साधिते सति तुरीययंत्रदिगंशकाग्रकेंद्रोपरि या रज्जुः सा पूर्वापरा तन्मत्स्याद्याम्योत्तरे भवतः अत उक्तं यंत्रगा दिशः स्युरिति अथ नलिकाबंधनार्थं भुजसाधनमाह ॥२४॥ यस्य ग्रहस्य नलिकाबंधः क्रियते तस्य क्रांतिः स्वशरेण संस्कृता सती स्पष्टा कार्या सा क्रांतिः इष्टकर्णेन गुण्या रात्रौ यासु घटीषु नलिकाबंधः क्रियते तद्घटीभ्यो छायेष्टकर्णयंत्रभागग्रहद्युगतादि साध्यं तत्साधनं आचार्येणाग्रे प्रोक्तमस्ति ततः सेष्टकर्णगुणा क्रांतिः अक्षकर्णगुणा सती खखाद्रिहृत् अपक्रमदिक् स्पष्टक्रांतेर्या दिक् तद्दिग्भुजो भवति स मध्यमः यमदिशा दक्षिणादिशा अक्षभया असौ संस्कृतः स्फुटः स्यात् तस्य भुजस्य यः वर्गः भायाच्छायायाः यः वर्गः तयोर्वियोगः अंतरं तस्य पदं मूलं कोटिः स्यात् अत्र भुजस्योपपत्तिः पूर्वमेव प्रतिपादितास्ति तत्र दिग्गुणः

कृतोऽस्ति अत्रैक गुण्योऽतः हरो द्विगुणः पठितः एकगुण्या पलभया संस्कार्यः अथ कोटेरुपपत्तिः दक्षिणोत्तरो भुजः छायैव कर्णः यतो हि भुजः छायावृत्तस्थः
अतो दोःकर्णवर्गयो र्विवरान्मूलं कोटिरिति अथ भुजकोटिकर्णनलिकासंस्थानमाह ॥२५॥ आशाः दिशः ज्ञात्वा पूर्वोक्तवज्जलसमीकृतायां भूमौ दिक्साधनं कृ-
त्वा तत्रेष्टकालीनछायाव्यासार्द्धेन वृत्तं कृत्वा तत्र दिक्चिन्हानि कार्याणि ततो बिंद्वोः वृत्तमध्यात् परखेचरे खमध्यात् पश्चिमकपालस्थे ग्रहे परमुखीं कोटिं यथा
गतां दद्यात् प्राक् खेचरे पूर्वकपालस्थे ग्रहे प्राङ्मुखीं कोटिं बिंदोरेव दद्यात् अतः कोट्यंतात्स्वदिशि भुजं दद्यात् छायां विन्यसेत् केंद्रादारभ्य भुजांताग्रपर्यंतं
छायाप्रसारसैव कर्णः एवं जातं त्र्यस्रं क्षेत्रं अथ नलिकानिवेशमाह । बिंदोरिति बिंदोर्वृत्तमध्यान्दाग्रे गच्छति स तथा एवं भूतोयः शंकुः भुजांत छायांतसंयो
गे द्वादशांगुलः शंकुः स्थाप्यः तथा केंद्रे कीलकंटकादिबद्धसूत्रं भूलग्नं कृत्वा तत्सूत्रं तच्छंकोर्मस्तकोपरि नीत्वा तेनैव ऋजुमार्गेणाग्राद् ऊर्ध्वं नयेत् तत्सूत्रे नलो निवे

ज्ञात्वाशाः परखेचरे परमुखीं प्राक्खेचरे प्राङ्मुखीं बिंदोः कोटिमतो भुजं स्वदिशि तन्मध्ये प्रभां विन्यसेत् ॥

श्यः तस्य द्वौ वंशौ आधारभूतौ कार्यौ नलो नामांतः स शुषिरं वंशनालं तस्मिन्नले यत्कालीनं भुजादिकृतं तद् घटीषु भूरुमध्यस्थ दृष्ट्या रवेआकाशे खगं ग्रहं विलोकये
त् एवं विलोक्यमाने तस्मिन्नलमध्ये सन्चेत् ग्रहो नावलोक्यते तदासग्रहो न घटते तत्रांतरमपि लक्ष्यं एवमनयैव युक्त्या आचार्येण सर्वग्रहाणां नलिकाबंधं विधाय अं
तराणि ज्ञात्वा ग्रहसाधनं कृतं अथ जले ग्रहदर्शनार्थं नलिकानिवेशमाह कइति उदके ग्रहं विलोकयेत् । तद्यथा अत्र शंकुः केंद्रे स्थाप्यः तच्छंकुमात्सूत्रं भाग्रप
र्यंतमधो नयेत् तत् सूत्रे नलः स्थाप्यः ततच्छायाग्रस्थाने जलपूर्णपात्रं स्थाप्यं तत्र मध्येधो दृष्ट्या जले ग्रहो विलोक्यः । अत्रेदं सर्वदिक्साधननलिकानिवेशादि कृ
त्वा ततस्तस्मिन्नेव काले विलोक्यमिति उक्तं च सिद्धांतशिरोमणौ दर्शयेद्दिविचरं दिवि केचानेहासि कुचरदर्शनयोग्ये पूर्वमेव विरचय्य यथोक्तं रञ्जनाय सुजनस्य नृप
स्य अस्योपपत्तिः प्रत्यक्षसिद्धार्थत एव ज्ञायते इदं दिक्साधननलिकाबंधादिनान्यकरणेष्वस्ति आचार्येण राज्ञां चमत्कारदर्शनार्थं स्वकृतग्रह घटनार्थं कृतमिति

दैवज्ञवर्यस्य दिवाकरस्य सुतेन मल्लारिसमाह्वयेन वृत्तौ कृतायां ग्रहलाघवे त्रिप्रश्नाधिकारः परिपूर्तिमागात् ॥ ॥इति श्रीमद्गणेशदैवज्ञकृतग्रहलाघवस्य टीकायां मल्लारिदैवज्ञविरचितायां लग्नादिछायायत्नभागदिक्साधननलिकाबंधाधिकारः श्चतुर्थः ॥४॥ ॥अथ चंद्रग्रहणादिकारो व्याख्यायते ॥ तत्रेदं चिंत्यते ननु किं नाम ग्रहणं गृह्यते नेनेति ग्रहणं यः यं गृहीतुमिच्छति सूतं प्रति यदा गच्छेत्तदैव ग्रहणं अतो ग्राह्यग्राहकयोर्योगो ग्रहणं योगो नामांतराभावः अतो ग्राह्यग्राहकयोरंतराभावो ग्रहणमिति अस्ति ग्रहणागतिः षोढा पूर्वापरा याम्योत्तरार्ध्वाधरा चेति। तत्र किं पूर्वापरयाम्योत्तरोर्ध्वाधरांतराणामभावो ग्रहणं किंवा पूर्वापरयाम्योत्तरांतराभावो ग्रहणं किंवा पूर्वापरोर्ध्वाधरांतराभावो ग्रहणं किंवा पूर्वापरांतराभावो ग्रहणं उत याम्योत्तरांतराभावो ग्रहणं किमुत ऊर्ध्वाधराभावो ग्रहणं अत्रोच्यते ग्रहकक्षयोर्महदंतरस्याविद्यमानत्वात्। ग्राह्यग्राहकयोरूर्ध्वाधरांतराभावः कल्पांतेपि न स्यात् अतः प्रथमतृतीयषष्ठाः पक्षा न सुंदराः अथ वक्तव्यं पूर्वापरयाम्योत्तरांतराभावो ग्रहणमिति तदपि संज्ञा न घटतो यतो हि विद्यमाने शरतुल्ये दक्षिणोत्तरांतरे ग्रहणं भवत्येव अनेन हेतुना द्वितीयपंचमपक्षौ न शोभनौ अथ वक्तव्यं पूर्वापरांतराभावो ग्रहणं

बिंदोर्भाग्रगशंकुमस्तकगते सूत्रेनले रवेरवगं केबिन्दुस्छनराग्रभाग्रकगते सूत्रेनलेलोकयेत् ॥ २६ ॥ ॥

तत्र प्रतिपर्वणि ग्राह्यग्राहकयोः पूर्वापरांतराभावेस्त्येव न प्रतिपर्वणि ग्रहणं भवति अथ नापि चतुर्थः पक्षः शोभनः तत्र किं नाम ग्रहणमिति मंदमतयो न सुह्यंति अत्रोच्यते पूर्वापरांतराभावे मानैक्यखंडाद् ऊने शरे ग्रहणं मानैक्यखंडतुल्ये शरे बिंबप्रांतयोः संयोगमात्रं भवति यथा यथा मानैक्यखंडाच्छरो न्यूनो भवति तथा तथा ग्राह्यबिंबं ग्राहकबिंबे प्रविशति तावानेव ग्रासः एवं सत्यपि ऊर्ध्वाधरांतरे ग्रहणं तत्र हेतुः अस्मदादिदृष्टेरावरणीभूतत्वं तावत् ग्रहणकर्तृत्वं ननु ग्राह्यग्राहकयोः बिंबसंयोगः अहो आस्तां तावदनेन विचारेण यतः प्रथमं सूर्यचंद्रयोः को वा ग्राहक इति न ज्ञायते अत्रोच्यते अत्र सूर्यचंद्रग्रहणे राहुरेव कारणीभूतः यतो राहुर्नाम पातः पातवशाच्छरः शरवशादेव ग्रहणं अतोवस्वयं ग्रहणे राहुर्हेतुभूतः अत्र ग्रहणे कमलासनानुभावात् राहुग्रस्ते दिवाकरे निशाकरे चेति स्मृतिवाक्यपर्यालोचनेन च राहुरेव सूर्यचंद्रग्रहे ग्राहक इति पूर्वः पक्षः अत्र वयं तु ब्रूमः ननु राहोर्ग्रहणकर्तृत्वे प्रोच्यमाने राहुणा सूर्यचंद्रतुल्येन भवितव्यं यतः पूर्वापरांतराभावं विना ग्रहणं वक्तुं न शक्यते नात्र ग्रहणे राहुणा सह पूर्वापरांतराभावो दृश्यते नातो ग्रहणे राहोर्ग्राहकत्वमिति सिद्धांतः ननु पूर्वपक्षीत्याशंकते अहो भवद्भिः ग्रहणे ग्राह्यग्राहकयोः पूर्वापरांतराभाव एवोच्यते

तदयुक्तं यत: यथाग्रहाणामस्तोभवंत: कालांशांतरितेस्सूर्यात् ग्रहे सति ग्रहास्तादिरिति मन्यते तथैवास्माभि: सप्तभिर्द्वादशभि: कालांशै: सूर्यचंद्राभ्यां यथाक्रममंतरिते राहौ ग्रहणादिबिंबसंयोगमात्रं मन्यंते कालांशांतराभावे परमग्रहणं यथा सूर्यग्रहांतराभावे परमास्तमयउच्यते । एते कालांशा: राहुवशेनैव मानैक्यखंडतुल्यशराद्युत्पन्ना: युक्तियुक्ता एव संति अतो राहुणा ग्राहकेण कालांशांतरितेन सूर्यचंद्रौ ग्रस्येते इति युक्ति: कथं भवच्चेतो न सहते एवं चेत्तदा अस्तेपि सूर्यग्रहयो: पूर्वापरांतराभावमेव वदतु भवत: न कालांशांतरं चेत्तत्र कालांशांतरमंगीक्रियते तर्हि किमनेनापराद्धमिति ग्रहेमतिबंधराहुरेव ग्रहणे कारणमिति युक्तं सत्यं अहो भवतु राहु: ग्रहणे कारणं परं तस्य राहोर्ग्राहकस्य बिंबसिद्धि: कर्तव्या तद्बिंबगमनेनावलोक्यते अत्र तु ऋजुत्रिज्यामितशलाकाभ्यां बिंबभ्रांतौ वेध्या तन्मध्ये या: कला: ता: बिंबकला: अनयैव युक्त्या सर्वेषां बिंबानि साधितानि अनेन विधिनान्यप्रकारेण राहोर्बिंबं ज्ञातुं नैव शक्यते अदर्शनादेव अत: सति कुड्ये चित्रमिति न्यायात् राहोर्ग्राहकत्वं नैव संभवतीति सिद्धांत: अत्रोच्यते अहो भवद्भि: राहुबिंबसाधनोपायादर्शनात् न तस्य ग्राहकत्वमुच्यते तत्र बिंबं साध्यते तद्यथा राहुश्चंद्रकक्षायां क्रां

दिग्देशकालावरणादिभेदैर्नच्छादको राहुरिति ब्रुवंति ॥ ७॥ ७ ॥

तिमंडलविमंडलसंपातोस्ति तत्र सूर्यग्रहणे सूर्यचंद्रौ समकलौ सूर्यात्सप्ताल्पेष्टकालांशांतर एव राहु: सपुच्छादियुत: पक्षाकारो वर्त्तते तस्य मुखं तु क्रांतिमंडलविमंडलसंपातेनास्त्येव अमृतास्वादवेलायां छिन्नश्चक्रेण विष्णुनेति स्मृतिवाक्यबलेन राहुमुखं संपातात् कालांशांतरितमस्तीति कल्पनीयमेव यतो यदाकाशोदृश्यते तदेव गणितेन सिध्यतीति राहुमुखाभावात् राहुमुखस्थानाज्ञानात् तस्य मुखहीनशरीरस्य संपातसंज्ञं स्थानमंगीकृतं ततस्तत्संपातात् कालांशांतरे राहुशीर्षं संपातात् कालांशांतरे चंद्रश्च सूर्यश्चंद्रतुल्य: अत: सूर्यस्य ग्राह्यस्य राहुणा ग्राहकेन सह पूर्वापरांतराभावोप्यस्ति राहुशीर्षं तु चंद्रबिंबोपरि तत्समानमेव एककक्षत्वात्तत्तुल्यत्वाच्च यच्चंद्रबिंबं श्यामं तदेव सूर्यग्रहणे सूर्यस्यावरणीभूतं तथा चंद्रग्रहणे चंद्र: षड्भांतरे सूर्यात् भूछायापि षड्भांतरेण चंद्रभूछाये समाने चंद्रात् वृत्तसंपात: इष्टकालांशांतरे संपातात् राहुशीर्षमपि कालांशांतरे अत: राहुशीर्षं भूछायातुल्यं अत एव चंद्रकक्षायां यावती भूछाया विस्तृति: तावदेव राहुबिंबं अतश्चंद्रग्रहणेपि राहुबिंबं भूभातुल्यं चंद्रस्यावरणीभूतं तयो: पूर्वापरांतराभावोप्यस्ति अतो बिंबसिद्धिरपि वर्त्तत इति युक्तिबलात् आगमप्रामाण्याच्च राहुरेवावश्यं ग्रहणद्वयेपि

कारणीभूतो वक्तव्य इति सिद्धं ननु सूर्यग्रहणे चंद्रबिंबतुल्यं राहुबिंबं भवद्भिरुच्यते चंद्रग्रहणे भूछायातुल्यं राहुबिंबं इदं न घटते यतः एककक्षास्थितस्य राहोर्बिंबं कथं महांतरितं चंद्रबिंबात् भूछायातु त्रिगुणिता सन्ना दूरस्थे ग्रहे बिंबं लघु गतिश्च लघ्वी समीपस्थे ग्रहे बिंबं पृथु गतिश्च पृथ्वी तत्र राहोर्गतिः सदा समैव अतो बिंबलघुमहत्त्वं न स्यादेव अथ वक्तव्यं चंद्रकक्षायां राहुः यथा चंद्रस्योर्ध्वाधरगमनेन बिंबलघुमहत्वं तथैव राहोरिति तदप्ययुक्तं यतः चंद्रबिंबोर्ध्वाधरगमनवशेनैव यदास्य बिंबोनाधिक्यं स्यात्तदा सर्वदा सूर्यचंद्रग्रहणेपि चंद्रबिंबतुल्यमेव राहुबिंबं नोनाधिकं स्यात् कथं चंद्रग्रहणे भूछाया तुल्यं राहुबिंबमुच्यते अतस्तदसत् यदि ग्रहणद्वयेपि चंद्रबिंबतुल्यमेव राहुबिंबं वक्तव्यं तदा चंद्रग्रहणे स्थितिर्महती सूर्यग्रहणे स्थितिर्लघ्वी एवं कथं स्यात् स्थिति लघुमहत्वं तु प्रत्यक्षं ग्रहणे दृश्यते अत चंद्रबिंबतुल्यं राहुबिंबं सर्वदा कल्प्यमित्येतदप्यसत् अन्यच्च सूर्यग्रहणेर्धग्रासे सूर्यबिंबशृंगे तीक्ष्णे चंद्रग्रहणे शृंगयोः कुंडलता दृश्यते अतो हि छादकः ग्रहणद्वये भिन्न एव कल्प्यः अतोपि राहुर्न छादकः पूर्वं भवद्भिः कालांशांतरे अस्तप्रतिबंधाग्रहणमिति यदुक्तं तदप्यसत् यतः सूर्येण स्वतेजसा कालांशांतरेपि ग्रहो निःप्रभः क्रियते अत स्तत्रैव तस्यास्त इति युक्तं अत्र राहुः

गतगम्यदिनाहतद्युमुक्तेः खरसाप्तांशवियुग्युतो ग्रहः स्यात् तत्कालभवस्तथा घटीघ्न्याः खरसैर्लब्धकलोनसंयुतः स्यात् १

अंधकाररूपः अंधकारो नाम तेजोहानिः तेजोहान्या कालांशांतरेण सूर्यचंद्रावाच्छाद्येते इदं सर्वथाल्पसंबंधं एवं सति गणितयुक्तिबलेन प्रत्यक्षदर्शनतयाच राहोर्ग्रहणे ग्राहकत्वं न सम्भवत्येवेति सिद्धांतः नन्वेवं चेत्तर्हि वेदाप्रामाण्यप्रसंगः स्यात् अत्रोच्यते सूर्यग्रहणे चंद्रः छादकः चंद्रग्रहणे भूछाया छादिनी तत्राम्नायां चंद्रबिंबं श्यामं राहुबिंबमपि श्यामं यद्यपि तत्र न कालांशांतरे वृत्तसंपातेस्ति तथापि ब्रह्मवरदानात् ग्रहणकाले तत्र गच्छतीति कल्प्यते एवं चंद्रग्रहणेपि भूछाया श्यामला राहुबिंबमपि तथा यद्यपि तत्तत्र नास्ति कालांशांतरे वृत्तसंपातेस्ति तथापि वरवशात् ग्रहणे भूछायांतर्वर्ती राहुर्भवतीति कल्प्यते आगमभयात् उक्तंच भास्कराचार्यैः सिद्धांतशिरोमणौ ॥ दिग्देशकालावरणादिभेदैर्न छादको राहुरिति ब्रुवंति ॥ यन्मानिनः केवलगोलविद्यास्तत्संहिता वेदपुराणबाह्यं ॥ १॥ ॥ राहुः कुभामंडलगः शशांकं शशांकगश्छादयतीनबिंबं तमोमयः शंभुवरप्रदानात् सर्वागमानामविरुद्धमेतत् ॥ २॥ ॥ एवमत्र मुख्यतया सूर्यस्य चंद्रः छादकः चंद्रस्य भूछाया छादिनीति सिद्धं अहो भवद्भिः राहोर्ग्रहणकर्तृत्वं कृतं चेत्तदा सूर्यग्रहणे सूर्यबिंबस्य पश्चिमे स्पर्शः चंद्रग्रहणे चंद्रबिंबस्य पूर्वे स्पर्शः भूमेः छायां प्रविशतीति कः अथ प्रकृतं ग्रहणसाधनं तदर्थं पर्वांतकालीनौ

चंद्रसूर्यौकार्यावेव राहुरपिकार्यः यतोराहुंविना शरसिद्धिर्न अतः पंचांगीयावधि स्थितग्रहाणां तद्दिनजकरणार्थं स्थूलामेव तदवधिस्थितां गतिं तद्दिनांतरे समानमेवांगीकृत्य ग्रहाणांचालनं वदति तत्स्वल्पांतरं स्यात् अतोनदोषाय भवति इति अथ वा सूर्यचंद्रयोः सूर्योदयिकयोः पर्वांतकालीनकरणार्थंचालनमाह ॥१॥ व्याख्या यदिनजोग्रहस्तद्दिनात् पूर्वकालीन ग्रहसाधनार्थं गतदिनानि अग्र्यकालीनग्रहसाधनार्थं घार्वातिदिनानि तावंति गम्यानि ते गते रथवा गम्यदिवसे ग्रहस्य द्युभुक्तेः दिनागतेः गुणितायाः ये खरसैः षष्ट्या आप्तांशाः लब्धभागाः तैः विसुग्युतो ग्रहः चेत्पूर्वंक्रियते तदाहीनः अग्रिमश्चेत्तदायुक्तः स तद्दिनजोग्रहः स्यात् तथा इष्टघटीघ्न्याः गतेः खरसैर्यालब्धकलाः ताभिर्यथाक्रमं ऊनसंयुतः सन् तत्कालभवः ग्रहो भवतीत्यर्थः ॥ अत्रोपपत्तिः॥ यदि सावनाभिः षष्टिघटीभिः गतिकलाः ग्रहः पूर्वगत्याक्रामति तदा इष्टघटीभिः कतिकला एवंदिनगुणितायांगतौकलाःस्युः षष्ट्या आप्त्याः भागार्थं अतउक्तं गतगम्येत्यादि अतोनुपातः धनर्णोपपत्तिः प्रत्यक्षतोतिसुगमा अथग्रहणसंभवासंभवज्ञानार्थंपूर्वसंभूतिंकथयति ॥१॥ एवंकृतेसति सूर्यचंद्रौतुपर्वांतेसमकलौभवतः उक्तंच सिद्धांतशिरोमणौ. पूर्णांतकालेषुसमौ लवाद्यैर्दर्शांतकालेवयवैर्ग्रहाद्यैः इति

एवंपर्वांतेविराह्वर्कबाहोरिंद्राल्पांशाः संभवश्चेत्ग्रहस्य तेंशानिघ्नाः शंकरैः शैलभक्ता व्यग्वर्कांशः स्यात्पृषत्कोंऽगुलादिः २

ततः पर्वांतकालीनराहूनितस्य सूर्यस्य योबाहुः भुजः तस्य इंद्राल्पांशाः भुजभागाश्चेत् चतुर्दशाल्पाः तदैव ग्रहस्य ग्रहणस्य संभवः स्यादधिकेषुनैव ततस्तेंशाः भुजभागाः शंकरैः एकादशभिः निघ्नाः गुणिताः शैलैः सप्तभिर्भक्ताः संतो दृष्टंफलं सः अंगुलादिः अंगुलपूर्वकः पृषत्कः शरः व्यग्वर्कांशोभवति राहूनितसूर्यो यस्मिन् गोले तद्दिक भवतीत्यर्थः अत्रोपपत्तिः अपवृत्ते यद्राशौ भागेकलायां चंद्रपातोवर्तते तं तु विलोमं दत्वा तत्रविमंडलापमंडलयोः संपातो द्वितीयः षड्भांतरेण द्वयोः संपातयोः त्रिभांतरे परमविक्षेपतुल्यैर्भागैरपवृत्ताद्यः विमंडलार्धमुदक् विदध्यात् तथा द्वितीयं दक्षिणेन एवं स्थिते चंद्रपातावपिद्वौ मेषादितः पूर्वगतौप्रवृत्तः चंद्रःशीघ्रत्वाद्यतोयातत्रयत्रपातसमश्चन्द्रो भवति तत्र विक्षेपाभावः अतो विगतराहुश्चंद्रः चंद्रशरार्थं केंद्रं अत्रतुसूर्यग्रहणे चंद्रसूर्ययोः समत्वात् राहुणा सूर्य एवहीनः कृतः चंद्रग्रहणेपि सूर्यचंद्रयोः षड्भांतरात् विराहुश्चंद्रविराहुसूर्ययोर्भुजसाम्यमेव परमत्रगोलान्यत्वात् शरोन्यदिक् स एव परिलेखे प्रयोजकः अत एवाचार्येण चंद्रग्रहे व्यस्तदिक्शर इतिप्रोक्तं तत्र त्रिभे परमः शरः अतोनुपातः यदित्रिज्यातुल्यया १२० विराह्वर्कभुजज्यया परमोनवत्यंगुलतुल्यः शरः ९० तदेष्टदोर्ज्यया कि-

मिति अत्र भुजभागाः सप्तमिताः प्रकल्पिताः तेभ्यः साधितशरः ११ ततोनुपातः यदि सप्तभि र्भुजभागैर्भवतुल्यः शरः तदेष्टैः किमिति अत उक्तं भेंशाः निघ्नाः शंकंदैः रोलभक्ता इति गोलवशाद्विभवतीत्यर्थ तएवसिद्धं अथ पूर्वार्द्धोपपत्तिः मानैक्यखंडाधिके शरे ग्रहणाभावः अतश्चंद्रभूभाबिंबे परमगतिप्रमाणेन कृत्वा तयोर्योगार्द्धं मानैक्यखंडंकृतं २०।३७ एतावान् शरस्तु चतुर्दशतुल्यभुजभागेभ्य एव भवति अत इंद्राल्पांशाः यदा तदा ग्रहणमित्युपपन्नं अ सूर्यचंद्रभूछायाबिंबानां साधनं कथयति ॥२॥ विगताः अस्तशराः पंचपंचाशत् ५५ यस्याः सा तथा एवं भूतायागतिः तस्याः इष्वंशः पंचमांशः सद्दिग्भिः दशभिर्युक् युक्तः कार्यः ततउष्णगोः सूर्यस्य वपुः बिंबंस्यात् अंगुलपूर्वकमिति सर्वबिंबेषु संयुज्यते अथ सितरुचः चंद्रस्यभुक्ति गतिः युगाश्वैः चतुःसप्तत्या ७४ भाजितासती चंद्रबिंबस्यात् अथ भूछायां साधयति तदपि हिमगोः चंद्रस्य बिंबत्रिघ्नंत्रिगुणंततः निजे नईशभागेन एकादशांशेनयुक्विघस्तु अष्टेनं सत् क्ष्मायां भुवः याभाछायातस्याः बिंबं भूछाया बिंबं भवती

व्यसुशरगतीष्वंशोदिग्युक् भवेत् वपुरुष्णगोरथसितरुचोबिंबं भुक्तिर्युगाश्वलभाजिता
तदपिहिमगोर्बिंबं त्रिघ्नं भनिजेंशलवान्वितं विवस्तु भवतिक्ष्माभाबिंबंकिलांगुलपूर्वकं ३

स्पष्टार्थः अत्रोपपत्तिः उच्चस्थितग्रहस्य बिंबं लघुगतिश्चलघ्वी तथानीचसमस्य ग्रहस्य बिंबं पृथुगतिर्महती यथा यथा गतिर्वर्द्धते तथा बिंबमपि वर्द्धते यथा हीयते तथाऽपचीयते अतो गतेर्बिंबानयनं कर्तुंयुज्यते तद्यथा यदि दिनगति योजनैः गतिकलाः तदा बिंबयोजनैः किमिति कलादीनि बिंबानिस्युः तानि त्रिभक्तान्यंगुलानि यतोत्रांगुलं त्रिकलमेव कल्पितमस्ति अत्राचार्येण लाघवार्थे सूर्यगतिं पंचपंचाशन्मितां प्रकल्प्य सूर्यबिंबमंगुलाद्यं साधितं तद्यथा दिनगतियोजनानि पादोनगोक्षः धृतिभूमितानि ११८५९ एभिः पंचपंचाशन्मितायां गतौ भाजितायां एभिः सूर्यबिंबयोजनैः ६५२२ गुणितायां जातं कलाद्यकर्मबिंबं ३० इदं त्रिभक्तं जातमंगुलाद्यं १० अथ पंचपंचाशदधिकस्य गतेः खंडस्य बिंबं साध्यं तदत्रयोज्यं बिंबंस्यात् अत्र गत्यर्द्धसार्द्धं पंचभागः भवति गतिखंडस्याल्पत्वात् पंचमांश एवांगीकृतः अतो व्यस्तशरगतीष्वंशोदिग्युगित्युपपन्नं एवमेव चंद्रस्य मध्यगतिप्रमाणेनांगुलाद्यं चंद्रबिंबं साधितं १०।४० चंद्रबिंबयोजनानि ४८० अतो

नुपातः यदि मध्यगत्या ७८० इदं चंद्रबिंबं तदा स्पष्टगत्या किमिति स्पष्टयतेः बिंबं गुणः मध्यगतिर्हरः गुणहरौ गुणेनापवर्तितौ हरस्थाने जाताः ७४ अतः सितरुचौ बिंबं भुक्तियुगी चलभाजितेत्युपपन्नं अथ भूछायोपपत्तिः अत्रार्कबिंबं भूव्यासांतरयोजनानां रविकक्षायां कलाकरणार्थमनुपातः यदि दिनगतियोजनैः ११८५९ गतिकलाः लभ्यंते ५९।८ तदार्कबिंबयोजनभूव्यासांतरयोजनैः ४९४१ किमिति अतो लाघवार्थं मध्यगतेरेवानीताः कलाः २४ एतास्त्रिभक्ताः ८ जाताभि रविगति संबंधीनि अंगुलानि ८ अथ भूव्यासस्य चंद्रकक्षायां कलाकरणायानुपातः यदि गतियोजनैः ११८५९ चंद्रगतिकलाः लभ्यंते तदा भूव्यासयोजनैः १५८१ किमिति अंगुलार्थं त्रीणिहरः ३ चंद्रगतेर्गुणः १५८१ हरघातो हरो जातः ३५५७७ गुणहरौ सार्द्धत्रिवेदैरपवर्तितौ ४३।३० जातं गुणस्थाने ३६ हर

छादयत्यर्कमिंदुर्विधुं भूमिभा छादकच्छाद्यमानैक्यखंडं कुरु ॥
तच्छरोनं भवेच्छन्नमेतद्यदा ग्राह्यहीनावशिष्टं तु खच्छन्नकं ४

स्थाने ८१७ अत्र खंडगुणनं विहितं प्रथमस्थान एकादशाभि र्गुणहरापवर्त्तितौ ३।७४ अत्र वेदाद्रिभक्ता चंद्रगतिः चंद्रबिंबं भवति अतश्चंद्रबिंबं त्रिगुणं पृथक् स्थाप्यं द्वितीयस्थानीयो हरः चतुःसप्तत्या भक्तः चंद्रबिंबस्य गृहीतत्वात् अतो जातो द्वितीयहरः ११ गुणकः त्रिमित एवोभयत्र अत एव हिमगोर्बिंबं त्रिनिघ्नं निजेशलवान्वितमिति तत्सूर्यगतिसंबंधिभि रंगुलैः स्वल्पांतरैः ८ हीनं कार्यं यतो भूव्यासात् यावद्रविबिंबमधिकं तावत्प्रमाणेनोपर्युपरि गच्छत्या भूभायाः विस्तृतिरपचयिनी स्यात् यथा पृथुदीर्घेल्पवस्तुनः छाया अग्रे अपचीयमाना सूच्यग्रा भवति अल्पे दीपे पृथुवस्तुनो ग्रे उपचीयमाना स्थूला भवति अतो भूव्यासाद्यावताधिकं तेन भूव्यासो हीनः कृत इति अथ मानैक्यखंडग्रासप्रमाणे साधयति ४ ॥ छ छ छ छ छ

इंदुः चंद्रः अर्कं छादयति अस्मदादिदृष्टेरावरणीभूतोभवति भूमिभाविधुंचंद्रमसंछादयति छादकछाद्ययोः सूर्यग्रहणे सूर्यचंद्रयोः चंद्रग्रहणे चंद्रभूछाययोः येमाने बिंबेतयोर्योदैक्यं तस्य यत् खंडं अर्धंतत् कुरु तन्मानैक्यखंडमिति ॥ शरेणपूर्वसाधितेनऊनं रहितंसत् यदवशिष्टं तत् छन्नं अंगुलाद्योग्रासः स्यात् चेन्मानैक्यखंडाच्छरोननिर्गच्छति तदाग्रहणमपिनास्तीतिज्ञेयं ततः छन्नं यदाग्राह्येनछाद्यबिंबेन हीनंसत् अवशिष्टंतदातुशेषतुल्यखग्रासोभवतिखछन्नमिति यथार्थनामयतः सर्वबिंबंग्रासयित्वा आकाशमपितावद्ग्रसितं इदंतु सर्वग्रहणएवभवति अस्योपपत्तिः रवेर्भार्द्धांतरे क्रांतिवृत्तेभूभाभ्रमतिरवेर्भार्द्धांतरेचंद्रश्चअतः पौर्णमास्यंतेभूभाचंद्रौसमौभवतः अतश्चंद्रस्यभूछाया छादिनीस्यात् दर्शांतेचंद्रादूर्ध्वंरविः समः अतः रवेश्चंद्रमाः छादकोभवति अथग्रासोपपत्तिः चंद्रविमंडलापवृत्तयोः संपातश्चंद्रपातः तथा तस्मात् षड्भांतरेपिएवंस्थानद्वयेशराभावः ततस्त्रिभेंतरेपरमः शरः एवंकृतेचंद्रबिंबमध्यकेंद्रंविमंडले संदेववर्त्ततेसूर्यस्यमंडलकेंद्रंक्रांतिमंडले तस्मात् षड्भांतरेभूछायायाः केंद्रमपिक्रांतिमंडलएव यदाचंद्रस्यशराभावः तदाचंद्रः क्रांतिवृत्तमाश्रयति एवमुभयोरेकमार्गाश्रितत्वात् मंडलभेदः स्यात् तदाचंद्रमंडलंभूछायांप्रविश्यपूर्वतोभिः सृत्यगच्छति तदासर्वग्रहणंभवति स्वल्पेशरेग्रासादिकस्यसंभवः उभयोर्मंडल

मानैक्यखंडमिषुणासहितंदशघ्नंछन्नाहतंपदमतः स्वरसांशहीनं ॥ ग्लौबिंबहृत्स्थितिरियंघटिकादिकास्यात्मर्द्दंतथातनुदलांतरखग्रहाभ्यां ॥५॥

योर्योगार्धादधिकेशरेग्रहणाभावः एवमत्रराहोरकारणंपरिदृश्यतेउक्तंच दिग्देशकालावरणादिभेदैर्नछादकइति किंतु संहितादिषुराहुकृतं ग्रहणमितिप्रसिद्धिः तत् कारणं लल्लेनोक्तं ग्रहणेक्रमलासनानुभावादित्यादि छाद्यछादकयोः मंडलमध्यकेंद्रयोः विमंडलापमंडलस्थयोर्नेमिस्पर्शउभयोर्ई मंडलार्धएवयोगांतरंभवति तावतिशरेमंडलस्पर्शएव तदूनेयावत्तुभयोः संयोगस्तावान् ग्रासइति अधिकेमंडलयोः संपर्कोनभवत्येवतस्माद्ग्रहणाभावः छाद्यतुल्येछन्नेपूर्णग्रहणंतस्माच्छाद्योनेछन्नेचाकाशग्रासः खछन्नसंज्ञा ३ इति अथग्रहणस्यतिथिसाधनमाह ॥५॥ मानैक्यखंडइषुणाशरेणसहितंततोदशभिर्हन्यतेतत्तथा ततः छन्नेनग्रासेन आहतंगुणितं पदंमूलंतत् स्वषडंशहीनं चंद्रबिंबभक्तं घटिकादिकाः स्थितिः स्यात् तथातनुदलांतरखग्रहाभ्यांमर्द्दंस्यात् तद्यथाबिंबार्द्धांतरंशरयुक्तं खग्रासगुणं अतोमूलं स्वषडंशहीनं चंद्रबिंबभक्तं घटिकादिकं मर्द्दंस्यात् इत्यर्थः अत्रोपपत्तिः समायांभुवि अभीष्टव्यासार्द्धेनवृत्तमालिख्यदिगंकंकृत्वा यापूर्वापरावृत्तरेखाततः स्वदिशिमध्यग्रहणिकंशरंप्रसार्यतदग्रेबिंदुः कार्यः ततस्तदग्रसूत्रस्पृक्पूर्वापरायतारेखा कार्यासाविमंडलरेखाततोपवृत्त रेखामध्ये मध्यंकृत्वा भूभाव्यासार्द्धेन यद्वृत्तमुत्पद्यते तद्भूभावृत्तं ततोविक्षेपाग्रेबिंदुंमध्येकृत्वा ग्राह्यबिंबार्द्धेन यद्वृत्तमुत्स

ग्र.ला. ३१ ने तत्र द्रष्टव्यं तच्चंद्रभूभाद्यचांतयोः परस्परमनुप्रवेशो ग्रासः अत्र स्पर्शान्मध्यग्रहणं यावद्येन मार्गेण छादको गच्छति तस्य छादकमार्गस्य प्रमाणं ज्ञातुं त्रिभुजकल्पना कृता सा यथा ग्रा- ८ टी०
ह्यग्राहकयोः अवश्यं मानैक्यार्धतुल्यं अंतरं स एव कर्णः मध्यग्रहणकालिकः शरः कोटिः कोटिकृतिं कर्णकृतेर्विशोध्य मूलं पूर्वापरो भुजो भवति अत्र वर्गांतरं योगांतरघातसमम
तो मानैक्यखंडशरयोर्योगः मानैक्यखंडशरांतरेण गुण्यो वर्गांतरं भवति मानैक्यखंडशरांतरं ग्रास एव अतो मानैक्यखंडमिषुणा सहितं छन्नाहतमिति सिद्धं ततस्तदंगुलात्म
कं जातं कलीकरणार्थं गुणः ३ ततो घटीकरणार्थमनुपातः यदि गत्यंतरकलाभिः षष्टिघटिकाः तदा आभिर्भुजकलाभिः षष्टिघटिकाः किमिति फलं स्थित्यर्धघटिका एवं मानैक्यख
डशरयोगस्य ग्रासगुणस्य पूर्वगुणः ३ इदानीं षष्टिः गुणः एवं जातो गुणघातो गुणः १८० गत्यंतरं हरः गुणहरौ अष्टषष्ट्या ६८ अपवर्तितौ जातं गुणस्थाने सावयवं यावत् अष्टषष्ट्या
भाज्यते तावच्चंद्रबिंबमेव भवति अतश्चंद्रबिंबमेव हरः अत्र खंडगुणनार्थं सषडंशत्रयमितो गुणो धृतः अत्र मूलं गृहीत्वा अनेन गुण्यं अत्राचार्येणास्य गुणस्य ३।१० वर्ग १०
कृत्वा अनेन वर्ग एव प्रथमं गुणितस्ततो मूलं गृहीतं तुल्यमेव भविष्यति यतो वर्गेण वर्गं गुणयेदित्यादि उक्तमिति अतो दशघ्नं ततो मूलमित्युक्तं पूर्वगुणखंडस्थाने एतावदधि

युग्माहतैर्व्यगुभुजांशसमैः पलैः साद्विषास्थितिर्विरहितासहितार्कषड्भात् ॥ऊनेव्यगावितरथाभ्यधिके स्थितिस्तः स्पर्शांतिमे क्रमगते च तथैव मर्दे ॥६॥

कं गृहीतं ०।३१।४० इदं षष्टिः सवर्णितं जातं ३।१० इदं पूर्वगुणतुल्यं जातं अतः स्वरसांशहीनमिति चंद्रबिंबहरोऽस्ति अतो ग्लौबिंबहृदिति एवं स्थितिघटिकाः स्युरित्युपपन्नं अथ
मर्द्दानयने युक्तिः तत्र सम्मीलनकाले बिंबांतरार्द्धकालं मध्ये ग्रहकेंद्रयोरंतरं भवति स च कर्णः मध्यशरः कोटिः अनयोर्वर्गांतरात् स्थितिवन्मर्दसिद्धिर्भवतीति अनुपातसादृश्यात्
अत उक्तं तनुदलांतरखग्रहाभ्यां मर्दमिति एते कृते स्थितिमर्दयोः खंडेन सकले यतः स्पर्शान्मध्यपर्यंतं एकं स्थितिखंडं मध्यान्मोक्षपर्यंतमेकं स्थितिखंडं तथैव मर्दमपि मर्द
खंडं तु खग्राससंभवे नान्यथेत्यर्थः एवं सिद्धं अथ स्पर्शमोक्षस्थितिसाधनमाह ॥५॥ युग्माहताद्विगुणिताः ये व्यगोः भुजांशास्तन्मितैः पलैः साद्विषास्थितिर्विरहिता रती-
स्पर्शस्थितिः सहिता सती मोक्षस्थितिः स्यात् इदं कदा तदाह अर्कषड्भात् द्वादशराशिभ्यः षड्राशिभ्यश्च व्यगोऽने सति अधिके सति इतरथा विपरीतं यत्र विरहिता सा
मोक्षस्थितिः सहिता सा स्पर्शस्थितिः मर्देऽपि तथैव कार्ये अत्रोपपत्तिः अत्र तु असकृत्प्रकारेण स्थितिखंडे साध्येते यथा स्थितिखंडेन गतिर्गुण्या षष्ट्या भाज्या फलं ३१
स्पर्शार्थं ग्रहेषु हीनं मोक्षार्थं युक्तं तेभ्यः पुनः शरादिकं विधाय पृथक् स्थितिखंडे साध्येते ततः पुनः ताभ्यां स्थितिखंडाभ्यां रविराहू चालयित्वा शरावानयित्वा स्थितिका

र्ये एवं असकृत्कर्मे भवतः इदं जडकर्म दृष्ट्वा आचार्येणेत्थमनुकल्प्यांगीकृतः द्विगुणितव्यगुभुजभागतुल्यानि पलानि मध्यस्पर्शः स्थित्यंतराले मध्यमोक्षस्थित्यंतराले च स्वल्पांतरत्वात् तुल्यान्येव दृष्टानि अतो द्विगुणितव्यगुभुजभागतुल्यैः पलैः सा स्थितिर्द्विगुणितोना मोक्षस्पर्शस्थितिखंडे भवतः इत्युपपन्नं गुणितोनितस्योपपत्तिर्यथा षड्भार्कभोने व्यगौ सति स्पर्शकालार्थमृणचालनं दत्वा मध्यकालीनात् न्यूने सति भुजवृद्धिरतः शरवृद्धिः शरवृद्धौ स्थितेरल्पत्वं अतः विरहिते सति मोक्षार्थं धनचालने दत्ते व्यगोराधिक्यं तत्र भुजशराल्पत्वात् स्थितेराधिक्यं अतः सहितेनेति अर्कषड्भाढ्ये अधिके व्यगौ अग्रे भुजवृद्धिः पूर्वं भुजह्रासः अतो विपरीतमिति एकक्षेत्रमूलत्वात् स्थित्यर्धवन्मर्दार्धे अपि कार्ये इत्युपपन्नं अथ स्पर्शकालादिसाधनं कथयति ॥ ६॥ तिथेर्गणितागतायाः विरतिः अतः अयं ग्रहस्य ग्रहणस्य मध्यः सः मध्यकालः निजे ये स्थिती ताभ्यां विरहितः सहितः सन् ग्रहणसुखं स्पर्शः विरामो मोक्षः तयोः कालौ भवतः इत्यनेनैव प्रकारेण स्वमर्दकाभ्यां पिहितापिहिते सम्मीलितोन्मीलिते भवतः एतदुक्तं भवति तिथ्यंतकालो ग्रहस्य मध्यः स चतुर्षु स्था-

तिथिविरतिरयं ग्रहस्य मध्यः स च रहितः सहितो निजस्थितिभ्यां ॥ ग्रहणसुखविरामयोस्तु कालाविति पिहितापिहिते स्वमर्दकाभ्यां ॥ ७॥

नेषु स्थाप्यः स्पर्शस्थित्या न्यूनः स्पर्शकालः स्यात् अन्यत्र मोक्षस्थित्या युक्तो मोक्षकालः स्यात् तथा प्रथममर्द्धेनोनो मध्यः संमीलनकालो भवति द्वितीयमर्द्धेनान्यत्र युक्तो मध्यः उन्मीलनकालः मध्यकालात्पूर्वं स्थित्यर्धकालेन स्पर्शो भवत्येवातो मध्यकाले स्पर्शस्थितिः न्यूना कृता मोक्षकालस्तु मध्यात् अग्रतो मोक्षस्थित्यर्द्धेन भवत्यतो मोक्षस्थितियुक्तो मध्यो मोक्षो भवतीत्युपपन्नं तथैव मध्यात् मर्दार्धतुल्यकालाभ्यां संमीलनोन्मीलनयोः कालौ पूर्वापरौ भवत एव अथेष्टकाले ग्रासमानयति ॥ ७॥ पिहितेन ग्रासेन हृतं गुणितं यत् इष्टं घटिकाद्यं स्थित्या विहृतं कार्यं चेत् स्पर्शकालीनमिष्टं तदा स्पर्शस्थित्या भाज्यं मोक्षं चेत्तदा मोक्षस्थित्या भाज्यमिति तत्फलं दिष्टं सचरणभुवा सपादैकेन युक् अभीष्टं ग्रसनं अंगुलाद्यं स्यादिति व्याख्या अत्रोपपत्तिः अत्रेष्टकर्णं प्रसाध्ये तदूनं मानैक्यखंडं कृत्वा यच्छेषं तत् इष्टकाले छन्नं स्यात् इष्टकर्णानयने प्रयासोस्ति अतो लाघवार्थमनुपातः कल्प्यः यदि स्थितिघटीभिः यथागतो ग्रासस्तदेष्टघटीभिः किमिति अतः पिहितहतेष्टं स्थितिविहृतमिति अत्रानुपातस्यासंभवः वृत्तक्षेत्रपरिध्याश्रितत्वात् अप्रासावपि भासः कृत्वा अतो महदंतरं स्यात् तत्रानुकल्प्येनेत्थमंगीकृतं स चरणभूयुक् सूक्ष्मासन्नं भवति अथ मध्यस्पर्शमोक्षादिदिक् ज्ञानार्थं तदुपयोगि वलनद्वयं साधयिष्यंस्तावदायनं साधयति ॥ ७॥ ८॥ ७ ७ ७ ७

ग्र·ला·
३२

स्वविधुग्रहे त्रिभयुतोनरविः कार्यः सूर्यग्रहणे रविस्त्रिभयुतः कार्यः चंद्रग्रहणेरविरेव त्रिभोनः कार्यः ततः सः अयनलवैः अयनांशो आढ्योयुक्तः कार्यः इतः सायन
सूर्यात् नगशरेंदुमितैः दलैः खंडैः चरवत् यथाचरंक्रियते तथाकार्यं तथायनवलनंभवति तस्यदिशामाह स्वरविः त्रिभयुतोनः यस्मिन् सोलेस्तितद्दिगित्यर्थः अत्रो
पपत्तिः वलनंसाध्यं अहोकिंनाम वलनं कस्मात्किंबलतीत्युच्यते सममंडलप्राच्याः सकाशात् नाडिकामंडलप्राचीयावतांतरेणवलति तदाक्षवलनं अन्वर्थनाम
यतोनाडिकामंडलसममंडलयोरंतरमक्षांशा एवतथैव नाडीमंडलप्राच्याः क्रांतिमंडलप्राच्यावतांतरेणवलतितत् आयनं वलनं अयनसंबंधित्वादायनंतदादौसाध्यते गो

पिहितहृतेष्टंस्थितिविहृतंतनुसचरणाष्ट १५ युग्रसनमभीष्टं ॥८॥ त्रिभयुतो
नरविः स्वविधुग्रहोयनलवाढ्यइतश्चरवद्दलैः नगशरेंदुमितैर्वलनंभवेत्स्वरविदिक्क्रमयम
ध्यनताच्चयत् ॥९॥

लसंधौतु यद्यपिनाडिकामंडलक्रांतिमंडलयोर्योगोस्ति तथापिप्राचीऋजुमार्गेणपरममंतरंपरमक्रांतिवृत्तनाडीवृत्तयोर्यद्यपिपरममंतरंतथापिऋजुमार्गात् प्राच्यंतराभावः अतोयनसंधौवलना
भावः गोलसंधौपरमंगोलसंधौग्रहस्यदोर्ज्याभावात् कोटिज्यापरमा अयनसंधौदोर्ज्यापरमत्वात् कोटिज्याभावः यत्रकोटिज्यापरमत्वंतत्रायनवलनस्यपरमत्वंयत्रकोटिज्याभावस्तत्रायनव
लनाभावः अतः कोटिज्यातोवलनंसाध्यं तत्रग्रहः सत्रिभः तस्यभुजज्याकोटिज्यैव प्रत्यक्षंसंभवति एवंसूर्यग्रहणेसूर्यः त्रिभयुक्तइति एवंचंद्रग्रहणेचंद्रस्यापित्रिभंयोज्यं तत्रसूर्यचंद्रयोः षड्भां
तरत्वात् भुजतुल्यत्वं अतो रवावेवत्रिभंदेयं परमत्रिभं हीनं कार्यं गोलान्यत्व सद्भावात् ततः सायनः कार्यएव अयनसंबंधित्वात् ॥

टी·
३२

अतः त्रिभयुतोनसायनरविदोर्ज्यातो वलनसाधनेनुपातो यथा यदि त्रिज्या १२० तुल्यया दोर्ज्यया परमक्रांतिज्यातुल्ययाभनं वलनं ४८।४५ तदेष्टया किमिति अन्योनुपातः
यदि द्युज्यावृत्ते इदं तदा त्रिज्यावृत्ते किं एवं जातायनवलनज्या अस्याः धनुः आयनंवलनं स्यात् तत्रेदं गुरुकर्मदृष्ट्वा आचार्येण राशित्रयमध्ये प्रतिराशिवलनानि ॥ प्रसाध्य तान्यधोधो
विशोध्य खंडानि कृतानि ७।५।१। एवं तानि वलनानि अन्यत्र संपूर्णज्यावद्वलनप्रदानार्थं द्विगुणानि कृतानि संति एवमेभिः खंडैश्चरद्वलनं साध्यं यतश्चरखंडान्यपि राशित्रयमध्ये त्रीण्ये
वसंति अतो भुजर्क्षसङ्ख्यात्रगर्द्धयोगइत्यादि सममेव एवमायनंवलनं प्रसाध्येदानीमाक्षजंवलनंसाधयति मध्यनताच्चयत् ॥ मध्यनतात् मध्यकालद्युदलांतरं नतं ततः विषयैः पंच
भिर्लब्धं यत् गृहादि राश्यादि ततः उक्तवत् नगशरेंदुमितैरेव खंडैर्वलनं साध्यं तत् पलभयाहतम् गुणितं अक्षैः पंचभिर्हृतं भक्तं कार्यं तदाक्षंवलनं भवति तत्पूर्वपरे नते क्र-
मात् उदगपाक् स्यात् पूर्वनते उत्तरं पश्चिमनते दक्षिणं एवमुभयोर्वलनयोर्या संस्कृतिः सा रसैः षड्भिः हृता भक्ता सती अंघ्रयो वलनदिक् चरणाः स्युरित्यर्थः अत्रोपपत्तिः
क्षितिजे यद्यपि नाडीमंडलसममंडलयोः संपातः तथापि प्राचीऋजुमार्गयोस्तत्र परममंतरं ॥ अक्षज्यातुल्यं खमध्ये नाडिकामंडलसममंडलयोर्यद्यपि परमंत

॥१०

विषयलब्धगृहादितउक्तवद्वलनमक्ष ५ हृतंपलभाहतंउदगपागिहपूर्वपरेक्रमाद्रसहृतोभयसंस्कृतिरंध्रयः:१०

रमस्ति तथापिऋजुमार्गारंभात् प्राच्यो
रंतराभावः उदये परममक्षज्यातुल्यं आक्षंवलनं तच्च नतमपि परमं खमध्ये आक्षवलनाभावः तच्च नतस्याभावः अतो नताद्वलनं साध्यं अत्रानुपातो यथा नतघटीनां पंचमांशो राश
यः स्युः यतः पंचदशघटीनां मध्ये राशित्रयं एवं नतस्य पंचांशस्य दोर्ज्यातो वलनं साध्यं तद्यथा यदि त्रिज्यातु १२० ल्यया नतज्यया अक्षज्यातुल्यं परमं वलनं तदेष्टनतदोर्ज्यया कि
मिति ततो द्युज्यावृत्ते इदं तदा त्रिज्यावृत्ते किमिति अत्र लाघवार्थं पंचमितां पलभां प्रकल्प्य सार्द्धद्वाविंशति २२।३० मितान् अक्षांशान् कृत्वा पंचघटीषु त्रीणि वलनानि पृथक् प्रसा
ध्य तान्यधोधो विशोध्य ततोर्द्धानि कृत्वा वलनखण्डानि क्रियंते तानि तु पूर्वायनतुल्यान्येव भवंति अतस्तैरेव वलनमिति परमे तद्वलनं पंचपलभाप्रमाणेन जातं स्वदेशीयकरणार्थम
नुपातः यदि पंचपलभाप्रमाणेनेदं तदेष्टाक्षभया किमिति अतोक्षहृतं पलभाहतमिति पूर्वापरे नते दक्षिणोत्तरमिति अस्योपपत्तिर्गोलोपरि प्रत्यक्षतो दृश्यते अथ रसहृतेत्यस्यो
पपत्तिः अत्रेदं वलनं भागाद्यं वृत्तपरिधौ देयं अत्र एकमहादिकमध्ये अष्टौ चरणाः कृताः ततोनुपातः यदि चक्रांशैः द्वात्रिंशत् सर्वेषां चरणाः ३२ लभ्यंते तदेष्टवलनांशैः किमि

तिगुणहरयोर्गुणेनापवर्तितयोः लब्धाः हरस्थाने ११।१५ अत्र वलनार्द्धकृतमत्स्यतोहरार्द्धकृतं ५।३७ अतोरसतत्त्वेत्युक्तं स्वल्पांतरत्वात् खच्छन्नं दिक्चरणसाधनमाह खषड्भिः षड्भ्याहन्यते तत्तथा एवंभूतंपिहितंछन्नंमानैक्यार्द्धेन मानैक्यखण्डेनहृतं भक्तंसत् यल्लब्धंतस्मात् यन्मूलं तत्तेस्य छन्नस्य आशांघ्रयोदिक्चरणाः स्युः खच्छन्नं सदलैकेन सार्द्धैकेन युक् खच्छन्नांजायंते तेतथाएवंभूताः आशांघ्रयोदिक्चरणागदिताः उक्ताः स्युः ग्राह्यबिंबार्द्धेनहृत्तं दिगङ्कुःसमदंतकोष्ठां ३२कितं चकृत्वा तत्र शराशायाः शरस्य दिशमारभ्य अपाकुउदक्वलनजाशांघ्रीन् सव्यापसव्यंदद्यात् चेद्दक्षिणाःवलनांघ्रयः तदाशरदिशः सव्यंक्रमेणदेयाः चेदुत्तरास्तदापसव्यं व्युत्क्रमेण तत्र मध्यंमध्यग्रहणंस्यात् खग्रसनं खग्रासः अन्यदिशि मध्यग्रहणस्पर्शिन्यामेवदिशिभवेत् खग्रासाभावे बिंबस्य शेषकंमध्यस्पर्शिन्यामेवदिशिभवेत् अत्रोपपत्तिः यदिमानैक्यखंडतुल्यग्रासेनदिगंघ्रि ० वर्गः स्वल्पांतरः षष्टितुल्योलभ्यते तदिष्टेन किमिति तन्मूलं ग्रासाद्दिक्चरणाद्युपपन्नं एवं खच्छन्नांघ्रयोपि साध्यास्तत्राचार्येणसार्द्धैकयुगित्युपलब्ध्याः स्वल्पांतराःसाधिताः शेषांपपत्तिः स्पष्टा अथ स्पर्शमोक्षदिक्ज्ञानमाह॥ मध्यग्रहणात् खच्छन्नस्य खग्रासस्य आशांघ्रिभि र्दिक्चरणैः प्राक्पश्चाद्दत्तैः इंदोश्चंद्रस्य स्पर्शमोक्षौ

॥१२॥

मानैक्यार्द्धहृतात्खषड्घ्नपिहितान्मूलंतदाशांघ्रयः खच्छन्नंसदलैकयुक्चगदिताः खच्छन्नजाशांघ्रयः॥ सव्यासव्यमपागुदग्वलनजाशांघ्रीन्प्रपद्याच्छराशायाः स्याद्ग्रहमध्यमन्यदिशिखग्रासोथवाशेषकं॥१२॥ मध्याच्छन्नाशांघ्रिभिःप्राक्चपश्चाद्दिंदोर्व्यस्तंतूष्णगोः स्पर्शमोक्षौ॥ खग्रस्तात्खच्छन्नपादैः परेप्राग्दत्तैरिंदोर्मीलनोन्मीलनेस्तः१३

स्तः एतदुक्तंभवतिमध्यग्रहणाच्चिन्हात् छन्नांघ्रयः पूर्वदिशियथागतागणयित्वादेयाः तत्रस्पर्शः चंद्रस्यभवेत् तथैवमध्यात् छन्नांघ्रयः पश्चिमदिशिदेयाः तत्रचंद्रस्यमोक्षः उष्णगोः सूर्यस्यव्यस्तंविपरीतं तद्यथामध्यात् छन्नांघ्रयोहि पश्चिमतोदेयास्तत्रस्पर्शः पूर्वदिशिदेयास्तत्र मोक्षइत्यर्थः खग्रस्तात् खग्रासचिन्हात् खच्छन्नांघ्रिभिः पश्चिमायांदत्तैः संमीलनंस्यात् पूर्वदिशिदत्तैः उन्मीलनंस्यात् इतिसूर्यस्यविपरीतं पूर्वदिशिसंमीलनंपश्चिमदिश्युन्मीलनंस्यात् अत्रोपपत्तिः चंद्रग्रहणेतुग्रासस्यचंद्रस्यपूर्वगतेर्बाहुल्यात् अग्रेसरण्याः पूर्वदिशिग्राहकत्वेनवर्त्तमानायाः भूछायायाः बिंबांतश्चंद्रमाः प्रविशति अतश्चंद्रबिंबस्यपूर्वदिशिप्रथमंग्राहकबिंबे लग्नत्वात् तत्रस्पर्शः एवंग्रहणंकृत्वापूर्वगतिबाहुल्यात् चंद्रमाः भूछायांपश्चिमतस्त्यक्त्वागतः अतोनिःसरणेग्राह्यबिंबस्यपश्चिमदिशिसंयोगः अतस्तत्रमोक्षः उक्तंच सिद्धांतसिरोमणौ पूर्वाभिमुखोगच्छन् भूछायांतः शशीविशतितेनप्राक्प्रग्रहणंपश्चान्मोक्षोस्यनिःसरतः सूर्यग्रहणेहि सूर्यस्य ग्राह्यस्य पूर्वगतेरपेक्षयाचंद्रस्यग्राहकस्यपू

पूर्वगतिबाहुल्यात्ग्राहकेणपश्चिमस्थेनपूर्वदिग्वर्तमानस्यग्राह्यस्यस्पर्शः कृतः अतोग्राह्यबिंबस्यपश्चिमदिशिस्पर्शः निःसरणवेलायांग्राह्यबिंबस्यपूर्वदिशिग्राहकबिंबलग्नं अ
तोत्र मोक्षः अनयैव युक्त्या संमीलनोन्मीलनदिशोरुपपत्तिर्ज्ञातव्या॥ दैवज्ञवर्यस्यदिवाकरस्य सुतेन मल्लारिसमाह्वयेन वृत्तौ कृतायांग्रहलाघवस्यसमाप्तइंदुग्रहणाधिकारः
इति श्रीगणेशदैवज्ञविरचित ग्रहलाघवस्यटीकायांमल्लारिदैवज्ञविरचितायां चंद्रग्रहणाधिकारः पंचमः अथ सूर्यग्रहणाधिकारो व्याख्यायते तत्रादौ लंबनं वृत्तद्वयेन साध
यति अमांतेलग्नं कृत्वा तत् त्रिभेण राशित्रयेण ऊनं सत् पृथक् अन्यत्र स्थाप्यं क्रांत्यंशैः संस्कृतः अक्षः अक्षांशाः नतांशाः स्युः संस्कारस्तु एकदिशोर्योगो भिन्नदिशोरंतरमि
तिप्रसिद्धः तेषांनतांशानांयोद्विघ्नांशो द्वाविंशतिभागः सवर्गितः कृतवर्गः सन् चेद्द्विकात् द्वयात् ऊर्ध्वः अधिको भवति तदा सोऽधः अन्यस्थाने स्थाप्यः ततोत्र द्व्यूनः द्विहीनः सन्
खंडितः अर्द्धितः यत्फलं तेन सः पूर्वस्थापितः युतस्ततः सार्कोद्वादशयुक्तः सन् हारः स्यात् ततः त्रिभोनोदयो राशित्रयोनलग्नं अर्कः सूर्यः अनयोर्योर्विश्लेषः अंतरं यथा रा
॥१॥

लग्नं दर्शांतेत्रिभोनं पृथक्स्थं तत्क्रांत्यंशैः संस्कृतोक्षोनतांशाः तद्विघ्नांशो २२ वर्गितश्चेत्द्विकोर्ध्वो धौसोद्व्यूनः खंडितस्तद्युतः सः १
सार्कोहारः स्यात्त्रिभोनोदयार्कविश्लेषांशा १० शांशहीनघ्नशक्राः हाराप्ताः स्याल्लंबनंनाडिकाद्यं तिथ्यांस्वर्णं वित्रिभेर्काधिकोने २

शित्रयाल्पंतथाकार्यंतस्ययेंऽशाः तेषांयः आशांशो १० दशमांशः तेनहीनाः सङ्गुणिताश्च येशक्राः चतुर्दशतेहाराप्ताः संतो नाडिकाद्यंलंबनंस्यात् तत्तिथ्यां अमाघटीषु स्वर्णंकार्यं
कदेस्याह वित्रिभेत्रिभोनलग्ने अर्कात् अधिके धनंऊने ऋणमिति अत्रोपपत्तिः ननुकिन्नाम लंबनं उच्यते लंबनमित्यन्वर्थंनाम यतो दृक्सूत्राच्चंद्रो यावतांतरेण लंबितस्त-
ल्लंबनं अहोलंबनंचंद्रग्रहणेकथंनास्ति सूर्यग्रहणेकथमित्युच्यते चंद्रग्रहणेतु चंद्रोग्राह्यः स्वकक्षायांभ्रमति भूछायापि ग्राहकरूपा चंद्रकक्षायामेव साधितास्ति अतोग्राह्य
ग्राहकसमकक्षत्वात् लंबननत्योरभावः सूर्यग्रहणेतुग्राह्यग्राहकयोः सूर्यचंद्रयोः भिन्नकक्षत्वाल्लंबननती उत्पन्ने अत्र भंगिविरचय्यसूर्यस्य लंबननत्युपपत्तिंशिष्यान्
प्रतिदर्शयेत् तत्र किंचिदुच्यते प्रथमं भूवृत्तं लघु गतितिथ्यंशतुल्यं शंकार्यं तदुपरिचंद्रकक्षावृत्तंकार्यं तस्मादुपरिसूर्यकक्षावृत्तं अत्र द्वयोर्वृत्तयोराशयो द्वादशांक्याः तत्र
यथास्थाने चंद्रकक्षायां चंद्रो देयः सूर्यकक्षायां सूर्यलग्ने अपि यथास्थाने देये एवं भूगर्भान्नीयमानंचंद्रस्योपरि यत्सूत्रं तद्गर्भसूत्रमित्युच्यते एवंभूपृष्ठात्नीयमानं
चंद्रं सांतरं स्वकक्षायाति अतश्चंद्रकक्षायांदृक्सूत्राच्चंद्रो यावतांतरेण लंबितं स्तल्लंबनं उक्तंच दृक्सूत्राल्लंबितश्चंद्रस्तेन तल्लंबनं स्मृतं अतोहि भूगर्भस्थलोकानां

सूर्यग्रहणेपिलंबनाभावः दृग्गर्भसूत्रयोरेकीभूतत्वात् एवमत्र लंबनेकेवलं भिन्नकक्षात्वमेवकारणंनोवाच्यं भूगर्भे लंबने भावदर्शनात् अतो भिन्नकक्षात्वं द्रष्टृणां भूपृष्ठास्थि
तित्वंचेति द्वे लंबनकारणे लंबनंतुपूर्वापरंयतोगर्भसूत्रीये चंद्रेदृक्सूत्रीकरणंपूर्वगत्यैव एवंग्रहे पूर्वापरांतरोत्पन्नत्वाद्दक्षिणोत्तरांतरमप्युपपन्नं तन्नतिसंज्ञं अत्र लंबनसाधनोपा
यो यथाक्षितिजे दृग्गर्भसूत्रयोः परममंतरं चंद्रगतितिथ्यंशतुल्यकलानां सूर्यगतितिथ्यंशकलानां मंतरतुल्यं ४८।४५ खमध्येतु दृग्गर्भसूत्रे एकीभूते अतो लंबनाभावः उक्तं
च दृग्गर्भसूत्रयोरैक्यात्खमध्ये नास्तिलंबनमिति क्षितिजे रवितुल्यं लग्नं तस्यत्रिभेहीने कृतेतत्सूर्यांतरंत्रिभमेवातोस्माल्लंबनं साध्यंयतः खमध्येत्रिभोनलग्नं रवितुल्यं
अतस्तदंतराभावे लंबनाभावश्च अत्रानुपातः यदि त्रिज्यातुल्यया सूर्यत्रिभोनलग्नांतरदोर्ज्ययेदं परमं लंबनंतदेष्टदोर्ज्यया किमिति अत्र लंबनकलानां घटीकरणार्थमनु
पातः यदि गत्यंतरकलाभिः षष्टिघटिकास्तदा लंबलंकलाभिः किमिति जातं घटिकाद्यं परमंलंबनं अनेन दोर्ज्या गुण्या त्रिज्यया भाज्येष्टलंबनं स्यादित्यत्राचार्येण
भागेभ्यएवसाधितं तद्यथा त्रिभोनोदयार्कविश्लेषांशाशांश्च हीनघ्नशक्रा इतिपरमिदं लंबनं मध्यमंयतः खमध्यक्षितिजयोरंतरं सर्वत्रत्रिभमेवलक्षितंतन्न यतः याम्या

॥२॥ त्रिकु१३निघ्नविलंबनकलास्तत्सहितोनस्तिथिवद्व्यगुः शरोतः॥ अथषड्गुणालंबनलवास्तैर्युगयुग्विगत्रिभतः पुनर्नतांशाः ३

तरक्षितिजयोरंतरं सर्वत्रत्रिभंनास्ति अतः खमध्यएवेदंलंबनं इष्टयाम्योत्तरवृत्तीकरणार्थमनुपातः खमध्येतुत्रिभोनलग्नस्यनतांशाभावादुन्नतांशाः परमाः अतो
नुपातः यदिद्वादशतुल्येत्रिभोनलग्नस्यछायाकर्णेइदं लंबनं तदेष्टछायाकर्णे किमिति अत्रव्यस्तत्रैराशिकं एवमत्रेष्टत्रिभोनलग्नार्कांतरदोर्ज्यायाः परमलंबन
मिदं घटिकाद्यमंसकृत्प्रकारत्यागात् घटीचतुष्टयादूनं गृहीतं ३।४५। अयंगुणः द्वादशच १२ गुणः त्रिज्याहरः १२० अत्रत्रिज्यातुल्येष्टदोर्ज्या १२० गुण
घातगुणा त्रिज्या भक्ता गुणघाततुल्या जाता ४५ एतावती त्रिज्याकृता ४५ इयंत्रिभोनोदयार्कविश्लेषांशांशाहीनघ्नशक्रतुल्याभवति अतः सादोर्ज्या छायाकर्णभक्तास्पष्टं
लंबनंस्यात् तदर्थं त्रिभोनलग्नस्य नतोन्नतलवाः साध्याः ततोनपातः यदि उन्नतांशज्याकोटौ त्रिज्याकर्णः तदाद्वादशकोटौ कइति एवमत्र छायाकर्णः द्वादशेभ्यः नतां
शाद्द्वाविंशत्यंशवर्गेणाधिकारोभवति अतोद्वादश १२ नतांशद्वाविंशत्यंशवर्गयुक्ताः छायाकर्णः स्यात् तस्यहारसंज्ञाकृता यतः सदोर्ज्यायाः हरः इदंनतांशद्वाविंश
त्यंशवर्गेद्व्यूने भवति अधिकेसांतरं तद्यथाद्व्यधिकात् द्वयमपास्य यच्छेषं तदर्द्धमपि नेतत्रनतांशद्वाविंशत्यंशवर्गेण युक्तं तावत् द्वादशछायाकर्णांतरं अनेन द्वादश

युक्ताः त्रिभोनलग्नछायाकर्णो भवति अनेनेष्टदोर्ज्या भक्ता लंबनं स्यादित्युपपन्नं एतल्लंबनं चंद्रगत्या गुणयित्वा षष्ट्या लब्धं चंद्रे देयं तथा रवावपि देयं ताभ्यां तिथिः साध्या अतो हि तल्लंबनं तिथ्यामेव देयमुक्तं धनर्णोपपत्तिर्यथा पूर्वकपाले दृक्सूत्रात् गर्भसूत्रं पूर्वस्यामधोलंबितं अतो ग्रहे पूर्वकपाले धनं देयं अत्र त्रिभोनलग्नमर्काल्पकमस्ति ग्रहे यद्धनं क्रियते तत्तिथौ ऋणमेव भवति भोग्यत्वात् तथा पश्चिमकपाले दृक्सूत्रात् गर्भसूत्रं पश्चिमतो वर्तते अतो ग्रहे ऋणं त्रिभोनलग्नमत्रार्काधिकं यत् ग्रहे ऋणं तत्तिथौ धनं अत उक्तं स्वर्णं वित्रिभेर्काधिकोने इति एवं सूर्यग्रहे लंबनसंस्कृतो दर्शांत एव मध्यकालो भवतीयं युक्तिर्गोलोपरि सविस्तरा। अथ लंबनकाले व्यगोश्चालनमाह। त्रयोदशगुणितं लंबनं कलाः स्युः तिथिवद्व्यगुस्ताभिः कलाभिः सहितोनः तिथौ चेल्लंबनं धनं तदा व्यगावपि धनं ऋणं चेत्तत्रापि ऋणमिति अतो मुष्माद्व्यगोः शरः पूर्ववत् साध्यः अथ शब्दोनंतरवाची षड्गुणलंबनं लवाः स्युः तैर्लवैः युग्वियुक् वित्रिभतः नतांशाः साध्याः ततः क्रांत्यक्षांशसंस्कारेण नतांशाः साध्याः एत

दशहृतनतभागोनाहताष्टेंदवस्तद्रहितसधृतिलिप्तैः षड्भि ६ राभास्त एव
स्वदिगितिनतिरेतत्संस्कृतः सांगुलादिः स्फुट इषुरमुतोत्र स्यात्स्थितिछिन्नपूर्वं ४

दुक्तं भवति षड्गुणलंबनं भागास्ते त्रिभोनलग्ने लंबने धने सति धनं कार्यं ऋणे लंबने सति ऋणं कार्यं ततः क्रान्त्यक्षांशसंस्कारेण नतांशाः साध्याः इत्यर्थः अत्रोपपत्तिः यदि षष्टिघटिकाभिः विपातचंद्रगतिकालाः एता ७८७ स्तदा लंबनकलाभिः किमिति गुणहरयोर्हरेणापवर्तितयोः जाताः गुणस्थाने त्रयोदश १३ अतस्त्रिकुनिघ्नं विलंबनमिति अथ मध्यकालीनं त्रिभोनं कार्यं लग्नं तत्र लाघवार्थं लंबनेन दर्शान्तकालीनत्रिभोनलग्नमेव चालयति तत्र घटिकाः षड्गुणाः भागा भवंति यतः षष्टिघटिकानां चक्रभागाः अतो हि षड्गुणलंबनं दर्शांतकालीनत्रिभोनलग्ने धनमृणं कार्यं तन्मध्यकालीनत्रिभोनलग्नं भवति अतो नतांशाः कार्या नतिसाधनार्थमेव अथ नतिसाधनमाह दशभक्ता ये नतांशास्तैः ऊनाः सन्तस्त एव गुणिताः ये अष्टेन्दवः ते कलाद्याः पृथक्स्थाप्याः तैः रहिता हीनाः ये सधृतिलिप्ताः षड्भागाः अष्टादशकलान्विताः षड्भागाः ताभिः कलाभिः हीनाः कार्या इत्यर्थः ततो यच्छेषं तेन ते पृथक्स्था भाज्याः यल्लब्धं सा स्वदिक् नतांशदिक् नतिः स्यात् एतया नत्या

संस्कृतः सः अंगुलादिः शरः स्फुटः स्यात् अमुनाहि स्पष्टशरादेव स्थितिछन्नपूर्वं साध्यं अत्रोपपत्तिः नतिकारणं तु लंबनानयने उक्तमेव तत्साधनार्थमनुपातः यदि त्रि-
ज्यातुल्यया १२० नतांशज्यया परमाः नतिकलाः ४८।४५ तदेष्टनतांशज्यया किमिति ताः नतिकलाः त्रिभक्ताः अंगुलानि स्युः १६।१५ तथात्र त्रिज्या ८१ धृता द्वयंर
शत्वत् नतभागो नाहतार्धेंदु १८ तुल्या भवति इयं त्रिज्या ८१ केन भक्ता परमनतिः स्यादतः परमनत्यंगुलं भक्ताजातो हरः ४।५७ अयं हरः त्रिज्यातुल्यकलो नता-
शदशकलषड्भागतुल्य एव अतस्तद्रहितसधृतिलिप्तैः षड्भिः तएव भक्ताः अंगुलाद्या नतिः स्यादित्युपपन्नं खमध्याद्दक्षिणतः उत्तरतो वा त्रिभोनलग्नं याव
द्विनतांशैर्नतं स्यात् तद्दर्शनेनैव दृक्सूत्राच्चंद्रोपि दक्षिणतः उत्तरतो वा नति संज्ञेनांतरेण नतो भवति अतोहि नतांशदिगेव नतिर्भवतीत्युपपन्नं इयं नतिः स्थूला स्वल्पां
तराभवति अत्र नतिर्याम्योत्तरमंतरं शरोपि याम्योत्तरः अतो नतिसंस्कृत एव शरः स्पष्टशरो भवति अस्मादेव छन्नस्थित्यादिकं साध्यं यतोहि मानैक्यखंडं क

स्थितिरसहतिरंशाविभिन्नैः पृथक्स्थं रहितसहितमाभ्यां लंबने येतु ताभ्यां॥ स्थितिविरहितयुक्तः संस्कृतो मध्य
दर्शः क्रमशइति भवेतां स्पर्शमुक्त्योस्तु कालौ ॥५॥ मर्दादेवंमीलनोन्मीलने स्तो ग्रासोनादेश्योंगुलाद्यो र
वींद्वोः॥ धूम्रः कृष्णः पिंगलोल्पार्द्धसर्वं ग्रस्तश्चंद्रोर्कस्तु कृष्णः सदैव ॥६॥

र्णः ग्राह्यग्राहकयो याम्योत्तरमंतरं कोटिः सातु नतिसंस्कृतशरतुल्यैव भवति चंद्रग्रहणेतु नतेरभावात्केवलशरतुल्यैव भवति अथ स्पर्शकालमोक्षकालौ साध
यति षड्गुणाः स्थितिरंशाः स्युः तैरंशैः मध्यदर्शांत कालीनं पृथक् स्थापितं त्रिभोनलग्नं स्पर्शार्थं रहितं मोक्षार्थं सहितं कार्यं आभ्यां त्रिभोनलग्नाभ्यां पृथक् लंब
नेसाध्ये ताभ्यां लंबनाभ्यां स्थित्या विरहितयुक्तो मध्यो गणितागतो दर्शः संस्कृतः कार्यः तद्यथा स्पर्शार्थं तिथौ स्थितिर्हीना कार्या तस्यां तल्लंबनं धनमृणं ल
क्षणागतं कुर्यात् सः स्पर्शकालो भवति तथैव मोक्षार्थं दर्शांते स्थितिर्योज्या तस्यां स्वीयं लंबनं संस्कार्यं स मोक्षकालो भवति इत्यर्थः अत्रोपपत्तिः स्थितिहीन-
युक्ततिथेः पृथक् त्रिभोनलग्ने साध्ये ताभ्यां लंबने अपि साध्येते स्थितिहीनयुक्ततिथौ देये तौ स्पर्शमोक्षौ भवत इत्यत्र लाघवार्थं त्रिभोनलग्ने स्थितिघटीभिश्चालिते
त्र स्थितिघटिकाः यावत् षड्गुणाः क्रियंते तावत् भागाः भवंति ते भागाः दर्शांतकालीने त्रिभोनलग्ने स्पर्शकालीनकरणार्थं ऋणं देयाः प्राक्कपालत्वात् मोक्षार्थं

धनंदेयाः अग्रे सरलादित्युपपन्नं अत्रार्कोपि स्थितिचालितो गृह्यते चेत् सूक्ष्मता स्यादितिद्रष्टव्यं अथ संमीलनोन्मीलनकालौ साधयति एवमनयैववरीत्या मर्दात् मीलनोन्मीलनेस्तः एतदुक्तं भवति षड्गुणं भागाः स्युः तेदर्शांतकालीनत्रिभोनलग्ने संमीलनार्थे हीनाः उन्मीलनार्थे युक्ताः ताभ्यां पृथक् लंबने साध्ये ततश्च संमीलनार्थे तिथौ मर्दे न्यूनंकार्यं तत्र तल्लंबनं कार्यं संमीलनकालो भवति तथैव मर्दे तिथौ योज्यं तत्र लंबनं द्वितीयंदेयं उन्मीलनकालो भवति अस्योपपत्तिः स्पर्शमोक्षवत् कृगमारवींद्वोः सूर्यचंद्रयोः अंगुलादल्पोग्रासः अनादेश्यः यतोहि किरणबलवशात् अल्पग्रासो नदृश्यतइति प्रत्यक्षहेतोः चंद्रोहि अल्पार्द्धसर्वग्रस्तः धूम्रादिः स्यात् तद्यथा अल्पग्रहे धूम्रवर्णः अर्द्धग्रहे कृष्णः सर्वग्रहे पिंगलः स्यात् अर्कः सदा अल्पादिग्रासेषु कृष्णः एकवर्णः अत्र दृग्गोचरतयैवोपपत्तिः अथेष्टग्रासानयनमाह इष्टंघटीपूर्वं द्विघ्नं द्विगुणं न

इष्टंद्विघ्नंछन्नक्षुण्णंस्पर्शांत्यान्तर्नाडीभक्तंरूपार्द्धेनोपेतंविद्यादिष्टेकालेर्कस्यग्रासं ॥७
अथमासगणात्सुलघुक्रिययाग्रहणद्वयसिद्धिकृतेभिदधे ॥ स्फुटसूर्यविपाततिथीश्चवपु
ग्रसनादिविशेषचमत्कृतये १

तोहि छन्नेन ग्रासेन क्षुण्णं गुणितं सत् स्पर्शांत्ययोः स्पर्शमोक्षयोः या अंतर्मध्ये नाडिकाः पर्वकालाख्याः ताभिर्भक्तं ततोलब्धं रूपार्द्धेन उपेतं युक्तं सत् अर्कस्येष्टकाले ग्रासं विद्यात् जानीयात् अत्रोपपत्तिः यदि स्थितिघटिकाभिः अयंग्रासस्तदेष्टघटिभिः किमिति ग्रासोभीष्टघटीगुणः स्थित्याभाज्यः अत्र स्पर्शमोक्षस्थितीइष्टे पृथक् नकृते अतोहिपर्वकाल एवहरो गृहीतः एवं हरस्य द्विगुणत्वात् इष्टं द्विगुणं कार्यमित्युपपन्नं

दैवज्ञवर्यस्य दिवाकरस्य कृतेन मल्लारिसमाह्वयेन
वृत्तौकृतायां गृहलाघवस्य जातोदिनेशग्रहणाधिकारः

इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरसुतगणेशदैवज्ञकृतग्रहलाघवस्य टीकायां-मल्लारिदैवज्ञविरचितायां सूर्यग्रहणाधिकारः षष्ठः ६ ॥अथ मासगणादेव ग्रहणद्वयसाधनाधिकारो व्याख्यायते मासगणात्सुतरां लघुक्रियया ग्रहणद्वयसि

द्यर्थं स्फुटान् सूर्यविपाततिथीन् तथा वपूंषि बिंबानि ग्रसनं ग्रासः इत्यादिविशेषचमत्कारदर्शनार्थं अभिदध्ये अभिधास्ये तत्रादौ क्षेपकानाह अर्केभाद्यो राश्याद्यः अयं क्षेपः स्यात् खंकृताभूदृशा इतिविपाते व्यगो रुद्राः शैलाः नागचंद्राः क्षेपः स्यात् वृत्ते शून्यं वज्रिण श्चतुर्दशचंद्रबाणा एकपंचाशत् वाराद्ये द्वौव्यंघ्रिनं दाब्धयः विचरणे कोनपंचाशत् वार स्थाने द्वौ घटीष्वष्टचत्वारिंशत् ४८ पलेषु पंचचत्वारिंशत् ४५ अत्रोपपत्तिः ग्रंथशकादौ रविचंद्रराहूणांक्षेपाः प्रथममुक्ताः संति एवं राहुक्षेपं चंद्रक्षेपे त्यक्त्वा विपातः कृतः सूर्यक्षेपस्तु सिद्ध एव वृत्तं चंद्रस्य मंदकेंद्रं चंद्रोच्चक्षेपयोरंतरं जातस्तस्यापि क्षेपः एवं तच्छकादौ यन्मध्यमतिथेर्वाराद्यं सवारादिक

क्षेपो भाद्यः खंकृताभूदृशोर्के रुद्राः शैला नागचंद्रा विपाते॥ वृत्ते शून्यं वज्रिणाश्चंद्रबाणा वाराद्ये द्वौव्यंघ्रिनंदाब्धयः स्यात् ॥२॥
भानोः खंभूः खाब्धयोयं ध्रुवः स्यात् शैलाः कुर्का राशिपूर्वो व्यगोः स्यात्॥ वृत्तस्यांकाभूरसाश्चाथतिथ्यावाराद्यस्याक्षाः खगास्तर्करामाः ३

स्य क्षेपः अत्रमासगणोत्पन्ना ग्रहा मासादिप्रतिपदिस्युः अतः पौर्णमास्यांतकरणार्थं पक्षचालनानि ग्रहेषु क्षेप्यानि ततो लाघवार्थं क्षेपेष्वेव प्रक्षिप्य क्षेपाः पाठपठिताः अथ ध्रुवानाह भानोः सूर्यस्य खंभूः खाब्धयः अयं राशिपूर्वो ध्रुवः स्यात् व्यगोः शैलाः सप्त कुरेकः अर्काः द्वादश ध्रुवः स्यात् वृत्तस्य अंकाः नव भूरेकः रसाः षट् अथ तिथि वाराद्यस्य अक्षाः पंच खगानव तर्करामाः षट्त्रिंशत् अस्योपपत्तिः एकादशवर्षमितं चक्रं अतोहि एकादशवर्षाहर्गणात् रव्यादयः पूर्वोक्तवत् साधितास्ते ध्रुवसंज्ञा इति अथ मासगणात् सूर्यविपाताबेक वृत्तेन साधयति

॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७

द्विगुणितात्मासगणात् नगषड्भिः सप्तषष्ट्या आप्तं लब्धं यद्राश्यादिफलं तेनरहितोमासगणःमध्यमरविःस्यात् अथयावंतामासगणे मासाः तावंत्येवगृहाणि राशयःस्युः विगतोनिजः स्वकीयः त्रिलवोयभ्यस्तेतथा एवंभूता मासाः अंशाः भागाः स्युः मासानांयः अंघ्रिः चरणः तत्तुल्या एवकलिकाः अर्धविपातःस्यात् तत्रोपपत्तिः यदिकल्प चंद्रमासैःकल्पग्रहभगणानां राशयोलभ्यंते तदेकमासेनकिमिति लब्धाः पृथक् पृथक् सूर्यविपात वृत्तवारादिकानांमासगुणाः ततोन्योनुपातः यद्येकमासेनैते तदेष्टमासगणेन के अत्ररूपहरस्य अविकृतत्वात् नाशेकृतेमासगणेनैव तेगुणागरण्याः तेग्रहाःस्युरित्यत्रगुणानांचतुःस्थितत्वात् मासगणांकबाहुल्यात् गुणनेजउकर्मदृष्ट्वा आचार्येण खंडगुणनानि सर्वत्रविहितानि तत्रादौरवेरयंराश्यादिर्मासगुणः ०।२९।६।१६ अत्रखंडगुणनार्थंएकोराशिरेवधृतः अतोमासगणतुल्योरविःस्यात् ततःतदेकस्मात्खंडद्वयं शेषं।०।५३।४४। इदंसप्तषष्ट्यासवर्णितं जाताद्युपरिद्वौ २ अंतेद्विगुणमासगणात् सप्तषष्टिलब्धंमासगणेन्यूनीकृतम् सत् रविर्भवतीति उपपन्नं तथैवायंविपातमासगुणः १।०।४०।१५ अत्रैकराशिस्तोमासाःएवराशयः शेषस्यापिखंडद्वयंकृतम् तत्रैकंखंडं ०।४०। इदंत्रिभिःसवर्णितम् जातौभागस्थानेद्वौ अतोमासाः द्विगुणास्त्रिभक्ता इत्यत्रापि योराशिर्द्वाभ्यां

मासोघतोद्विगुणितान्नगषड्भिराप्तराश्यादिनारहितमासगणोरविःस्यात् मासागृहाणिविनिजत्रिलवाश्चतेंशामासांघ्रितुल्यकलिकाश्चयुरयंविपातः
४ स्वाद्यंशकेनरहितामनुतष्टमासावृत्तंगणाभ्रकुलवाद्यलवंगृहादि स्वार्द्धान्वितादिनमुखंमनुतष्टमासामासोघनोदशगुणाद्भगुणाप्तियुक्तम् ५

गुण्यतेत्रिभिर्भज्यते सतावत् स्वत्रिभागोनएवभवति अतोविनिजत्रिलवाइति मास भागाःस्युरिति अन्यत्खंडम्।०।१५। इदंचतुर्भिःसवर्णितं जातंकलास्थानेरूपम्- अतोमासांघ्रितुल्यकलिकाइत्युपपन्नम् अथैकवृत्तेन वृत्तवारादिकेसाधयति मनुभिःचतुर्दशभिः तष्टाभक्ता विशिष्टायेमासास्ते स्वस्यअद्यंशकेन सप्तभागेन रहिताःसंतोगृहादिराश्यादिवृत्तंस्यात् परमेतत् गणस्यमासगणस्य अभ्रकुभिः दशभिःलवाः तेनाद्याःयुक्ताः भागाःयस्यतत् एवंभूतंकार्यं तथैवमनुतष्टाःमासाः स्वस्यअर्द्धेन अन्विताःयुक्ताःसंतोदिनमुखंवारादिकंस्यात् दशगुणात् मासगणाद्भगणैः सप्तविंशत्यधिकशतत्रयेणयाआप्तिःलब्धिः तयायुक्तंकार्यमित्यर्थः अत्रोपपत्तिः वृत्तगुणोराश्यादिः १०।२५।४८।५२। अत्रचतुर्दशभिर्मासैरेकं चक्रंभवति अतोभगणप्रयोजनाभावात् मनुतष्टमासाइत्युक्तं अत्रास्यैकोराशिर्धृतःएकशब्दध्रुवः ०।४।११।८ अस्यापिखंडद्वयंकृत्वा अत्रेदंखंडंअधिकंगृहीतं ०।४।१७।८ सप्तभिःसवर्णितं जातंरूपं १ राशिस्थाने अतोहिस्वाद्यंशकेन रहिताइति अधिकखंडं ०।८ दशभिःसव-

र्णितं जातं भागस्थानेरूपं १। अतोगणाप्तकुल्लवाद्यमित्युपपन्नं अत्रतिथिवारादिकस्यायंमासगुणः ।१।३१।५०। अत्रखंडद्वयम् १।३०। इदं द्वाभ्यांसवर्णितंजातं गुणस्थाने त्रयं ३ योराशिस्त्रिगुणः द्वाभ्यांभज्यते सः स्वार्धान्वितएवभवति अन्यत् खंडं ०।१।५०। इदं भगुणैःसवर्णितं जातो गुणस्थाने दश १० अतोदशगुणात् भगुणात्रियुक्तमित्युपपन्नं ध्रुवकक्षेपकाःअत्रयोज्याइत्याह मासगणात् जनितः उत्थाः दिनौरविः निजेनस्वेनचक्रहतेन ध्रुवकेनऊनः कार्यः इतरेविपातादयः तेनसंकलिताः संयोज्याः ततस्तेसर्पादयः स्वीयेन क्षेपकेणयुताः संतोनिजेभीष्टे मासिसितांते पौर्णमास्यंतेस्युरिति अत्रोपपत्तिः चक्रहतास्तुध्रुवकाः ग्रहेषुप्रक्षेप्याः एवं वर्षाणामेकादशतष्टत्वात् तत्ररवेर्ध्रुवकोद्वादशशरूद्धोऽस्ति अतस्तदूनोरविःकार्यः अन्येयोज्याएव यतः ग्रंथशकादिमारभ्याग्रेसरकालादेवग्रहाः साधिताः अतः सृष्ट्यादेः सकाशात् साधितायेग्रहास्तद्युक्ताएवेत्युपपन्नं पाक्षिकंचालनंकथयति सूर्येपाक्षिकम् पंचदशदिनभवंतत् एतत् चालनं खंशून्यंराशयः इंद्राश्चतुर्दशभागाः देवास्त्रयस्त्रिंशत्कलाः विपातेनभः शून्यंराशयः बाणचंद्राः पंचदशभागाः नखाः विंशतिकलाः केंद्रेषड्राशयः अर्का द्वादशभागाः युगाक्षाः चतुःपंचाशत् कलाः दिनाद्ये वाराद्ये नभः शून्यंवारः अक्षाब्धयः पंचचत्वारिंशत् घटिकाः बाणबाणाः पंचपंचाशत् कलाः अत्रोपपत्तिः पूर्वंमनुपातात्रव्यादीनांमासगुणाः साधिताः संति तेषामर्द्धं चालनंकृतं अभीष्टकालिकग्रहसाधनार्थमिति एतदेव द्वादशगुणं षण्मासचालनं चतुर्विंशतिगुणं वर्षचालनंभवतीति

मासगणाज्जनितोद्युरविरूनश्चक्रहतध्रुवकेन निजेन संकलिताइतरेथचतेस्युः क्षेपयुतानिजमासिसितांते ६
रवौपाक्षिकं चालनं खेंद्रदेवाविपातेनभोबाणचंद्रानखाश्च षडर्कायुगाक्षागृहाद्येचकेंद्रेदिनाद्येनभोक्षाब्धयेबाणबाणाः ७

स्फुगमम् अथषाण्मासिकंचालनमाह शराः पंच वेदपक्षाः चतुर्विंशतिः भुजंगाग्नयो ष्टत्रिंशत् इदमर्केषाण्मासिकं चालनंस्यात् व्यगौषट्कृताः कुः वृत्ते शराः पंच वार्धयश्चत्वारः ४ त्रीषवः त्रिपंचाशत् तिथेर्दिनाद्ये द्वौ भवाः एकादश भूरेकः इदंदिनाद्यंचालनंस्यात् अथेष्टतिथिसाधनमाह अभिमतायाः इष्टायातिथेः सिद्धेः प्राक् पौर्णमास्याः पूर्वेपरे पश्चात् याः यावत्यः इष्टतिथ्यः स्युः ताः स्वस्य युगरसलवेन चतुः षष्टिभागेन ऊनाः सत्यः दिनाद्यंचालनंस्यात् स्वस्ययुगगुणलवेन चतुस्त्रिंशदंशेनऊनास्ताएव तिथयः दिनेशे सूर्ये लवाद्यंचालनंस्यात् ततस्ताएवतिथयः विश्वैः त्रयोदशभिः हन्यंतेगुण्यंते तास्तथा ततः स्वस्य गुणनवलवेन त्रिनवतिभागेन ऊनाः वृत्तेचालनंस्यात् अत्रोपपत्तिः अत्रैकचांद्रदिनमानं ०।५९।३।४५ यद्येकतिथावेतत् तदेष्टतिथिभिः किमिति इदमिष्टतिथिगुणम् रूपहरस्याविकृतत्वान्नाशः अत्र खंडगुणनार्थमस्यैकएवगृहीतः अतइदमेकशुद्धं कृताजातम् ।०।०।५६।१५। चतुःषष्ट्या सवर्णितमूर्ध्वस्थानेरूपं अतःस्वरसयुगलवोनास्तिथयो

शरावेदपक्षा भुजंगाग्नयोऽर्के व्यगौ षट्कृताः कुश्च षाण्मासिकंस्यात शरावार्धयस्त्रीषवोभादिवृत्ते दिनाद्येतिथेर्द्वौ भवाभूदिनाद्यं ८
अभिमततिथिसिद्धेः प्राक्परे यास्तुतिथ्यः स्वयुगरसनवान्न श्चालनंस्याद्दिनाद्ये स्वयुगगुणलवोनाः स्याल्लवाद्यंदिनेशेस्वगुणनवलवोनाविश्वनिघ्नाश्चवृत्ते ९

वाराद्येदेयाः पूर्वेऋणंअग्रेधनमितिचालनेष्युक्तमस्ति अथरविचालनोपपत्तिः तत्ररवेः चांद्रदिनांतर्वर्तिनीमध्यगतिरियंभागाद्या ।०।५९।१४। अस्याप्यंकाः गृहीताः अतइदंरूपशुद्धंजातं ।०।१।४६ इदंतु चतुस्त्रिंशता सवर्णितंजातमूर्ध्वंरूपम् १ अतोयुगगुणलवोनाः ३४ तिथयोरविचालनमिति अथवृत्तचालनं वृत्तस्यचंद्रमंदकेंद्रस्य० चांद्रदिनांतर्वर्तिनी मध्यगतिर्भागाद्या १२।५१।३७। अस्याः त्रयोदशगृहीताः अतइदंत्रयोदशशुद्धं ।०।८।२३। इदंत्रिनवतिसवर्णितंजाताः ऊर्ध्वंत्रयोदशैव अतोविश्वनिघ्नाः स्वत्रिनवतिभागोनास्तिथयो वृत्तचालनमिति अथरविस्पष्टार्थंतिथेरपिस्पष्टार्थं सूर्यचंद्रयोर्मंदफले साधयति एतानिखंडानिस्युः अत्यष्टिः १७ सप्त

दश अष्टिः १६ षोडश वृषाश्चतुर्दश १४ अर्का द्वादश गावः नवशराः पंच दृशौ द्वौ तैः खंडकैः कृत्वा वृत्तस्य दोर्भुजः तस्य ये भागाः तेषां यः त्रींदुभिः त्रयोदशभिः लव
भागः यन्मितः स्यात् तन्मितानांखंडानांऐक्यंतत् आगतेन खंडकेन हन्यते तथा एवंभूतस्य उच्छिष्टस्य शेषस्य यस्त्रींदुलवस्त्रयोदशभागः तेनयुक्तं सत् भाग्व
दितिवृत्तेमेषादिषट्के धनं तुलादिषट्के ऋणं चंद्रफलंस्यात् इत्यनेनैव प्रकारेण रवेः मंदकेंद्राद्भुजादिविधिना एभिः खंडैः सूर्यमंदफलंसाध्यं तद्यासं ततः स्वस्यां
गलवेन ऊनितंकार्यं तयोः सूर्यचंद्रफलयोः संस्कृतिःकार्या संस्कृतिर्यथा धनयोर्योगः ऋणयोरपि योगः धनर्णयोरंतरमिति अत्रोपपत्तिः अत्र वृत्तं त्रयोदश
भागांतरं प्रकल्प्य पूर्वोक्तवन्मंदफलम् खंडानि चंद्रस्य साधितानि राशित्रयमध्ये सप्तैव एतानिमंदफलखंडानि सावयवान्यतोद्विपंचदशगुणानि निःशेषा-
णि भवंति अतः पंचदशगुणानि कृत्वा पठितानि अत्रेष्टफलार्थमनुपातः यदित्रयोदशभागैरेकं खंडं तदेष्टवृत्तदोर्भागैः किमिति लब्धमितखंडानामैक्यं कार्यं

अत्यष्ट्यष्टिवृषार्कगोशरदृशः खंडानि तैर्वृत्तदोर्भागत्रींदुलवप्रमैक्यमगतघ्नोच्छिष्टविश्वांशयुक् भाग्वत्स्यात् स्वमृणफलंत्विति
रवेः केंद्राद्यदन्यत्र द्यासंस्वांगलवोनितं कुरुत तयोः कार्या पुनः संस्कृतिः १० वृत्तेष्यदलाद्रसाभियुक्ता रहिताः कर्किमृगादिके च
वृत्ते खगुणाः शरखवन्हयो हरः स्यादथ सूर्याच्चरमुक्तं पूर्ववत्स्यात् ११

ततः शेषादनुपातः यदित्रयोदशभागैर्भोग्यखंडं तदा शेषांशैः कि-
मिति लब्धं गतखंडयोगे योज्यं तत्फलंस्यात् धनर्णोपपत्तिः स्पष्टीकरणाधिकारे उक्तैवास्ति एवंरविकेंद्रादपिमंदफलंसाध्यं तत्र लाघवार्थं एभिरेव खं-
डैः रविकेंद्रादपि फलंसाध्यमित्युपपन्नं अत्र चंद्रफलं केन भक्तं रविफलंस्यादिति ज्ञानार्थं सूर्यफलेनपरमेण २।१०। चंद्रपरमफले ५।२। भक्ते लब्धं द्वौ
२ अतश्चंद्रफलं द्व्याप्तं एवं द्विभक्तं चंद्रफलं २० सूर्यफलात् ५ यदधिकं शेषं ३० तद्विभक्तस्य षडंशाः अत उक्तं स्वषडंशविवर्जितमिति एवमुभयोः
फलयोः संस्कृतिः कार्या तिथ्योदयत्वात् अथ ३ हरं साधयति वृत्तस्य यदेष्यदलं भोग्यखंडं तस्माद्वारसाप्तिः षडंशः तेन खगुणांशाः सत्र्यंशाः खव
न्हयः त्रिंशत्कर्किमृगादिके वृत्ते युक्ताः रहिताः कार्याः कर्क्यादिषड्के युक्ताः मकरादिषड्के रहिताः संतो हरः स्यात् अथ सूर्याच्चरदिनमानं च पूर्ववत्साध्यम्
अस्योपपत्तिः इयं फलसंस्कृतिस्तिथौ देयातो घटीकरणार्थमनुपातः यदि गत्यंतरकलाभिः षष्टिघटिकास्तदा एभिः फलकलाभिः कति घटिकाः एवमत्र

फलभागानां पूर्वंबालीकरणार्थं षष्टिर्गुणः एतत् फलं पंचदशगुणितमस्ति सावयवत्वात् अतः पंचदशहरः गुणहरयोर्हरेणापवर्तितयोर्जातो गुणः ४ इदानीं षष्टिर्गुणः ६० अतो गुणघातो जातो गुणः २४० हरस्तु गत्यंतरकलाः तास्तु मध्यमा एव गृहीताः २३० गुणाहरयोश्चतुर्विंशत्या अपवर्तितयोः जातो गुणः १० हरः ३०।२० फलसंस्कृतिर्दशघ्नेत्यग्रे उक्तमस्ति अयं हरो मध्यः अतस्स्पष्टत्वं यथा स्पष्टभोग्यखंडं परमं १७ इदं केन गुणं परमं गतिफलं भवति अत्रेदं भोग्यखंडं वेदैर्गुण्यं ततः चतुर्विंशत्या अपवर्तितं गुणाहरयोर्गुणे नापवर्तितयोर्जातो हरः षट् इदं फलं सगुणांशखवन्हिमिते हरे संस्कार्यं तत्र कर्क्यादिषट्के केंद्रे गतिफलं धनं अतो युक्ता इति मकरादिषट्के ऋणमतो रहिता इति एवं जातः स्पष्टो हरः अतो हि फलसंस्कृतिर्दशहता हारोद्धृता नाड्यः स्युरित्युपपन्नं तदेवाह फलयोः संस्कृति दशगुणा स्पष्टहरभक्ता सती नाड्यः स्युः अथो चरं सायं लक्षणकं विपरीतलक्षणं धनं चेत्तदा ऋणमृणं चेत्तदा धनमिति स्वांघ्रिणा स्वचरणेन

नाड्यः स्युः फलसंस्कृतिर्दशहता हारोद्धृता थोचरं सायं लक्षणकं त्वथो विघटिकाः पश्चादृणं प्राग्धनं
स्वांघ्र्यूनांतरयोजनान्यथ तिथिः स्पष्टा त्रिभिः संस्कृता तत्संस्कारघटीसमाश्च कलिकादेयाव्ययगे चोष्णगो १२

ऊनानि रेखास्वदेशांतरयोजनानि रेखातः पश्चात्स्वपुरे ऋणं पूर्वस्यां धनं एवं त्रिभिः फलैरेभिः संस्कृता तिथिः स्पष्टा स्यात् तत्संकारः तेषां फलानां यः संस्कारः तत्समाः कलिकाः व्ययगे उष्णगौ च देयाः अत्रोपपत्तिः फलनाडीकरणोपपत्तिः पूर्वमेवोक्ता चरव्यस्तत्वे हेतुर्यथा यदुग्रहे ऋणं तत्तिथौ धनं यद्धनं तदृणं भोग्यत्वात् अतः चरं विपरीतं रेखास्वदेशांतरोपपत्तिः पूर्वं प्रतिपादितास्ति तिथिः रविचंद्रांतराद्भवति अतो गत्यंतरादनुपातः यदि भूपरिधियोजनैः ४८०० गत्यंतरकलाः लभ्यंते तदा रेखास्वदेशांतरयोजनैः किमिति पुनर्घटीकरणायानुपातः यदि गत्यंतरकलाभिः षष्टिकलाः ६० तदाभिः किमिति गत्यंतरकलानां तुल्यत्वात् गुणहरयोर्नाशः पुनरस्य फलस्य पलीकरणार्थं षष्टिर्गुणः ६० एवं गुणघातो गुणः ३६०० हरः ४८०० गुणाहरौ द्वादशशतापत्र १२०० तैर्जातो गुणः ३ हरः ४ अतः स्वांघ्र्यूनानि योजनानि पलानि स्युरित्युपपन्नं एतत्फलत्रयसंस्कृता तिथिः स्पष्टा भवतीत्युपप

न्नं रविव्यगूमध्यमतिथ्यंतकालीनौ तयोः स्पष्टतिथिकालीनकरणार्थं फलसंस्कारघटीभिश्चालनं देयं अतो लाघवार्थं स्वल्पांतरत्वात्संस्कारघटीसमाः कलाः सूर्येव्यगौ देयास्तौ तात्कालिकौ मध्यमौ भवतइति अतः तयोः स्पष्टत्वार्थं फलं साधयति इनात् सूर्य्याज्जायते तत्तथा एवं भूतं फलं स्वस्य अर्हल्लवेन चतुर्विंशत्यंशेन युक्तं युगघ्नं चतुर्गुणितं सत् ताः लिप्ताः कलाः स्युः तास्तयोः सूर्यविपातयोः कुरुतौ स्फुटौ स्तः विध्वंशो यौ द्वौ ताभ्यां युतो हरः कृशानुभिः त्रिभिः भक्तः सन् फलं अंगुलाद्यं चंद्रस्य बिंबं प्रभवति अत्रोपपत्तिः अत्र रविफलं पंचदशभि भाज्यं पूर्वं पंचदशगुणितत्वात् ततः कलार्थं षष्टिर्गुणः गुणहरयो हरेणापवर्तितयोर्जातो गुणः ४ अतो युगघ्नमिति अत्र प्रथमं रविफलंपरमं एतावत् २।५।३१ धृतं एतन्मितं धार्यं २।१०।३१ अतः अनयोरंतरमिदं ०।५ इदं सवर्णितं चतुर्विंशत्याजातं तद्द्वयं फलं तुल्यमेव अतः सस्वार्हल्लवमिति ताः फलकलाः रविव्यग्वोर्देया तौ स्फुटौ भवतः अथ चंद्रबिंबस्योपपत्तिः अत्र गते बिंबानयनं कार्यमित्यत्र हरोपि गतिखंडमतो हरादनुपातः यद्यस्मिन्मध्यमे हरे ३०।२० इदं चंद्रबिंबं १०।४० तदेष्टस्पष्टहरे किमिति अत्र गुणाद्धरोहि त्रिगुणासन्नोतः अत्र विध्वंशैः द्वौः शोध्यौ ततस्त्रिगुणचंद्रबिंबं भवति अतउक्तं विध्वंशद्वियुतहरः कृशानुभक्तश्चंद्रबिंबमिति

सस्वार्हल्लवमिनजं फलं युगघ्नं लिप्तास्ताः कुरु च तयोः स्फुटौ च तौ स्तः॥ विध्वंशद्वियुतहरः कृशानुभक्तश्चंद्रस्य प्रभवति बिंबमंगुलाद्यं १२

अथ सूर्यबिंबभूभाबिंबे साधयति खाब्धिभिश्चत्वारिंशद्भिः ४० आप्तं भक्तं च तत् अर्कस्य अगतदलं भोग्यखंडं तेन व्यग्निलवभवाः विषट्लवाः एकादशयुतोनाः कार्याः कदेत्याह स्वकेंद्रे सूर्यस्य मंदकेंद्रे कुलीरनक्राद्ये सति कर्काद्ये युताः मकराद्ये ऊनाः संतः अंगुलादि सूर्यबिंबं स्यात् विगता इषवः पंच यस्मात् सतथा एवं भूतो हरः स्वस्वतिथिलवेन पंचदशांशेन युक् कुभा स्यात् अस्यां कुभायां खाक्षैः पंचाशद्भिः आप्तं भक्तं यदर्कस्य अगतदलं भोग्यखंडं तत् नक्रकर्कादिकेंद्रे धनर्णं कार्यं मकरादौ धनं कर्कादौ ऋणं तत् भूछायाबिंबं भवति अत्रोपपत्तिः मध्यगतिप्रमाणेन रवेर्मध्यबिंबमिदं १०।५० यदि मध्यगत्या इदं तदा स्पष्टगत्या किं अत्र भोग्यखंडपरमत्वे गतिफलपरमत्वमित्यत्र भोग्यखंडात् गतिफलं प्रसाध्य बिंबं साध्यं तदत्र परमं बिंबं ११।१५ अनयोर्मध्यस्पष्टयोरंतरं ०।२५ इदं परमभोग्यखंडस्यास्य १७ चत्वारिंशत्तमो भागः अयं मध्यबिंबे देयः कर्कादौ गतिफलं धनं अतो युतो युक्तः मकरादौ गतिफलं ऋणं अतो हीनः एवं रविबिंबं भवति अथ भूभाबिंबोपपत्तिः अत्र चंद्रमध्यगतिवशात् जातं भूभाखंडमेकं २७ इदं मध्यहरस्य ३०।२० पंचोनितस्य स्वतिथिलवयुक्तस्य समं भवति अतो हि स्पष्टहरादेवं साध्यं तदत्र सूर्यगतिफलोत्थं

बिंबं भूछायायाभस्यां देयं तत्र सूर्यभोग्यखंडस्य पंचदशांशो देयः इति दृश्यते यतो हि परमभोग्यखंडमिदं १७ त्र्यंशोनाष्ट ७।४० भक्तं रविगतिफलं भवति २।१३ तदपि सप्तभक्तं भूभाखंडं भवति अतोयं हरघातो हरः ५० भोग्यखंडं पंचाशद्भक्तं तत्र भूभाखंडे देयः मकरादौ ऋणं फलं गतेः अतः तत् भूभायां युज्यते कर्कादौ धनं फलं तद्भूभायां न्यूनं भवति एवं बिंबादि प्रसाध्येदानीं ग्रहणसंभूतिमाह एवं तिथिपूर्वकं ज्ञात्वा शेषं ग्रहणजं शरस्थित्यादि पूर्ववत् चंद्रग्रहणोक्तवद्भवेत् अर्केद्वोः सूर्यचंद्रयोः ग्रहणं षण्मासैः ग्रहणादन्यत् ग्रहणं अथवा पक्षवर्जितयुतैः षण्मासैः सार्द्धषण्मासैः सार्द्धपंचमासैर्वा आलोकयेत् ग्रहणसंभूतिं पश्येत् तत्संभवमाह व्यगोः भुजभागैः तिथ्यल्पकैः सद्भिर्ग्रहणं तु विशेषे उष्णगोः सूर्यग्रहणे व्यगुभुजभागैर्याम्यैर्दक्षिणगोलजैः वसुधरः सद्भिर्ग्रहणं तद्यथा सूर्यग्रहणे यदा व्यगुरुत्तरगोले तदा तद्भुजांशैः तिथ्यल्पकैरेव ग्रहणं यदि याम्याः भुजभागाः तदाष्टाधिकत्वे ग्रहणसंभवो नास्तीत्यर्थः द्युरात्रिगततिथौ सत्यां भवति अथ वा अहर्निशं तिथौ आश्रिते किंचिद्दिनरात्रिस्पर्शे तिथौ सति सूर्यचंद्रग्रहणे भवत इति व्याख्या अस्योपपत्तिः प्रतिपादितप्रमेयातिसुगमा च अथ ग्रासं साधयति अयं हरः स

खाब्ध्याप्तार्कांगतदलयुतोनाः स्वकेंद्रे कुलीरनक्राद्ये स्याद्धरिलवभवा अंगुलाद्यर्कबिंबं हारोवीषुः स्वतिथिलवयुक् स्यात्कुभास्यां धनर्णं खा
क्षाप्तार्कांगतदलमतो नक्रकर्क्यादिकेंद्रे १४ ज्ञात्वैवं तिथिपूर्वकं ग्रहणजं शेषं भवेत्पूर्ववत् षण्मासैरूनपक्षवर्जितयुतैः पक्षेथवालोकयेत्॥
अर्केंदुग्रहणं व्यगोर्भुजलवैस्तिथ्यल्पकैरुष्णगो याम्ये वस्वधरैर्द्युरात्रिगततिथौ चाहर्निशामाश्रिते १५

त्र्यांशैर्गुणैस्त्रिभिः ऊनितस्ततः वेदैः चतुर्भिर्हन्यंते स तथा ततः अंकैः नवभिः हृतो भक्तः व्यगुभुजांशैर्हीनः कार्यः चेद्धीनो न स्यात्तदा ग्रहणमेव नास्ति ततः स हृ भवैरेकादशभिः ताडितो गुणितः अद्रिहृत्सप्तभक्तः इष्टं फलं शीतरुचः चंद्रस्य अंगुलादिच्छन्नं वा प्रकारांतरेण स्यात् अत्रोपपत्तिः शरोनं मानैक्यखंडं ग्रास इति मुख्ययुक्तिः तदत्र मध्यमं मानैक्यखंडमिदं १९।५२ अत एव भागाः साधिताः विलोमविधिना शरवत् व्यगुभुजभागाः भवघ्नाः सप्तभक्ताः शरो भवति अतो व्यस्तविधिना मानैक्यखंडं सप्तगुणं एकादशभक्तं जाता भागाः १२ एते मध्यहराद्यथा गच्छंति तथा कार्यं अतः मध्यहरे सत्र्यंशगुणोनिते सति सप्तविंशतिः सप्तविंशतिर्यावत् चतुर्गुणा नवभिर्भज्यंते तावद्द्वादशभागा एव भवंति अतः सत्र्यंशगुणोनितचतुर्गुणो नवभक्तो भागाः स्युः तेभ्यः व्य

गुभुजभागाः ऊनाः कार्याः शरस्यन्यूनीकर्तव्यत्वात् ततोभागा भवगुणाः सप्तभक्ताः छन्नमंगुलाद्यं चंद्रस्यभवतीत्युपपन्नं अथरविग्रहणे ग्रासानयनं स्थूलमाह दर्शांतकालीनं यन्नतं तस्य नाडीकाः घटिकाः यास्तासां अंघ्रिः चतुर्थांशो राश्यादिः तेन प्राक् पूर्वनतेरहितात् गृहादिकात् रवेः सूर्यासरे पश्चिमनते युतात् येननतांशकाः स्युः तेस्य क्रांतिरक्षांशैः संस्कृता नतांशाः भवंति तेषां नतभागानां योरसांशकः षडंशः तेनव्यगोः भुजलवाः संस्कारिताः एकदिशोर्योगो भिन्नदिशोरंतरमिति तेस्फुटाः स्युः ततस्ते सप्तभ्यः शुद्धाः कार्याः यदिन शुध्यंति तदा ग्रहणमेव नास्तितिनिजेन अर्द्धेन सहिताः संतोरवेः अंगुलादिकं स्फुटंस्थगितं ग्रासः स्यात् इतिव्याख्या अत्रोपपत्तिः अत्र रविग्रहणे लंबननतिसाधनं विनाग्रहणसंभवोपिन ज्ञायते अतः स्थूले लंबननती साध्येते नत घटीनां चतुर्थांशो लंबनं तद्दर्शांते देयं पुनस्तत्कालीननतात् यः पंचमांशः सरवो पूर्वकपाले यावत् न्यूनीक्रियते पश्चिमकपाले युक्तः क्रियते तत्त्रिभोन लग्न भवति अत्र चतुर्थांशसंस्कृतस्य पंचमांशः केवलचतुर्थां

सत्यंगुणोनितोहरोयंवेदघ्नोंकत्हतोव्यगोर्भुजांशैर्हीनो भवताडितोद्दिन्हृत्स्यात् छंन्नंशीतरुचोंगुलादिकंवा १६
अमांतनतनाडिकांघ्रिरहिताद्युतात् प्राक् परे गृहादिकरवेर्नतांशकरसांशसंस्कारिताः॥ व्यगोर्भुज
लवाः स्फुटाः स्युरथसप्तशुद्धाश्च्युते निजार्द्धसहितारवेः स्थगितमंगुलाद्यंस्फुटं॥ १७॥

शतुल्य एव भवति अतोनतघटीनांचतुर्थांशः पूर्वापरे नते रवौहीनाधिकः कार्यः तत्त्रिभोनलग्नं स्यात् तस्यनतांशाः कार्याः तेभ्यो नतिः साध्या साशरेण संस्कार्या सः स्पष्टशरो मानैक्यखंडाद्भिः कासनीयोग्रासः स्यादित्यत्र लाघवार्थं नतभागेष्वनतिभागैः व्यगुभुजभागा ये विहीनाः कृताः तद्यथा नतभागानां चतुर्थांशः स्थूला नति भवति नतिरुक्त स्पष्टशरखंडं अतोस्यां भागकरणार्थं सप्तगुणः एकादशहरः ११ एवंचत्वारोहरः ४ एवं जातोहरघातोहरः ४४ गुणहरयोर्गुणेनापवर्त्तितयोर्लब्धाः हरस्थाने षड्नतांशरसांशसंस्कारिताः व्यगुभुजभागाः स्युरिति अत्र रवेर्मानैक्यखंडमिदं ११ मध्यंकियन्द्यः भुजभागेभ्यः स्यादितिज्ञानार्थं सप्तगुणं एकादशभक्तं जाता भागाः सप्त ७ अतः एतेषु भागेषु सप्तभ्योन्यूनेष्वेव ग्रहणं अतः सप्तशुद्धाः शरार्थं स्थूलत्वात् निजार्द्धसहिता इति तत् अंगुलादिकं सूर्यग्रहणेछन्नं भवतीत्युपपन्नं अथपर्वेशानयनमाह १७ ॥ ७ ७ ७ ७ ७ ७ ७

क्षेपचक्रभ्रभ्रवयुक्तस्य व्यगोः मध्यः यः पर्ययगणः मध्यग्रहानयने राशयो द्वादशभिर्भज्यंते फलं पर्यायाः स पर्ययगणः द्विगुणः कार्यः वणिगादिगे तुलादिषड्भस्थे व्यगुगृहे सति कुयुतः एकयुतस्ततोसौ स्मृतं यच्चक्रसंज्ञं तेनयुतः ततोसुनिहतोर्वरितः सप्ततष्टावसिष्टः सन् विधितो ब्रम्हणः सकाशात् शेषतुल्यो गतः पर्वग्रहणं पातितया पर्वेशः स्यात् पर्वेशाः सप्त ७ उक्तं च वराहसंहितायां षाण्मासोत्तरवृध्या पर्वेशाः सप्त देवताः क्रमशः ब्रम्हशशींद्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः अत्रोपपत्तिः मासषट्केन एकः पर्वेशः वर्षमध्ये द्वौ वर्षमध्ये तु व्यगुपर्ययोप्येकः ततः स द्विगुणः पर्वेशस्यादित्युपपन्नं सराशिषट्कस्य एव यतो राशिषट्कांतरं एकवृद्धिः अनस्तुलादिगे व्यगौ कुयुत इति अत्रैकादशवर्षात्मकं चक्रं चक्रमध्ये द्वाविंशतिः पर्वेशाः सप्त अतः सप्त इत्युपपन्नं नन्वत्र चक्रोत्पन्नपर्वेशस्य योजितत्वात् पूर्वं च भ्रमभ्रवयोगो नोपपद्यत् इतिचेत् भ्रांतोसि नह्येकचक्रे निरवयवैकादशभगणा येन चक्रोत्थपर्वेशयोगे चक्रभ्रमभ्रवयोगो नर्थकः स्यात् किंत्वेतावान् भगणादिर्व्यगुः ११।७।१।१२ तत्र राश्यादिरयं ध्रुवः ७।१।१२ चक्रभ्रमः पूर्वं योजितः इदानीं चक्रभ्रमैकादश योज्याः आचार्येण त्वेकादशोत्थपर्वेश एकचक्रभ्रमः पर्वेशो योजितस्तदपि युक्तमेव नन्वेवं ग्रंथादिज व्यगुभगणानां तदुत्पन्नपर्वेशस्य वायोजनेः प्रसज्यते बाढं तदुत्थपर्वेश इति वराहोक्ते मासशब्दस्य चांद्रे मुख्यत्वात् चांद्रवर्षे द्वौ पर्वेशाविति गम्यते न पुनरेकस्मिन् भगण इति नन्वेकवर्षे व्यगुभगणोप्येक इति वाच्यं गणेनाधिक्यदर्शनात् अत एक भगणे पर्वेशद्वयं न युक्तमिति चेत् अत्र ब्रूमः ब्रह्मेंदुशक्रवित्तेशा वरुणाग्नियमाः क्रमात् फणीनभगणनैक्यघ्नद्विमितग्रहगाधिपा इति ब्रम्हसिद्धांतोक्तिश्रवणादेकभगणे द्वौ पर्वेशावित्येव युक्तं वाराहोक्तिर्यथा कथंचिन्नेयेति विस्तरभयोद्विरराम अथ सूर्याच्चंद्रं साधयति

व्यगुमध्यपर्ययगणो द्विगुणो वणिगादिगे व्यगुगृहे कुयुतः ॥ स्मृतचक्रसंज्ञकयुतो विधितो गतपर्वयोसुनिहतोर्वरितः ॥१८॥ तिथिरविहतिरंशास्तद्धृ-
तोर्को विधुः स्यादथ जिन २४ गुणाहरो द्व्यंगयुक्तद्गतिः स्यात् खचरशरखलाशात् सूर्यभुक्तिस्ततः स्युर्भयुतिजगतगम्या नाडिकास्तिथ्यपायात् ॥१९॥ ॥

द्वादशगुण्या तिथिसंख्या भागाः स्युः तैर्भागैः युतः अर्कः विधुश्चंद्रः स्यात् अथ जिनैश्चतुर्विंशत्या गुण्यते स तथा एवंभूतो हारः व्यंगैः द्विषष्ट्या युक्तस्य चंद्रस्य गतिः स्यात् खचरशराः एकोनषष्टिकलाः सूर्यस्य भुक्तिर्गतिः स्यात् सूर्यचंद्राभ्यां भयुतिजाः नक्षत्रयोगजाः गतगम्याः घटिकास्तिथेरपायात् अंतात् स्युः न सूर्योदयात् यतो रविचंद्रौ तिथ्यंतकालीनौ तास्तिथिघटीसंस्कृताः सूर्योदयान्नक्षत्रयोगघटिकाः स्युरित्यर्थः अत्रोपपत्तिः सूर्यचंद्रांतरे द्वादशभागतुल्ये एकातिथिर्भवति अतो द्वादशगुणा तिथिः सूर्यचंद्रांतरभागाः ते रवौ यावत् क्षिप्यंते तावच्चंद्रो भवति अत्र गत्यंतरं चतुर्विंशतिभक्तं हाराः कृतोस्ति अतो गुणाजिनो हारः गत्यंतरं तत्र सूर्यगतिर्योज्या

चंद्रगतिस्यादिस्तत्रव्यंगाभितासूर्यगतिः प्रकल्पिता अतोव्यंगुयुगित्युपपन्नं ॥१९॥ दैवज्ञवर्यस्यदिवाकरस्यसुतेनमल्लारिसमाह्वयेन दृढीकृतायांग्रहलाघवस्यमासोपतः पर्वयुगंसमासं ॥ इतिश्रीगणेशदैवज्ञकृतग्रहलाघवस्यटीकायांमल्लारिदैवज्ञविरचितायांमासगणादेर्ग्रहणद्वयसाधनाधिकारः सप्तमः ॥७॥ अथकेवलपंचांगादेवलघुकर्मणा ग्रहणद्वयंसाधयति ॥ अथ वायंपर्वांतो दर्शांतः पौर्णमास्यंतश्च रविः सूर्यराहुस्तिथेर्वा भस्यैतैष्यघटीयुतिः गतैष्यघटीयोगश्च ज्ञेयः तिथिपत्रस्थं द्युमानमपिज्ञेयं तेभ्योज्ञानेभ्यः ग्रहणद्वयंप्रवर्च्मीत्यर्थः ॥१॥ अथ छन्नसाधनमाह ॥ सप्तविंशत्यधिकषट्शतमिताः विगताः अताः सप्तस्वस्मात्स तया एवंभूतो यस्तिथेर्यातगम्यनाडीयोगस्तेनआप्ताः भक्तं लब्धांतिष्ठं ग्राह्यंततस्तेलब्धांशाः व्यगुरवेः विराहुर्कस्य येदोर्लवाः भुजभागास्तैः ऊनितास्तेनिजेनस्वीयेन दलेनअर्द्धेन तथास्वस्यभूपभागेन षोडशांशोनचलब्धद्वयेन युक्ताः संतो अंगुलपूर्वकं विधोश्चंद्रस्य छन्नंग्रासो भवेदित्यर्थः अस्योपपत्तिः चंद्रस्यमध्यमं मानैक्यखंडमिदं १८।५६। तिथिघटिका ५९।४ श्चमध्यमाः मध्यमरविचंद्रगत्यंतरोत्पन्नाः तत्रगतेराधिक्ये मानैक्यखंडाधिक्यं तत्रतिथिघटीनामल्पत्वं तत्रानुपातः यदिमध्यमतिथिघटीभिर्मध्यमं मानैक्यखंडं तदेष्टस्पष्टतिथिघटीभिः किं अत्रव्यस्तत्रैराशिके स्पष्टतिथिघटिकाहरः मध्यमतिथिघटीमध्यममानैक्यखंडघातोभाज्यः १११९।८ अत्रास्मिन् भाज्येभागकरणार्थं सप्तगुणेभवभक्तेजातेभागाः ॥७१२।११ एतेतिथिगतैष्यघटीयोगेनभाज्या इत्यत्र तेषां सावयवत्वार्थं संचारगुणनं यद्यासु घटीषु ५९।४ अयंभाज्यः ७१२।११ तदासप्तोनितास्वासु घटीषु ५२ कोभाज्य इतिजाताः ६२७ अतएतेव्यगतिथिगतैष्यघटीयोगेनभाज्याः व्यगुभुजांशोनाः ततः शरार्धं स्वदलयुक्ताभागाः स्थूलः शर इत्यतोभूपभागान्विताः कृताः तच्छन्नं भवतीत्युपपन्नं अथचंद्रबिंबभूभाबिंबे कथयति ॥२॥ षड्युक्ततिथिगतैष्ययोगेन भक्ताः पंचोनसप्तशतमिताः संतः अंगुलमुखंविधोश्चंद्रस्यबिंबंस्यात् दिग्भिर्विधुजोहीनाः यास्तिथिघटिकास्ताभिर्हृताः इक्कइक्कत्रीदवः द्वाविंशत्यधिकत्रयोदशशतमिताः अंगुलमुखाक्षितिभाभूच्छायास्यादितिव्याख्या अत्रोपपत्तिः अत्रमध्यतिथ्यानया ५९।४ मध्यमेचंद्रबिंबेस्मिन् १०।४१ गुणितेभाज्यः ६३१।२ अयंसावयवोतः संचारः यद्यासु घटीषु ५९।४ अयं ६३१।२

अथवायंतिथिपत्रतोवगम्यः पर्वांतश्चरविस्तमस्तिथेर्वा भस्यैतैष्यघटीयुतिर्द्युमानंतेभ्योथग्रहणद्वयंप्रवच्मि ॥१॥ ताराषड्व्यगतिथि
यातगम्यनाडीयोगाप्तारवि रविदोर्लवोनितास्ते ॥ संयुक्तानिजदलभूपभागकाभ्यांछन्नंवांगुलवदनंभवेत्सुधांशोः ॥२॥

तदा षड्युक्तघटीषु कद्दनिजातोभाज्यः ६९५ अयंतिथिघटीभिः षड्युक्ताभिः भाज्यश्चंद्रबिंबंभवति त्युपपन्नं अथ मध्यमं भूभाबिंबमिदं २६।५५ अस्मिन्मध्यतिथिगुणिते जातोभाज्यःसावयवः अत्र संचारः यद्याभिर्घटीभिः ५९।४ अयंभाज्यः १५९२।४९ तदा दशाहीनघटीनां ४९।४ कोभाज्य इतिजातः १३२२ अतोदशाहीनतिथिघटीभक्तोभाज्यः भूभास्यादित्युपपन्नं ॥३॥ अथनक्षत्रघटीभ्योग्रासानयनमाह ॥ विगताः दशयाभ्यः एवंविधाउडुघटयोनक्षत्रगतेष्य घटीयोगः ताभिर्हताः खभू

अंगयुक्तितिथिघटीहृतबाणांकतर्वोंगुलमुखंविधुबिंबं दिग्वियुक्तितिथिघटीहृतदृक्त्रींदवोंगुलमुखाक्षितिभास्यात् ॥३॥ विदशोडुघटी
हृताःखभूषट्व्यगुभास्वन्दुजभागवर्जितास्ते शितिकंठहतास्तुरंगभक्ताःस्युर्गतंचांगुलपूर्वकंविधोः स्यात् ॥४॥ भगतागतनाडिकैक्य
भक्तानववेदतर्वइंदुबिंबमुक्तं विमनूडुघटीहृताः शराक्षाद्विफवः स्यात् क्षितिभांगुलादिकावा ॥५॥

षट्दशाधिकशतद्वशतमितास्ते व्यगोः विराहोर्भास्वतः सूर्यस्य येफजभागास्तै रूनिताः कार्यः ततः शितिकंठै रेकादशभिर्हता गुणितास्तुरंगैः सप्तभिर्भक्ता अंगुलपूर्वकंविधोः स्थगितं छन्नं प्रकारांतरेणस्यादित्यर्थः अत्रोपपत्तिः मध्यमनक्षत्रघटीभिराभिः ६०।५२ भाज्यादिकृत्वा तिथिवदकाउत्पादनीयाः स्त

सुगममिदं ॥ ३॥ ४॥ भस्यनक्षत्रस्य यः गतागतनाडीयोगः गतैष्यघटीयोगः तेनभक्ताः नववेदर्तवः एकोनपंचाशदधिक षट्शतमिताः यल्लब्धंतदंगुलाद्यं चंद्रबिंबमुक्तं तथैवविगताः ममवश्चतुर्दशायाभ्यस्तास्तथा एवंविधायाः उडुनाड्यः नक्षत्रघटिकाः ताभिर्हीनाः शराक्षद्विकुवः पंचपंचाशा

खात्यष्टयस्तिथिघटीविहृताः सवेदाः याथोडुनाडीहृतदेवयमाः सरामाः हीनाव्ययुक्स्फुटलवैर्भवसंगुणास्तेशैलोद्धृताः खररुचः स्थगितांगुलानि ॥ ६॥ रविलवयुतभानोर्दोर्लवव्यंशतुल्यैर्विरसलवमहेशाव्यंगुलैर्हीनयुक्ताः ॥ अजघटरसभेकेबिंबमस्यांगुलाद्यंस्थितिसुखमवशिष्टंपूर्ववत्शेषमत्र ॥ ७॥

दधिक द्वादशशतमिताः अंगुलसुखाक्षितिभूभृच्छायास्यादिति अत्रोपपत्तिस्तिथिवत्सुगमा ॥ ५।६।७॥ दैवज्ञवर्यस्यदिवाकरस्यसुतेन मल्लारिसमाह्वयेन वृत्तोक्तनायांग्रहलाघवस्य पंचांगतः पर्वयुगंसमाप्तं ॥ इतिश्रीगणेशदैवज्ञविरचितस्यग्रहलाघवस्यटीकायांमल्ला० तिथिपत्राद्देव ग्रहणद्वयसाध

अथोदयास्ताधिकारो व्याख्यायते ॥ तत्रादौ शुक्लप्रतिपदि चंद्रदर्शनं भविष्यति न वेत्युच्यते वृत्तत्रयेण ॥ इह पक्षतेः प्रतिपदः क्षये अंते अर्कव्यग्वर्कौ सूर्यविराह्वर्कौ साकांशौ द्वादशभागयुक्तौ कुरु अथ केवलात् अदत्तायनांशात् व्यगोश्चरं साध्यं तत् षड्बाणैः षट्पंचाशद्भिः विहृतं भक्तं सल्लवाद्यं फलं ग्राह्यं तत्स्वर्णं धनर्णं स्यात् कदेत्याह व्यगुरवेर्विराह्वर्कस्य योगोलोतद्वशात् उत्तरगोले धनं दक्षिणगोले ऋणमिति तत्फलं पृथक् एकांते स्थापयेत् ॥१॥ त्रिभेण राशित्रयेण अयनलवैरयनांशैः अन्वितः युक्तः यः अरुणः सूर्यः तस्य यच्चरं तेन पृथक्स्थं फलं आहतं गुणितं ततोद्व्यक्षभाहतेः द्विगुणितपलभायाः कृत्या वर्गेण लब्धं तत् द्वितीयं फलं एकांते स्थाप्यं तद्व्यगोः असमैकगोले धनर्णं स्यात् रविव्यगू यदि भिन्नगोले तदा धनं एकगोले तदा ऋणमिति अथ सरसभार्कोनार्कोदयः षड्राश्ययनांशयुक्तार्कोदयः खखवानलवि

साकांशाविह कुरु पक्षतिक्षयेऽर्कव्यग्वर्कौ चरमथ केवलाद्व्यगोर्यत् षड्बाणैर्विहृतमिदं क्रमाल्लवाद्यं स्वर्णं स्याद्व्यगुरविगोलयोः पृथक्
तत् ॥१॥ त्रिभायनलवान्वितारुणाच्चराहतं द्व्यक्षभाहतेः कृतिलब्धं धनर्णमसमैकगोले व्यगोः खखवानलविशेषितः सरसभायना
र्कोदयः शरद्विकल्हृतो धनाधनमनल्पकाल्योदये ॥२॥ द्युमितिप्रतिपद्भमांतरं यच्छरभक्तं स्वमृणं दिनेऽधिकोने ॥

शेषितः शतत्रयांतरितः सन् शरद्विकैः पंचविंशत्याहृतः फलं अनल्पकाल्येऽर्कोदये सति धनाधनं स्यात् शतत्रयात् उदये अधिके धनं ऊने ऋणं इदं तृतीयमेकांते स्थाप्यं अथ चतुर्थफलं साधयति ॥२॥ द्युमितिर्दिनमानं प्रतिपदंतः अनयोर्यदंतरं तत् शरभक्तं फलं दिनेऽधिकोने स्वमृणं स्यात् दिनमानेतिथ्येरधिके धनं ऊने ऋणमिति चतुर्थफलं भवति अत्र चतुष्कसंस्कृतिः फलचतुष्टयसंस्कारश्चेदूनं तदा तपनस्य सूर्यस्यास्ते विधुश्चंद्रः ईक्ष्यते दृश्यते अन्यथा फलसंस्कारे ऋणे सति न दृश्यते इति भावः संस्कारस्तु धनयोर्योगः ऋणयोरपि योगः धनर्णयोरंतरमिति प्रसिद्धः अत्रोपपत्तिः चंद्रस्य कालांशाः द्वादश यदा स्युस्तदा चंद्रोदयः चेदल्पास्तदा नेति अतश्चंद्रे दृक्कर्मादि दत्वा कालांशाः तत्राचार्येण लाघवार्थं शिष्यक्लेशभयार्थं फलानि साधितानि तेषां योगो यदा धनं तदा कालांशाः द्वादशाधिकाः अत उदयो भविष्यत्येव यदा ऋणं तदा कालांशाः द्वादश काल्पाः अतो न दर्शनं सूर्यचंद्रांतरं प्रतिपदंते द्वादश भागास्ते तु क्षेत्रांशाः नित्यांशाः नित्या एव कालांशाः देशविशेषेण कालवशेन शराद्यंतरवशेन

चांतरिता भवंति तत्र प्रतिपदंते चंद्रः कार्यः अतोरविः साकशश्चंद्रो जातः तया शारार्थं व्यगुचंद्रः कार्यः अतोव्यगुरविरेव साकांशो व्यगुचंद्रः स्यात् अतः शाकांशावित्युपपन्नं अथाक्षंदृक्कर्मसाध्यं तत्रादौव्यगोःशरः साध्यःततः द्वादशकोटौपलभाभुजः तदाशरकोटौपलभाभुजः तदाशरकोटौक इतिजातं दृक्कर्म तत्र लाघवार्थंप्रतिराशित्रयमध्येशराः साधिताः तेयथा १३५।२३४।२७० एते द्वादशभक्ताजाताः ११।१९।२२।३०। एषांपलभागुणोस्ति एते एकांगुलपलभोत्थचरखंडैरेभिः आसन्नासति १०।१८।२१।२० एतानि चरखंडानि यावत् पलभयागुण्यंते तावत्स्वदेशीयान्यव भवंति तैश्चरखंडकैः व्यगोःसाधितं यच्चरं तत्पलभागुणितशरासन्नं स्यादेव द्वादशाभिस्तु पूर्वमेवभक्तमस्ति अतो व्यगोश्चरं दृक्कर्मकलाः तासांभागकरणार्थं षष्टिर्हरः ६० परमिदंसांतरं तदंतरंसाध्यते यद्यनेन परमचरखंडकेन २१।२० एताः परमदृक्कर्मखंडकलाः २२।३० तदेष्टेन चरेण का इति एवं हरघातोहरः १२८० गुणहरौगुणेनापवर्त्यजातोहरः ५६ अतोव्यगोश्चरं षट्बाणैर्हृतं भागाद्यमाक्षंदृक्कर्म भवतीत्युपपन्नं धनर्णोपपतिः उत्तरगोले ग्रहः क्षितिजादुन्नाम्यते अतस्तदुदयः पूर्वमेव अतस्तत्र धनं दक्षिणेनाम्यते तस्तदुदयः पश्चात् अतस्तत्र ऋणमेकं फलं अथायनदृक्कर्म साधयति त्रिज्या

धनमत्रचतुष्कसंस्कृतिश्चेत्तपनास्तेविधुरीक्ष्यतेन्यथान ॥३॥

कर्णे आयनवलनज्या ऋजस्तदाशारकर्णेकइति द्युज्यावृत्तेइदं तदा त्रिज्यावृत्ते किंत्रिज्ययोस्तुल्यत्वान्नाशे कृतेद्युज्याहरः शरोगुणः तत्रसायनसत्रिभग्रहक्रांतिरेवायनवलनं तत्प्रतिराशिसाधितं $^{११}_{४३}$।$^{२०}_{८}$।$^{२४}_{०}$ एतदप्येकांगुलपलभोत्थचरार्द्धासन्नं भागार्थं षष्ट्याभाज्यं ६० यदास्य चरार्द्धस्य १० इदं वलनं ११।४३ तदेष्टस्य किमिति हरघातोहरः ६०० मध्यस्थद्युज्या ११२।३० इयमपिहरः ६७५०० जीवार्थं द्वौ २ गुणः पूर्वगुणश्च ११।४३ एवं सत्रिभायनार्कस्यैकांगुलपलभोत्थचरं ग्राह्यं तदिष्टफलभावशेन गृहीतं अतस्तस्याक्षाभापिहरः शरोगुणोस्ति तदर्थंशरः साध्यः तदाक्षदृक्कर्मततोविलोमेनशरः तत् षष्टिद्वादशाघातः ७२० गुणंपलभाभक्तंशरस्यात् उभयोर्घाते पलभावर्गोहरः अयंचहरः ६७५०० सत्रिभायनार्कचराक्षदृक्कर्मघातस्य गुणघातोगुणः १६८७२ गुणहरौगुणेनापवर्त्य जातोहरः ४ चतुर्भिः पलभावर्गोपिहरः एवंहरघातेब्ध्यक्षभाहतेः कृतिर्हरः रूपगुणस्याविकृतत्वान्नाशः धनर्णोपपत्तिः प्रत्यक्षंगोलेदृश्यते इदंद्वितीयफलं अथक्षेत्रांशाकालांशातरं साध्यं तत्र राशिकलोदयास्वंतरंकार्यं अत्रोदयपलान्यतः राशिकलाः षड्भक्ताः ३०० एतदंतरं तत्रसूर्यास्ते चंद्रोदयोतः सूर्यः षड्भायनः कार्यः तदुदयः खखानलविशेषितः कलास्वंतरस्य त्रिंशदंशोदिदमंतरं तदा द्वादशाभिः क्षेत्रांशैः किमितिहरः ३० गुणः १२ षष्टिभक्तं घटिकाः ताः षट्

घ्नाः भागाः एवंहरघातोहरः१८०० गुणघातोगुणः७२गुणहरौ गुणेनापवर्त्यहरः२५ अतः शरद्विकहृतइति धनर्णोपपत्तिः शतत्रयादधिके उदये कलाभ्यः असवो ऽधिकाः ततस्तत्रधनंऊनेऋणमिति इदं तृतीयंफलं प्रतिपदंते सूर्यास्ते चंद्रोदयः अतो द्युमानतुल्ये प्रतिपदंते चंद्रोदयः ऊनाधिकात्फलंसाध्यते षष्टिघटिकाभिर्द्वादशभागास्तदेष्टदिनमानप्रतिपदंतरघटीभिः किमिति गुणहरौगुणेनापवर्त्य हरः५अतः शरभक्तमितिधनर्णोपपत्तिः प्रतिपदधिकेदिने चंद्रोदयः स्यादेव अतस्तत्र धनंऊने ऋणमित्यर्थतएवसिद्धं एवंचतुर्णांफलानांसंस्कारेधनभूतेकालांशाः द्वादशाधिकाःस्युः तदा तत्रचंद्रोदयः स्यादित्युपपन्नं अन्यथानेति अथ झटितिसभायांगुरुशुक्रोदयास्तज्ञानंयथाभवति तथोच्यते तत्रादौगुरोरुदयास्तौ सार्द्धश्लोकेनकथयति॥३॥ तिथिदिनरहिता द्योसौद्विधा तेभ्यश्च मासैः क्रमशइहभवेतांमन्त्रिणोस्तोदयौच मधुवल्के चैत्रादौयः मासगणोभवति सतद्वर्षीयचक्रेण आद्योयुक्तःकार्यः सएवविश्वाप्तेन त्रयोदशभक्तेन चक्रेणऊनितः ततोसौद्वाभ्यांहन्यते गुण्यते स तथा ततः दशभिर्मासैर्धूर्जटिभिरेकादशदिनैर्युक् युक्तःसन् ऊर्ध्वस्थानेभैः सप्तविंशत्याशेषितः भक्तोर्वरितः ततोभच्युतः सप्तविंशतेः शोध्यः सन्नक्षत्रात्मकोव्याप्तः सन् भसुखोराश्यादिःस्यात् राश्यादिः पृथक्

चक्राढ्योमधुवल्कमासनिचयोविश्वाप्तचक्रोनितोद्विघ्नोयुक्दशमासधूर्जटिदिनैर्भैःशेषितोभच्युतः

अन्यस्थलेस्थाप्यः तत्रतिथिलवैः पंचदशभागैःऊनःअस्य पंचदशभागेनस्वयोबाहुफलजस्तस्य येंशकाः भागाः तेभ्यः अर्कैर्द्वादशभिः आप्तांशाः लब्धाः भागास्तैर्भागैः पृथक्स्थोराश्यादिकः ऊनयुतः कार्यः क्वदेत्यत आह धटाजरसभे सति तुलादिषड्भस्थे राश्यादिके सति फलं तत्रैव ऋणं कार्यंमेषादिषड्भस्थे धनं कार्यं सराश्यादिरेवमधौ चैत्रे आरभ्य मासादिकः स्यात् यावतोराशयस्तावंतोमासाः भागाः दिनानिकलाः घटिकाः विकलाः पलानीति तिथिदिनरहिता द्यइति अयं मासादिको द्विधास्थानद्वयेस्थाप्यः ततः एकस्थाने प्रथमं तिथिदिनैः पंचदशदिवसैः रहिताः कार्यः तत्रतैः सावयवैर्मासैः चैत्राद्गुरोरस्तः स्यात् तथाद्वितीयस्थाने पंचदशयुक्तैस्तैर्मासैश्चैत्रादेवगुरोरुदयः स्यात् अत्रोपपत्तिः वर्षादौगुरुः साध्यःस्पष्टः कार्यः तथारविस्तत्र वर्षादौशून्यं अतोगुरुरेवशीघ्रकेंद्रंयोहिगुरुः राश्यादिः समासादिकः कृतः स यथा चैत्रादा मासगणस्ततोगुरुः सार्द्धविश्वमासैर्गुरूदयास्तकालः शुद्धोभवति अतो मासगणः सार्द्धविश्वे भाज्यः अत एव द्विघ्नोमासगणोभैः शेषितइति अत्रचक्रोत्थमासगणेसार्द्धविश्वभक्तेयच्छेषं दतप्यत्र योज्यं एवमेकचक्रे मासगणः१२८ अयंसार्द्धविश्वभक्तः शेषंसार्द्धाः षट् ६।३० एकचक्रे इदं तदेष्टचक्रैः किमिति चक्रस्य गुणः६।३०

गणगुणितचक्रं सार्धविश्वभक्तेमासगणे योज्यमित्यत्रद्विगुणाः कृत्वा प्रथममेव योजिताः तेतु चक्रतुल्या एव अतश्चक्राद्यइति इदं सांतरं यतः सार्द्धविश्वेसंपूर्णाभ भवं
ति अतोविश्वाप्तचक्रोनितइति ग्रंथांतरंभेगुरोर्मासादिक्षेपः २०।११ अतउक्तंदशमासदूर्जदिदिनैर्युगिति भग्रैकदोदयास्तः स्यात् अतोभोग्यार्थं भच्युतः द्विगुणत्वाद्भास
इति अस्यकालांशांतरे सूर्योनः पंचदशभागोनः कृतस्तस्माफलं साध्यं अतस्तन्दुजभागार्कलवोनयुक्तः कार्यइति यतः परमफलांशानां १० द्वादशांशाः ७।३० सूर्यमंदफल
गुरुमंदफलयोः परमयो र्योगासन्नो भवति समासादिकः यावत् पंचदशादिनै रूनाधिकः क्रियते तावत् गुरूदयास्तयोरंतरं त्रिंशद्दिनात्मकमेव भवति अतस्तैर्मासैश्चैत्रा
द्गुरोरस्तोदयौ भवत इति शोभनमुक्तं अथशुक्रोदयास्तौ कथयति सार्द्धवृत्तद्वयेन अयमधुसुरवमासाः सप्तभूनिघ्नचक्रैः स्वशरयुग ४५ लवाढ्यैः संयुतामार्गणघ्नाः उद

अथमधुसुरवमासाः सप्तभूनिघ्नचक्रैः स्वशरयुग ४५ लवाढ्यैः संयुतामार्गणघ्नाः ॥ उदधिरससमेताश्छिद्रखेगाभितष्टानवनवपरिशु
द्धाः पंचभक्ताः पृथक्स्थाः ॥ रसगुणदिनहीनाढ्याद्विधाचैत्रतस्तैर्भृगुजहरिदिगस्तांबूदयौस्तः क्रमेण ॥५॥ नवमाससमघस्रतोल्प
पुष्टाः पृथगास्थाः क्रमशस्तुतैर्युतोनाः ॥ द्वैधायुगवासरोनयुक्तास्तायास्तैश्च्युदयौक्रमाद्दृगोःस्तः ॥६॥

धिरससमेताश्छिद्रखेगाभितष्टानवनवपरिशुद्धाः पंचभक्ताः पृथक्स्थाः॥ अथगुरूदयास्तकथनानंतरं शुक्रास्तोदयौ कथयति मधुसुरवमासाश्चैत्रादौ योमासगणः तेमा-
साः सप्तभूभिर्निघ्नानि गुणितानि यानिचक्राणि ततस्तानिस्वशरयुगलवेन पंचचत्वारिंशदंशेन आढ्यानियुक्तानि तैः संयुतास्तेमार्गणघ्नाः पंचगुणाः ततः उदधिरसैः
चतुष्षष्ट्या समेताः ततः छिद्राणि नवखेगामिनो ग्रहाः नवएवं नवनवतितष्टाः शेषाः नवनवभ्यः परिशुद्धाः तच्छेषाः पंचभक्ताः पृथक्स्थाः कार्याः येपृथक्स्थास्तेपि स्था
नद्वयेस्थाप्याः एकत्र रसगुणादिनैः षट्त्रिंशद्दिनैः हीनाः अन्यत्रयुक्ताः चैत्रतः तैर्मासैर्यथाक्रमं भृगुजस्य शुक्रस्य हरिदिशि पूर्वस्यामस्तः अंबुनिपश्चिमायामुदयः
भवेत् ततः येपृथक्स्थाः तेनवमासभघस्रतः सप्तविंशतिदिनाधिकनवमासेभ्य श्चेत् अल्पाः पुष्टावास्युस्तदा क्रमशः तैर्नवमासभघस्रैः युतोनाः कार्याः ततस्ते

द्वेधासुगवासरैश्चतुर्भिर्दिनैः ऊनयुक्ताः क्रमात् भृगोः शुक्रस्यतोयास्तः पश्चिमास्तः ऐंद्र्युदयः पूर्वोदयः एतौ चैत्राद्यैर्मासैः स्त इत्यर्थः अत्रोपपत्तिर्गुरूदयास्तवत्स्फुटगमा अथगु
रुशुक्रयोरुदयास्तकालपरिवृत्तिमाह ॥६॥ शुक्रस्यउदयास्तकालः पूर्वास्तपूर्वोदयपश्चिमास्तपश्चिमोदयपरिवर्तितः व्यरिदिनैः षड्दिनरहितैः नखैर्विंशतिमासैः शुध्यति
संपूर्णो भवति गुरोः सार्द्धविश्वैर्मासैः शुध्यति मधुमुखाच्चैत्रादेः तैर्युतश्चेत्तदान्यः स्यात् विलोमशुध्यापुरतोपि पूर्वमेवतैः स्वमासैरुदयास्तः स्यात् एतदुक्तंभवति य-
स्योदयास्तयोः मासादिकश्चैत्रादितः कालः स एभिः परिवर्तमासैर्युक्तः तैरेवमासैश्चैत्रादिः स एवोदयास्तः स्यात् चेन्न्यूनीकृतस्तदा तैर्मासैश्चैत्रादेः पूर्ववदुदयास्तः स्या
दित्यर्थः अत्रोपपत्तिः प्रत्यक्षसिद्धास्फुटगमा ॥७॥ अथचंद्रशरंसाधयति ॥ व्यगुचंद्रस्य विराहुचंद्रस्य दोर्गृहे भुजराशौ प्रथमेसति अंशाः भागाः स्वदलेन स्वार्द्धेन आढ्याः यु
क्ताः कार्याः सोंगुलादिकः शरः स्यात् अपरे द्वितीयराशौ येभागास्तेनगाब्धिभिः सप्तचत्वारिंशता युक्ताः कार्याः सशरः स्यात् चरमे तृतीयराशौ भागास्तेदलिताः ततोनगा

मासैर्नखैर्व्यरिदिनैरुदयास्तकालः शुक्रस्यशुध्यतिगुरोर्यदिसार्द्धविश्वैः सोन्योभवेन्मधुमुखाद्यदितैर्युतश्चेत्स्यात्तत्परोथपुरतोपिविलोमशुध्या ॥७
प्रथमे व्यगुचंद्रदोर्गृहेंशाः स्वदलाढ्यास्त्वपरे नगाब्धियुक्ताः चरमे दलिता नगाद्वियुक्ताव्यगुविधुदोःकुविशिखोंगुलादिकः स्यात् ॥८॥ नृपतिथिम
नुविश्वरुद्रगोद्विश्रुतिवसुधाः १६।१५।१४।१३।११।९।७।४।१ शरखंडकानि लैर्यत् व्यगुविधुभुजतोपमौक्तिवद्वाव्यगुविधोर्दिग्घ्नविशिखोंगुलादिकः स्या
त् ॥९॥ लघुगोल्पइनादुदेति पूर्वे भूयान्भूरिगतिर्ग्रहः प्रतीच्यां ॥

द्विभिः सप्तसप्तत्या युक्ताः व्यगुविधोर्दिक्कुविराहुचंद्रो यस्मिन् गोले तद्दिक् शरो भवतीत्यर्थः अत्रभा
रानयने राशीनां संज्ञाः न कार्याः अधस्तना यथावस्थिता एव भागाः ग्राह्याः अत्रोपपत्तिः प्रथमराशौ भागाः स्वार्द्धयुक्ताः शरो भवतीति पूर्वमेव ग्रहणे युक्तिः प्रतिपादितास्ति द्वितीय
राश्यंते शरः ७७ अत्र प्रथमराश्यंते शराः ४७ अतो द्वितीयराश्यादितो ये भागास्ते युक्ताः ४७ एते शरो भवत्येव तथैव तृतीयराश्यादेर्भागाः दलिताः द्वितीयराश्यंतरेणानेन ७७ युक्ताः
शरः स्यादेवेति युक्तमुक्तं पूर्वं ग्रहणे चंद्रशरउक्तः स त्रिंशदल्पभुजभागमध्यस्थ एव अन्यत्र बहुषु भुजभागेषु बह्वंतरितः स्यात् अतः उदयास्तशृंगोन्नतिग्रहयोगादिवि
धावनेन प्रकारेण शरः कार्यः न पूर्वेणेति इदानीं खंडकैः सूक्ष्ममप्याह ॥८॥ व्यगुचंद्रभुजांशदशांशमितखंडैक्यं शेषं भोग्यखंडाहतं दशांशयुक्तं सदंगुलादिकः शरः स्यादित्यर्थः
उपपत्तिरत्रातिस्फुटा अथग्रहाणां पूर्वपश्चिमदिशोरुदयास्तकारणमाह ॥९॥ योग्रहः इनात् सूर्यात् लघुगः अल्पगतिः अल्पश्च भागैरपि न्यूनः स पूर्वस्यां उदयं प्राप्नोति यः ग्रहः

भूयांल्लघुगः परत्र चास्तं प्राच्यां भूरिजवो लघुः प्रयाति ॥१०॥ भास्करा नगक्ष्मवो गुणचंद्रा भूक्ष्मवो दिविसदस्तिथयोब्जात् प्राक्तनैर्निगदितास्सम
यांशा वक्रिणो भृगुविदोः क्षितिहीनाः ॥११॥ खांबुधयः खयमाः खभुजंगाः खांगमिताः खदशाक्रमशः स्युः ॥ पातलवाः कुसुताद्बुधभृग्वो
मध्यमचंचलकेंद्रविहीनाः ॥१२॥

भूयान् सूर्यापेक्षया भागैरधिकः भरिगतिः सूर्याधिकगतिश्च सः प्रतीच्यां पश्चिमायां उदेति उदयं प्राप्नोति यः भूयान् सूर्यादधिकभागो लघुगः सूर्यादल्पगतिः स परत्र पश्चिमदिशि अस्तं गच्छति यः भूरिजवः सूर्याधिकगतिः लघुः सूर्यात् भागैरल्पः स प्राच्यां पूर्वदिशि अस्तं याति इदं सूर्यकृतोदयास्तलक्षणं दैनंदिनोदयास्तो ग्रहाणां प्रवहानिलवशेन पूर्वपश्चिमयोर्वर्तेते एवेति अत्रोपपत्तिः सूर्यादल्पोल्पगतिश्च ग्रहः सूर्यात्पूर्वं रव्यंशैः स्थितोतः सूर्योदयात्पूर्वमेव तस्योदयः अतः कालांशतुल्यांतरेण तस्य पूर्वोदयः स्यात् यः सूर्यादधिकः अधिकगतिश्च ग्रहः सः पश्चिमायामुदेति विलोमत्वात् यः सूर्यादधिकः अल्पगतिस्तं ग्रहं त्यक्त्वा सूर्योग्रतो याति अतः पश्चिमायामस्तः यः भागैरल्पः गत्याधिकः स सूर्यं प्रतिगच्छति अतोल्पत्वात्पूर्वस्यामस्तो भवतीत्युपपन्नं अथोदयास्तनिमित्तं कालांशानाह ॥१०॥ अब्जात् चंद्रमारभ्य ग्रहाणां एते कालांशाः स्युः भास्करः द्वादशभागाश्चंद्रस्य नगक्ष्मवः सप्तदश भौमस्य गुणचंद्राः त्रयोदश बुधस्य भूक्ष्मवः एकादश गुरोः दिविसदः नव शुक्रस्य तिथयः पंचदश मंदस्य प्राक्तनैः पूर्वाचार्यैरेते कालांशाः निगदिताः भृगुविदोः शुक्रबुधयोः वक्रिणोः सतोस्ते कालांशाः क्षित्या एकेन हीनाः अत्रोपपत्तिः अत्रोदयोस्तो वा तुल्यैरेव कालांशैर्भवति कालांशलक्षणोपायो यथा यद्दिने ग्रहस्योदयोस्तो वा आकाशे ज्ञातस्तद्दिने सूर्यग्रहयोरंतरे लग्नसूर्यांतरवत् लंकोदयैः कालाः साध्याः ततः घटिकाः षड्गुणाः भागाः स्युः ते कालस्य अंशाः अतः कालांशा इत्यन्वर्थं नाम अत्र बुधशुक्रयोः वक्रिणोः सतोः निरेकैस्तैः कालांशैस्तयोरुदयास्तो भवत इत्युपपन्नं अथ भौमादीनां पातानाह ॥११॥ कुसुताद्भौममारभ्य ग्रहाणां एते पातस्य लवाः भागाः स्युः खांबुधयश्चत्वारिंशद्भागाः भौमस्य खयमाः विंशतिर्भागाः बुधस्य खभुजंगा अशीतिभागाः गुरोः खांगमिताः षष्टिभागाः शुक्रस्य खदशाशतमिताः भागाः शनेः बुधभृग्वोः पातांशा मध्यमेनाहर्गणोत्पन्नेन चंचलकेंद्रेण शीघ्रकेंद्रेण विहीनाः कार्याः अत्रोपपत्तिः मंदस्फुटो ग्रहः शीघ्रप्रतिमंडले भ्रमति विमंडलाश्रितः सन्निति तस्मान्मंदस्फुटादेव शरः साध्यते इत्युपपन्नो ग्रहः सपातः कार्यः अत्र विमंडलक्रांतिमंडलयोः संपातः पातः तत्र ग्रहस्य शराभावः एवमग्रसंपाते क्रांतिपाते क्रांतिमंडले योराश्याद्यवयवः स एव पातः एवं ग्रहाणां पातलवाः सिद्धाः पाठपठिताः एवंपा-

तात् षड्भांतरेपिशराभावः एवंबुधशुक्रयोः पातलवाः शीघ्रप्रतिमंडलस्था एव पठिताः संतिस्वशीघ्रकेंद्रभागैरधिकाः कृत्वापठिताः अतः शीघ्रकेंद्रविहीनाः एतेपाताः मंदस्फुटग्रहयुक्तपातात् शरः साध्यइत्यग्रेपि वक्ष्यतीत्युपपन्नं अथग्रहाणांशीघ्रकर्णानयनमेकवृत्तेनाह ।।१२ अथ दलानां खंडानांचयस्यात् कुरेकः द्वौत्रयः अब्धयश्चत्वारः युगानिचत्वारि अश्विनौद्वौ एतानिषट्खंडानिस्युः चलकेंद्रंचतुषड्भयुक्तंषड्भाश्यधिकं तदाचक्रात् द्वादशराशिभ्यः शुद्धं अस्य चलकेंद्रस्ययानिभानिराशयः तन्मिताद्धीनामैक्यं लवभागतात् भाग्यगुणितभोग्यखंडात् त्रिंशतायल्लब्धं तेन तदैक्यं युतंकार्यं ततः कुजात् मंगलमारभ्य कुयमलाब्धीं द्विद्विभक्तं भौमस्यैकभक्तं बुधस्य द्विभक्तं गुरोश्चतुर्भक्तं शुक्रस्यैकभक्तं शनेः सप्तभक्तं क्रमात् तत्फलेन एतेंकाः ऊनाः कार्याः धृतिः अष्टादशभौमस्य फलेन हीनाभौमस्य शीघ्रकर्णः इषिलाः पंचदशबुधस्य गुणभुवस्त्रयोदशगुरोः गोब्जाः एकोनविंशतिः शुक्रस्य इनाः द्वादशशनेः एतेंकाः फलेनहीनाः संतोयच्छेषंसाग्रहाणां द्राक् श्रुतिः शीघ्रकर्णः स्यात् अत्रोपपत्तिः अत्र कोटिज्यांत्यफलज्ययोः मृगकर्कादिशीघ्रकेंद्रे योगांतरंकोटिः शीघ्रकेंद्रदोर्ज्याभुजः अनयोर्वर्गैक्यपदं कर्णः शीघ्रप्रतिमंडलेव्यासार्द्धं अत्रतुदोर्ज्याको

कुद्वित्र्यब्धियुगाश्विनोदलचय १।२।३।४।४।२ श्चेत्षड्भयुक्चलकेंद्रंचक्रविशुद्धमस्यभमिताद्यैक्यंलवघ्नागतात् त्रिंशल्लब्धयुतंकुजात्कुजमला
ब्धींद्विद्विभक्तंक्रमात्तद्धीनाधृति १८ रिषिला १५ गुण १३ भुवोगोब्जा १९ इना १२ द्राक्श्रुतिः ।।१३।।

टिज्यादिविधिर्नास्ति अतः प्रतिराशिशीघ्रकर्णः साधितः शीघ्रफलयुतं राशित्रयंप्रथमं पदंशीघ्रफलोनंराशित्रयंद्वितीयं अतःषड्राशिमध्ये पदद्वयमस्त्येव अतः षट्खंडान्येव कर्णार्थंशीघ्रकेंद्रात् साधितानि तानिभवमितां त्रिज्यांपरिकल्प्यभौमशीघ्रफलांत्यज्यातः साधितानि ग्रहाणां परमशीघ्रफलज्याभिन्ना अतोहि भौमशीघ्रपरमज्या ८१ यामस्यां यद्येतानि खंडानि तदेष्टग्रहपरमशीघ्रफलज्यास्फुकान्यतोबुधादीनांयमलब्ध्यादिभक्तयुक्तं भौमस्ययथास्थितत्वात् कुभक्तमिति अनेनफलेनपरमशीघ्रकर्णाः यावदूनीक्रियंते तावदीष्टशीघ्रकर्णाभवंतिपरमशीघ्रकर्णास्तु त्रिज्यांत्यफलज्यायोगतुल्याः यथाभौमस्यांत्यफलज्या ८१ इयंत्रिज्यायुता २०१ यदित्रिज्यायामस्यां १२० परमभौमशीघ्रकर्णोयं २०१ तदेष्टायां भवत्तुल्यायाकिमिति जाताः १८ अत्र भवमितत्रिज्यायांसप्तमितांत्यफलज्या ७ अतस्त्रिज्यांत्यफलज्यायोगे परमशीघ्रकर्णोयं १८ युक्तः एवंत्रिज्यांत्यफलज्यांतरेण परमाल्पशीघ्रकर्णो अत्र भौमस्य कुभक्तमिति यदुक्तंतेन सर्वखंडयोगे १६ धृतिशुद्धेद्वयं परमाल्पः शीघ्रकर्णः सचायुक्तः तत्साधितोऽग्रेयः शरः सचत्रिज्याल्पे ११ शीघ्रकर्णे पुनर्द्विभक्तः

कार्यदतियुक्तं अन्यत्र महदंतरं स्यात् त्रिज्याधिके शीघ्रकर्णे नांतरं तत्र स्वांघ्र्यून इत्येव अथवा तत्रापि चेत् द्विभक्तस्तदा किंचिदंतरं शरःसः स्वल्पांतरत्वात् अंगीकर्तव्यः अतो न दोषायेति एवमन्येषामपीति अत एव तद्विनाधृतिरित्युपपन्नं एवं शीघ्रकर्णं प्रसाध्येदानीं ग्रहाणांशरं साधयति ।।१३।। स्वपातरहितात् मंदस्पष्टग्रहात् केवलादित्सुदत्ता यनांशात् क्रांतिभागाः साध्याः तेत्रियमैस्त्रयोविंशत्या आहताः ततः कर्णेन आप्ताः भक्ताः अथ गुरोर्बृहस्पतेस्तर्हि लोचनाभ्यां द्वाभ्यां भक्ताः कार्याः असृजो भौमस्य चेत्तर्हि द्वाप्ताः पुनः स्वांघ्रिणा ऊनाः संतः पातोनग्रहो यस्मिन् गोले तद्दिक् अंगुलादिकशरः स्यात् असौ त्रिगुणः कलादिकः स्यात् तेन कलादिना बाणेन अपमः ग्रहक्रांतिः संस्कृता एकान्यदिशोर्युक्तोना स्फुटतरापभवतीत्यर्थः अत्रोपपत्तिः अत्र ग्रहाग्रा पठिताः शरकलाः शीघ्रकर्णाग्रस्थानीयाः शीघ्रप्रतिमंडले हि शीघ्रकर्णो व्यासार्द्धं एवं शीघ्रप्रतिमंडले मंदस्पष्ट एव ग्रहो भ्रमति तत्रैवास्य पातः अतो मंदस्पष्टात् पातयुतात् शरः साध्य इति युक्तमुक्तं उक्तं च सिद्धांतशिरोमणौ ।।१४।। अत्राचार्येण पाताः चक्रशुद्धाः कृताः अतः पातरहितादित्युक्तं अत्रानुपातः यदि चतुर्विंशति २४ मितायां क्रांतौ एताः पठितशरकलाः तदेष्टायां ग्रहक्रांतौ का इति अत्र लाघवार्थं स्वल्पांतरत्वात् अंगुलादिकशरस्योपयोगि

मंदस्पष्टखगात् स्वपातरहितात् क्रांत्यंशकाः केवलात् कर्णाप्तास्त्रियमाहताः अथ गुरोश्चेल्लोचनाप्ताः पुनः स्वांघ्र्यूना असृजोंगुलादिकशरः पातोन
दिक् स्यादसौ त्रिघ्नः स्यात्कलिकादिकः स्फुटतरस्तत्संस्कृतश्चापमः ।।१४।। मंदस्फुटो द्राक् प्रतिमंडले हि ग्रहो भ्रमत्यत्रैव च तस्य पातः पातेन युक्तात् गणि
तागतेन मंदस्फुटात् खेचरतः शरोस्मादिति ।।१।।

त्वात् सर्वेषां शराः पंचाशदंगुलो गृहीतः एवमिष्टग्रहक्रांत्यंशानां पंचाशद्गुणः चतुर्विंशतिर्हरः यदि कर्णाग्रे अयं तदा चतुर्विंशतित्रिज्याग्रे कः एवं चतुर्विंशतितुल्ययोर्गुणहरयोर्नाशे कृते क्रांतेः पंचाशद्गुणः कर्णो हरः अत्र कर्णो द्विभवमितित्रिज्यां प्रकल्प्य कृतोस्ति अतोन्योनुपातः यदि चतुर्विंशति व्यासार्द्धे अयं तदा भवमिते क इति एवं भवपंचाशत् घातो गुणः ५५० चतुर्विंशतिर्हरः कर्णोपि हरः अत्र सिद्धो गुणहरौ हरेणापवर्तितौ जातो गुणस्त्रयोविंशतिः अतः क्रांत्यंशकाः त्रियमाहताः कर्णाप्ता इति अत्र बुधशुक्रशनीनां स्वल्पांतरत्वात् सम एव गृहीतः गुरोः पठितशरः पंचविंशतिः पंचाशन्मितः कृतो स्पतो लोचनाप्ता इति एवं भौमस्य सप्तविंशत् अतस्ते स्वांघ्र्यूना इति परमाल्पशीघ्रकर्णोद्भूतः ह्रासः अपि कलात्रयेणैकमंगुलमतस्त्रिघ्नः कलाद्यः स्यात् एवमत्र नाडीमंडलात् क्रांतिमंडलपर्यंतं दक्षिणोत्तरमंतरं क्रांतिः क्रांतिमंडलात् ग्रहपर्यंतं शरः एवमुभयोः संस्कारः स्पष्टा क्रांतिर्नाडिकामंडलग्रहयोरंतरे भवतीत्युपपन्नं अथ पंचांगी

यस्फुटग्रहज्ञाने वक्रादिदिनज्ञाने चेष्टदिनस्थ मंदस्पष्टग्रहसाधनं करोति ॥१॥ तिथिपटे पंचांगे गतं वर्तमानं यद्वक्रास्ताद्यं तद्दिने यद्ग्रहस्य उक्तं केंद्रं त्रिनृपैरित्यादिकं स्यात्
तत् अभिमते इष्टे दिने स्वशीघ्रकेंद्रोक्तगत्यागलगम्यदिनाहते द्युभक्ते इत्यादिविधिना चालनीयं तस्मात् शीघ्रकेंद्रात् पूर्वोक्तरीत्या शीघ्रफलं साध्यं इदं चालितस्पष्टग्रहे
व्यस्तं धनं चेत्तदा ऋणं ऋणं चेत्तदा धनं देयं स ग्रहो मंदस्पष्टो भवति तस्माद्भाशराद्यं साध्यं इति अत्रोपपत्तिः प्रत्यक्षा विलोमविधिनैव सुगमा अथ नतांशान्साधयति ॥१५॥
प्राक्पूर्वोदयास्तसाधने राशित्रयेण हीनात् पश्चिमोदयास्तसाधने राशित्रययुक्तात् स्पष्टात् ग्रहात् क्रांतिः साध्या साक्षांशैः संस्कृता नतांशाः स्युरित्यर्थः अथ दृक्कर्म साधयति
॥१६॥ षड्शैलार्कनवार्कधृत्यदितिजाः एतानि खंडानि नतांशानां यो दशमांशस्तत्तुल्यखंडानामैक्यं कार्यं ततस्तत् अगतखंडशेषभागाद्यादशमांशेनयुतं शरांगुलगुणितं द्वादशभक्तं-
लिप्ताः दृक्कर्मकलाः भवंति ताः कलाः स्पष्टे ग्रहे धनं वा ऋणं देयाः शरनतांशयोः एकदिक्त्वे धनं भिन्नदिकत्वे ऋणं पश्चिमोदयास्तसाधने व्यस्तमिदं दृग्ग्रहः दृक्कर्मदत्तो ग्रहः

वक्रास्ताद्यं तिथिपटगतं तद्दिने स्योक्तकेंद्रं स्यात्तच्चाल्यं त्वभिमतदिने स्वाशुकेंद्रोक्तगत्या तस्मात्प्राग्वच्चरफलमिदं चालितस्पष्टखेटे व्यस्तं देयं मृदुजफलभाक्स्यात्त
तोभाशराद्यं ॥१५॥ प्राक्त्रिभेण वर्जितात्संयुतात्तु पश्चिमे खेटतोपमाक्षयोः संस्कृतिर्नतालवाः ॥१६॥ षड्शैलार्कनवार्कधृत्यदितिजाः खंडानि कार्यं नतांशाशांशाप्र
मखंडैक्यमगतोच्छिष्टांशाघाताद्धृतं आशास्यारविहृत् छरांगुलहितं लिप्ताग्रहे तान नतांशेष्वोः स्वर्णमभिन्नभिन्नदिशि सव्यस्तं परे दृग्ग्रहः ॥१७॥ क्रांतिवृत्तग्रहस्था
नचिन्हं यदा स्यात् कुजे नो तदा खेचरोयं यतः खेषुणोत्क्षिप्यते नाम्यते वा कुजात्तेन दृक्कर्मखेटोदयास्ते कृतं ॥१॥ आकाशे दृग्गोचरो भवतीत्यर्थः अत्रोपपत्तिः ग्रहः यस्मिन्

राश्याद्यवयवे वर्तते संक्रांतिमंडलस्थो राश्याद्यवयवः यदा क्षितिजे उदेति तदैव ग्रहस्य नोदयः ग्रहस्य विमंडले व्यवस्थितत्वात् शरतुल्येनांतरेण ग्रहः क्षितिजादुन्नमितो नमितो वा
भवति तदंतरस्य दृक्कर्म संज्ञा यतोन्वर्थनामदृशः कर्म दृक्कर्म तावतांतरेण ग्रहो दृग्गोचरो भवति तदपि दृक्कर्म द्विविधं आयनमाक्षजं चेति यतः शरः क्षितिज एव नास्ति कदंबा
भिमुखत्वात् उक्तं च सिद्धांतशिरोमणौ ॥१७॥ एवमत्र च ग्रहादग्रतः त्रिभेंतरे दृक्कर्मणः परमत्वात् पूर्वस्यां त्रिभिः हीनाः पश्चिमायां त्रिभयुक्त इति तद्ग्रहस्य नतांशज्या तोनुपातः
यदि उन्नतज्या कोटौ नतज्या भुजः तदा शरकोटौ क इति दशभागोत्तरान् नतांशान् प्रकल्प्य तज्जीवाः स्वस्वोन्नतांशज्याभक्ताः सावयवो अतो द्वादशभिः सवर्णिताः अनुपाते शरः
कलात्मकः अत्रांगुलाद्या गृहीतो ऽतः पुनस्त्रिसवर्णिताः कृत्वा खंडानि पठितानि तत्र प्रथमं खंडं प्रतीत्यर्थं साध्यते दशतुल्यनतांशानां ज्या २१ इयमेव षट्त्रिंशता सवर्णिता ७५६ उन्न

शज्यायानया ११८ भक्ताजातमाद्यखंडं ६ एवमन्यानपि मध्येनुपातः यदि दशभागैरेकं खंडं तदेष्टभागैः किमिति फलमुक्तं गतखंडैक्यं कार्यं तस्य शरोगुणः वततैखंडानि द्वादशगुणा
न्यतो द्वादशाहारः अतो रविदृक्शरांगुलहृतमिति धनर्णोपपत्तिर्यथा उन्नमिते ऋणं नमिते धनं यतस्वस्वस्तिकाक्रांतिवृत्तस्य यत्रोन्नमनं तद्दिग्ग्रहस्यापि क्षितिजान्नमनं भवति तस्मा
द्धनं अन्यदिक्कुले ऋणमित्युपपन्नं अथोदयास्तयोः कालज्ञानमाह १७॥ व्याख्या अर्कः सूर्यः दृक्खचरो दृक्कर्मदत्तो ग्रहः अनयोर्द्वयोर्मध्ये योल्पः स रविः कल्प्यः अधिको लग्नं तयो
र्लग्नार्कयोर्मध्ये भुक्तभोग्यादिविधिना घटिकाः साध्याः पश्चिमोदयास्तसाधने सचक्रार्धयोः षड्राशियुक्तयोर्लग्नार्कयोर्घटिकास्ताः षड्गुणाः इष्टकालभागाः स्युः तैरिष्टकालांशैः प्रो
क्तकालांशेभ्यः चंद्रशुक्रयोस्तु वक्ष्यमाणसंस्कारसंस्कृतेभ्यः अभ्यधिकैरस्तोगम्यः न्यूनैर्गतः उदयस्तु अधिकैर्गतः न्यूनैर्गम्यः अत्रोपपत्तिः प्रत्यक्षसंगमा अथ दिवसानयनं ॥१८
कथिताः पूर्वोक्ताः इष्टाः इदानीमानीताः ये कालांशास्तेषां यदंतरं तस्य कलाः स्वाभ्राग्निभि ३०० र्विनिहताः शतत्रयगुणाः ततो रविभोदयेन सूर्याधिष्ठितराशेः स्वदेशोदयेन भक्ताः

नैवबाणः कुजेसौ कदंबोत्थुरवस्तत्समुत्क्षेपणंनामनंचद्विधा आयनंचाक्षजंतेन कर्मद्वयंतत्प्रपंचः पुनः संविविच्योच्यते ॥२॥ कल्प्योल्पोरविरर्कदृक्खचरयोरन्य
श्चलग्नंतयोर्मध्येस्युर्घटिकाश्चपूर्ववदिमाः पश्चात्सचक्रार्धयोः षंडघ्नाः काललवाअमीभिरधिकैर्गम्योस्तऊनैर्गतः प्रोक्तेभ्योभ्यधिकैर्गतः ससुदयोन्यूनैस्तुगम्योभवेत्
॥१८॥ स्वाभ्राग्निभि ३०० र्विनिहताः कथितेष्टकालभागांतरस्य कलिकारविभोदयाप्ताः तत्सप्तमेन परतोथजवांतराप्तायोगेनवक्रिणिदिनान्युदयास्तयोः स्युः ॥१९॥ स्या
त्स्वाभ्राग्न्युदयांतरंभविहृतंस्वर्णंपृथूनोदयेयत्तत्संस्कृतदृष्टिकर्मलववतः प्राणांशसंस्कारिताः पूर्वोक्ताभृगुचंद्रयोक्षणलवाः स्पष्टाभृगोश्चानिताह्याभ्यांतैरुदयास्तदृ
ष्टिसमितास्याल्लक्षितैषामया ॥२०॥

परतः पश्चिमोदयास्तसाधने तत्सप्तमोदयेन भक्ताः कार्याः ततो जवांतरेण रविग्रहगत्यंतरेण भक्ताः वक्रिणि ग्रहे गतियोगभक्ताः संतः उदया
स्तयोर्दिनानि स्युरित्यर्थः अत्रोपपत्तिः यदि उदयासुभिः राशिकलाः १८०० लभ्यंते तदा कालांशांतरकलातुल्यासुभिः किं एवं कालांशांतरकलानां अष्टादशशतागुणः उदयासवो हरः अ
त्रोदयपलानि संत्यतोन्यः षड्हरः एवं गुणे षड्भक्ते जातस्त्रिशतीगुणः अत उक्तं स्वाभ्राग्निभिर्विनिहता इति पश्चिमायां सप्तमोदयादेवानुपातः यदि गत्यंतरकलाभिरेकं दिनं तदा
भिः किमित्यतो जवांतराप्ता इति वक्रिणि गतियोगं विनांतरं न सिध्यति अतो गतियोगाप्ता इति एवमुदयास्तदिनानि स्युरित्युपपन्नं अथ चंद्रशुक्रयोरुदयास्तयोरंतरमाह ॥१९॥ शतत्रय-
स्योदयस्य च यदंतरं तत्भैः सप्तविंशत्याविहृतं भक्तं सत् यत् फलं स्यात्तत्फलं शतत्रयात् अधिके ऊने धनं ऊने ऋणं अनेन भागादिफलेन संस्कृतं दृक्कर्म भागेभ्यः यः प्राणांशाः पं

चमभागास्तेन पूर्वोक्तानवद्द्वादशमिताः शुक्रचंद्रयोः कालांशाः संस्कृताः धनर्णत्वेन स्पष्टाः स्युः भृगोः शुक्रस्य द्वाभ्यां च हीनाः कार्याः तैः कालांशैः शुक्रचंद्रयोरुदयास्तदृष्टिसमता स्यात् एषामयालक्षितावर्त्तमानघटनामवलोक्यज्ञाताः ज्ञातो मूलस्युपलब्धिरेव वासनेतिसिद्धं अथागस्त्योदयोस्तज्ञानमाह ॥२०॥ अक्षभा अष्टगुणाभागाः स्युस्तैर्भागैर्गजशैला अष्टसप्ततिः ऊनाः वसुखेचराः अष्टनवतिः युक्ताः कार्याः तत्समे सूर्ये सति क्रमाद्घटजोगस्त्यः अस्तमुदयं च गच्छति इत्यर्थः अत्रोपपत्तिः अगस्त्यध्रुवः सप्ताशीतिभागा आयनदृक्कर्मसंस्कृताः तथास्य कालांशा द्वादश १२ एते क्षेत्रांशाः एकादश सप्ताशीत्यंशेषु युक्ताः ९८ एतन्मिते सूर्ये उदयः अस्ते व्यस्तायनदृक्कर्मसंस्कृते ध्रुवभागाः ८९ क्षेत्रांशैः ११ ऊना जाताः ७८ एतन्मिते सूर्येस्तः इदं निरक्षे साक्षे तु अक्षदृक्कर्म कर्तुं युज्यते शरस्य महत्वात् सुखव्यकल्पेन स्फुटास्फुटक्रांतिज्ययोश्चराद्वयोरित्यादिविधिना एकांगुलाक्षभायां अष्टौ भागा उत्पद्यंते ततोनुपातः यद्येकांगुलपलभया अष्टौ भागास्तदेष्टपलभया किमिति अक्षभयाः अष्टौ गुणः रूपं हरः अतः पलभाष्टवधोनसंयुता इत्याद्युपपन्नं अत्रानुपातस्याप्राप्तौ प्राप्तिः कृतालेनष

पलभाष्टवधोनसंयुतागजशैलावसुखेचरालवाः इह तावति भास्करे क्रमात् घटजोस्तं त्वुदयं च गच्छति ॥२१॥ खेचरोर्कोस्तकाले सषड्भार्कतो योधिकोल्पोर्क
तो निश्युदेतीह सः अस्तमेत्यन्यथा नेविधेयः क्रमात्पूर्वपश्चात्यदृक्कर्मभाक्सग्रहः ॥२२॥ उद्गमे यातकालः खगात्खस्तके षड्भयुक्तात्सषड्भाक्भाग्यान्वि
तः युक्मध्योदयोस्योद्गमात्स्तेभवेद्रात्रियातोथतत्कालखेटात्स्फुटः ॥२३॥ चंद्रोस्तगोपलाढयोनः कार्योधिमतिनाडिकं युतोद्विद्विपलैः स्पष्टः किंस्यात्ता
त्कालिकेंदुना ॥२४॥

दृपलभापर्यंतं स्वल्पांतरं अग्रेबह्वतरं अथ ग्रहस्य नित्योदयास्तज्ञानमाह ॥२१॥ सूर्यास्तकाले यो ग्रहः स षड्भसूर्यात् अधिकः अथवा केवलात्सूर्यादूनः स निश्युदेतीति अन्यथास्तमेति अथोसग्रहः क्रमेण पूर्वपश्चात्स्थदृक्ककर्मभाग्विधेय इति अत्रोपपत्तिः ग्रहोदये ग्रहतुल्यं लग्नं सूर्यास्ते सषड्भार्कतुल्यमुदयलग्नं केवलार्के तुल्यमस्तलग्नं अतः सषड्भार्कात् ग्रहे अधिके रात्रौ ग्रहस्योदयः केवलार्कात् ऊने अस्त इति प्रत्यक्षं उदयास्तयोः कालज्ञानार्थं दृक्कर्मदत्तो ग्रहः कार्यः अथोदयास्तकाले रात्रिगतघटिकाज्ञानमाह ॥२२॥ उदये सति ग्रहात् भुक्तकालः साध्यः अस्ते च षड्भयुक्तात् ग्रहात् यात एव कालः साध्यः सषड्भसूर्यास्तकालेन युक्तः ततो मध्योदययुक्तः कार्यः एतावान् कालः ग्रहस्योदये अस्ते च रात्रेर्गतो भवति तात्कालिकात् ग्रहात् दृक्कर्मादि विधाय स कालः पुनः साध्यः स्पष्टः स्यादित्यर्थः अत्रोपपत्तिः पूर्वप्रतिपादितैव चंद्रस्य सकृत्प्रकारार्थं विशेषं वदति ॥२३॥ चंद्रस्य सकालश्चेंद्वोपलैर्नवपलैः उदये अस्ते क्रमेण आढ्यः ऊनः कार्यः प्रतिघटिकं पलद्वयेन युक्तः द्विगुणघटीतुल्यैः पलैर्युक्तः स्पष्टः कालः स्यात् तात्कालिकचंद्रा

स्तुनः कालः साध्यइति प्रयासेन किंप्रयोजनमिति अत्रोपलब्धिरेववासना ॥२४॥ दैवज्ञवर्यस्यदिवाकरस्यसूतेनमल्हारिसमाह्वयेन वृत्तीकृतायांग्रहलाघवस्यखगोदयास्तानयनंसमाप्तं ॥ ॥इतिश्रीगणेशदैवज्ञविरचितस्यग्रहलाघवस्यटीकायांमल्लारिदैवज्ञविरचितायांउदयास्ताधिकारः नवमः॥९॥ अथग्रहछायाधिकारोव्याख्यायते ॥ दत्तपूर्वदृक्कर्मा ग्रहः इष्टकालीनलग्नात् यदाल्पः अस्तात्सप्तमलग्नात् यदाधिकः स्यात्तदा तत्समयेग्रहोदृश्यः इहेष्टकालोग्रहस्यभोग्यकालः तत्रभुक्तयुक्मध्योदययुक्कार्यः ग्रहस्योदयातद्युगतकालः स्यात् चंद्रस्यचेत्तर्हिनवपलोनः कार्यः अत्रोपपत्तिरतिसुगमा अथग्रहछायासाधनमाह ॥१॥ अंगुलादिकः शरः पलभागुणः चतुर्विंशतिभक्तः कार्यः अनेन पलात्मकफलेनग्रहात्सूर्यवत्साधितंचरंशरचरैकान्यगोलेयुक्तोनंस्फुटंस्यात् अतः चराद्दिनमानंसाध्यं अथग्रहस्यद्युगतकालात्सूर्यवत्छायाद्यंसाध्यं एवंतावद्दिज्ञातेरात्रिगतेग्रहस्यद्युगतमानीयछायाद्यंसाधितं इदानींदृष्टछायाद्युगतद्वारेणवक्ष्यमाणरीत्यारात्रिगतंसाध्यमित्याह अथेति खचरभादेः ग्रहस्यछायायंत्र

प्राग्दृष्टिकर्मखचरस्तनुतोल्पकोस्तात्पुष्टश्चदृश्यइह खेचरभोग्यकालः लग्नेनयुक्चविवरोदययुक्द्युयातः स्यात्खेचरस्यसितगोर्यदिगोपलोनः ॥१॥
जिनाप्तोंशाभाघ्नोंगुलमयशरोनेनतुचरंस्फुटंसंस्कृत्यातोदिनमथखगस्यद्युविगतात् प्रभाद्यंसंसिध्येद्थखचरभागैर्निशिगतंध्रुवेथारादीनांद्युतिप
रिगमंयंत्रवशतः ॥२॥ पश्येज्जलादौप्रतिबिंबितंवाखेटंदृगौच्च्यंगणयेच्चलंबं तंलंबपातप्रतिबिंबमध्यंदृगौच्च्यहृत्सूर्यहतंप्रभास्यात् ॥३॥

भागेभ्यः निशिगतंरात्रिगतघटिकादिकंस्यात् कथंपुनः प्रभादिज्ञानंस्यादित्यतआह ध्रुवइति आरादीनांभौमादीनां द्युतिपरिगमं छायाज्ञानं यंत्रवशातः ध्रुवे वक्ष्यमाणरीत्यास्यात् अत्रोपपत्तिः अत्रचरंशारसंस्कृतस्पष्टक्रांतितः साध्यं तत्केवलक्रांतितः एवखंडकैः साधितंअतोहि मध्यमस्पष्टक्रांत्योरंतरंशारएवतस्माच्चरंसाध्यं तत्पूर्वचरेसंस्कार्यंस्पष्टक्रांतितः कृतंचरंभविष्यति अतोनुपातः यदिद्वादशकोटौपलभाभुजः तदाशरतुल्यक्रांतिकोटौक इति अत्रशरांगुलोद्योनः कलार्थंत्रयंगुणः एवंजाताः कलाः तावंतएवासवः तेषड्भक्ताः पलानि एवंशरस्य द्वादशाषट्घातोहरः ७२ त्रयंगुणः ३ गुणहरौगुणेनापवर्त्तितौजातोहरश्चतुर्विंशतिपलभागुणोस्त्येव अतोजिनाप्तइत्याद्युपपन्नं प्रतिज्ञातांछायांधीयंत्रेणाह ॥२॥ जलादर्शादौग्रहंप्रतिबिंबितंपश्येत् दृगौच्च्यंइतिभूतलात् दृक्पर्यंतंलंबंगणयेत् एवंलंबपातप्रतिबिंबांतरमप्यंगुलादिगणनीयं तत्सूर्यहतंद्वादशगुणंदृगौच्च्योंगुलादिकेन भक्तंग्रहस्यछायास्यात् प्रतिबिंबितंवेति वाशब्देनतुरीयादियंत्रविद्धग्रहोन्नतांशेभ्यो यंत्रलब्धोत्थक्रांतिलवप्रभा इत्यनेन कर्णप्रतिसा

ध्यतः कर्णार्कवर्गविवरात्सदभिष्टमेति छायांसाधयेदितिविधांतरं सूचयति अत्रोपपत्तिरेकानुपातेन यदिदृग्गोच्चतुल्यायां कोटौ लंबपातप्रतिबिंबांतरभूर्भुजः तदा द्वादशाकोटौ केति छा-
यास्यादेवेति सुगमा अथ ग्रहस्य द्युगतकालसाधनं वदति ॥३॥ अनुमानात्स्थूलत्वेन रात्रौ गतघटीः ज्ञात्वा तात्कालिकग्रहात् कथितस्पष्टचरादेर्दृष्टछायादिनस्य ग्रहस्य सूर्यवत् द्यु-
गतः कालः साध्यः चंद्रस्य चेत्तर्हि नवपलान्वितः कार्यः अथ ग्रहोदये दिनशेषरात्रिगतकालं साधयति ॥४॥ पूर्ववद्दृक्कर्मदत्तग्रहक्षषड्भसूर्ययोर्मध्ये अस्योरविः अन्यत् लग्नं एतदंतरेद्यः
कालः स ग्रहोदयसमये द्युशेषोथवा रात्रीतः स्यात् क्रमशः इति ग्रहे सषड्भसूर्यादल्पे द्युशेषः अधिके रात्रीतः स्यादित्यर्थः अथास्मात्कालाद्रात्रिगतमाह ॥५॥ तेन द्युशेषेण ग्रहद्युयातः
ऊनः रात्रिगतेन सहितः सन् सूर्यास्ताद्रात्रिगतकालः स्यात् चंद्रस्य चेत् अनुमानज्ञातरात्रिगतघटीषु आनीतरात्रिगततो यावदल्पमधिकं स्यात्तावदेव द्विगुणं पलात्मकं स्यात्-

ज्ञात्वानुमानान्निशिपातनाडीस्तत्कालखेटात्कथितैश्चराद्यैः दृष्टप्रभादेर्द्युगतो ग्रहस्य साध्यस्त्विहेंदोर्यदि गोपलाढ्यः ॥४॥ प्राग्दृक्खचरांगभाढ्यभा-
न्वोरल्पोर्कस्त्वपरस्तनुस्तदंतः कालः स खगोदये द्युशेषो रात्रीतः क्रमशो ग्रहेल्पपुष्टे ॥५॥ तेनोनोथ च सहितो ग्रहद्युयातः स्यादर्कास्तमयकतो
निशिप्रयातः चेदग्लावोनुमितघटीषु तोल्पपुष्टं द्विघ्नं तत्सम फलयुक्वियुक्स्फुटः सः ॥६॥ दास्त्रादष्टचमूर्छनागजगुणानंदाब्धयो दृग्रसाः षट्-
तर्काग्नियुगखेचरारसदिशोन्द्वाशानवार्काः क्रमात् भाग्यादष्टयुगेंदवोक्षतिथयः खात्यष्टयोंशा ध्रुवास्त्र्यष्टाब्जा गजगोभुवो रविदृशः सिद्धाश्विनः खत्रि-
दृक् ॥१॥ मूलात्स्युर्द्विजिनाः शराः खगदृशाः धृंगाश्विनोष्टेषुदृक्बाणाक्षोणिरसाष्टदृक्कनखगुणास्तत्त्वाग्नयोश्वामराः खंदत्तायनदृक्क्रियाः स्युरिह चक्षे-
पोक्षप्रभाघ्नोर्के १२ हृत्स्वर्णमाक्परतोन्यथोत्तरशरे ते स्युः स्वदेशे ध्रुवाः ॥२॥ तैः पलैः सः कालः अल्पश्चेदूनः पूर्वाधिकश्चेदन्वितः कृतः स्फुटः कालो भवतीत्यर्थः अ-

त्रोपपत्तिः प्रत्यक्षसुगमा ॥६॥ ॥दैवज्ञवर्यस्य दिवाकरस्य सुतेन मल्लारिसमाह्वयेन वृत्तीकृतायां ग्रहलाघवस्य खेटप्रभाद्यानयनाधिकारः॥ ॥इति श्रीगणेशदैवज्ञवि-
रचितस्य ग्रहलाघवस्य टीकायां मल्लारिदैवज्ञविरचितायां ग्रहछायाधिकारो दशमः ॥१०॥ अथ नक्षत्रछायाधिकारो व्याख्यायते तत्रादौ नक्षत्रध्रुवानाह ॥ मूलात्स्युर्द्विजिनाः शा-
राःखगदृशः ॥ अश्विनीमारभ्य सर्वेषां नक्षत्राणां क्रमात् दत्तायनदृक्कर्मणो भागाद्या एव ध्रुवाः स्युरिति ते त्रिंशद्भक्ता राश्यादयो भवंतीत्यर्थः क्षेपो नक्षत्राणां वक्ष्यमाणः शरः प-
लभागुणः द्वादशभक्तः भागादिफलं ग्राह्यं तत्पूर्वध्रुवे धनं पश्चिमध्रुवे ऋणं इदमपि दक्षिणशरे उत्तरशरे विपरीतं ते स्वदेशे नक्षत्रध्रुवाः स्युरिति अत्रोपपत्तिः तत्रभवेधार्थं गो-

लवन्मोक्तविधानेन विपुलं गोलयन्त्रं कार्यं तत्र खगोलस्यान्तर्भगोले आधारवृत्तोर्ध्वस्योपरि विषुववृत्तं तत्र च यथोक्तं क्रांतिवृत्तं भगणांशांकितं कार्यं ततस्तद्गोलयन्त्रं सम्यक् ध्रु-
वाभिमुखयष्टिकं जलसमक्षितिजवलयं च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलचिन्हमध्यगतया दृष्ट्या रेवतीतारां विलोक्य क्रांतिवृत्ते मीनांते चिन्हं कार्यं तदीयमध्यगतये-
व दृष्ट्या अश्विन्यादियोगतारां विलोक्य तस्योपरि तद्वेधवलयं निवेश्य कृतं एवं कृते वेधवृत्तक्रांतिवृत्तयोर्यः संपातः तन्मीनांतचिन्हयोरंतरे येंशाः ते तस्य भध्रुवांशाः
वेधवलये तस्य तस्य संपातस्य योगताराया श्चांतरे येंशाः ते तस्य भस्य दक्षिणा उत्तरा वा ध्रुवसक्तवृत्ते स्पष्टशरांशा ज्ञेयाः अत्र ये ध्रुवाः ते दत्तायनदृक्कर्मण एव आक्षदृ-
कर्म देयं तत्रानुपातः यदि द्वादशकोटौ पलभाभुजस्तदा शरकोटौ क इति अत एव क्षेपोक्षभाघ्नोर्कहृदित्युपपन्नं याम्ये शरे प्राच्यां नामनं प्रतीच्यामुन्नामनं सौम्यशरे त-
न्यथा अतः स्वर्णं प्राक् परतोन्यथोत्तरशार इति युक्तं यत्तु नृसिंहदैवज्ञकृतटिप्पणौ रेखातः प्राग्देशे धनमत्यक्देशे ऋणमिति दृश्यते तल्लेखकदोषेणेति प्रतिमः अ

षेट्कर्णाश्विरदरित्रयः खजिनभाभ्यंताष्टाहस्ताहिमेहीशात् षड्रूकमात्रयोशरलवायाम्याउदक्शेषभे ॥३॥ मष्टार्यं ॥ प्रजापतिब्रह्महृदग्न्यग
स्त्यापांवत्सलुब्धध्रुवकांशकाः स्युः कुषट्षडक्षाग्निशरानभोष्टौत्र्यष्टेन्दवोभ्रूफणिनः क्रमेण ॥४॥ तेषां क्रमाज्ञो शिखिनः खरोमाः अष्टौ रसाश्वाः
शिखिनः खवेदाः ॥ शरांशकाः स्युर्मुनिलुब्धयोस्तु याम्यास्तु सौम्याः परिशेषकाणां ॥५॥ निजदेशभवाद्ध्रुवाच्च बाणाच्छायायंत्रलवादि खेटव-
त्स्यात् छायादेरपि हरात्रियातं नक्षत्रग्रहयोग उक्तवच्च ॥६॥

धनक्षत्रबाणांशरभागान्वदति ॥३॥ दिक्कृस्सूर्येषुदृक्शिवांगखनभाभ्यार्काश्विविश्वेभवास्त्वा-
ष्टात् द्रोणगवन्हयः कुयमलाग्नीभाक्षबाणाद्रिषुद्र ॥ अस्योपपत्तिः पूर्वमेव प्रतिपादितास्ति अथ लुब्धकादीनां ध्रुवान् शरांश्च कथयति ॥ ३॥ प्रजापतिब्रह्महृदग्न्यगस्त्या-
पांवत्सलुब्धकानामेते ध्रुवांशकाः तेषां एते भागाः स्युरिति सुगमार्थं अत्रोपपत्तिः नक्षत्रोक्तरीत्यैव सुगमा अथ नक्षत्रध्रुवात् छायाद्यं साध्यमिति वदति ॥४॥५॥ स्वदेशी-
योनाभ्रदत्ताक्षपूर्वदृक्कर्मकः नक्षत्रध्रुवोयः स्यात् तस्मात् प्राग्दृष्टिकर्म खचर इत्यादिना छायायंत्रांशादिकं ग्रहवत्स्यात् ॥ तथा पश्येज्जलादावित्यादिनाज्ञानात्तु छायादेः
रात्रिगतं तदेव स्यात् नक्षत्रग्रहयोगः ग्रहयुतिवत् अत एव केचित्पठंति द्युचरभध्रुवकांतरलिप्तिका द्युगासुभुक्तिहृता हि गतागतैः फलादिनैर्द्युचरेधिकहीनके युतिरिहे-
तरथा खलु वक्रिणीति द्युगतिर्ग्रहः स्पष्टमन्यत् अत्रोपपत्तिः सुगमा अथ ग्रहस्य रोहिणीशाकटभेदं तत्फलं चाह ॥६॥ ७॥ ७॥ ७॥ ७॥

योग्रहः वृषभेसप्तदशाभागमितः स्यात् तस्यशरोपियदि दक्षिणः पंचाशदंगुलाधिपः स्यात्तदासौ ग्रहः रोहिणीशाकटौभिनत्तीतिज्ञेयं यदा एवं असृक् भौमः शनिश्चंद्रोवारोहिणीशाकटंभेदयति तदाजनक्षयोलोकानां महतीपीडास्यादित्यर्थः अत्रोपपत्तिः रोहिणीध्रुवः वृषेएकोनविंशतिभागाः आक्षदृक्कर्मसंस्कारार्थंभागाद्वयं हीनमेव स्वल्पांतरत्वात्कृतं तत्र सप्त एव ग्रहे तन्द्भेदः अतउक्तं गविनग १७ कुलवेइति एवं रोहिणीशाकटं पंचतारात्मकं पंचाशदंगुलं यदस्ति तन्मध्येग्रहस्य प्रवेशः दक्षिणशरे पंचाशदधिक एव भवति येतो रोहिणीशारः पतांगुलो याम्यः अत्र योगतारायाम्यास्ति अथ चंद्रस्यशकटभेदसमयमाह ॥ ७ राहुपुनर्वसुमारभ्याष्टनक्षत्रमध्येवर्त्तमाने सति चंद्रोरोहिणीशकटं सदा भिनत्त्येव मंगलशन्योः शकटभेदः युगांतरेस्यात् इदानींअस्मिन्पाते खांबुधयइत्यादिकेनैवस्यात् अत्रोपपत्तिः चंद्रोवृषभेसप्तदशाभागमितः तस्यशरोदक्षिणः पंचादशदंगुलाधिकः पुनर्वस्वाद्यष्टनक्षत्रस्थेराहावेवभवतीतिप्रत्यक्षंभौमशन्योरेतादृशेपाते दक्षिणशरः पंचाशदंगुलाधिकोनभवत्येव

गविनगकुलवे १७ खगोस्यचेद्यमदिगिषुः खशरांगुलाधिकः कुभशकटमसौभिनत्त्यसृक्शनिरुडुपोयदि चेज्जनक्षयः ॥ ७॥ स्वर्भानावदितिभतोष्टऋक्षसंस्थेशीतांशुः कुभशाकटं सदाभिनत्ति भौमार्क्योः शाकटभिदायुगांतरेस्यात्सेदानींनहिभवतिदृशिस्वपाते ॥ ८॥ खमध्यगर्क्षध्रुवतोस्फुटंचरंततोदिनार्द्धान्निजभोदयैस्तनुः भवेत्तदालग्नमथोतदगभान्वितार्कमध्येघटिकानिशागताः ॥ ९॥ उद्यन्ध्रुवकः स्वदेशजोस्तंवामासुवतः सषड्ग्रहः स्यात्तत्कालविलग्नकंततः प्राग्वत्सुघटिकानिशागताः ॥ १०॥

अथ खमध्यस्थनक्षत्रदर्शनात्तत्काललग्नंरात्रिगतंचकथयति ॥ ८॥ खमध्ये याम्योत्तरवृत्तेवर्त्तमानं यन्नक्षत्रंतस्ययः उक्तः ध्रुवः अष्टचमूर्छनेत्यादि तस्मात्साधितं अस्फुटंसूर्यवत् चरंतेन चरेण यत् कृतं दिनार्धंसः इष्टकालः नक्षत्रध्रुवएवरविः ताभ्यांस्वदेशीयोदयैर्यत् साधितंलग्नं तात्कालिकलग्नंस्यात् ततस्तल्लग्नसषड्भार्कयोर्मध्ये रात्रिगतघटिकाः स्युरित्यर्थः अत्रोपपत्तिः नक्षत्रस्ययत्कृतंदिनार्द्धं सएवेष्टकालः नक्षत्रस्य खमध्यस्थितत्वात् तस्मात्साधितंलग्नंतत्कालिकलग्नंभवतीत्याद्यतिसुगमं अथ नक्षत्रोदयास्तलग्ने ताभ्यांनिशिगतंच वदति ॥ ९॥ उदये वर्त्तमानंयन्नक्षत्रं तस्ययः स्वदेशीयोध्रुवः सः सषड्भः सन्तल्लग्नंभवति ततस्तल्लग्नसषड्भार्कयोर्मध्ये प्राग्वत् रात्रिगताघटिकाः स्युरित्यर्थः ध्रुवउद्यदुडोः स्वदेशइतिपाठः साधुः अत्रोपपत्तिरतिसुगमा अथस्वदेशीयानिनक्षत्राणांउदयादीनिस्थिर-

लग्नानिकार्याणीत्याह ॥१०॥ निजदेशपलभावशात् उदयं खमध्यं अस्तं वा गच्छतो नक्षत्रस्योक्तरीत्या सुधीः स्थिरलग्नकानि कुर्वीतेत्यर्थः चतुर्भिस्तां पलभां भकस्य आचार्येणास्थिराणि मध्यलग्नानि शिष्यकृपया कृतानि संति अग्रे लग्नस्य लवाः खमध्यकगते दास्त्रेऽद्रिदिग्भिर्मिता इत्यादिभिः दैवज्ञवर्यस्य दिवाकरस्य सुतेन मल्लारिसमाह्वयेन रचिते कृतायां ग्रहलाघवस्याभूदृक्सदीप्यानयनाधिकारः ॥११॥ ॥इति श्रीग्रहलाघवस्य टीकायां नक्षत्रछायाधिकारः एकादशः ॥११॥ ॥अथ चंद्रशृंगोन्नत्यधिकारो व्याख्यायते ॥ मासस्य प्रथमे चरणे अथवा अंतिमे चरणे यस्मिन्नभीष्टदिने शृंगोन्नतिरवलोक्यते तद्दिवसे तपनास्तमयोदये क्रमादिति शुक्लपक्षे सूर्यास्तकाले गतातिथयः कृष्णपक्षे सूर्योदये एष्यतिथयः सावयवा ज्ञेयाः अत्रोपपत्तिः एष चंद्रः जलमयः तस्य यथा यथा सूर्यकिरणसंयोगस्तथा तथा शृंगौच्च्यं एवममायां सूर्यचंद्रयोः साम्यात्तत्र सिताभावः एवं प्रतिपदि द्वादशभागांतरे सितं किंचित् एवमष्टम्यामर्धं बिंबं सितं तत्र सितं न समौच्च्यं कक्षाभेदाभेदात् सूर्यचंद्रयोः दक्षिणोत्तरांतरस्य विद्यमानत्वात् अत्र बिंबार्धादधिके सिते शृंगौच्च्यदर्शनाभावः अत एव शुक्लाष्टमीपर्यंतं कृष्णाष्टमीतोऽग्रे वा शृंगोन्नतिरवलोक्येत्युपपन्नं एवं शुक्लपक्षे शृंगोन्नतिः सूर्या

इति निजदेशपलभावशातोऽत्युदयं खमध्यमथवास्तमयं व्रजदश्विभादिषु स्वखार्थमिह स्थिरलग्नकानि विदधीत सुधीः ॥११॥ मासस्य प्रथमेंऽति
मेथवांघ्रौ विधुशृंगोन्नतिरीक्ष्यते यदन्हि ः तपनास्तमयोदये वगम्यास्तिथयः सावयवाः क्रमात्कृतैष्याः ॥१॥ रविहृततिथयोंऽशास्तद्द्वियुक्कुयुक्
क्रमेण द्युमणिरपरपूर्वे मासपादे विधुः स्यात् नृपगुणतिथिरूनाः स्वप्रतिथ्याक्षभाघ्नीशरकृद्धृदुदगाशासंस्कृताकापमांशैः ॥२॥ ॥ ॥

स्तासन्ना कृष्णपक्षे सूर्योदयासन्ना भवति अत एव तपनास्तसमये इत्याद्युक्तं अथ गतैष्यसावयवतिथिभ्यो रवितश्चंद्रं साधयति ॥१॥ द्वादशगुणास्तिथयो भागाः तैःभौगैः सूर्यः मासाद्यपादे हीनः मासप्रथमांघ्रौ युक्तः चंद्रः स्यात् षोडशगुणा तिथिः तिथिवर्गेणोना पलभागुणा पंचदशभक्ता फलं भागादि कुसुत्तरं स्यात् ततः सूर्यकांत्या संस्कृतं कार्यं अत्र सर्वत्र संस्कारः एकदिशो योगः अन्यदिशोरंतरमिति प्रसिद्धः चंद्रस्य व्यस्तदिशाशरेण व्यस्तदिक् क्रांत्या च तत् संस्कार्यं ततस्तद्द्विगुणाभिस्तिथिभिः भाज्यसंस्कारः यद्दिक् तद्दिक् अंगुलाद्यं वलनं स्फुटं स्वीयो यः पांचमांशस्तेन हीनास्तिथयः अंगुलाद्यं सितं स्यादित्यर्थः अत्रोपपत्तिः रविचंद्रांतरे द्वादशभागतुल्ये एका तिथिर्भवति अतस्तिथयो द्वादशगुणाः रविचंद्रांतरभागा जाताः ते रवौ योज्याश्चंद्रो भवत्येव अत एवात्र शुक्ले युक्ता इत्युक्तं कृष्णे वियोज्याः

परमत्रकृष्णे एष्यतिथयोगृहीताः संत्यतोहीनाइत्युक्तं अथवलनोपपत्तिः तत्रसूर्यचंद्रयोः दक्षिणोत्तरमंतरं भुजः तस्यवलयसंज्ञायतोन्वर्थंनाम तावतांतरेण चंद्रशृंगंवलनि. ऊर्ध्वाधरमंतरंकोटिः तयोर्मध्येतिर्यक्कर्णः तद्दक्षिणोत्तरमंतरं साध्यंतेसूर्यक्रांतिः चंद्रस्यशरेणक्रांत्याच संस्कार्या तत्र व्यस्तदिक्कत्वे अयंहेतुः यतउभयोर्दक्षिणोत्तरांतरे साध्यमानेसमदृशोरंतरंभिन्नदिशोर्योगः कर्त्तव्यः संस्कारलक्षणंतुसमदिशोर्योगोभिन्नदिशोरंतरमित्यतोव्यस्तशरापमांशैरित्युक्तं एवमत्रदक्षिणोत्तरमंतरंनिरक्षदेशीयंजातं तत्स्वदेशीयकरणार्थंफलंनृपगुणतिथिरित्याद्युत्पादितं तद्यथा रवेरुदयेस्तेशृंगोन्नतौचंद्रोयदास्वस्वस्तिकं तदातयोर्दक्षिणोत्तरांतरमक्षांशाएव अथेष्टस्थानस्थे चंद्रेनुपातः यदित्रिज्यातुल्यया १२० व्यर्कैंदुदोर्ज्यया अक्षांशतुल्यमंतरं तदेष्टदोर्ज्यया किमिति अत्रतिथिर्द्वादशगुणाव्यर्कैंदुदोर्भागाः तेद्विगुणादोर्ज्यासाक्षांशागुणात्रिज्याभक्ताकृता तत्राक्षांशस्थाने पलभागृहीता तेनपलभापंचगुणापलभावर्गदशांशोनाक्षांशाः स्युरितिप्रथमंपंचगुणः किंचिन्न्यूनोग्राह्य इत्यत्राधिक एकगृहीतः सत्र्यंशाःपंच ५।२० एवंतिथेर्गुणाः १२।२ अत्रयोर्गुणानांघातोजातोगुणः १२८ त्रिज्याहरः १२० गुणहरावष्टभिरपवर्त्तितौ जातोगुणः १६। हरः १५ पलभागुणाशरकुद्धृदितिजातं अत्र

चंद्रस्यचव्यस्तशरापमांशैर्द्विनिघ्नतिथ्याविहृतांगुलाद्यं संस्कारदृक्कं वलनं स्फुटं स्यात् स्वेष्वंशहीनास्तिथयः सितं स्यात् ॥३॥ ७ ॥ ७ ॥

स्थानद्वयेंतरंजातं यतोद्विगुणभागाः सर्वभुजभागेषुदोर्ज्यानभवंति सत्र्यंशपंचगुणपलभा तुल्या अक्षांशानभवंति यतःपंचगुणपलभायान्तरपलभागदशांशोन्यूनास्ति तेनप्रतितिथिकियदंतरमिति ज्ञानार्थमुपायः अत्रस्थानद्वयेंतरं एकमक्षांशेषु पलभागदशांशतुल्यं द्वितीयस्थानेद्विगुणभागादोर्ज्येतिस्थानद्वयेंतरमधिकमस्ति वर्गात्मकं तदंतरं तिथिवर्गपंचदशांशतुल्यमधिकमस्ति तेनप्रथमं नृपगुणतिथिषेवहीनास्तिथिवर्गः कृतः यतोग्रेपंचदशहरोस्त्येव अतःनृपगुणतिथिःस्वघ्नतिथ्योनाक्षमाघ्नीशरकुद्धृद्वलनंभवतीत्युपपन्नं व्यस्तदिक्कार्थमुदगाशाएवंसंस्कारादिग्वलनंजातं अत्रक्रांतिशराक्षांशानांसंस्काराज्जातंवलनमंशाद्यं तस्यांगुलीकरणार्थमुपायःप्रतिपदंते रविचंद्रांतरं द्वादशभागाः तत्र षडंगुलतुल्यंबिंबार्द्धंयदि द्वादशभागैः षडंगुलानि तदेष्टवलनभागैः किमिति अत्रगुणहरौ गुणेनापवर्त्यजातोहरः २ पुनरन्योनुपातः द्वादशभागप्रमाणेन यदाद्व्यंहरः २ तदेष्टव्यर्कैंदुदोर्भागैः किमिति व्यर्कैंदुदोर्भागषडंशोवलनस्यहरः द्वादशतुल्ये रविचंद्रांतरे एकातिथिः तत्रद्व्यंहरः एकतिथ्याद्व्यंहरः तदेष्टतिथ्याकिमिति अतोद्विनिघ्नतिथ्याविहृतेत्युपपन्नं अथसितोपपत्तिः अत्ररविचंद्रयोः पादोनषट्काष्ठलवांतरे अर्धबिंबंसितंभवति अतःसार्धसप्त

तिथिषु बिंबार्धंसितं षडंगुलतुल्यं तेनानुपातः यदि सार्द्धसप्ततिथिभिः षडंगुलतुल्यं सितं लभ्यते तदेष्टतिथिभिः किमिति तिथ्यो यावत् षड्गुणाः सार्द्धसप्तभक्ताः क्रियंते तावत्स्वपंचमांशहीना एवं भवंतीत्युपपन्नं अथ कस्यां दिशि शृंगोच्च्यमिति वदति ॥३॥ वलनस्य यादिक् तस्यां शृंगोन्नतत्वं अन्यस्यां दिशि चंद्रस्य शृंगं नतं स्यात् वलनस्यांगुलैः शृंगोच्च्यपरिमाणं ज्ञेयं अत्र परिलेखतः किं साध्यं किमर्थं जडकर्मकर्तव्यमिति भावः अत्रोपपत्तिः सूर्यान्यदिदिवलनं अतो वलनान्यदिश्येव शृंगोन्नयनं अत्र वलनं व्यस्तदिक्कमस्त्यतो वलनदिश्येव शृंगोच्च्यं वलनांगुलातुल्यमेव शृंगोच्च्यं वलनाभावे शृंगे समाने भवतः अत्र परिलेखः शृंगोन्नतिदिक्ज्ञानार्थं कर्तव्यः तत् शृंगोन्नतिदिक्ज्ञानं शृंगोच्च्यपरिमाणं च वलनत एव जातं अतः किमर्थं परिलेखः कर्तव्य इत्युक्तं ॥४॥ ॥दैवज्ञवर्यस्य दिवाकरस्य सुतेन मल्हारिसमाह्वयेन ॥ कृतौ कृतायां ग्रहलाघवस्याभूच्चंद्रशृंगोन्नमनाधिकारः॥ ॥इति श्रीग्रहलाघवस्य टीकायां चंद्रशृंगोन्नत्यधिकारो द्वादशः ॥१२॥ अथ ग्रहयुत्यधिकारो व्याख्यायते ॥ ॥ पंचभसिद्धाः ऋतवः षट् अगाः सप्त अंकाः नव विशिखाः पंच एते काः पृथक् ईशानामेकादशानां कर्णस्यत्रयः अथो गो

उन्नतं बलनाशायामन्यस्यां स्यान्नतं विधोः वलनस्यांगुलैः शृंगं किमत्र परिलेखतः ॥४॥ पंचर्तुगांकविशिखाः ५।६।७।७।५ पृथगीशकर्णा ११ योगाहृ
ताः प्रकृतिभान्वरिसिद्धरामैः २१।१२।६।२४।३ भक्ताः फलोनसहिताः श्रवणेधिकोने तेऽसृग्युद्धृताः स्युरसृजो वपुरंगुलानि ॥१॥

नामांतरं ते हृताः ततः क्रमात् प्रकृत्याघ्नं कभक्ताः प्रकृतिरेकविंशतिः भानवो द्वादश अरयः षट् सिद्धाश्चतुर्विंशतिः रामास्त्रयः एभिर्भक्ताः यदंगुलाद्यं फलं तेन पृथक्कृतेंकाः ऊनसहिताः कार्याः कर्णे एकादशाधिके ऊनाः ऊने सहिताः ततस्ते त्रिभक्ताः असृजः सकाशात् भौमादीनां अंगुलात्मकानि बिंबानि भवंतीत्यर्थः अत्रोपपत्तिः अत्रातींद्रियदृग्भिराद्यैराचार्यैस्त्रिज्यातुल्ये शीघ्रकर्णे भौमादीनां बिंबांगुलानि लक्षितानि तान्येवाचार्येण पंचादीन्युक्तानि तेषां स्पष्टीकरणं यथा अंत्यफलज्यातुल्येन त्रिज्याशीघ्रकर्णांतरेण यदि बिंबत्रिभागतुल्या हासर्द्धिर्लभ्यते तदेष्टेन त्रिज्याशीघ्रकर्णांतरेण किमिति अत्र बिंबानां अंत्यफलज्याहारः अत्र त्रिज्या भवमिता अतः भवशीघ्रकर्णांतरं गुणः अत्र यथा भौमस्यांत्यफलज्या ७७ इयं त्रिगुणा जातो हरः २३१ यदि खार्कमिते व्यासार्द्धे अयं हरः तदेकादशतुल्ये व्यासार्द्धे क इत्यतोयं हरः २३१ एकादशगुणः २५४१ खार्कभक्तो जातः एकविंशतिर्भौमस्य हरः एवं सर्वेषामेव फलेन तत एवोनसहिता इति दूरस्थे गृहे बिंबं लघु त्रिज्याधिके कर्णे ग्रहहरस्थितं अतस्तत्रोनं समीपे बिंबाधिक्यं तत्र त्रिज्यातः कर्णोनता अतस्तत्र युक्त

मित्युक्तं तद्विंबकलाद्यं अंगुलादिकरणाय त्रिभिर्भक्तं यतः कलात्रयेणैकमंगुलं भवति अथ ग्रहयुतेर्गतैष्यताज्ञानमाह ॥१॥ ॥ययोर्ग्रहयोर्युतिः साध्यते तयोर्मध्ये यः अधिकगतिर्ग्रहः सचेत् अल्पगतेर्ग्रहात् अंशाद्यवयवेनाधिकः तदा तयोर्युतिर्गतेति वाच्यं अथवा कुटिले वक्रिणि ग्रहे अनुलोमतो मार्गिग्रहात् ॥अल्पतरे सति युतिर्गता वाच्या अनृजुखगयोर्द्वयोर्वक्रिणोर्ग्रहयोर्मध्ये शीघ्रगतो ग्रहे भागादिना अल्पे युतिर्गतैव वाच्या अन्यथोक्तलक्षणवैपरीत्ये ग्रहयुतिर्गम्येत्यर्थः अत्रोपपत्तिः प्रत्यक्षसुगमा॥ अथ ग्रहयुतिदिवसज्ञानमाह ॥२॥ मार्गिणोः द्वयोर्ग्रहयोः सतोः अथवा वक्रयोर्द्वयोर्ग्रहयोः सतोः तदंतरकलाः कार्याः ताः गत्यंतरेण भक्ताः यद्येको वक्री परो मार्गी तदा गत्यंतरकला गतियोगभक्ताः कार्याः आप्तैर्दिनैः ग्रहयुतिर्गम्यागता पूर्वोक्तलक्षणेन स्यात् अत्रोपपत्तिः यदि गत्यंतरकलाभिः एकं दिनं तदा ग्रहांतरकलाभिः किमिति वक्रिणि गतियोग एवांतरमिति अतस्तत्र तेनैवाप्ताः लब्धदिनैः एष्यगतैः ग्रहयुतिसमयः स्यादित्युपपन्नं ॥अथ ग्रहयोर्दक्षिणोत्तरदिक्संस्थानं तदंतरं च-

अधिकऋजुखगेधिकेल्पभुक्तेरथ कुटिलेल्पतरेनुलोमतो वा अनृजुगखगयोस्तु शीघ्रजेल्पे युतिरनयोः प्रगताऽन्यथा तु गम्या ॥२॥ ऋजुगतिखगयो
स्तु वक्रयोर्वा विवरकला गतिजांतरेण भक्ताः गतिजयुतिहृता यदैकवक्री युतिरगता प्रगता च वासरैः स्यात् ॥ ४ ॥ चाल्यौ रवेर्दौस्समौ स्तो ग्रहयुतिदि
वसेश्चंद्रबाणः स्वनत्या संस्कार्योऽत्र ग्रहौ स्वेषुदिशि समदिशोस्त्वल्पबाणोपरस्यां एकान्याशौ यदेषु विरहितसहितौ खेटमध्यांतरे स्याद्भेदो माने
क्यखंडादिह लघुनि तदाल्पाहि कीं लंबनाद्यं ॥३॥

साधयति ग्रहयुतेर्ये दिवसाः समागतैस्तैर्दिवसैः स्वगत्या ग्रहौ चाल्यौ तौ राश्याद्यवयवेन समौ स्तः अत्र चंद्रस्य शरः स्वनत्या सूर्यग्रहणोक्तरीत्या कृत्स्नतया संस्कार्यः ग्रहौ स्वशरदिशौ ज्ञेयौ यस्य ग्रहस्य शरः उत्तरः स ग्रह उत्तरस्यां यस्य दक्षिणः शरः स दक्षिणस्यामिति द्वयोः शरयोः समदिशोः सतोः यः अल्पबाणः ग्रहः सः अधिकशरग्रहात् अन्यदिशि ज्ञेयः इषू ग्रहयोः शरौ यदा द्वावपि एकदिशौ तदा तयोरंतरं कार्यं यदा भिन्नदिशौ तदा तयोर्योगः ग्रहयोर्मध्ये तद्दक्षिणोत्तरमंतरं अंगुलात्मकं स्यात् चतुर्विंशतिभक्तं चेद्धस्तात्मकमपि स्यात् इह शरांतरे ग्रहयोर्मानैक्यखंडात् लघुनि अल्पे सति ग्रहबिंबयोर्भेदः स्यात् तदा सूर्यग्रहणवत् अल्पं लंबनाद्यं अत्र किं कर्तव्यं अल्पबिंबत्वात् स्पर्शादि नोपलभ्यत अतो लंबनादिजडकर्म किमर्थं कार्यमिति भावः अत्रोपपत्तिः ग्रहयुतिदिवसाः ग्रहयोरंतरे गतिवशात् साधिताः तैः दिवसैश्चालितौ ग्रहौ समौ भवत एवेति प्रत्यक्षं अत्र चंद्रेण सदान्यग्रहस्य योगे साध्ये चंद्रशरः स्वन

स्या संस्कार्य एवं यतो नतिरपि दक्षिणोत्तरमंतरं अत्रापि ग्रहकक्षयोर्भिन्नत्वं द्रष्टुर्भूपृष्ठगतत्वं चेति हेतुद्वयं वर्तत एव अतश्चंद्रशरो नत्या संस्कार्य इति युक्तं ग्रहौ स्वशरदिशा वेवम्भवतः शरयोर्दिक्साम्ये अल्पबाणः अधिकबाणात् अन्यदिशि प्राविष्यत्येव अथ ग्रहयोर्दक्षिणोत्तरमंतरं साध्यं तत्तु शरांतरतुल्यं क्रांत्यंतराभावात् अतः एकदिशोः शरयोरंतरं कार्यं अन्यदिशोः सशरयोर्योगं विनांतरं न सिध्यत्यतो योगः कार्य इति दक्षिणोत्तरमंतरं स्यात् स एव व्यासस्थित्यादिसाधनार्थं स्पष्टः शरः मानैक्यखंडात् न्यूने शरे ग्राह्यग्राहकबिंबसंयोगः स्यात् तदाधस्थो ग्रहः चंद्रः ऊर्ध्वस्थो रविरित्यादि प्रकल्प्य प्रकल्पितार्कादेव लंबादि कृत्वा लंबनादि साध्यं तत्स्पर्शादिकाले देयं ते स्पष्टाः स्युः इत्यादि बिंबस्वस्वात् स्पर्शादिदर्शनाभावात् किमर्थं जडकार्यमित्याचार्येणोक्तं तदपि युक्तं ३॥ ॥दैवज्ञवर्यस्य दिवाकरस्य सूतेन मल्लारिसमाह्वयेन कृतौ कृतायां ग्रहलाघवस्य जातः खगामामिलनाधिकारः॥ ॥इति श्रीग्रहलाघवस्य टीकायां ग्रहयुत्यधिकारस्त्रयोदशः॥१३॥ ॥अथ पाताधिकारो व्याख्यायते॥ नवभिर्गुणिताये अयनांशाः तत्तुल्या घटिकाः स्युः ता घटिकाः षष्टिभक्ताः ऊर्ध्वस्थाने योगा अपि भविष्यंति तदूनाः सार्द्धविश्वयोगाः १३।३० अथ सप्तविंशति योगाः २७ तदूनाः कार्याः तावान् सावयवो योगः यस्मि

नंदघ्नायनभागतुल्यघटिकोनाः सार्द्धविश्वे १३।३० तथा तारास्तावति साग्रयोगविगमे पातो व्यतीपातकः॥ ज्ञेयो वैधृतिरत्र पातघटिकाः सर्वर्क्षनाडीहताः स्पष्टाः स्युः शरषड्हृता ६५ इह तमोऽर्कौ सायनांशौ कुरु॥१॥

न्काले प्रतिभासे भविष्यति तस्मिन्काले क्रमात् व्यतीपातः वैधृतिश्च पातो विज्ञेयः अत्र सार्धास्त्रयोदशोनास्तत्र व्यतीपातः यत्र सप्तविंशतिस्तत्र वैधृतिरिति अत्र योगस्य याः पातघटिकाः ताः तद्दिनजसर्वर्क्षनक्षत्रनाडीभिर्गुण्याः शरषड्भिः पंचषष्ट्या भक्ताः संत्यः स्पष्टाः स्युः इहास्मिन्काले तमोऽर्कौ राहुसूर्यौ सायनांशौ कुरु अत्र पातसाधने ऽमुनाचार्येण एहावयवांशाः देयाः रवौ च देयाः ततो विराह्वर्कात् शरः खंडानि च सन्धिविचारश्च कृतः इदमल्पबुद्धीनामयुक्तमिव प्रतिभाति यतोऽयनांशसंस्कारः क्रांतावेव न शरसाधने अत एव करणकुतूहले विनापि सपातेंदुमिहायनांशाके युतो रविः शीतकरश्च गृह्यत इति तेषां भ्रांतिनिरासार्थमुच्यते अत्र पातः सायनचंद्रसूर्ययोगो द्वादशराशिषड्राशितुल्य एव तदर्थमत्राचार्येण चंद्रविने वसूर्यराहुर्व्यां पातसाधनं कृतं तेन सायनः सूर्यः सायनराहुयुतः शरार्थमंगीकृतः स चादत्तायनांशः चंद्रस्यादत्तायनांशराहूनितस्य भुजरीत्या समान एव भवति अत्रोदाहरणं यथा अयनांशाः १८ गणितागताः सूर्यचंद्रराहवः सूर्य ११ २ चंद्र ३ रा ७ अत्र व्यगुचंद्रः ६ सायनाः सू २ चं ४ रा २५ अत्र राहुयुतः सूर्यः ३५ अस्य भुजः १० व्यगुचंद्रस्य ० भ

जेनतुल्योभवति ३५ अतस्तमोर्कौ सायनांशाविति युक्तमुक्तं पातकालेसिद्धे तत्कालीनसूर्यचंद्रराहवः साध्याः ततः शरसाधनार्थं अदत्तायनांशाराहूनि तदात्तायनांशचंद्रादेव शरः क्रांति संस्कारार्थं साध्यः अथवा सायनचंद्रसायनराहुभ्यामेवशरः साध्यः सशरः निरयनांशाभ्यांसाधितेनतुल्यएवभवति यतः तुल्ययोः क्षेपयोः क्षिप्तयोः अंतरेकेवलयोरंतरमेवसिद्धं अत्रोपपत्तिः पातोनामरविचंद्रयोः क्रांतिसाम्यं तत्रचंद्रक्रांतिः शरसंस्कृतासूर्यक्रांत्यायदासमास्यात् तदापातमध्यकालः तत्रादौ रविचंद्रयोर्मध्यमक्रांतिसाम्यं साधयतिमध्यमक्रांतिसाम्यं तयोर्भुजसाम्येस्यात् भुजसाम्यंतुरविचंद्रयोः षड्राशितुल्योद्वादशराशितुल्येयोगेभवति नन्वेवंचेत्तदारविचंद्रयोः षड्राशितुल्येद्वादशराशितुल्येअंतरेपिभुजसाम्यात् क्रांतिसाम्यमस्ति तत्रापिपातः तर्हिमासमध्येपादचतुष्टयं वक्तव्यंसत्यं तत्र पातकालेस्नानदानादिकफलमाचार्येणोक्तमस्तितत् अस्मिन्नेवपातद्वये उक्तमस्ति अतस्तद्द्येनोक्तं अतोरविचंद्रादेव देव पातः साध्यइति युक्तमुक्तं पाचांगीयोयोगोपि रवींदुयोगादेवसिद्धोस्ति अतस्तस्मादेवपातः साध्यते चक्रार्धतुल्ये योगेसार्धत्रयोदशयोगा चक्रतुल्येयोगेसप्तविंशतियोगाः अतस्तएवांगीकृताः अत्रयोगः निरयनांशात् क्रांतिः सायनांशात् अतोत्रयोगेद्विगुणायनांशोत्पन्नयोगः न्यूनीकर्तव्यः निरयनांश

गोलैक्येसाग्वर्कभान्वोःसदास्यात्पातोन्यत्वेचेंद्वेर्बाहुभागाः पंचेषुभ्यो ५५ ल्पास्तदास्त्येवपातःपृष्ठाश्चेत्तत्संशयस्तंचभिंद्यः ॥२॥ खाभ्रें
दुद्विरसाधृतिनगशराः ०।०।१।२।६।१८।५७ सागार्कभान्वोःपदैक्येधीनिघ्न्यगुरुद्रभूपतिनखवास्त्यक्षीणि ३।७।११।१६।२०।२३ भेदेक्रमात् ॥ क्षे
पः षड्दश ६।१० चार्ककोटिजलवेष्वंशा ५ भपाद्वैक्यकंशेषांशैष्यवधेषुभागसहितः संधिर्भवेत्क्षेपयुक् ॥ ३॥ साग्वर्कभुजांशकायदाल्पाः
संधेःक्रांतिसमत्वमस्तिचेत् अधिकानतदाभुजांशसंध्यंतरसाहृश्यमिहापमांतरंस्यात् ॥ ४ ॥

योगयोर्योगस्यकृतत्वात् यदिचक्रांशैः ३६० गसप्तविंशतियोगाः २७ लभ्यंते तदा द्विगुणायनांशैः किमितिफलंयोगाः तस्य घटीकरणार्थंषष्टिः ६० गुणः एवमयनांशानांद्वयंषष्टिः सप्तविंशतिरितिगुणत्रयं तद्घातोजातोगुणः ३२४० हरश्चक्रांशाः ३६० एवंगुणहरौ हरेणापवर्त्यलब्धाः गुणस्थानेनव अतोनवगुणायनांशातुल्यघटीभिः सार्द्धत्रयोदशसप्तविंशतिश्चोनास्ततुल्ययोगेगते पातः स्यादित्युपपन्नं अत्र योगाधस्थले घटिकाः मध्यमाः तासांस्पष्टीकरणायानुपातः यदिपराभिः पंचषष्टिमिताभिः सर्वर्क्षघटिकाभिः एताः योगघटिकाः तदेष्टसर्वर्क्षनाडीभिः किमिति अत्रपातेसायनांशस्यैव प्रयोजनमतः सायनांशावेवकार्याविल्युपपन्नं अथपातस्यसंभवासंभवविचारमाह ॥१॥ साग्वर्कभान्वोः सराहु

रविस्सूर्ययोः एकगोलत्वे सति सदापातः स्यादेव अन्यत्वे भिन्नगोलत्वे सति रवेर्भुजभागाः यदा पंचेषुभ्यः अल्पाः तदा पातोस्त्येव चेत्संच पंचाशदधिकाः तदा तस्य पातस्य संशयः अस्ति नास्ति चेति तमपि संशयं भिद्मो नाशयाम इति सराहुसूर्ययोरेकपदत्वे खाभ्रेंदुद्विरसा इति खंडानि स्युः पदभेदे व्यगरुद्रभूपतिनखाः खंडानि स्युः अत्र क्षेपः षड्भागाः प्रथमस्य द्वितीयस्य दश अर्कस्य ये कोटिलवाः सूर्यस्य कोट्यंशाः तेषां यः इष्वंशः पंचमांशस्तत्प्रमाणानां खंडानामैक्यं कार्यं तत्कंडैक्यं शेषागामैष्यखंडस्य च योवधस्तस्य यः इषुभागः पंचमांशस्तेन सहितं क्षेपयुक्तं च कृतं सत् संधिर्भवति एवं यत्र साग्वर्कस्य भुजांशकाः सन्धिभागेभ्यः अल्पाः तदा क्रांतिसाम्यमस्ति चेत्संधितोधिकाः तदा न पातः अत्र भुजांशानां संधेश्च यदंतरं तत्समानं क्रांत्यंतरं स्यादित्यर्थः अत्रोपपत्तिः अत्र व्यतीपाते रविचंद्रयोर्गोलैकत्वं वैधृते गोलान्यत्वं उभयत्रापि साग्वर्कभान्वोर्गोलैकत्वे विराहुचंद्रोत्पन्नशरसंस्कृतेंदुक्रांतिः रविक्रांत्यग्रे पृष्ठे चासन्नैव भवति चयापचयाहेतुभूतत्वात् साग्वर्कार्कयोर्गोलान्यत्वे चंद्रपरमशरेण ४।३० चंद्रस्य परमक्रांतिः २४हीना १९।३० अस्याः क्रांतेरूनायां रविक्रांतौ क्रांतिसाम्यं भविष्यत्येव एतावतीरविक्रांतिः कैर्भुजभागैर्भविष्यतीति ज्ञानार्थं धनुःकरणरीत्या ज्ञाता भुजभागाः ५५ एभ्योल्परविभुजभागेषु क्रांतिसाम्यमवश्यमस्त्येव पंचपंचाशदधिकभुजभागेषु भावाभावविचारः तत्र पंचपंचाशदधिकभुजभागप्रयोजनात् रवेः कोटिभागा एव कार्याः ते परमाः पंचत्रिंशत् ३५ तत्र भुजभागपरमत्वे कोट्यंशाभावात् शून्यमितान् रविकोट्यंशान् प्रकल्प्य पातविचारः कृतः तत्र सराहुसूर्यसूर्ययोः पदैकत्वे सराहुसूर्यभुजभागेषु षड्गुणेष्वेव पातः अतो रविकोट्यंशेषु शून्यतुल्येषु षड्तुल्यः संधिः एवं पंचतुल्यरविकोट्यंशेष्वपि षड्तुल्य एव संधिः एवं पंचोत्तरान् भागान् प्रकल्प्य साधितसंध्यंशानधो विशोध्य षड्गुणान् कृत्वा खंडानि पंचत्रिंशादशमध्ये सप्त पठितानि एवं तयोः पदान्यत्वे षष्ट्यधिकभुजभागेषु त्रिंशाभिन्नकोट्यंशमध्ये षड्संधिखंडानि दशोनानि कृत्वा पठितानि मध्ये तु पातः पंचभागैर्यदि भोग्यखंडं तदा शेषभागैः किमिति षड्दशचोनाः कृताः अतः सक्षेपः योज्य एव एवं जातो भागाद्यः संधिः संधितः सराहुसूर्यभुजभागेष्वल्पेषु पातः नाधिकेष्वित्युपपन्नं भुजांशानां संध्यंशानां यदंतरं तत्तुल्यमेव क्रांत्योरंतरमित्यर्थत एव सिद्धं अथ पातस्य गतागतलक्षणमाह ॥ ४ ॥ अर्कः सूर्यः यदि युग्मपदे वर्त्तते सराहुसूर्यात् समगोलेपि चेत्स्यात्तदा पातः यातो ज्ञेयः अथवा रविः ओजपदे सराहुसूर्यात् भिन्नगोले चेत्तदापि यातः पातः स्यात् निगदितात् उक्तलक्षणात्

पदेयुग्मौजेर्कः समविषमगोलः सतमसस्तदायातः पातस्त्वगतइतरत्वेनिगदितात् ॥ ७ ॥ ७ ॥

इतरत्से अन्यथात्वेअगतः एष्यपातः स्यात् सराहुसूर्यात् सूर्यश्चेत् भिन्नगोलेवदा कृतोगणितागतेयः शरः तस्य य जांघ्रिः चतुर्थांशः तस्माद्रवेर्भुजभागाः लघुतराः अल्प : स्युः तदा रविपदस्य अन्यत्वमुचितं अत्रोपपत्तिः अत्र रविचंद्रयोः भुजमान्यात् रविरेवांगीकृतः रविः यदायुग्मपदे तदा तस्य क्रांतिरपचीयमाना तत्र ससाहुसूर्यात् समगोलत्वेपि समदिशाशरेणयुक्तापि साक्रांतिः अग्रेरविक्रांत्यान समास्यात् अतः तत्रपातोगतोज्ञेयः ओजपदे वर्तमानस्य क्रांतिरूपचीयमानासा सराहु सूर्यभिन्नगोलत्वेसति भिन्नदिशा शरेणांतरिताप्यग्रेसूर्यक्रांत्यानसमान्यम् अतः तत्रापियातः स्यात्तदन्यथात्वेगम्यः पातइत्युपपन्नं अत्र चंद्रस्यगोलसंधिः साध्यः तत्रचंद्रोन कृतः रविरेवास्ति चंद्रभुजसाम्यात् शरेण कृता गोलान्यत्वसंभवः संधौ तत्र शराद्भुजभागाः साध्यंते परमक्रांत्या २४ त्रिज्या तुल्या दोर्ज्यात

विभिन्नेगोलेचेदिह कृतशरांघ्रेर्लघुतरा रवेर्दोर्भागाः स्यादिहरविपदान्यत्वमुचितं ॥५

देष्टशर तुल्यक्रांत्याकेति एवमिष्टदोर्ज्यातस्याधनुः करणार्थंसुखार्थं द्वौहरः शरांकानां दशगुणत्वात् दशहरः एवमत्र हर घातोहरः ४८० त्रिज्यागुणः तेनैवापवर्तनेजातः शरस्यहरः ४ एवंचतुर्भक्तशरादल्पभुजभागेषुभिन्नगोलत्वात् पदान्यत्वंभविष्यतीति युक्तंतेन कृतशरांघ्रेर्लघुतरा रवेर्दोर्भागाइत्युपपन्नं अथपातसाधने हेतुभूतशरं खंडकैः सूक्ष्मंसाधयति ॥५॥ इषोः शरस्यएतेंकाः स्युः सागराश्चत्वारः पंचधावन्हयः त्रयस्तेपिद्वौचतुर्धाततः कुभूखाभ्रकुरेकः भूरेकः-खशून्यअभ्रशून्यएतेषां समाहारः तत्तथाततः साग्विनात् सराहुसूर्यात् दोर्लवानांभुजभागानां इष्वंशाः पंचमांशाः तत्तुल्याः येगतांकाः तेषामैक्यंकार्यं ततः शेषांशानां भोग्यांकस्य च याहतिः तस्याः यः पंचमांशस्तेन युक्तःशरः स्यादित्यर्थः अत्रोपपत्तिः शरस्वरूपपूर्वनेव प्रतिपादितमस्ति अत्रपंचपंचभागानांशा

रभागादिकमुत्पाद्य सावयवत्वाद्दशभिः सवर्ण्य सिद्धान् नवतिभुजभागानामष्टादशशरांकानाचार्यः प्रोक्तवान् मध्ये तत्रानुपातः यदि पंचभिर्भुजभागैरेकः शरांको लभ्यते तदेष्टभुजभागैः कियंत इति अत उक्तं भुजभागपंचांशतुल्यगतांकैक्यं कार्यं शेषाणामनुपातः पंचभिर्भागैः भोग्यखंडं लभ्यते तदा शेषभागैः कियत इति अतः शेषभोग्यखंडवधपंचमांशेन युक्तं तदैक्यं शरः स्यादित्युपपन्नं अथास्य शरस्य क्रांतिसंस्कारयोग्यत्वार्थं स्पष्टत्वमाह ॥ ६ ॥ रवेर्भुजांशाः ये स्युः तेषां यो दशमांशः तस्मिन् रवैकादिके शून्येकादिसमे सति क्रमादयं हरः स्यात् अर्का द्वादश पुनः सूर्यः द्वादश मनवश्चतुर्दश धृतिरष्टादश उडूनि सप्तविंशतिः अंगरामाः षट्त्रिंशत् खाश्वाः सप्ततिः द्विशती प्रसिद्धाः उडुगुणाः सप्तविंशत्यधिकशतत्रयं एवमत्र शरात्क्रमशः स्वहरेण या लब्धिः तया स एव शरः हीनः सन् क्रांतिसंस्कारयोग्यः स्पष्टः शरः स्यादित्यर्थः अत्रोपपत्तिः अत्र क्रांतिर्ध्रुवाभिमुखी अतः सा कोटिरूपा शरः कदंबाभिमुखः स कर्णरूपः अतः क्रांतिसंस्कारार्थं शरस्य कर्णरूपस्य कोटिरूपत्वं कार्यं तद्यथा यदि

पंचघ्नाः सागराः पंचधा वह्नयो द्वौ चतुर्धा कुभूः खाभ्रमंकाद्रिषोः ४।४।४।४।४।३।३।३।३।३।२।२।२।२।१।१।०।० साग्निनाड्योर्लवेष्वंश ५ तुल्यैक्यकांशेषभोग्याहतीषांशयुक्स्यात्शरः ॥६॥ रवैकादिके रविभुजांशदशांशके स्याद्धरोर्कः सूर्यमनुधृत्युडवोंगरामाः खाश्वा द्विशत्युडुगुणा १२।१२।१४।१८।२७।३६।७०।२००।३२७। स्वशराद्धराप्त्या हीनोत्र सद्यपमसंस्कृतये स्फुटः स्यात् ॥७॥

त्रिज्याकर्णे द्युज्याकोटिः तदा शरकर्णे का कोटिरिति जातः कोटिरूपः शरः एवमत्र द्युज्या कार्या द्युज्या नाम द्युरात्रवृत्तव्यासार्द्धं तत्र क्रांतिज्या भुजः द्युज्या कोटिः त्रिज्याकर्णः एवं क्रांतिज्यावर्गोनित्रिज्यावर्गो द्युज्यावर्गस्तन्मूलं द्युज्येति कर्तव्यं अत्रेदं जडकर्म दृष्ट्वा आचार्येण दशदशभागानां द्युज्याः साधिताः तत्र प्रथमं दशभागानां क्रांतिज्यायां क्रियमाणायां सत्रिराशिग्रहः कार्यः एवमत्र सत्रिराशीनां दशभागानां द्युज्या ११० शरोनेन गुण्यः खार्कमितत्रिज्यया भाज्यः गुणहरौ दशभिरपवर्तितौ जातो गुणः एकादश ११ हरो द्वादश १२ यो राशिरेकादशभिर्गुण्यते द्वादशभिर्भज्यते स स्वद्वादशांशहीन एव भवति एवं सर्वेपि हरा उत्पादिताः अतः शरः स्वहरलब्ध्या हीनः क्रांतिसंस्कारयोग्यः स्पष्टो भवतीत्युपपन्नं अथ क्रांतेः कर्त्तव्यताप्रकारं खंडैरेवाह ॥७॥ एवं अपमस्य क्रांतेरंकाः स्युरित्यन्वयः नखा विंशतिश्चतुर्धा ततः गोभुवः एकोनविंशतिः द्विवारं

गजाब्जाः अष्टादशनूमाः षोडश अष्टिः षोडश इंद्राश्चतुर्दश विश्वेत्रयोदश अर्काः द्वादशदिशोदशवसवोष्टौअगाः सप्तअक्षाः पंचत्रयःप्रसिद्धाः क्ष्माएकः अर्कस्ययोबाहुर्भुजः तस्य येलवाः तेषां इष्वंशः पंचमांशः तत्तुल्यगतः अंकः स्यात् शेषंन्यस्येति शेषमेकांतेस्थापनीयमेव अत्रोपपत्तिः क्रांतिलक्षणपूर्वमेव प्रतिपादितं पंच पंच भागानां क्रांतिभागान् प्रसाध्यसावयवत्वात् दशभिःसंगुण्यांकाः पठिताः तत्रानुपातः यदिपंचभिर्भुजभागैरेकः क्रांते रंकोलभ्यते तदेष्टभुजभागैः किमितिलब्धतुल्योगतांकः स्यात् शेषस्याग्रे प्रयोजनमस्त्यतः तत्स्थाप्यं अतः क्रांतिखंडानां शरखंडानां संस्थानक्रमं तत्संस्कारंच कथयति क्रमोत्क्रमाद्युक्तशरापमांकान् संख्याहि भोग्यात् क्रमतः षडंकाः स्थाप्यागतैष्यागतगम्यपाते युग्मेन्यथौजेस्युरिमेयनांशाः ॥९॥ उक्ता येशरस्य तथापमस्य क्रांतेः येंकाः तान् यथागतान् आदौ क्रमात् पश्चादुत्क्रमात्संख्याहि गणयभोग्यात् अंकात् क्रमतः यथाक्रमं षट् अंकाः गतेपातेगताः एष्येपातेएष्याः स्थापनीयाः अयंप्रकारस्तु युग्मपदेओजपदेच यदारविः सराहुसूर्यौ वा भवतितदा इदमन्यथाविपरीतं तद्यथागतेपाते एष्याः एष्येपातेगताः इमेंकाः अयनदिशः स्युः रविर्यस्मिन्नयनेतद्दिश क्रांत्यंकाः विराहुसूर्यः यस्मिन्नयनतद्दिशः क्रांत्यंकाः अंत्यादिलोमा

क्रमोत्क्रमाद्युक्तशरापमंकान् संख्याहिभोग्यात्क्रमतः षडंकाः स्थाप्यागतैष्यागतगम्यपाते युग्मेन्यथौजेस्युरिमेयनांशाः ॥९॥ अंत्याद्विलोमायदितं

दाते ः न्यदिशोज्ञेयाः भोग्यादंत्यपर्यंतं येकास्तेयनदिशः अंत्यादन्येयेउत्क्रमस्थास्तेविपरीतदिशः उत्तरायणेदक्षिणा दक्षिणायनेउत्तराः स्युरित्यर्थः अथशब्दोनंतरवाची क्रांत्यंकशरांकस्थापनानंतरंक्रांत्यंकाः शरांकैः संसंस्कृताः कार्याः अत्रसंस्कारस्तु एकदिशोर्योगोभिन्नदिशोरंतरमिति प्रसिद्धः ततस्तेंकास्त्रींदुहृतापमेष्यांकेनत्रयोदशभक्तक्रांतिभोग्यांकेनापिसंस्कृताः स्पष्टतराभवेयुरित्यर्थः अत्रोपपत्तिः युग्मपदेखंडानामग्रे उपचयः तत्र चेद्गतः पातः तत् ज्ञानार्थमपचयभूतांकग्रहणं अतोगतांकस्थापनमुक्तं एष्ये पाते एष्यांकस्थापनमर्थतएवसिद्धं ओजपदे इदंविपरीतं भवतिअंकानां चयापचयस्य व्यस्तभूतत्वात् तेंकाः स्वायनदिशिस्युरितिप्रत्यक्षं अत्र शरसंस्कृतायाः चंद्रक्रांतेःसूर्यक्रांत्यासह यदंतरं तत् ज्ञानार्थंक्रांत्यंकाः शरांकैः संस्कार्याएवशरस्य प्रथमांकः क्रांतेः प्रथमांकेसंस्कार्यः एवंद्वितीयोद्वितीयेइत्यादिषणामप्यंकाना संस्कारः कार्यएव अन्यच्च संस्कारांतरं यदिचंद्रगतिप्रमाणेनेदं क्रांतिभोग्यखंडं तदारविगतिप्रमाणेनकिमितिभोग्यखंडं रविगत्यागुण्यंचंद्रगत्याभाज्यं अत्र रविगतिस्त्रयोदशगुणाचंद्रगतिर्भवत्यतः स्थूलत्वात् भोग्यांकाः त्रयोदशभिर्भाज्याः फलंसर्वांकेषुसंस्कार्यं चंद्रगतिसंबंधित्वात् अतस्त्रींदुहृता १३ पमेष्यांकेनापि-

संस्कृतास्ते षडंकाः स्पष्टनराणि क्रांत्यंतरखंडानि चंद्रार्कयोर्भवेयुरित्युपपन्नं अथपातकालं वृत्तद्वयेन साधयति ॥१०॥ प्राक्पूर्वक्रांतौ येशेषभागाः एकांतस्थापिताः ते शरैः पंचभिराप्ताभक्ताः संतो यत्फलं तस्य रूपशुद्धस्य लघुसंज्ञा षडंकमध्ये यः आद्यः प्रथमः स्पष्टांकः स लघुनाहतो गुणितः कार्यः तेन आद्योयुक्तो योत्रस्पष्टबाणः तस्मात् तानंकान् जह्यात् शोधयेत् ततः शुद्धषडंकेषु यत् शेषं तत् अशुद्धेनांकेन भक्तं कार्यं तत्फलं विशुद्धखंडानां संख्या यावती स्यात् तयासहितं युक्तं च कार्यं ततस्तत् लघुना ऊनं त्रिगुणं पुनर्भिर्नाडीभिः नक्षत्रसर्वघटीभिः गुण्यं ततस्तत् इभैरष्टभिराप्तं भक्तं सत् आप्ताः लब्धाः याः यातैष्यानाड्यः ताः पातमध्यः स्यात् यातैष्यलक्षणं पूर्वमेव प्रतिपादितमस्ति मध्यमपातकालात् ताभिः घटीभिः गतो गम्यो वा पातमध्यः स्यादित्यर्थः अत्रोपपत्तिः अत्र खंडानि पंचपंचभागानां तेन प्रपातः यदि पंचभिर्भागैर्भोग्यांकाः लभ्यते तदा शेषांशैः किमिति अतः शेषलवाः शराप्ताः कार्या एव रूपादूना एव सदास्युरिति तेषां भोग्यत्वकरणार्थं ते रूपाद्विशुद्धा इत्युक्तं तस्य लघुसंज्ञा कृता तस्य भोग्यांको गुणो रूपमितः लघुनाहतः आद्यः स्फुटांकः कार्य इति सिद्धं एवं जाते गतेपाते शेषांशोत्थभोग्यखंडमेष्ये शेषांशोनपंचांशोत्थं भोग्यखंडं इदमाद्यापरपर्यायान्मध्यक्रांतिसाम्यकालिकशरतुल्यक्रांत्यंतरा-

न्यदिक्क्राथापमांकाः क्रमशः शरार्कैः संस्कृतास्त्वौंदुलूताप मैष्यांकेनाप्तितेभ्यस्पष्टनराभवेयुः ॥१०॥ प्राक्स्थापिताः शेषलवाः शराप्ता रूपाद्विशुद्धा
लघुसंज्ञकः स्यात् आद्यः स्फुटांको लघुनाहतोयस्तेनाढ्यबाणात्क्रमशोथजह्यात् ॥११॥ तानंककान् शेषमशुद्धभक्तं विशुद्धसंख्यासहितं लघूनं ॥

द्वितीयादिखंडान्यपि शोध्यानि ॥ अत्राचार्येण प्रथमखंडं संपूर्णं शोधितं अतो भोग्योत्थभोग्यखंडं गतेपाते भुक्तांशोत्थभोग्यखंडं गम्ये पाते शरे योज्यं अतः शेषलवाः शराप्ताः रूपाद्विशुद्धाः गतपाते लघुः गम्ये शेषांशाः शराप्ता एव लघुः स्यादिति युक्तं अत एवाचार्यलिखितस्तज्जीर्णपुस्तके प्राक् स्थापिताः शेषलवाः शराप्ता लघुर्भवेत् भूच्युत एष्यथात इति पाठो दृश्यते ॥ अस्यार्थः एष्यपाते शेषांशाः शराप्ताः भूच्युतः लघुः गते किं कर्तव्यमिति मंदधियां शंका यो भवेदतः प्राक् स्थापितः शेषलवाः शराप्ता गम्ये लघुर्भूपतितो गतेऽसाविति पाठो नितांतरमणीय इति प्रतिभाति रूपाद्विशुद्धा लघुसंज्ञकः स्यादिति पाठस्तु वासनाविरोधादुपेक्ष्यः एवं यावंतोंकाः शुद्ध्यंति तावंतः शोध्याः शेषेण सह अत्र पातः यदि अशुद्धांकेन पंचभागाः लभ्यंते तदानेन शेषेण किमिति अतः शेषं अशुद्धांकभक्तं कार्यमिति तस्मिन्फले विशुद्धांकसंख्या योज्या तत्र पूर्वं लघुः संयोजितो वर्तते-सः निःकासनीय एव तत्कालादेव पातज्ञानार्थं अतो लघूनमिति यदि चंद्रगतिभागैरेभिः १३।१० सर्वनक्षत्रघटिकाः लभ्यंते तदेभिः शेषभागैः किमिति अत्र शेषस्य सव

र्कनाड्योर्गुण्याअतोभनाडीघ्नमिति अत्र हरस्त्रयोदशसावयवाः १३ पूर्वानुपातेगुणः पंचतुल्यस्छिन्नः अत्र संचारः यदिपंचतुल्येगुणेसावयवास्त्रयोदश १३।१० हरः तदाचार्येण
कल्प्यते त्रिभिर्गुणे कोवाहरः लब्धा अष्टौ अतस्त्रिघ्नमिति भासानि लब्धघटीभिः गतैष्यं पातमध्यं स्यादित्युपपन्नं अथपातस्छितिकालमाह ॥१२॥ अविशुद्धेनांकेन तत्ताभ-
काः यमार्कनाड्यः द्वाविंशत्यधिकशतमितघटिकाः यत्फलं ताभिर्घटिकाभिः पातमध्यात्पूर्वं अग्रतश्च स्छितिः स्यात् तावत्समयंपातस्य कालोस्त्येव अत्र क्वचिद्यदा षडंकाश्च
पि बाणात् शुद्धाः तदा अन्येपि त्रयः अंकाः पूर्वोक्तरीत्या संस्कार्याः अत्रोपपत्तिः स्थितिर्नाम मानैक्यखंडतुल्यंयावत्क्रांत्यंतरंभवति तावत्पर्यंतं पातोस्त्येव अथभाज्यः साध्यतेत
त्र पंचदशभागानांकलाः ९०० यदिचंद्रगतिप्रमाणेन ७९० एताः तदा रविगतिप्रमाणेन ५९ काइतिजाताः कलाः ६७।३० तथामानैक्यखंडस्यमध्यमस्यकलाः ३२।३८ तत्रमानैक्य-
खंडं एतत्कलागुण्यं जातोभाज्यः अपरपर्यायः यदि यमांगराम ३६२ मितक्रांत्यापंचदशभागकलाः लभ्यंते ९०० तदा मानैक्यखंडतुल्यक्रांत्या ३२।१५ काः चंद्रगतिकलाभिः
७९०।३५ षष्टि घटिकाः ६० तदाभिः कलाभिः किं यदि यमांगराम ३६२ तुल्यभोगखंडेनैतास्तदा अशुद्धेनखंडेन काः अयमनुपातोव्यस्तः इच्छान्हासे फलवृद्धेरपेक्षितत्वा

त्रिघ्नं भनाडीघ्नमिभान्समासयातैष्यनाडीष्विह पातमध्यं १२॥ षड्गार्कभव्यतरीविस्त्विह सावनाङ्गोथार्के घटीसमकलाश्चलनंतथेंदोः॥ भुक्त्यंशका
भघटिकासखखवाहयः ८०० स्युस्तच्चालितापमसमत्वमिह प्रतीत्यै ॥१३॥ अविशुद्धहृततायमार्कनाड्यः १२२ प्राक्पश्चात्स्थितिरत्र पातमध्यात् ॥ शुद्धाः द्व

त्व तेनाशुद्धखंडंहरः यमांगरामागुणाः पूर्वंहरश्च तयोर्नाशः एवंजातो गुणत्रयघातोगुणः १७४१५०० हरः चंद्रगतिः अशुद्धखंडंच चंद्रगत्याःपवर्तेकृते जातोभाज्यः २२०३
अथ यमांगरामखंडेन पंचदशभागोत्पन्नेन ततोन्योनुपातः यदि यमांगरामानामयंभाज्यः २२०३ तदाचार्योक्तविंशतिमितानांकिमितिजातोभाज्यः १२२ अस्याशु
द्धांकोहरोस्त्यतः अविशुद्धहृततायमार्कनाड्यइत्युपपन्नं इयंस्छितिरुभयतः समामानैक्यखंडतुल्यांतरस्यविद्यमानत्वात् अत्र मानस्छितिमध्येकृतं स्नानजपहोमादि-
अनंतफलदं भवतियत्र क्वचिच्छरबाहुल्यात् षडंका अपिशुद्धास्तत्रान्येत्रयः संस्कार्याइतिप्रत्यक्षसिद्धं अथात्रसूर्यात् चंद्रज्ञानंवदति ॥१३॥ व्यतीपाते पातं पातेर
विः षड्राशिभ्यः शुद्धः सत्सायनचंद्रोभवति वैधृते पाते पातेरविः द्वादशराशिभ्यः शुद्धः सायनः चंद्रोभवति अथसूर्यघटीसमकलाश्चालनंदेयं अथभघटीभिः
नक्षत्रसर्वघटीभिः आप्ताः भक्ताः खखवायः अष्टशतानिइंदोः चंद्रस्यभुक्त्यंशकागतिभागाः स्युः तयागत्याचालितोयश्चंद्रः तस्यापमः शरसंस्कृतः सूर्यापम

केवल एव अनयोः समत्वंप्रतीत्यैस्यात् अत्रोपपत्तिः अत्रव्यतीपातपाते सायनरविशशियोगः षड्राशितुल्यः वैधृते द्वादशराशितुल्यः अतोहि षड्राशिभ्योद्वादशराशिभ्यः शोधितः सायनोरविः सायनः चंद्रः स्यादिति प्रत्यक्षं पातकालीनसूर्यकरणार्थं पातघटीतुल्या एवकलाः स्वल्पांतरत्वात् रवौदेयाइत्युक्तं भघटीभक्ताः खखाष्टौ चंद्रगतिः स्यादिति प्रत्यक्षोपपत्तिः यदिसर्वर्क्षघटीभिः अष्टशतकलाः ८०० तदा षष्टिघटीभिः काइतिफलं चंद्रगतिकलाः ताः षष्टिभक्ताः भागाः स्युः तेन षष्टितुल्ययोर्गुणहरयोर्नाशे भघटिका सखखाहयश्चंद्रगत्यंशाइति एवंतत्र रविचंद्रयोः क्रांतिसाम्यंस्यादेवेति दैवज्ञवर्यस्यदिवाकरस्य सुतेनमल्लारिसमाह्वयेन वृत्तौकृतायांग्रहलाघवस्य पाताधिकारः परिपूर्त्तिमागात् ॥ इतिश्रीग्रहलाघवस्यटीकायांपाताधिकारश्चतुर्दशः ॥ अथपंचांगानयनचंद्रग्रहणसाधनाधिकारोव्याख्यायते॥ इष्टमासीयो मासगणोयः तएवमासाः तेस्वार्धयुताः तिथेर्दिनाद्यं वाराद्यंस्यात् तावत्य एवघटिकाः मासगणात् त्र्यंशाढ्याः ततस्तत् द्वयत्रयाभ्यां सहितंकार्यं चक्रेणगुणाः अक्षा

सिदत्रचेत्षडंकाः संस्कार्याश्च तदग्रतस्त्रयोंकाः ॥१४॥ मासास्वार्द्धयुताः स्तिथेर्दिनाद्यं तावत्यो घटिकाश्च मासगणात् ॥ त्र्यंशाढ्याः स
हितं द्वयत्रयाभ्यां २।३ चक्रघ्नाक्षनवांगवर्गयुक्तं ॥१॥ संसप्ताष्टयमा ०।७।२८ श्चचक्रनिघ्नानागांभोधघटीयुताभशुद्धाः ॥ द्वाभ्यां धूर्ज
टिभिर्विनिघ्नमासैर्युक्ताभध्रुवकोभपूर्वकः स्यात् ॥२॥

पंचनवभसिद्धाः अंगवर्गः षट्त्रिंशत् अकगुणेनानेन ध्रुवेण युक्तं तत्कार्यमित्यर्थः अत्रोपपत्तिः अत्रतिथ्यानयनार्थं मध्यमं तिथिवाराद्यं साध्यं तत्र चांद्रमासप्रमाणं २९।३१।५० इदं सप्ततष्टं जातं वाराद्यं १।३१।५० अत्रानुपातः यद्येकमासेनेदं तदेष्टमासगणेन किमिति अतोमासगणेनानेन गुण्यः तत्रखंडगुणन मासगुणतुल्याः एववाराः एकं खंडं द्वितीयखंडं ०।३० अतः सार्द्धयुक्ताः इति घटिका अपि तावत्यः अन्यत् खंडं ०।२० अतस्त्र्यंशाढ्याइति अत्र ग्रंथारंभे तिथिवारद्वयंघटीत्रयंच अतस्तद्युक्तमिति एकचक्रे तिथिवाराद्यं ५।९।३६ यद्येकचक्रेणेदं तदेष्टचक्रेण किमिति अतश्चक्रघ्नाक्षनवांगवर्गयुक्तमित्युपपन्नं अथनक्षत्रध्रुवकं साधयति ॥१॥ खंशून्य सप्त घटिकाः अष्टाविंशतिपलानि एतेचक्रनिघ्नाः कार्याः ततः नागांभोधि ४८ घटीभिर्युक्ताः कार्याः ततस्तेसप्तविंशतेः शोध्याः द्वाभ्यां धूर्जटिभिर्विनिघ्नाः गुणिताः ये मासाः तैर्युक्ताः भपूर्वोनक्षत्राद्यः नक्षत्रध्रुवकः स्यादित्यर्थः अत्रोपपत्तिः अत्रैकमासेनक्षत्रध्रुवः सप्तविंशतितष्टः २।११

अतो मासाः अनेनगुण्यइति तथैकस्मिन् चक्रे नक्षत्रध्रुवकः चक्रशुद्धः ७।२८ अतो यंचक्रगुणइति क्षेपश्चशुद्धोयं ०।४८ अतो नागांभोधिघटीयुता इति स्वचक्र शुद्धत्वात् भशुद्ध इत्युपपन्नं अथ पिंडं साधयति ॥२॥ स्वर्गाः एकविंशतिः शरयुः पंचनवप्रसिद्धाः एते चक्रेण गुणनीयाः ततो द्विगुणमासगणेन युक्ताः कार्याः पुनः घटीशुद्धिभक्तमासगणेनयुक्ताः कार्याः सपिंडोभवेत् युगकुभिः चतुर्दशाभिरूर्ध्वस्थाने खचरैर्नवभिर्घटीषु समेतः युक्तः कार्यः ततोगजाश्विभिः अष्टाविंशत्यातष्टः कार्यः अत्रपिंडे अष्टाविंशतिमितंचक्रं अत्रोपपत्तिः पिंडोनाम चंद्रमंदकेंद्रं तस्य चक्रमध्येध्रुवोयं २१।५।१ अतोयंचक्रगुणइति ततोमासध्रुवोयं २।०।३ अतोद्विघ्नमासान्विताः घटीषु द्विहतमासयुता इति यागकुभिरित्यादिक्षेपः अतः स्तद्युक्तः कार्यः अष्टाविंशतिचक्रत्वात् तत्तष्टः कार्य इत्युपपन्नं अथ सूर्यनक्षत्रात्फलघटिकाआह ॥३॥ अथ ११।१०।८।६।४।२पु० कृ० ।३।५।७।९।१०।११।१०।१०।९।८।६।३।० उषाध २।४।६।८।९।१०।११ अश्विनीनक्षत्रात् एताः

स्वर्गाः शरानवचचक्रहताद्विनिघ्नमासान्वितावित्द्विहतमासयुताघटीषु पिंडोभवेद्युगकुभिः खचरैः समेतस्तष्टोगजाश्विभिरिदं
भवतीह चक्रं ॥३॥ दिग्वेददशवसुषड्द्व्यश्विनाड्योश्विभात्स्वरखगुणशरनगांकाशाशादिग्दिङ्क्वाष्टो रसगुणखभिनक्षादादिते
याद्द्वणस्युर्हियुगरसगजांकाशाशोप्रवरा वैश्वतः स्वं ॥४॥ सूर्यघटीका धनंस्युः क्रमात् शिवादयः तथा आदितेयात् पुनर्वसुतः एताः स्वसु

रव्याः घटिका ऋणं तथा वैश्वतः उत्तराषाढातः द्वियुगादयो घटिकाः धनं स्युरिति अत्रोपपत्तिः सूर्यस्य प्रतिनक्षत्रं स्वार्थं मंदफलकलानां गस्यंतरवशात् घटिकाः कृत्वासिद्धाः पठिताः तासां धनर्णोपपत्तिः अश्विनीमारभ्य पुनर्वसुपर्यंतं रविमंदकेंद्रं मेषादावतस्तत्र धनं एवं पुनर्वसुतः उत्तराषाढापर्यंतंकेंद्रं तुलादौ भवत्यतऋणं उत्तराषाढामारभ्याश्विनीपर्यंतं केंद्रं मेषादावपिस्तत्रापि धनमित्युपपन्नं यत्सूर्ये धनं तच्चंद्रे ऋणंपुनर्भोग्यकरणे तदधिकमेव भवति इति सूर्ये यादृशांफलं तादृशमेव तिथावपीत्युपपन्नं अथ सूर्यनक्षत्रानानयाह ॥४॥ चतुर्गुणाइष्टावर्त्तमानातिथिः स्वार्कभागयुता तिथेर्हदिशांशोनयुता ततः सानक्षत्रध्रुवघटीषु योज्या तदुतं सूर्यर्क्षं सावयवं च मध्यमं स्यात् ततस्तत् अर्कजाख्याः इदानीमुदितायाः सूर्यनक्षत्रघटिकाः तांभ्यां धनर्णत्वेन युतोनं सत् स्फुटं स्यात् अत्रोपपत्तिः प्रतितिथिनक्षत्रयोर्घटिकाचतुष्टयं पंचपलाधिकमंतरं अतोनुपातः यद्येकयातिथ्येदं तदेष्टति-

थिभिः किमिति अत्र खंडं ४ अन्यत् ०।५ अतो वेदघ्नेष्टतिथिः द्वादशांशायुक्ते त्युपपन्नं इदं भध्रुवे योज्यं सूर्यनक्षत्रं स्यादेव तन्मध्यमतः सूर्यघटीभिर्मंदफलोसन्नाभिः संस्कृतं स्पष्टं स्यादित्युपपन्नं अथपिंडफलमाह ॥ वर्त्तमानतिथियुक्ते पिंडो ध्रुवांके कृते सति एताः घटिकाः स्युः विश्वेन्द्वोः शराः भयोर्दशातुल्ये एकतुल्ये वा पिंडे शराः पंचघटिकाः तथैव अर्कयमयोः पिंडयोः दशास्त्रीशयोः पंचेन्दवः दशवेदयोः गोचंद्राः पंचांकयोर्यमयमाः षड्वस्वोः जिनाः नगेतत्व घटिकाः शक्रे खं एताः पिंडघटिकाः प्रथमचतुर्दशमध्ये धनं अग्रे ऋणमित्यर्थः परमपिंडयुक्ततिथिमष्टाविंशतेः शोध्यशेषात्फलं ग्राह्यं अत्रोपपत्तिः अत्र पिंडो नाम चंद्रमंदकेंद्रं तत्र प्रतिपिंडं चंद्रस्य मंदफलानि प्रसाध्य गत्यंतरकलाप्रमाणेन तेषां घटिकाः कृत्वा सिद्धाः पाठपठिताः पिंडापरपर्याय चंद्रकेंद्रस्युच्चोनः ग्रहः केंद्रमिति प्रकारेण भवति अतस्तुलादौ स्वमजादौ ऋणमिति यद्यपि तथापि भोग्यकरणे चंद्रमंदफलं व्यस्तं भवतीति मे

वेदघ्नेष्टतिथियुतार्कभागायोज्या भध्रुवनाडिकास्ततत्स्यात् सूर्यर्क्षं विगतं ततोर्कजाख्यनाडीहीनयुतं स्फुटं भवेत्तत् ॥५॥ पिंडे युक्ततिथौ तदाद्यमनुषु स्वशेषपिंडेष्वृणं विश्वेन्द्वोश्च शरा दशार्कयमयोः पंचेन्दवः स्त्रीशयोः गोचंद्रा दशवेदयोर्यमयमाः पंचांकयोः स्युर्जिनाः षड्वस्वोश्च नगेषुतत्त्व घटिकाः शक्रे च खं पिंडजाः ॥६॥ वारेषु तिथिर्देया हेया नाडीषु जायते मध्या रविजापिंडफलाभ्यां संस्कृता स्पष्टतां याति ॥७॥ स्याद्भं केवलयोस्तिथिध्रुवभयोर्योगे तिथेर्नाडिका युक्ताव्यंगलवर्द्विनिघ्नतिथिना व्यस्तार्कजासंस्कृताः ॥

षादिषट्के केंद्रे फलं धनं अतश्चतुर्दशापिंडमध्ये धनं तुलादावृणं अतोग्रे ऋणमित्युपपन्नं अथ स्पष्टतिथिवारादिकमाह ॥६॥ यदानीतंमसुगणात्तिथिवाराद्यं तस्य वारे वर्त्तमानतिथिर्देया ततस्तस्य नाडीषु सैव तिथिर्हेया न्यूनी कर्तव्या सा मध्या स्यात् सा रविजाभिर्घटीभिः तथा पिंडघटीभिः संस्कृता सती स्पष्टतां याति स्पष्टा स्यादित्यर्थः अत्रोपपत्तिः अत्र तिथेर्मध्यमं वाराद्यं ०।५९।४ इदं तिथिगुणितं वारे योज्यं अतोत्र वारे तिथिर्युक्ता घटीषु न्यूनीकृता पलचतुष्टयं स्वल्पांतरत्वात्यक्तं तन्मध्यमं तिथिवाराद्यं सूर्यचंद्रमंदफलघटिकाभिः रविजापिंडजासंज्ञाभिः संस्कृतं स्पष्टं स्यादित्युपपन्नं अथ नक्षत्रानयनं करोति ॥७॥ केवलयोः तिथिध्रुवभयोः योगे सप्तविंशतितष्टे भं नक्षत्रं स्यात् तिथेर्नाडिका व्यंगलवः केवलतिथिषडंशहीनो यो द्विनिघ्नतिथिः तेन यु

क्ताः कार्याः व्यंगलवश्चासौद्विनिघ्नतिथिश्चेति विग्रहः व्यंगलवद्वाभ्यांनिघ्नः सभासो तिथिश्चेति तत्पुरुषगर्भकर्मधारयो वा ततः व्यस्ताभिः धनर्णविपरीताभिः अर्कजाभिः घटीभिः संस्कृताश्चेताः कार्याः ततः ध्रुवभस्य नक्षत्रध्रुवस्यनाडीभिः वियुताः कार्याः चेन्न भविष्यंति तदा तद्दिनाषष्ट्याताः अन्विताः कार्याः एवं कृते सति भं नक्षत्रं सैकं कर्तव्यं घटिकाश्चेद्वियत् षड्रूपः षष्ट्या अधिकाः स्युः तदा ताः षष्ट्यूनिताः कार्याः व्येकभंएकहीनंनक्षत्रंकर्त्तव्यमितार्थः अत्रोपपत्तिः नक्षत्रध्रुवः मासांतीयः कृतोस्ति इष्टतिथिकालीनत्वकरणार्थं तिथिस्तत्र योज्या तथोतिथिघटिकानां नक्षत्रघटिकानांप्रतितिथिइदमंतरं १।५० अतो व्यंगलवद्विनिघ्नतिथिना युक्ताइति ततः स्पष्टत्वार्थं सूर्यघटीभिः संस्कार्याः तत्रग्रहापेक्षयातिथिनक्षत्रयोर्व्यस्तत्वमतोव्यस्तार्कजा संस्कृताइति एताः नक्षत्रघटिकाः नक्षत्रध्रुवघटीभ्यः उपरी समागताः अतः तद्दिनाइति चेन्न्योनाभविष्यंती तदा तद्दिन षष्ट्यायुक्ताइति तदानक्षत्रं सैकं कार्यमेव यदा नक्षत्रघटिकाः षष्ट्यधिकाः तदा षष्ट्यूनाः नक्षत्रंभाकहीनकार्यंभोग्यत्वात् अथ योगसाधनमाह ॥ ८॥ सूर्यनक्षत्रचंद्रनक्षत्रयोर्योगो योगः स्यात् तथा तयोर्घटीनां यदंतरंताः योगघटिकाः स्युः कुभादिवसनक्षत्रे यदि घटिकाः अल्पाः स्युः तदा योगः सकुः एकयुक्तः कार्यः अस्य योगस्य घटिकाः तदा खषट् युताः कार्या इत्यर्थः अत्रोपपत्तिरिति सुगमा ॥ अथ पूर्णांतकाले राहुं साधयति ॥ ९॥ सप्तयमौरवबाणाः चक्रेणगुणिताः कार्याः खंक्षितिः अब्धिरामाः मासगणेन गुणनीयाः अनयोर्भाद्याराशिपूर्वा या संयुतिः सा अर्कशुद्धा द्वादशशुद्धा भांशैः सप्तविंशतिभागैर्युक्ता सति शकुगमे पौर्णमास्यंते तमः राहुः स्यात् अत्रोपपत्तिः एकचक्रे राहुध्रुवः ७।२।५० अतश्चक्रहतोयमिति तथैकमासे राहुध्रुवः ०।१।३४ अनेन मासगणो गुण्य इति अनयोः संयोगः चक्रशुद्धः कार्यः ध्रुवाणांचक्रशुद्धत्वात् तत्र क्षेपः सप्तविंशतिभागाः अतःस्तद्युक्तः कार्यइत्युपपन्नं अथसू

नाडीभिर्ध्रुवभस्यचेन्नवियुतास्तद्धीनषष्ट्य ६० न्विताः सैकंभंघटिकावियत्षडधिकाः षष्ट्यूनिताव्येकभं ॥ ८॥ सूर्यभेंदुभयुतीर्भवे
द्गतिस्त हृदीविवरमत्रनाडिकाः चेन्नूनमल्पघटिकास्तदा सकुयोगकोऽस्य घटिकाः खषट् ६० स्युताः ॥ ९॥ चक्राहताः सप्तयमौरव
बाणा ७।२।५० मासाहताः खंक्षितिरब्धिरामाः ०।१।३४ भाद्यानयोः संयुतिरर्कशुद्धाः १२ भांशैर्युता २७ शकुगमे तमः स्यात् ॥१०॥

चंद्रसाधयति ॥ रवेः सूर्यस्य ऋक्षं नक्षत्रं यत्सावयवमानीतमस्ति तद्वेदघ्नगोहृत् चतुर्भिः संगुण्य नवभिर्भाज्यं फलं ग्रहपूर्वकः राश्यादिकः तिथ्यंतजः अर्कः स्यात् पर्वणि सः रविः राहुणा ऊनितः कार्यः तस्य भुजभागाः चेत् मनुभ्यश्चतुर्दशभ्योऽल्पाः तदा ग्रहणसंभवः स्यात् अत्रोपपत्तिः प्रत्यक्षसुगमा अथ ग्रासमानं साधयति ॥ गतैष्यपिंडोत्पन्नाः या घटिकाः तासां यदंतरं तस्य यः अंघ्रिः चतुर्थांशः तेन इनाः द्वादश ऊनाः युक्ताः कार्याः स्वर्गपिंडद्विपिंडादिति एकविंशतिपिंडमारभ्य षष्ठपिंडपर्यंतं ऊनाः ततोऽग्रे युक्ताः इति ततस्ते व्यग्विनात् विराहुसूर्यात् जातैर्दोर्लवैः भुजभागैर्वर्जिताः कार्याः ततः स्वार्धेन युक्ताः संवः त्र

वेदघ्नगोहृद्रविभक्षधिष्ण्यं तिथ्यंतजोऽर्को ग्रहपूर्वकः सः राहूनितः पर्वणि तद्भुजांशा मन्वल्पकाश्चेद्ग्रहसंभवः स्यात् ॥११॥
पिंडनाड्यंतरांघ्रियुक्ता इनाः १२ स्वर्ग २१ पिंडाद्द्वि ७ पिंडात् क्रमाद्वर्जिताः व्यग्विनाहोर्लवैः स्वार्धयुक्ता भवेच्छन्नभिदोरविच्छन्नकाद्यक्षवत् ॥१२॥ वित्र्यंशेशाः पिंडनाड्यंतरस्य षष्ठोनाढ्याः स्वर्गपिंडाद्द्विपिंडात् ग्लौबिंबं स्यात्तद्द्युर्वीभभा स्यात् त्रिघ्नस्याक्षांशोनयुक्तानि भानि ॥१३॥ वारादिके भूः कुगुणाः १।२१।५० पिंडद्वयं २ भेद्वयमीशानाड्यः २।११ क्षेप्याः क्रमेण प्रतिमासमत्र राहोर्युगांकाः ९४ कालिकाः वियोज्याः ॥१४॥

द्रस्य ग्रासांगुलाद्योऽपि चेत् सूर्यग्रासादि पूर्ववत्साध्यं अत्रोपपत्तिः प्रतिपादितप्रमेया अथ चंद्रबिंबभूछायेन्च साधयति ॥ त्र्यंशोनाः एकादश ११ पिंडनाड्यंतरषडंशेन स्वर्गपिंडात् क्रमात् ऊनाढ्यः कार्याः तच्चंद्रबिंबं स्यात् तद्भूत्तथैव त्रिगुणस्य पिंडनाड्यंतरस्य अक्षांशेन पंचमांशेन भानि सप्तविंशतिमितानि स्वर्गाद्विपिंडादेवं क्रमादूनयुक्तानि कार्याणि सा भूछाया स्यात् अस्योपपत्तिः मासगणाधिकारे कथितैव अथ प्रतिमासं वारादीनां चालनमाह ॥१४॥ स्पष्टार्थमेतत् अत्रोपपत्तिः सुगमा ॥ दैवज्ञवर्यस्य दिवाकरस्य सुतेन मल्लारिसमाह्वयेन कृतौ कृतायां ग्रहलाघवस्य पंचांगपर्वानयनं समाप्तं ॥ इतिश्री ग्रं॰टी॰ पंचांगानयन ग्रहणाधिकारः १५

अथव्यब्धींद्राल्पेब्दे ग्रहज्ञानार्थमहर्गणसाधनं वदति ॥ अत्रोपपत्तिः विलोमविधिनापूर्वाहर्गणवासनातःसिद्धा अथ ग्रंथालंकारमाह ॥ पूर्वेभास्कराद्याचार्याः प्रौढतराः किं
निछायासाधनं धनुर्ज्यैर्विना चक्रुः तेतेनैव कर्मणा महान् अतिगर्वलक्षणोयः कुभृत्सर्वतः तस्य उच्चशृंगे उच्चशिखरे अधिरोहंति यतः भास्करेण ब्रम्हतुल्ये छायाधिकारे

व्यब्धींद्राःशकरहिताःस्ततोभ्रवासंचक्राख्यंरविहृतशेषकंतुहीनं चैत्राद्यैःपृथगमुतःशरघ्नचक्रात् सिद्धाद्याद्मरफलाधिमासयु
क्तं ॥१॥ खविश्वघ्नंतिथिरहितंनिरग्रचक्रांगांशाढ्यंपृथगसुतोब्धिषड्लब्धैः ऊनाहैर्वियुतमहर्गणोभवेद्वै वारःस्यात्कुशरहृतेचक्रसुग्गणा
ज्ञात् ॥२॥ चक्रनिघ्नध्रुवोपेताःसक्षेपाह्युगणोद्भवैः खेटैरूनाःस्युरिष्टाहेव्यब्धींद्राल्पःशकोयदा ॥३॥ स्पष्टार्थमिदं ॥ पूर्वेप्रौढतराःक्रांति
त्रिकमपियच्चक्रुर्धनुर्ज्यैर्विनातेतेनैवमहाभिगर्वकुभृदुच्चशृंगाधिरोहंतिहि सिद्धांतोक्तमिहाखिलंलघुकृतंहित्वाधनुर्ज्यैर्मयातद्गर्वोमयिमा
स्तुकिंनयदहंतच्छास्त्रतोहद्धीः ॥४॥

उक्तं इतिकृतलघुकार्मुकशिंजीनिग्रहणकर्मविनाद्युतिसाधनमिति ॥ मयाइहास्मिन्ग्रंथे अखिलंगणितंजातं कर्मसिद्धांतोक्तं धनुर्ज्याविधिंहित्वाकृतंतद्गर्वः तेषामपेक्ष
यागर्वः मयिकिंमास्तु अपितुनयतोममबुद्धिवृद्धिः तच्छास्त्रतोजातेत्यर्थः स्वस्थितोढरत्वानामादि कथयति ॥४॥ ७ ७ ७

केशवः नंदिग्रामेअपरांतविषयेसमुद्रतटनिकटे पश्चिमदेशेशिष्यादिभिर्गीतास्तुतिर्यस्येतिसतथा कौशिकगोत्रेजातः सकलानियानिसंतिसमीचीनानिशास्त्राणितेषांयेर्थाःतान् वेत्तिजानातिसतथाएवंयोभूत् तस्यसूनुः गणेशः तदंघ्रिपद्मभजनात् तच्चरणकमलसेवनात् किंचिदवबोधांशकंज्ञानलवंलब्ध्वाप्राप्य इदंकरणंस्पष्टंस्पष्टार्थंवृत्तैर्नानाछंदोभिर्विचित्रंअर्थेन बहुलंच एतदकरोत्कृतवानित्यर्थः इतिपूर्वशकानुग्रहानयनप्रकारोग्रंथालंकारश्चकृतः॥ इतिश्रीमद्गणकचूडामणि दिवाकरदैवज्ञसुतमल्लारिदैवज्ञविरचितायांग्रहलाघवस्यटीकायांग्रंथसमास्यलंकारव्याख्यानंसमाप्तं॥१६॥ देशोपाध्यसमाह्वयेतिरुचिरेतीरेचगोदोत्तरे गो

नंदिग्रामइहापरांतविषयेशिष्यादिगीतास्तुतिर्योभूत्कौशिकवंशजःसक
लसच्छास्त्रार्थवित्केशवः॥ सूनुस्तस्यतदंघ्रिपद्मभजनाल्लब्ध्वावबोधांशकं
स्पष्टंवृत्तविचित्रमल्पकरणंचैतद्गणेशोऽकरोत्॥५॥ ७॥ ७॥ ७॥

लग्रामपुरेपुरारिचरणार्चासक्तविद्वद्धृते आसीत्तत्रदिवाकरोतिरुचिरोदैवज्ञसंघाग्रणीर्विश्वेशोसततंयदीयहृदयंयस्तस्यपुत्रोऽकरोत्॥१॥ मल्लारिर्गणकाग्रणीर्गुरुपदद्वन्द्वाब्जभक्तेरतोलब्ध्वाबोधलवंततोहिविवृतिंसार्थोपपत्तिस्फुटां॥ वर्यस्यग्रहलाघवस्यगणकश्रीमद्गणेशाभिधप्रोक्तस्याथकृपालवोहिसुधियःपश्यंतु तुष्यंत्विमां॥२॥ बाणोनाछकतःकुरामविहृतानुमूलंहिमासःसयुक्बाणेभैश्चदशोनितंदिनमितिस्तस्यादलंस्याच्चिथिः॥ पक्षःस्यात्तिथिसंमितोखिलयुतःसप्ताब्धितिथ्युन्मिताबालाख्योगणकोलिलेखचतदाटीकांपरार्थन्त्विमां॥१॥३॥ ही पोथी मुंबईंत विष्णुवासुदेवगोडबोलेयाणी छापिली असे.शाके१७८८ चैत्रवद्यपक्ष

इतिश्री ग्रहलाघवसटीकःसमाप्तोयम्

अथमुहूर्त्तचिंतामणिप्रारंभोऽयम्



श्रीगणेशायनमः कैलासेपूर्णराकाहिमकररुचिरेवीक्ष्यबिंबंस्वकीयंभूयोभूयोऽपिधावत्प्रतिभटकरटिस्पर्धयाचंडशुंडः माधावत्वंस्वदंघ्रिप्रहरतिभिरतोधूयतेसौधरित्रीत्यंबावाग्भिर्निरुद्धाः कपटकरटिनःकेलयोनःपुनंतु १ मुहूर्तचिंतामणिसंज्ञकस्यस्वयंकृतस्यप्रमिताक्षराख्याम् रामोविधत्तेविघ्नार्तिंप्रणाम्यविष्णवर्करुद्रान्पितरौगुरूंश्च २ प्रारिप्सितस्यग्रंथस्यनिर्विघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकंस्वाभीष्टगणेशदेवताशीर्वादरूपंमंगलमिंद्रवज्रयोपनिबध्नाति गौरीश्रवइति द्विपस्यगजस्यआस्यंमुखंयस्येतिद्विपास्योगणेशोविघ्नंहरतुनाशयतु युष्माकमितिशेषः

श्रीगणेशायनमः गौरीश्रवःकेतकपत्रभंगमाकृष्यहस्तेनददन्मुखाग्रे विघ्नंमुहूर्ताकलितद्वितीयदंतप्ररोहोहरतुद्विपास्यः १

कीदृशोगणेशः गौरीश्रवःकेतकपत्रभंगंहस्तेनाकृष्यमुखाग्रेददत् गौरीपार्वतीतस्याःश्रवणयोःकर्णयोःस्थितंकेतक्याःपुष्पंकेतकंतस्यपत्रंपर्णंतस्यभंगंखंडंहस्तेनशुंडादंडेनाकृष्यहठाद्गृहीत्वास्वमुखाग्रेस्वमुखौष्ठेददातिस्थापयतीतिददत् अनेनगणेशस्यबाललीलासूचिता बालोपिमातृसमीपवर्तियत्किंचित्स्वेष्टंवस्तुबलात्कारेणगृहीत्वामुखेनिक्षिपतीति अतएवमुहूर्त्ताकलितद्वितीयदंतप्ररोहः मुहूर्त्तंक्षणमात्रंआकलितोनिःसृतोद्वितीयदंतप्ररोहोद्वितीयदंतोद्गमोयेनसः अनेनकेतकपत्रस्यमुखस्थापनसमयेयावन्निगिरणंनकरोतितावद्गणेशोऽपिद्विदंतएवालौकिकैरित्थंभूतोपमेयम् १ अथज्योतिषग्रंथमारभमाणोविषयप्रयोजनसंबंधाधिकारिणःसूचयन्कर्त्तव्यंउपजातिकयाप्रतिजानीते क्रियाकलापेति अनंताख्यज्योतिर्वित्पुत्रःसःप्रसिद्धःरामोमुहूर्तचिंतामणिंमुहूर्तानांदिन

शुद्धिविशेषाणांलक्षणयातदुपलक्षितः कालोमुहूर्तशब्देनोच्यते तस्यचिंताशुद्धाशुद्धिस्तस्यामणिरिव मुहूर्तचिंतामणिस्तंज्योतिषग्रंथमातनोति निषेधविधीना
माधारस्तथायमपिग्रंथोनिखिलमुहूर्त्तानामाधारइत्यन्वर्थनामानंमुहूर्त्तचिंतामणिंज्योतिषग्रंथमातनोति निषेधविध्यादिसंनिवेशविशेषेणनिरूपयतीत्यर्थः
ननुजीर्णग्रंथैरेवमुहूर्त्तविचारेसिद्धेकिमनेनेत्यतआह कीदृशंमुहूर्त्तचिंतामणिं क्रियाकलापप्रतिपत्तिहेतुं क्रियाजातकर्मादिकास्तासांकलापः समूहः तस्यअ
मुकस्मिन्शुभदिनेकार्यमेतदस्मिन्नशुभदिनेनकार्यमित्येवंरूपा इततरंप्रतिपत्तिः सम्यग्ज्ञानंतस्यहेतुंकारणं अयमर्थः अन्यग्रंथेषुतिथ्यादिप्रकरणेषुतिथ्या
दिशुद्धिरुक्ता तत्ज्ञानंतत्प्रकरणानांपुनःपुनरालोडनेनसिद्ध्येदितिगौरवम् अत्रतुएकस्मिन्नेवपद्येयोमुहूर्त्तोविचार्यतेतस्यतत्रैवनिर्वाहइतिलाघवम् न

क्रियाकलापप्रतिपत्तिहेतुंसंक्षिप्तसारार्थविलासगर्भम् अनंतदैवज्ञसुतःसरामोमुहूर्त्तचिंतामणिमातनोति २ नन्वन्येष्वपि

ग्रंथेषुएवंविधमुहूर्त्तनिरूपणात्व्यर्थोऽयंश्रमइत्यतआह पुनःकीदृशंमुहूर्त्तचिंतामणिं संक्षिप्तसारार्थविलासगर्भम् संक्षिप्तश्चासौसारार्थविलासगर्भश्च-
निष्कृष्टार्थस्तस्यविलासः प्रकाशः सगर्भेयस्यासौ अत्रशब्दलाघवेनिष्कृष्टार्थस्यनिरूपणात् यथागुरुमुखंविनैवार्थज्ञानंसद्योमनसिजागर्तितथानान्यग्रंथे ते
षुतत्रशब्दकाठिन्याद्गुरुमुखादपिझटित्यर्थज्ञानंनभवतीत्येतदर्थमस्यारंभइति ननुसंबंधादिचतुष्टयकथनंविनाकथंश्रोतृप्रवृत्तिः उक्तंच सिद्धिः श्रोतृ
प्रवृत्तीनांसंबंधकथनाद्यतः तस्मात्सर्वेषुशास्त्रेषुसंबंधःपूर्वमुच्यते किमेवात्राभिधेयंस्यादितिपृष्टस्तुकेनचित् यावत्प्रयोजनंनोक्तंतावत्तत्केनगृह्यतइति

उच्यते मुहूर्तचिंतामणिमित्यनेनपदेनैवसर्वंसूचितम् तथाचनारदः अस्यशास्त्रस्यसंबंधोवेदांगमितिधातृतइति यद्वा अत्राभिधेयपदार्थानां मुहूर्तानां ग्रंथस्यच प्रतिपाद्यप्रतिपादकभावः संबंधः प्रयोजनंतुशुभाशुभनिरूपणं विवाहादिकालनिर्णयश्च यदाहनारदः प्रयोजनंचजगतः शुभाशुभनिरूपणमिति कश्यपोपि ग्रहणग्रहसंक्रांतियज्ञाध्ययनकर्मणाम् प्रयोजनंव्रतोद्वाहक्रियाणांकालनिर्णयइति तज्जिज्ञासुरधिकारी सचद्विजएवनान्यः उक्तंच नारदेन सिद्धांतसंहिताहोरारूपस्कंधत्रयात्मकम् वेदस्यनिर्मलंचक्षुर्ज्योतिः शास्त्रमकल्मषम् विनैतदखिलंश्रौतस्मार्तकर्मनसिद्ध्यति तस्माज्जगद्धितायेदंब्रह्मणानिर्मितंपुरा अतएवद्विजैरेतदध्येतव्यंप्रयत्नतः अत्रैवकारस्यपाठक्रमेणायोजनेप्रयोजनंविनैवज्योतिः शास्त्राध्ययनस्यावश्यकत्वंप्रतीयतेद्विजैरेवेतिव्याख्यानेद्विजव्यतिरिक्तैः शूद्रैर्नाध्येयमितिचप्रतीयते व्याख्यानद्वयमपियुक्तमेव ननुकथंश्रौतस्मार्तकर्मोपयोगिज्योतिषमितिचेदुच्यते अष्टवर्षंब्राह्मणमुपनयीत वसंतेब्राह्मणोग्नीनादधीत दर्शपौर्णमासाभ्यांयजेतेत्यादिश्रुतयः संति तत्रवर्षादिज्ञानंवसंताद्यृतुज्ञानंदर्शपूर्णमासयोर्ज्ञानंचज्योतिषंविनासर्वथाननिर्वहतीत्यवश्यमध्येतव्यंज्योतिःशास्त्रम् उक्तंचवेदांगज्योतिषे वेदाहियज्ञार्थमभिप्रवृत्ताः कालानुपूर्वाविहिताश्चयज्ञाः तस्मादिदंकालविधानशास्त्रंयोज्योतिषंवेदसवेदयज्ञान् यथाशिखामयूराणांनागानांमणयोयथा तद्वद्वेदांगशास्त्राणांज्योतिषंमूर्धनिस्थितम् तस्मात्कर्मोपयोगिकतयाऽवश्यमध्येतव्यंज्योतिःशास्त्रम् तच्चसुपरीक्षितशिष्यायदेयम् तदुक्तंश्रुतौ विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि असूयकायानृजवेहितायनमाब्रूयावीर्यवतीतथास्याम् अन्यच्च नैतद्देयंदुर्विनीतायजातुज्ञानंगुसंतद्धिसम्यग्फलाय अस्थानेहिस्थाप्यमानैववाचांदेवीकोपा

न्निर्दहेत्तंचिराय विनयावनतायदीयमानंप्रभवेत्कल्पलतेवसत्फलाय उपकृत्यनुचिंत कानिशास्त्राण्युपकारस्यपदंहिसाधुरेवेति शूद्रपाठेचमहान्दोषः गर्गः स्नेहाल्लोभाच्चमोहाच्चयोविप्रोज्ञानतोपिवा शूद्राणामुपदेशंतुदद्यात्सनरकंव्रजेदिति ज्योतिःशास्त्राध्ययनेफलमाह मांडव्यः एवंविधस्यश्रुतिनेत्रशास्त्रस्वरूपभर्त्तुःखलुदर्शनंवै निहंत्यशेषंकलुषंजनानांषडब्दजंधर्मसुखास्पदंस्यात् अत्रज्ञानविशेषेणज्योतिर्विदःपूजातारतम्यंजीर्णैरभ्यधायि दशादिनकृतपापंहंतिसिद्धांतवेत्तात्रिदिनजनितदोषंतत्रवैशिष्टएव करणभगणवेत्ताहंत्यहोरात्रदोषंजनयतिधनमंहस्त्वत्रनक्षत्रसूची नक्षत्रसूचिलक्षणंवराहसंहितायाम् अविदित्वैवयःशास्त्रंदैवज्ञत्वंप्रपद्यते सपंक्तिदूषकःपापोज्ञेयोनक्षत्रसूचकः तिथ्युत्पत्तिंनजानंतिग्रहाणांनैवसाधनम् परवाक्येनवर्त्ततेते वै नक्षत्रसूचकः नक्षत्रंसूचयतीतिनक्षत्रसूची नक्षत्रसूचकोद्दिष्टमुपवासंकरोतियः सव्रजत्यंधतामिस्रंसार्द्धमृक्षविडंबिना नक्षत्रजीविनंपापंभिषजंशुल्कजीविनम् तादृक्पौराणिकादींश्चवाङ्मात्रेणापिनार्चयेत् ऋक्षविडंबिनानक्षत्रसूचकेनसहांधतामिस्रंनरकंव्रजंति अतश्चायथाशास्त्रमादेशकएव नक्षत्रसूचकः नतुसंपूर्णशास्त्रपरिज्ञातादैवज्ञत्वंप्रपद्यतइत्युक्तत्वात् पूर्वकर्मार्जितसदसत्कर्मविपाकोदैवंतज्जानातीतिदैवज्ञः तस्यभावोदैवज्ञत्वं गुरुः दैवज्ञैः शास्त्रतत्वज्ञैर्मुहूर्त्तोन्विष्यतेयदि सन्मुहूर्त्तःसमन्वेष्योनान्यैर्नक्षत्रसूचकैरिति अतएवकश्यपोवेदपारगसाहित्येनैवनक्षत्रसूचकस्यश्राद्धभोजनमाह अरिर्विश्रंभहंताचव्यंगोनक्षत्रसूचकः काणःकुब्जश्चमंदश्चश्वित्रीमूर्खश्चकुष्ठवान् सर्वेश्राद्धेनियोक्तव्यामिश्रितावेदपारगैरिति वसिष्ठःत्रिस्कंधपारंगमएवपूज्यः श्राद्धेसदाभूसुरवृंदमध्ये नक्षत्रसूचीखलुपापरूपोहेयःसदासर्वसुधर्मकृत्ये वराहोपि ससांवत्सरिकेदेशेवस्तव्यंभूतिमिच्छता च

क्षुर्मूर्त्तौहि यत्रैषपापंतत्रनविद्यते मुहूर्त्ततिथिनक्षत्रमृतवश्चायनानिच सर्वाण्येवाकुलानिस्युर्नस्यात्सांवत्सरोयदि अतोगणकानांयदपांक्तेयत्वमभ्यधायिधर्मशास्त्रेतत्रसूचकाभिप्रायेणज्ञेयम् महाप्रयोजनंतुएतच्छास्त्रस्यसम्यग्ज्ञानाद्ब्रह्मसायुज्यमिति तथाचगर्गः ज्योतिश्चक्रेतुलोकस्यसर्वस्योक्तंशुभाशुभम् ज्योतिर्ज्ञानंतुयोवेदसयातिपरमांगतिम् सूर्यसिद्धांते दिव्यंचक्षुर्ग्रहाणांतुदर्शितंज्ञानमुत्तमम् विज्ञाकार्यादिलोकेषुस्थानंप्राप्नोतिशाश्वतम् वराहः नसांवत्सरपाठीचनरकेपरिपच्यते ब्रह्मलोकप्रतिष्ठांचलभतेदैवचिंतकइति तस्माज्ज्योतिःशास्त्रमवश्यमध्येतव्यमितिस्थितम् तत्राप्यार्षवाक्यानांपाठमात्रेणापिफलमस्तिस्मृत्यादिपठनवदिति अथमुहूर्तप्रयोजनमाह सत्याचार्यः शुभक्षणक्रियारंभजनितापर्वसंभवाः संपदःसर्वलोकानां ज्योतिस्तत्रप्रयोजनमिति तेनशुभमुहूर्तारब्धंकार्यंसिद्ध्येदशुभमुहूर्त्तारब्धंतुनसिद्ध्येदितितन्नयुज्यते येनतुयत्प्राप्तव्यंतस्यविपाकंसुरेशसचिवोपि यःसाक्षात्त्रिपतिज्ञः सोपिनशक्तोऽन्यथाकर्तुमितिशौनकोक्तेः प्राचीनसदसत्कर्मरूपदैवस्यावश्यंभावित्वादितिचेन्न विवाहादिषुविहितकालस्यपुरुषप्रयत्नसाध्यत्वादुभययोगेसत्येवकार्यसिद्धिर्नकेवलदैवेनेति तदुक्तंकेशवार्किणा फलेद्यदिप्राक्तनमेवतत्किंकृष्याद्युपायेषुपरःप्रयत्नतः श्रुतिःस्मृतिश्चापिनृणांनिषेधविध्यात्मकेकर्मणिकिंनिषण्णेति यदितुदैवमेवफलेत्तदासर्वोजनःकृष्याद्युपायेषुकथंप्रवर्त्तेतेति किंच श्रुतिस्मृत्यादयोपिनिषेधविध्यात्मकानिरर्थकाःस्युः नवृक्षमारोहेन्नकूपमवरोहेन्नबाहुभ्यांनदींतरेन्नसंशयमभ्यापद्येतेत्यादीनामाश्वलायनादिवचनानांचिकित्साशास्त्रस्येववैयर्थ्यप्रसंगःस्यादित्यर्थः याज्ञवल्क्योपि दैवेपुरुषकारेपिकर्मसिद्धिर्व्यवस्थिता तत्रदैवमभिव्यक्तंपौरुषंपौर्वदैहिकमिति क

र्मसिद्धिः फलावाप्तिरिष्टानिष्टाचलक्षणा साचकेवलदैवे नव्यवस्थिता अपितुपुरुषकारेपि पुरुषकारः प्रयत्नः पुरुषकाराभावेदैवमेवनास्तीत्याह तत्रदैवमिति पूर्वदेहार्जितपौरुषमेवदैवमित्युच्यते तच्चाल्पपुरुषप्रयत्नानंतरंमहाफलोदयेनअभिव्यक्तंभवति अतएववसंतराजः पूर्वजन्मजनितंपुराविदः कर्म दैवमितिसंप्रचक्षते उद्यमेनसमुपार्जितंतदावांच्छितंफलतिनैवकेवलमिति दैवप्रयत्नयोरन्यतरेणासिद्धिर्भवतीत्यत्रदृष्टांतमाहयाज्ञवल्क्यः यथाह्येकेनचक्रेणरथस्यनगतिर्भवेत् तद्वत्पुरुषकारेणविनादैवंनसिद्ध्यति केशवार्कोपि प्राक्कर्मबीजंसलिलानलोर्वीसंस्करवत्कर्मविधीयमानम् शोषायपोषायचयस्यतस्यतस्मात्सदाचारवतांनहानिरिति यत्प्राक्कर्मजन्मांतरोपार्जितंकर्मदैवरूपंतस्यविधीयमानं अधुनाक्रियमाणंकर्मशोषायच्च भवति किंवटबीजंसलिलानलोर्वीसंस्कारवत् यथासद्बिजंशुभसलिलादिसंस्कारैः संस्कृतंसदुदेतिवर्द्धतेच तद्वत्प्राक्कर्मापिऐहिकेनसत्प्रयत्नेनवर्द्धते अन्यथाक्षीयतेइत्यर्थः तस्मात्ज्योतिःशास्त्रविहितकालेविवाहादिकुर्वतांशांतिचिकित्सादिसदाचारवतांपुरुषाणांसदानहानिःस्यात् अन्यच्च दैवंहिपुरुषनिष्ठंतद्देशकालवशतएवविपच्यते दुष्टमपिदुष्टांतरसाहित्येनैतत्दुष्टकारिभवति यथादुर्जनोरंध्रान्वेषणेन अतएववसंतराजः सर्पवन्हिविषकंटकादिकंयेनदैवशरणोपिमानवः दूरतस्त्यजतिपौरुषंतदातेननः स्फुरतिदैवतोधिकम् पौरुषेणहृदयेप्सितांगतिंप्राप्नुवंतिपुरुषाः सुमेधसः यांतिदेवशरणालयंयथापादपाज्वलतिदावपावकेइति शकुननिमित्तादिभिः सूचितमशुभंदैवफलंशुभेनप्रयत्नेनवंच्यतएव तथाचवसंतराजः तन्निरूप्यशकुनेनदुःखदंवंचयंतिनियतंसमुद्यतम् पौरुषेणपुरुषाः सुमेधसः संश्रयंतिपुनरात्मनोहितमिति तद्दैवफलंदुःखंसमुद्यतंशकुनेननि-

रूप्यज्ञातारः पुरुषाः पौरुषेणवंचयंतीत्यर्थः यथायेनग्रहेणयावतीदशांतर्दशावादत्तातस्याः फलपरिपाकः तावंतंकालमभिव्याप्यभवेदेवेतिस्थितेदशाप्रवेशकालीनचंद्राद्यच्छुभाशुभफलनिरूपणंयथातस्यदशाफलस्यान्यथात्वमल्पत्वमाधिक्यंवारुंधयतितद्वदेतदपिबोद्धव्यम् नन्वनंतरोक्तसर्पविषवैद्यादिदृष्टांतेनपौरुषमेवफलसाधनंकथंनस्यात् तथाचबृहद्यात्रायांवराहः तथापरमुपेक्ष्यैवदैवंधैर्यावलंबिनः प्रत्यक्षतःक्रियासिद्धौकेवलंजगुरुद्यमम् उत्थानहीनोराजाहिबुद्धिमानपिसर्वदा प्रधर्षणीयःशत्रूणांभुजंगइवनिर्विषः विधानगणनाजडःपुरुषकारमुक्तादरीमनोरथपरिश्रमैर्नपरिचुंबतिश्रीमुखम् पराक्रमविनिश्चितैकसुनयोहिसद्यःकृतंहरिर्मदस्रुवासितंपिबतिकुंजरासृङ्मधुइत्यादि उच्यते समानभूमिषुसमानसलिलादिप्रयत्नेपि फलवैचित्र्यदर्शनात् कारणांतरं कल्प्यतेतदेवदैवमिति अतउभयोर्योगेसत्येवफलसिद्धिरिति एतदपितत्रैव कृषिवृष्टिसमायोगाद्दृश्यंते फलसिद्धयः अस्मिन्नर्थेशृणुश्लोकान्द्वैपायनमुखोद्गतान् कृषिःपौरुषंवृष्टिर्दैवंकर्षकःपौरुषेणकृषिंकरोतिताम् दैवंवृष्ट्यासाधयति अथकृषिंकरोतिचेत्तदावृष्ट्याबिनानकिंचित्फलमाप्नोति यदिपुनःकर्षकोबीजंवपतिदैवंचवर्षतितदाफलमधिकमुत्पद्यते एवंदैवपुरुषकारयोः समयोर्यत्फलसिद्धयोदृश्यंते अत्रार्थेश्रीव्यासमुखोद्गताइमेश्लोकाः नविनामानुषंदैवाद्दैवंवामानुषाद्विना नैकोनिवर्तयत्यर्थमेकारणिरिवानलमिति केचिद्बुद्धिःकर्मानुसारिणीतिमन्यमानाः प्रयत्नोपिदैवरूपइतिकृत्वादैवमेवफलसिद्धेःकारणमितिवदंतितन्न अनवस्थादोषप्रसंगात् तथाहि प्राक्कर्मार्जितपौरुषमेवकिलदैवशब्देनोच्यते अत्रत्यःप्रयत्नःप्राचीनपौरुषलक्षणोनदैवेनजन्यते तदपितत्प्राचीनपौरुषजन्यमित्यनवस्थाऽतःप्रयत्नोपिदैवप्रेरितइत्यनुपपन्नम् ननुबीजां

कुरन्यायेनानवस्थादोषोन भवतीतिचेन्न नहिबीजांकुरन्यायेनदैवमेवमूलमितिनिश्चीयतेनापिप्रयत्नः अतःसत्युभययोगेफलसिद्धिरितितत्त्वम् एवं
चेत्तर्हिपूर्वोक्तानांशौनकादिवाक्यानांयेनतुयत्प्रासव्यंतस्यविपाकंसुरेशसन्निवोपि यःसाक्षान्निपतितः सोपिनशक्तोऽन्यथाकर्त्तुमित्यादिकानांकागतिःउ
च्यतेदैवंतुदृढकर्मजमदृढकर्मजंचेतिद्विविधम् तत्रदृढकर्मजस्यावश्यंभावित्वात् ग्रहशांत्यादिरूपापूर्वप्रयत्नादपितन्निवारयितुंनशक्यते दृढमूलत्वात्प्रब
लवाताघातेपिदृढमूलपादपवत् अदृढकर्मजंतुदैवंप्रयत्नेननिर्वर्त्यमतिशिथिलमूलपादपवत् तथान्नजातके येधर्मकर्मनिरताविजितेंद्रियायेयेपथ्यभोजनजुषो
द्विजदेवभक्ताः लोकेनरादधतियेकुलशीललीलांतेषामिदंकथितमायुरुदारधीभिरिति प्रयत्नाभावेतु विपच्यंते तथाचतत्रैव पापिष्ठायेदुराचारादेवब्राह्मण
निंदकाः अपथ्यभोजिनस्तेषामकालेमरणंध्रुवमिति वैद्यकेपि पूर्वजन्मकृतंपापंव्याधिरूपेणबाधतेइतिसर्वव्याधीनांसाधारण्येनकर्मजत्वेपिसाध्यासा
ध्यत्वेनद्वैविध्यम् तत्रापि कृच्छ्रोपायः सुखोपायोद्विविधःसाध्यउच्यते असाध्योद्विविधोज्ञेयोसाध्योयश्चाप्रतिक्रियः साध्यायथात्वमायांतिया
प्याश्चासाध्यतांतथा घ्नंतिप्राणानसाध्यास्तुनराणामक्रियावतामित्यादिनाःचिकित्स्यव्याधेर्दृढमूलत्वमन्येषामदृढकर्ममूलत्वंनिश्चीयते ततो
दैवस्येदृशंद्वैविध्यमस्ति अतःशौनकवाक्यानामयमर्थः येनत्विति येनपुरुषेणयत्प्राप्तव्यं अवश्यंभोक्तव्यंदृढकर्मोपार्जितमितियावत् तदन्यथाक
र्तुंबृहस्पतिरपिनशक्तः अर्थादन्यददृढकर्मोपार्जितमन्यथाकर्त्तुंशक्तइत्यर्थः अतोनिमित्तशकुनादिभिर्दुष्टफलेज्ञातेबौधायनादिविहितेनतच्छां
तिदानादिरूपधर्मेणप्रयत्नेनतन्निवर्त्यतेशुभंवर्धते अतएवतेनैवोक्तम् सुपरीक्षितंविलग्नंधर्मार्थसुखायदंपत्योः अपरीक्षितंविलग्नंनहिदेयंपंडि

तेन्दैवविदा अयशोंबुनिधौमज्जतिशास्त्रमविज्ञाययोदद्यादिति बृहस्पतिरपींद्रं प्रत्याह स्वभावादेवकालोयंशुभाशुभसमन्वितः अनादिनिधनःसर्वोननिर्दोषोननिर्गुणः तस्मान्निर्दोषकालार्थंमुहूर्त्तमधिगच्छताम् कालःशुभोगुणैर्युक्तोबलवद्भिःशुभप्रदः दोषैर्युक्तोपिचाप्राप्यैर्बहुभिर्व्यत्ययंद्वयोरिति अतःशुभमुहूर्त्तबलेनपूर्वकर्मार्जितमशुभमपिदैवफलंनिवार्यतेइति अनवद्यं २ अथतिथीशाननुष्टुभाह तिथीशाइति एतेतिथीशाः तिथीनांस्वामिनः वन्हिश्चकश्च कोब्रह्मा शेषंस्पष्टं प्रयोजनंतु तत्तद्देवतापूजाप्रतिष्ठादि अथमुहूर्तविचारस्यप्रतिज्ञातत्वात् संवत्सरादिकथनंनोक्तंततएवावधार्यम् ३ अथतिथीनांसंज्ञांसफलामाह नंदेति प्रतिपदादिपंचतिथयोनंदाभद्राजयारिक्तापूर्णासंज्ञाः स्वस्वनामसदृशफलदाःस्युरिति एवंप्रकारेणसर्वाःषष्ठ्यादयोज्ञेयाः ताःशुक्लपक्षेअशुभमध्यमशुभफलदाःस्युः असितेकृष्णपक्षेशुभमध्याधमफलदाःस्युः ताएवनंदादितिथयः शुक्रबुधमंगलशनिगुरुवारेषुसिद्धिकराःस्युः यथानंदाशुक्रवारेएवंभद्राबुधवारे जयाभौमेरिक्ताशनौपूर्णागुरौइति ४ अथसूर्यादिवारेषुयथासंख्यंनिषिद्धतिथीर्दग्धनक्षत्राणिचशालिन्याह नंदेति अर्कादितिल्यपुलोपेपं-

तिथीशावन्हिकौगौरीगणेशोहिर्गुहोरविः शिवोदुर्गांतकोविश्वेहरिःकामःशिवःशशी ३ नंदाचभद्राचजयाचरिक्तापूर्णेतितिथ्योऽशुभमध्यशस्ताः सितेऽसितेशस्तसमाधमाःस्युःसितज्ञभौमार्किगुरौचसिद्धाः ४ नंदाभद्रानंदिकाख्याजयाचरिक्ताभद्रा पूर्णसंज्ञाऽधमार्कात् याम्यंत्वाष्ट्रंवैश्वदेवंधनिष्ठार्यम्णंज्येष्ठांत्यंरवेर्दग्धभंस्यात् ५

चमी अर्कमारभ्य नंदादिकातिथिरधमास्यात् यथासूर्यवारे नंदाधमा एवंसोमेभद्रा भौमेनंदा बुधेजया गुरौरिक्ता शुक्रेभद्रा शनौपूर्णेति इदमाधुनिकानां
प्राच्यानांमतंवस्तुतस्तुतेशुभाः अमृतयोगाः तथाचवसिष्ठः नंदाभौमार्कयोर्भद्राशुक्रेंदोश्चजयाबुधे शुभयोगागुरौरिक्तापूर्णामंदेऽमृताह्वया गुरुरपि
आदित्यभौमयोर्नंदाभद्राशुक्रशशांकयोः जयाज्ञेचगुरौरिक्तापूर्णाकौर्चामृताशुभाइति नारदवाक्येशनौपूर्णाच्चमृत्युदेति कल्पितपाठः वसिष्ठादिवचन
विसंवादात् बहुषुपुस्तकेषुशनौपूर्णाऽमृताशुभेतिपाठाच्च पूर्णसंज्ञाऽमृतार्कादितिपाठः साधुः तथारविवारादिषुयाम्यभरणीतदादीनिनक्षत्राणियथा
क्रमेणदग्धनक्षत्राणिस्युः यथारविवारेभरणीदग्धा सोमेचित्राभौमेउत्तराषाढाबुधेधनिष्ठा गुरावुत्तराफाल्गुनी शुक्रेज्येष्ठा शनौरेवती नारदः आदि
त्यभौमयोर्नंदाभद्राशुक्रशशांकयोः जयासौम्येगुरौरिक्ताशनौपूर्णाऽमृताशुभाइति नारदः यमर्क्षमर्कवारेऽब्जेचित्राभौमेतुविश्वभम् बुधेश्रविष्ठार्य-
म्णार्क्षंगुरौज्येष्ठाभृगोर्दिने रेवतीशनिवारेतुदग्धयोगाभवंत्यमी एतान्येवनक्षत्राणिरव्यादीनांजन्मभानीत्युक्तानितान्यपिनिषिद्धान्येव लल्लः याम्यं
त्वाष्ट्रोत्तराषाढेधनिष्ठोत्तरफाल्गुनी ज्येष्ठाचरेवतीचैवजन्मर्क्षंभानुतःक्रमात् क्रमात्ससेंद्रदशसूर्यनवाष्टौपौर्णिमास्यमा ७ १४ १० १२ ९ ८ १५ ३० सू-
र्यादिजन्मतिथयः संत्याज्याः शुभकर्मणि जन्मर्क्षेजन्मतिथिषुशुभकर्मविवर्जयेत् बलाच्चेत्कुरुतेकर्मनतत्फलमवाप्नुयादिति ५ अथक्रकचादिनिंद्य
योगाननुष्टुभाह षष्ठ्यादीति क्रमेणषष्ठ्यादितिथयः मंदाच्छनैश्चराद्विलोमंविपरीतगणनयाऽधमाःस्युः यथाशनौषष्ठीअधमाशुक्रेसप्तमीगुरावष्टमी बुधे
नवमीभौमेदशमीसोमेएकादशीरवौद्वादशीएतेयोगाः क्रकचाख्याःज्ञेयाः तथाप्रतिपद्बुधवासरे सप्तमीरविवारे संवर्तयोगाअधमास्यात् अथषष्ठीआद्याप्रति

पत् अमा अमावास्यारदधावने दंतानांकाष्ठादिभिर्मलनिराकरणे अधमाः निषिद्धाः स्युः क्वचिन्नवमीरविवारयोरपिनिषेधः काशीखंडे प्रतिपद्दशमीषष्ठीनवम्यांरविवासरे दंतानांकाष्ठसंयोगोदहेदासप्तमंकुलमिति ६ अथकृत्यविशेषेषुनिषिद्धतिथीरिंद्रवंशाच्छंदसाह षष्ठ्यष्टम्यौप्रसिद्धे भूतश्चतुर्दशीविधुक्षयोऽमावास्या एतासुतिथिषुनापुरुषः तैलंपलंमांसं क्षुरंक्षौरम् रतंमैथुनं नोसेवेत यथाषष्ठ्यांतैलम् अष्टम्यांमांसम् चतुर्दश्यांक्षौरम् अमावास्यायांमैथुनम् नसेवेतेत्यर्थः विधुक्षयः सर्वोपलक्षकः वसिष्ठः स्त्रीसेवनंपर्वसु पक्षमध्येफलंचषष्ठीषुचसर्वतैलं नृणांविनाशायचतुर्दशीषुक्षुरक्रियास्यादसकृत्तदा-

> षष्ठ्यादितिथयोमंदाह्निलोमंप्रतिपद्बुधे सप्तम्यर्केऽधमाःषष्ठ्याद्यामाश्चरदधावने ६ षष्ठ्यष्टमीभूतविधुक्षयेषुनोसेवेतनातैलपलेक्षु
> रव्रतम् नाभ्यंजनंविश्वदशद्विकेतिथौधात्रीफलैःस्नानममाद्रिगोष्वसत् ७

सुनारदः व्यतीपातेचसंक्रांतावेकादश्यांचपर्वसु अर्कभौमदिनेविष्ट्यांनाभ्यंगंनचवैधृताविति पर्वाणिवसिष्ठआह चतुर्दश्यष्टमीकृष्णा अमावास्याचपौर्णिमा पुण्यानिपंचपर्वाणिसंक्रांतिर्दिनपस्यचेति अत्र तिथिस्तात्कालिकीग्राह्या उक्तंच स्नानेवाभ्यंजनेचैवदंतधावनमैथुने तिथिस्तात्कालिकीग्राह्यातथामरणजन्मनोरिति अथविश्वेत्रयोदशी दशादशमी द्विकंद्वितीया एतासुतिथिषु अभ्यंजनं अभ्यंगंमलापहत्वंनसेवेत अयंनिषेधोब्राह्मणव्यतिरिक्तस्य तथाचभट्टभास्करोनिर्णयामृते त्रयोदश्यांद्वितीयायांसप्तम्यांचविशेषतः शूद्रविट्क्षत्रियाःस्नानंनाचरेयुःकदाचनेति अथधात्रीफलैरामलकैःस्नानममाद्रिगोषु अमावास्यासप्तमीनवमीषुअसत् निषिद्ध

मित्यर्थः अत्रवसिष्ठादिमतेत्रयोदश्यादितिथिषु आमलकस्नानस्यैवनिषेधोनाभ्यंगस्य वसिष्ठः कामदुर्गातिकरविनष्टेंद्वर्कदिनेषुच सकृदामलकस्नानंसंपत्पुत्रविनाशनम् भट्टभास्करस्तुनवम्यादिष्वेवामलकस्नानंनिषेधति सप्तम्यन्चंद्रानवमीषुदेहश्रीसंततीरामलकैर्नरस्य स्नानंनिहंत्यंत्यदिनेतुधत्तेतिलैः श्रियंपुण्यकरंसदैवेति ७ अथसूर्यादिवारेषुदग्धादियोगचतुष्टयमिंद्रवज्रोपजातिकाभ्यामाह सूर्येति सूर्यादीति सूर्येशपंचाग्निरसाष्टनंदाःतिथयः सूर्यादिवारेदग्धसंज्ञाभवंति यथा द्वादशीरविवारेदग्धा सोमेएकादशी भौमेपंचमी बुधेतृतीया गुरौषष्ठी शुक्रेऽष्टमी शनौनवमी उक्तंचनारदेन एकादशीन्चेंदुवारेद्वादशीचार्कवासरे षष्ठीबृहस्पतेर्वारेतृतीयाबुधवासरे अष्टमीशुक्रवारेचनवमीशनिवासरे पंचमीभौमवारेच्चदग्धयोगाःप्रकीर्तिताः अथवि

सूर्येशपंचाग्निरसाष्टनंदावेदांगसप्ताश्विगजांकशैलाः सूर्यांगसप्तोरगगोदिगीशादग्धाविषाख्याश्चहुताशनाश्च ८

षयोगाः वेदेति चतुर्थ्यादितिथयः अर्कादिवारेषु विषाख्याभवंति यथा रवौचतुर्थीविषाख्या चंद्रेषष्ठी भौमेसप्तमी बुधेद्वितीया बुधेभद्रारूपः सिद्धियोगस्तुसप्तमीद्वादश्योश्चरितार्थः एवंनवमीशन्यादावपि गुरावष्टमी शुक्रेनवमी शनौसप्तमी तथाच्चगुरुः षष्ठीशशांकेनवमीन्चशुक्रेबुधेद्वितीयातपनेचतुर्थी जीवेऽष्टमीसौरिकुजेऽन्हिसप्तमीयोगाविषाख्याःकुलनाशनाःस्युः अथहुताशनाख्याः सूर्यांगेति द्वादश्यादितिथयः सूर्यादिवारेषुहुताशनाख्याःस्युः वसिष्ठः सप्तषष्ठ्यादितिथयःसोमवारादिभिर्युताः अग्निजिव्हाःसप्तयोगामंगलेष्वतिगर्हिताः ८ अथयमघंटाः मघाविशाखादिनक्षत्राणिरविवारादिषु

यमघंटसंज्ञानिस्युः यथा अर्कवारेमघायमघंटा एवंसोमवारेविशाखाइत्यादिगर्गः मघाविशाखाआर्द्राच मूलमृक्षंच कृत्तिका रोहिणीहस्तइत्युक्तायमघंटाः क्रमाद्रवेः एतेदग्धादियोगाः शुभेविवाहादिकार्येवर्ज्याः गमनेतुयात्रायामवश्यंवर्ज्याः एषामपवादोवसिष्ठेनोक्तः दिवामृत्युप्रदाःपापदोषास्त्वेतेनरात्रिषु शुभकार्येप्रसूतौचसर्वदापरिवर्जयेदिति आवश्यककृत्येदीपिकायाम् यमघंटेत्यजेदष्टौमृत्यौद्वादशनाडिकाइति अन्येषांपापयोगानांमध्यान्हात्परतःशुभमिति ९ अथचैत्रादिमासेशून्यतिथीःशार्दूलविक्रीडितेनार्द्धानुष्टुभाह भाद्रेइति शुक्राइतिच भाद्रपदादिश्लोकोक्तमासेषुचंद्रदर्शौप्रतिपद्द्विती

सूर्यादिवारेतिथयोभवंतिमघाविशाखाशिवमूलवन्हिः ब्राह्मंकरोर्काद्यमघंटकाश्चशुभेविवर्ज्यागमनेत्ववश्यम् ९ भाद्रेचंद्रदर्शौन
भस्यनलनेत्रेमाधवेद्वादशीपौषेवेदशराइषेदशशिवामार्गेऽद्रिनागामधौ गोष्टौचोभयपक्षगाश्चतिथयःशून्याबुधैःकीर्तिताऊर्जाषाढतपस्य
शुक्रतपसांकृष्णेशरांगाब्धयः १०

येइत्यादिक्रमोक्ततिथयः उभयपक्षगाः शुक्लकृष्णपक्षगताः शून्यसंज्ञकाः बुधैःकीर्तिताः कथिताः यथा भाद्रपदेप्रतिपद्द्वितीयेउभयपक्षेशून्ये एवंनभसिश्रावणेउभयपक्षेतृतीयाद्वितीयेशून्येइत्यादि अनुक्तमासानांऊर्जाषाढतपस्यशुक्रतपसांकार्तिकाषाढज्येष्ठफाल्गुनमाघानांकृष्णपक्षेक्रमेणशरांगाब्धयः शक्राःपंच एतास्तिथयःशून्याः यथाकार्तिककृष्णेपंचमीशून्या एवमाषाढकृष्णेषष्ठी फाल्गुनकृष्णेचतुर्थी ज्येष्ठकृष्णेचतुर्दशी माघकृष्णेपंचमी अथैषामेवकार्तिकादिमासानांशुक्लपक्षेशक्रान्धग्निविश्वरसाः क्रमाच्छून्याः यथा कार्तिकशुक्लेचतुर्दशीशून्या आषाढशुक्ले-

सप्तमी फाल्गुनशुक्लेतृतीयाज्येष्ठशुक्लेत्रयोदशी माघशुक्लेषष्ठीचेति वसिष्ठः अष्टमीनवमीचैत्रेपक्षयोरुभयोरपि माघवेद्वादशीत्याज्यापक्षयोरुभयोरपि ज्येष्ठेत्रयोदशीनिंद्यासितेकृष्णेचतुर्दशी आषाढेकृष्णपक्षस्यषष्ठीशुक्लेतुसप्तमी द्वितीयाचतृतीयाचश्रावणेसितकृष्णयोः प्रथमाचद्वितीयाचनभस्येमासिनिंदिते दशम्येकादशीनिंद्यामासीषेशुक्लकृष्णयोः ऊर्जेचतुर्दशीशुक्लाकृष्णपक्षेतुपंचमी सप्तमीचाष्टमीसौम्येपक्षयोरुभयोरपि पौषेपक्षद्वयेनैवचतुर्थीपंचमीतथा माघेतुपंचमीषष्ठीशुक्लेकृष्णेयथाक्रमम् तृतीयाचचतुर्थीचफाल्गुनेसितकृष्णयोः तिथयोमासशून्याख्यावंशवित्तविनाशनाः

शक्राःपंचासितेशक्राद्यग्निविश्वरसाःक्रमात् तथानिंद्यंशुभेसार्पेद्वादश्यांवैश्वमादिमे ११ अनुराधाद्वितीयायांपंचम्यांपित्र्यभंतथा त्र्युत्तराश्चतृतीयायामेकादश्यांचरोहिणी १२ स्वातीचित्रेत्रयोदश्यांसप्तम्यांहस्तराक्षसे नवम्यांकृत्तिकाष्टम्यांपूभाषष्ठ्यांचरोहिणी १३

आसुश्राद्धं प्रकुर्वीतनैवमंगलमाचरेदिति १० अथनक्षत्रसंबंधिदोषान्सार्द्धानुष्टुब्द्वयेनाह तथेति अनुराधेति स्वातीतिच शुभेकृत्येद्वादश्यांसार्पमाश्लेषा निंद्या आदिमेप्रतिपदिवैश्वमुत्तराषाढा राक्षसंमूलम् लल्लः द्वितीययाचानुराधात्र्युत्तराचतृतीययाच पंचम्याचमघायुक्ताचित्रास्वात्योस्त्रयोदशी प्रतिपद्युत्तराषाढानवम्यांकृत्तिकायदि सप्तम्यांहस्तमूलेचषष्ठ्यांब्राह्मंभवेद्यदि पूर्वाभाद्रपदाष्टम्यामेकादश्यांचरोहिणी द्वादश्यांचयदाश्लेषात्रयोदश्यांमघायदि इत्यादि एषुकार्येकृतेचेत्स्यात्षण्णासान्मरणंध्रुवमिति ११ १२ १३ अथचैत्रादिमासेषुशून्यनक्षत्राण्यनुष्टुब्द्वयेनाह कदास्त्रेति कदास्त्रभेरोहिण्यश्वि-

न्यौचैत्रेशून्येनक्षत्रे एषुशुभकार्यंनकार्यम् यतोवित्तविनाशदाः धननाशकराइत्यर्थः एवंवैशाखेत्वाष्ट्रवायूचित्रास्वात्यौशून्यभे पाशीवरुणास्तद्भंशततारा अजपा
त्पूर्वाभाद्रपदा वसिष्ठः अश्विनीरोहिणीचैत्रेशून्यभेपरिकीर्तिते चित्रास्वातीचवैशाखेज्येष्ठेविश्वेज्यतारके भगवासवमाषाढेश्रावणेहरिविश्वभे नभस्येवारुणांत्यर्क्ष
मजपादश्वयुज्यपि कार्तिकेपितृवन्ह्यर्क्षेसौम्येचित्राहिर्दैवते पौषेदस्रकरार्द्राःस्युर्माघेमूलंचविष्णुभम् तपस्येशक्रभरणीशून्यभान्याहुरग्रजाः एषुयत्तुकृतंक
र्मधनैःसहविनश्यतीति १४ १५ अथचैत्रादिमासेषुशून्यराशीननुष्टुभाह घटइति वसिष्ठः घटमत्स्यवृषायुग्ममेषकन्याःसवृश्चिकाःतुलाचापकुलीराख्यामृग-

कदास्त्रभेत्वाष्ट्रवायूविश्वेज्यौभगवासवौ वैश्वश्रुतीपाशिपौष्णेअजपादग्निपित्र्यभे १४ चित्राहीशौशिवाश्व्यर्काःश्रुतिमूलेयमेंद्रभे चैत्रादि
मासेशून्याख्यास्ताराविक्तविनाशदाः १५ घटोझषोगौर्मिथुनंमेषकन्यालितौलिनः धनुःकर्कौमृगःसिंहश्चैत्रादौशून्यराशयः १६ पक्षादि
तस्त्वोजतिथौघटेणौमृगेंद्रनक्रौमिथुनांगनेच चापेंदुभेकर्कहरीहयांत्यौगोंत्यौचनष्टेतिथिशून्यलग्ने १७

सिंहाश्चराशयः चैत्रादौमासशू
न्याख्यावंशवित्तविनाशनाइति १६ अथविषमतिथिषुदग्धलग्नानींद्रवज्रयाह पक्षादितइति शुक्लपक्षकृष्णपक्षादितः प्रतिपदमारभ्यओजतिथौविषमति
थौप्रतिपत्तिथौघटेणौतुलामकरौ तृतीयायांमृगेंद्रनक्रौसिंहमकरौ पंचम्यांमिथुनकन्ये सप्तम्यांचापेंदुभेधनुःकर्कौ नवम्यांकर्कहरीकर्कसिंहौ एकादश्यांहयां
त्यौधनुर्मीनौ त्रयोदश्यांगोंत्यौवृषमीनौ एतेतिथिशून्यलग्ने तस्यांतस्यांतिथौनष्टेनिषिद्धे वसिष्ठः मृगसिंहौतृतीयायांप्रथमायांतुलामृगौ पंचम्यांबुध

राशीद्वौसप्तम्यांचापचंद्रभे नवम्यांसिंहकीटाख्यावेकादश्यांगुरोर्गृहे वृषमीनौत्रयोदश्यांदग्धसंज्ञास्त्वमीग्रहाः दग्धपद्मानियत्कर्मकृतंसर्वंप्रणश्यति १७ अथै-
षांदुष्टयोगानांशुभकृत्यावश्यकत्वेसतिपरिहारमाह नारदः तिथयोमासशून्याइतिद्वाभ्यांपंग्वंधकाणलग्नानिविवाहप्रकरणेवक्ष्यंते चंद्रेचैवत्रिकोणेचशुभे
ह्युपचयेपिवा एकोपिबलवांश्चापिशून्यतिथ्युडुनाशकइति १८ १९ अथहस्तार्कादिसिद्धियोगानांतिथिविशेषेणातिनिंद्यत्वमनुष्टुब्द्वयेनाह वर्जयेदिति
बुधानुराधामितिचश्रीपतिः हस्तेरवौशशधरेचमृगोत्तमांगंभौमेऽश्विनीबुधदिनेचतथा नुराधा पुष्योगुरौभृगुसुतेपिचपौष्णयधिष्ण्यंरोहिण्यथार्कितनयेऽमृतसि

तिथयोमासशून्याश्चशून्यलग्नानियान्यपि मध्यदेशेविवर्ज्यानिनदूष्याणीतरेषुतु १८ पंग्वंधकाणलग्नानिमासशून्याश्चराशयः
गौडमालवयोस्त्याज्याअन्यदेशेनगर्हिताः १९ वर्जयेत्सर्वकार्येषुहस्तार्कंपंचमीतिथौ भौमाश्विनींचसप्तम्यांषष्ठ्यांचंद्रेंदवंतथा २०
बुधानुराधामष्टम्यांदशम्यांभृगुरेवतीं नवम्यांगुरुपुष्यंचैकादश्यांशनिरोहिणीम् २१ गृहप्रवेशेयात्रायांविवाहेचयथाक्रमं भौमाश्वि
नींशनौब्राह्मंगुरौपुष्यंविवर्जयेत् २२

द्धियोगाः एतेपंचम्यादितिथिषुचेद्भवंतितदावर्ज्याः यथापंचम्यांहस्तार्कोवर्ज्यः एवमग्रेपिषष्ठ्यादौ अन्येउक्तंच
अर्केहस्तःपंचमीचसोमेषष्ठीचचंद्रभम् अश्विनीसप्तमीभौमेबुधेमैत्रंतथाष्टमी गुरौपुष्यंचनवमीदशमीरेवतीभृगौ एकादशीशनौब्राह्मंवर्जयेत्सर्वदाबुधैरि
ति २० २१ अन्यदप्याह गृहप्रवेशइति ननुभौमाश्विन्यादीनांगृहप्रवेशादौस्वतएववानक्षत्रदोषादप्राप्तेःकिमर्थमिदंवचनं उच्यते यदिविष्टिर्व्यतीपातोदि

नंवाप्यशुभंभवेत् हन्यतेऽमृतयोगेनभास्करेणतमोयथेतिवचनात् कार्यमात्राप्राशस्त्यप्राप्ते आवश्यत्वेप्रवेशादिसंभावनास्यात्तदर्थमपवादवचनंयुक्तमेव २२ अथनंदादियोगान्शालिन्युपजातिकाभ्यामाह आनंदइति उत्पातइतिच २३ २४ अथैषांगणनोपायमनुष्टुभाह दास्त्रादिति अथनक्षत्राणांसाभिजितांगणनाकार्या यथेष्टाविंशतिर्योगाः यथार्कदिनेआद्यदिननक्षत्रंश्रवणस्तदाश्विनीतः साभिजिद्गणनयात्रयोविंशतिसंख्यमस्ति तथासत्यानंदादियोगेषुत्रयोविंशतिसंख्योगदयोगोजातः एवमिंदुवारेमृगशीर्षाद्गणनया आनंदादयोज्ञेयाः २५ अथैतेषुकियतांदुष्टयोगानामावश्यककृत्येपरिहारंशालिन्याह ध्वांक्षइति ध्वांक्षवज्रमुद्गरयोगेषुआद्याइषुनाड्यः पंचघटिकावर्ज्याःपद्मलुंबयोर्वेदाश्चतस्रः एवंगदेऽश्वाःसप्त धूम्रेभूरेकैव काणेघटिद्वयं मुसलेद्वेघटिके राक्षसमृत्यूत्पातकालाः सर्वेषष्टिघटिकात्मकावर्ज्याः कालः कालदंडः अत्रानुक्तेपिचरेयोगेघटिकात्रयंवर्ज्यं उक्तंचज्योतिःसागरे ध्वांक्षेंद्रायुधमुद्गरेषुघटिकास्त्याज्यास्तुपंचादितः पद्मंलुंबकयोश्चतस्रउदिताधूम्रेसदैका पुनः

आनंदाख्यःकालदंडश्चधूम्रोधातासौम्योध्वांक्षकेतूक्रमेण श्रीवत्साख्योवज्रकंमुद्गरश्चछत्रंमित्रंमानसंपद्मलुंबौ २३ उत्पातमृत्यूकिल
काणसिद्धीशुभोऽमृताख्योमुसलंगदश्च मातंगरक्षश्चरसुस्थिराख्य प्रवर्द्धमानाःफलदाःस्वनाम्ना २४ दास्त्रादर्केमृगादिंदौसार्पा-
द्भौमेकराद्बुधे मैत्राद्गुरौभृगौवैश्वाद्गण्यान्मंदेचवारुणात् २५ ध्वांक्षेवज्रेमुद्गरेचेषुनाड्योवर्ज्यावेदाःपद्मलुंबेगदेऽश्वाः धूम्रेकाणेमौ
सलेभूर्द्वयंद्वेरक्षोमृत्यूत्पातकालाश्चसर्वे २६

द्रेकाणेमुसलाह्वयेपिचगदेसप्तैवतिस्रश्चरेमृत्यूत्पातकरक्षसांदिनगतास्ताः कालदंडेतथा २६ अथदोषापवादभूतान्नवयोगाननुष्टुभाह सूर्यभादिति सूर्योयत्र
तन्नक्षत्रमारभ्यचंद्रर्क्षैदिननक्षत्रेचतुर्नवषड्दशत्रयोदशविंशतिसंख्याकेसतिरवियोगाः स्युः तेचदोषसमूहानांनाशकराः उक्तंच सूर्याच्चतुर्थेदशमेचषष्ठेवि
श्वर्क्षेकेविंशतिमेनवर्क्षे भवंति षड्भानुसदृक्षयोगाः कुयोगविध्वंसकराः प्रदिष्टाः २७ अथसूर्यादिवारेषुनक्षत्रविशेषैः सिद्धियोगानिंद्रवज्रोपजातिकाभ्यामा
ह सूर्येइति जीवेइतिच रविवारेहस्तमूलत्र्युत्तरापुष्याश्विनीनक्षत्राणिपूर्वैराचार्यैः सर्वार्थसिद्ध्यैकथितानि एवंचंद्रेश्रवणादीनि एतेसिद्धियोगाः दास्रादर्केमृगा

सूर्यभाद्वेदगोतर्कदिग्विश्वनखसंमिते चंद्रर्क्षैरवियोगास्स्युःदोषसंघविनाशकाः २७ सूर्येर्कमूलोत्तरपुष्यदास्रंचंद्रेश्रुतिब्राह्मशशीज्यमैत्रं
भौमेश्व्यहिर्बुध्न्यकृशानुसार्पं ज्ञेब्राह्ममैत्रार्ककृशानुचांद्रं २८ जीवेंत्यमैत्राश्व्यदितीज्यधिष्ण्यं शुक्रेंत्यमैत्राश्व्यदितिश्रवोभं शनौश्रु
तिब्राह्मसमीरभानिसर्वार्थसिद्ध्यैकथितानिपूर्वैः २९

दिंदावित्यादिप्रकारेण आनंदादिसमीचीनसद्योगसंबंधिनक्षत्रैरुपनिबद्धाः भीमपरा
क्रमेणकुयोगा अप्युक्ताः ज्येष्ठावह्निमघाविशाखवसवोमैत्रंयमाख्यंरवौ सोमेशैवविशाखपुष्यपवनाश्विन्यात्वषाढाद्वयं भौमेविश्वजलेशमित्रवसवः प्राग्भाद्रसा
र्पौशिवः शूलीरेवतिपूर्वयोनिभरणीवस्वश्विमूलाबुधे जीवेमूलमघार्द्रयाम्यवरुणापूषाशशीरोहिणी शुक्रेस्वातिभुजंगदैवतमघा पुष्योत्तरारोहिणी सौरा
वर्यममूलहस्तवरुणाषाढाद्वयंरेवतीचित्राविष्णुमघाश्वसर्वसमयेत्याज्या अयोगाबुधैरिति २८ २९ अथवश्यकवर्ज्यत्वेनज्ञादित्युपस्थित्यर्थंउत्पातमृत्यु-

काणसिद्धियोगान् शालिन्याह द्वीशादिति विशाखादिचतुर्नक्षत्रैरुत्पातमृत्युकाणसिद्धियोगाः रविवारेस्युः यथारवौविशाखाउत्पातः अनुराधामृत्युः ज्येष्ठाकाणः मूलंसिद्धिरिति एवंसोमवारादौ पूर्वाषाढादितोज्ञेयम् तत्फलंनामसदृशं उत्पातमृत्युकाणानिषिद्धाः सिद्धिः शुभइत्यर्थः नारदः विशाखादिचतुर्वर्गमर्कवारादिषुक्रमात् उत्पातमृत्युकाणाख्ययोगाश्चामृतसंयुताइति ३० अथदेशविशेषेणकुयोगानांपरिहारमनुष्टुभाह कुयोगाइति तिथिवारोत्थाः कुयोगाः क्रकचादयःतिथिभोत्थाः अनुराधाद्वितीयायामित्यादयः भवारजाः याम्यंत्वाष्ट्रंवैश्वदेवमित्यादयः तथात्रितयजाःतिथिवारनक्षत्रजाः वर्जये

द्वीशात्तोयाद्वासवात्पौष्णभाच्चब्राह्मात्पुष्यादर्यमर्क्षाच्चतुर्भैः स्यादुत्पातोमृत्युकाणौचसिद्धिर्वारेऽर्काद्येतत्फलंनामतुल्यं ३० कुयोगा
स्तिथिवारोत्थास्तिथिभोत्थाभवारजाः हूणवंगखशेष्वेववर्ज्यास्त्रितयजास्तथा ३१ सर्वस्मिन्विधुपापयुक्तनुलवावर्द्धेनिशान्होर्घ
टीत्र्यंशंवैकुनवांशकंग्रहणतःपूर्वंदिनानांत्रयम्

त्सर्वकार्येषुहस्तार्कंपंचमीतिथावित्येवमादयस्ते सर्वेहूणवंगखशदेशेष्वेववर्ज्याः अन्यदेशेनानिषिद्धाइत्यर्थः नारदः तिथिवारोद्भवानेष्टायोगावारर्क्षसंभवाः हूणवंगखशेभ्योन्यदेशेष्वेतेशुभप्रदाइति ३१ अथसमस्तशुभकृत्येवर्ज्यान् शार्दूलविक्रीडितेनाह सर्वस्मिन्निति सर्वस्मिन्शुभेकार्येएतानिवैनिश्चयेनत्यजपरिहरेत्यर्थः विधुनापापेनवापापैः क्षीणेंद्वर्कमहीसुतार्कतनयैर्वायुजौयुक्तौतनुलवौ लग्ननवांशौत्याज्यौ पूर्णः क्षीणोपिवाचंद्रोलग्नेसर्वत्रगर्हित इतिकश्यपोक्तेः पापेंदूलग्नगौवांशगतौवर्ज्यौशुभेसदेतिच निशान्होर

र्द्धेरात्र्यर्द्धेदिनार्द्धेचघटीत्र्यंशंविंशतिपलानिदशपूर्वंदशपश्चाच्चपरिहर उक्तंच मूर्तःकालोनिवसतिमहानिशायांचदिनदलेयस्मात्दशपूर्वंदशपरतस्तस्माद्वर्ज्यानिचपलानि कुनवांशकंपापग्रहनवांशकंपरिहर अथग्रहणतः पूर्वदिनानांत्रयंपरिहर उत्पातग्रहतः उत्पाताः दिव्यभौमांतरिक्षास्तेयस्मिन्दिनेभवंति ततोऽग्रहाश्चसप्तदिनानिवर्ज्यानि ग्रहोग्रहणंतस्मादपिसप्तदिनानिवर्ज्यानि उक्तंच चंद्रसूर्योपरागेषुत्र्यहंपूर्वंशुभेत्यजेत् सप्ताहमशुभंपश्चात्स्मृतंग्रहणसूतकम् त्रिविधोत्पाततश्चोर्ध्वंसिंहिकासूनुदर्शने सप्तरात्रंनकुर्वंतियात्रोद्वाहादिमंगलमिति अंगिराअपि सर्वग्रासेतुसप्ताहमर्द्धग्रासेदिनत्रयम् त्रिद्व्येकांगुलतोग्रासेदिनमेकंविवर्जयेत् वसिष्ठः सर्वग्रासेदिनान्यष्टौसर्वकार्येविवर्जयेत् षड्दिनानित्रिभागोनेअर्धग्रासेचतुर्दिनम् चतुर्थांशेत्रिरात्रंस्याद्ग्र-

उत्पातग्रहतोऽग्रहांश्चशुभदोत्पातैश्चदुष्टंदिनंषण्मासंग्रहभिन्नभंत्यजशुभेयौऽङ्कंतथोत्पातभम् ३२

हणेचंद्रसूर्ययोः अत्रकार्यस्यावश्यकत्वेपरिहारोज्योतिर्निबंधे पंचदिनानिवसिष्ठस्त्रिदिनंगर्गश्चकौशिकस्त्वेकम् यवनाचार्यस्यमतंपंचमुहूर्त्तानिदूषयतिराहुरिति अयंचनिषेधोनित्यनैमित्तिकादिकृत्यातिरिक्तविषयः गुरुः नित्येनैमित्तिकेकाम्येजपहोमक्रियासुच उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइति शुभदोत्पातैश्चदुष्टंदिनमिति शुभदोत्पातावराहसंहितायाम् चंडाशनिमहीकंपसंध्यानिर्वातनिस्वनाः परिवेषरजोधूमरक्तार्कास्तमनोदयाः दुर्मेध्यान्नरसस्नेहमधुपुष्पफलोद्गमाः गोपक्षिमदवृद्धिश्चशुभायमधुमाधवेइत्यादयः ऋतुपरत्वेनोक्ताः एतेयद्दिनेभवंतितद्दिनमेवत्यज अथग्रहभि-

न्न भंग्रहै भौमादिभिर्भिन्नंभेदितंतथायौद्धंग्रहयोर्युद्धंयस्मिन्दिननक्षत्रेयुद्धंजातं तथाउत्पातभंयस्मिन्नक्षत्रेदिव्यांतरिक्षभौमास्त्रिविधोत्पाताः संभूताः एतानिग्रहभिन्नयौद्धोत्पातनक्षत्राणिषण्मासंत्यज भेदस्ताराखेटयोर्यत्रवास्यादितिविवाहवृंदावने नारदः ग्रहणोत्पातभंत्याज्यंमंगलेषुऋतुत्रयमिति ननुनक्षत्रसंधौजायमानेग्रहणेकिंनक्षत्रंदूषयेदित्यत्राह शार्ङ्गधरः यस्मिन्विधुंराहुरिनंचधिष्ण्येगृण्हातितत्त्याज्यमृतुत्रयंस्यात् पाणिग्रहेपुंमरणंविधत्तेद्वयोर्भयोश्चेद्द्वयमेवजह्यात् अन्यच्च पक्षांतरेणग्रहणद्वयंस्याद्यदातदातद्ग्रहणोपगंभम् पक्षाद्विशुद्धंभवतिद्वितीयंपाणिग्रहेशंसयतिभोगषट्कादिति ३२

नेष्टंग्रहर्क्षेसकलार्द्धपादग्रासेक्रमात्तर्कगुणेंदुमासान् पूर्वंपरस्तादुभयोस्त्रिघस्त्राग्रस्तेस्तगेवाप्युदितेर्द्धखंडे ३३ जन्मर्क्षमासतिथयो
व्यतिपातभद्रावैधृत्यमापितृदिनानितिथिक्षयवृद्धी न्यूनाधिमासकुलिकप्रहरार्धपातविष्कंभवज्रघटिकात्रयमेववर्ज्यं ३४

अथग्रहणनक्षत्रेग्रासभेदेननिंद्यान्मासदिवसांश्चेंद्रवज्रयाह नेष्टमिति ग्रहर्क्षंग्रहणनक्षत्रंक्रमात्संपूर्णार्धचतुर्थांशग्रासेसतिषट्त्र्येकमासान्नेष्टम् गुरुः सर्वग्रासेषुषण्मासांस्त्रीन्मासांस्तुदलेग्रहे आपादग्रहणेधिष्ण्येमासमेकंविवर्जयेत् अथक्रमाद्ग्रस्तेऽस्तगेग्रहणार्धग्रासेउभयोः प्राक्पश्चाच्चत्रित्रिघस्त्रानेष्टाः तथाअर्धखंडेग्रस्तास्तग्रस्तोदययोरभावेपि अर्धग्रासेउभयोः प्राक्पश्चाच्चत्रित्रिघस्त्रानेष्टाः गुरुः ग्रस्तास्तेत्रिदिनंपूर्वपश्चाद्ग्रस्तोदयेतथा खंडमासेत्रित्रिदिनंनिःशेषेसप्तसप्तचेति कश्यपः ग्रस्तोदयेपरोदोषोग्रस्तास्तेऽवाक् शशीनयोः द्युनिशार्द्धेतूभयंतत्खंडीखंडव्यवस्थयोरिति ३३ अथसामान्यतोवश्यवर्ज्यानिपंचांगदूषणा

परिघार्द्धंपंचशूलेषट्चगंडातिगंडयोः व्याघातेनवनाड्यश्चवर्ज्याःसर्वेषुकर्मसु ३५ वेदांगाष्टनवार्केंद्रपक्षरंध्रतिथीस्त्यजेत् वस्वंकमनुतत्वा
शाशरानाडीः पराः शुभाः ३६

दीनि वसंततिलकानुष्टुब्भ्यामाह जन्मर्क्षेति परिघार्धेतिच जन्मनक्षत्रजन्ममासजन्मतिथयः शुभकर्मसुवर्ज्याः अयंनिषेध आद्यगर्भस्यैव नारदः नजन्ममासेजन्मर्क्षेनजन्म दिवसेपिवा आद्यगर्भस्तुतस्याथदुहितुर्वाकरग्रहइति जन्ममासः सविज्ञेयोवर्जितः सर्वकर्मसु वस्तुतस्तुयत्रशुक्लादिचांद्रमासेचैत्रादौजन्माभूत् सचांद्रोमासो जन्ममासस्त्याज्यः इंद्राग्नीयत्रहूयेतेमासादिः संप्रकीर्तितः अग्नीषोमौस्मृतौमध्येसमासः पितृसोमकइतिहारीतोक्तमासलक्षणात् व्यतीपातादयश्चवर्ज्याः पितृदिनंमातापित्रोर्मरणदिनंश्राद्धदिनमित्यर्थः तिथिक्षयर्द्धीतिथिक्षयस्तिथिवृद्धिश्च तल्लक्षणमाहवसिष्ठः स्युस्तिस्त्रतिथयोवारेएकस्मिन्नवमातिथिः तिथिर्वारत्रयेचैकात्रिद्युस्पृग्द्वेपिनिंदिते न्यूनमासः अधिमासश्चवर्ज्यः संक्रमद्वयसहितः क्षयमासः अधिकमासोऽसंक्रांतः कुलिकार्द्धप्रहरौवक्ष्यमाणौपातोमहापातः विष्कंभयोगवज्रयोगयोराद्यंघटिकात्रयमेववर्ज्यम् एवंप्रकारेणकैश्चिद्वज्रयोगेनवघटिकावर्ज्याइत्युक्तं यथा विष्कंभाद्यघटित्रयंचनवकंव्याघातवज्रोद्भवेइति वृत्तशतेतथा व्याघातेवज्रकेंकाइति गणेशज्योतिर्विदुक्तिरपिनिरस्ताविष्कंभवज्रयोस्तिस्त्रः षट्चगंडातिगंडयोः व्याघातेनवशूलेतुपंचनाड्योविगर्हिताइतिकश्यपोक्तेः परिघस्याद्यार्द्धं वर्ज्यं शूलस्याद्याःपंच गंडातिगंडयोराद्याःषट्षट्घटिकाःव्याघातेचादिमानवघटिकाः वर्ज्याः ३४ ३५ अथपक्षरंध्रतिथीरावश्यकत्वेतन्निषिद्धवर्ज्यघटीश्चानुष्टुभाह वेदांगेति चतुर्थीषष्ठीअष्टमीनवमीद्वादशी चतुर्दशी एताःपक्षरंध्रतिथयोज्ञेयाःआसु

शुभकृत्यस्यावश्यकत्वेसति आदिमाःक्रमात् वस्वंकमनुतत्वाशाशरानाडीस्त्यजेत् यथाच्चतुर्थ्याः आदिमाः अष्टघटिकाः षष्ठ्यांनव अष्टम्यांचतुर्दश नवम्यां पंचविंशतिः द्वादश्यांदश चतुर्दश्यांपंचघटिकास्त्याज्याइत्यर्थः पराउर्वरिताः शुभाज्ञेयाः वसिष्ठः चतुर्दशी चतुर्थीच अष्टमीनवमीतथा षष्ठीचद्वादशीचैवपक्षच्छिद्राव्हयाइमाः क्रमादेतासुतिथिषुवर्जनीयाश्चनाडिकाः भूताष्टमनुतत्वांकदशशेषास्तुशोभनाः दोषनाडीषुयत्कर्मकृतंसर्वंविनश्यतीत्यादि कश्यपेनसर्वसाधारण्येनदशैववर्जिताः ३६ अथकुलिककालवेलायमघंट कंटकदोषाननुष्टुभाह

कुलिकःकालवेलाचयमघंटश्चकंटकः वाराद्द्विघ्नेक्रमान्मंदेबुधेजीवेकुजेक्षणः ३७

कुलिकइति वर्तमानवारान्मंदे शनैश्चरेगदितेसतियोंकोभवतितस्मिन्द्विगुणे योंऽकस्तत्संख्यालक्षणोमुहूर्त्तः कुलिकोभवति एवंबुधेजीवेभौमेवर्त्तमानवाराद्गणितेयोंऽकोभवतिससद्विघ्नः क्रमात्कालवेलायमघंटकंटकसंज्ञादुष्टमुहूर्ताःस्युः यथारविजःशनिःसप्तसंख्याकः तस्मिन्द्विगुणेचतुर्दशजाताः तेनरवौचतुर्दशोमुहूर्त्तः कुलिकः एवंबुधः संख्याचत्वारः तद्द्विगुणोऽष्टमोमुहूर्त्तःकालवेला जीवेपंचद्विघ्नेदशमोयमघंटः भौमेतृतीयेद्विघ्नेषष्ठोमुहूर्त्तःकंटकसंज्ञइत्यर्थः एवंसोमवारादावपि अथशुभकृत्यावश्यकत्वेसतिदेशभेदेनकुलिकादिदोषपरिहारमाह गर्गः विंध्यस्योत्तरकूलेतुयावतातुहिमाचलम् यमघंटकदोषोस्तिनान्यदेशेषुविद्यते मत्स्यांगमागधांध्रेषुयमघंटस्तुदोषकृत् काश्मीरेकुलिकंदुष्टमर्धयामस्तुसर्वतइति केचिन्मतेस्यात्कालवेलारवितःशराक्षितर्कानलांगांबुधयो ५ २ ६ ३ ४ गजेंदू ८ १ दिनेनिशायामृतुवेदनेत्रनगेषुरामा ६ ४ २ ७ ५ ३ विधुदंतिनौ १ ८ च गजेंदूइत्यर्धप्रहरद्वयंशनौ यात्रायांमरणंकाले

वैधव्यंपाणिपीडने व्रतेब्रह्मवधःप्रोक्तःशुभकर्मततस्त्यजेत् गौडाःसूर्येवेदशरौ ४ ५ चंद्रेहयपक्षौ ७ २ कुजेक्षिभूः २ १ ज्ञेबाणाग्नी ५ ३ गुरौदंतिहयौ ८ ७ शुक्रेत्रिवेदकौ ३ ४
मंदेतर्कगजौ ६ ८ ज्ञेयौयामार्द्धविशुभौसदेति ३७ अथसूर्यादिवारेषुशिष्याणांसद्यएवदोषज्ञानार्थंदुर्मुहूर्त्तादिनामकान् मुहूर्त्तान् शार्दूलविक्रीडितवसंततिलकाभ्यामाह सूर्येइति
दिग्भास्कराइतिच रविवारेषष्ठस साष्टमदशमचतुर्दशमुहूर्त्तानिंद्याः एवंसर्वत्र अयमर्थोमूलेन्यासतः स्पष्टएव एषुमुहूर्त्तेषुकश्चिद्दुर्मुहूर्त्तःकश्चित् कुलिकः कंटकः कालवेलाख्यः
अर्धयामाख्यः यमघंटाख्यःस्यात् तत्प्रमाणंकलांशःदिनमानस्यषोडशांशः ३८ ३९ अथविवाहादिशुभकृत्येहोलिकाष्टकनिषेधंदेशपरत्वेनाह विपाशेति विपाशाइरा

सूर्येषड्स्वरनागदिङ्मनुमिताश्चंद्रेऽब्धिषड्कुंजरांकार्कविश्वपुरंदराक्षितिसुतेद्व्यब्ध्यग्नितर्कादिशः सौम्येद्व्यब्धिगजांकदिङ्मनुमिताजीवेद्विष
ड्भास्कराः शक्राख्यास्तिथयःकलाश्चभृगुजेवेदेषुतर्कग्रहाः ३८ दिग्भास्करमनुमिताश्चशनौशशिद्विनागादिशोभवदिवाकरसंमिताश्च दुष्ट
क्षणाःकुलिककंटककालवेलाःस्युश्चार्द्धयाममयमघंटगताःकलांशः ३९ विपाशेरावतीतीरे शतद्र्याश्चत्रिपुष्करे विवाहादिशुभेनेष्टंहोलिकाप्राग्दि
नाष्टकम् ४० मृत्युक्रकचदग्धादीनिंदौशस्तेशुभान्जगुः

वतीशतद्रूःएताःपश्चिमदेशप्रसिद्धाः नद्यःतासांतीरेउभयतटवर्तिदेशेत्रिपुष्करेदेशेचहोलिकाफा
ल्गुनशुक्लपौर्णिमाततःप्राक्दिनाष्टकंविवाहादिशुभकृत्येनेष्टंनिषिद्धम् अर्थादन्यदेशेननिषिद्धम् ४० अथमृत्युयोगादिदुष्टयोगपरिहारमनुष्टुभाह मृत्युक्रकचेति
मृत्युयोगादास्त्रादर्कइत्यादिना आनंदादिषूक्ताः क्रकचाः षष्ठ्यादितिथयोमंदाद्विलोममित्युक्ताः दग्धादियोगाःसूर्येशपंचाग्नीत्यादिनोक्ताः चंद्रेशस्तेकर्तुर्गोच

रेणसमीचीनेसति एतान्‌योगान्‌ शुभान्‌ शुभफलदान्‌जगुः ऊचुः राजमार्त्तंडः क्रकचामृत्युयोगाख्यादिनंदग्धंतथैवच चंद्रेशुभे क्षयंयांति वृक्षावज्रहताइव अथकेचिदाचार्याः यामोत्तरं प्रहरोत्तरं मृत्युक्रकचदग्धादीन्‌ शुभान्‌ जगुः सएवाह उत्पातेयमघंटेच काणेचक्रकचेतथा तिथौदग्धेचकालेच प्राग्यामात्परतः शुभमिति अथान्येआचार्याः मृत्युक्रकचदग्धादीन्‌ यात्रायामेवनिंदितान्‌ जगुः विवाहादौतुनदोषः लल्लः वारर्क्षतिथियोगेषु यात्रामेवविवर्जयेत्‌ विवाहादीनिकुर्वीतगर्गादीनामिदंवचः निंद्येष्विति शेषः अन्यच्च अयोगेषुचसर्वेषुवर्जयेद्घटिकाद्वयम्‌ उत्पातमृत्युकाणानांपंचषट्सप्तनाडिकाः ४१ पुनरप्यापवादंभुजंगप्रयातेना

केचिद्यामोत्तरंचान्येयात्रायामेवनिंदितान्‌ ४१ अयोगेसुयोगोपिचेत्स्यात्तदानीमयोगंनिहत्यैषसिद्धिंतनोति परेलग्नशुद्ध्याकुयोगादिनाशंदिनार्द्धोत्तरंविष्टिपूर्वंचशस्तम्‌ ४२ शुक्लेपूर्वार्द्धेऽष्टमीपंचदश्योर्भद्रैकादश्यांचतुर्थ्यांपरार्द्धे कृष्णोंऽत्यार्द्धेस्यात्तृतीयादशम्योःपूर्वेभागेसप्तमीशंभुतिथ्योः ४३

ह अयोगेइति अयोगेक्रकचादौसतिचेत्सुयोगःसिद्धियोगोपिस्यात्‌ तदाएषः सिद्धियोगः अयोगफलंनिहत्यसिद्धिंतनोतिनिष्पादयति मार्तंडः अयोगःसिद्धियोगश्चद्वावेतौभवतोयदि अयोगोहन्यतेतत्रसिद्धियोगःप्रवर्त्तते परेआचार्याः लग्नशुद्ध्याकुयोगादिनाशमाहुः यदाहसएव यत्रलग्नंविनाकिंचित्क्रियतेशुभसंज्ञकम्‌ तत्रतेषामयोगानांप्रभवाज्जायतेफलम्‌ अथावश्यककृत्येकालांतराभावेपरिहारमाह विष्टिपूर्वमिति विष्टिर्भद्रासापूर्वार्द्धेस्यविष्ट्यादिकंमध्यान्हानंतरंशस्तमाहुः उक्तंच विष्टिरंगारकश्चैवव्यतीपातःसवैधृतिः प्रत्यरंजन्मनक्षत्रंमध्यान्हात्परतःशुभमिति ४२ अथभद्रांशालिन्याह शुक्लेइति शुक्लेशुक्लपक्षे

ष्टम्यांपूर्णिमायांचपूर्वार्द्धे भद्रास्यात् एकादश्यांचतुर्दश्यांचउत्तरार्द्धे भद्रा कृष्णेपक्षेतृतीयायांच दशम्यांच अंत्यार्द्धे उत्तरार्द्धे सप्तम्यां शंभुतिथौचतुर्दश्यांच पूर्वार्द्धे पूर्वभागेभद्रास्यात् भद्रास्वरूपंरत्नमालायाम् उद्दन्डोद्भटतरेत्यादि ४३ अथचतुर्थ्यादितिथिषुभद्रायाः मुखपुच्छविभागंशार्दूलविक्रीडितेनाह पंचद्व्यद्रीति चतुर्थ्यादितिथीनांपंचादिप्रहरेषु आदिघट्यः शराः पंच संख्याविशिष्टैर्भद्राया आस्यंमुखम् यथा चतुर्थ्याः पंचमप्रहरे आदिभूताः पंचघट्यो भद्रामुखं एवमष्टम्यांद्वितीयप्रहरे एकादश्यांसप्तमप्रहरे पूर्णिमायांचतुर्थप्रहरे तृतीयायामष्टमे सप्तम्यांतृतीयेदशम्यांषष्ठे चतुर्दश्यांप्रथमेप्रहरेभद्रामुखंस्यात् तदसत् अशुभमित्यर्थः अथपुनश्चतुर्थ्यादितिथीनांक्रमेणगजेंद्वित्यादिप्रहरेषु अंत्यभवंघटीत्रयंपुच्छसंज्ञं तच्छुभकरम् यथा चतुर्थ्यामष्टमप्रहरस्यांत्यघटीत्रयंभद्रापुच्छम् एवमष्टम्यादिषुप्रथमादिप्रहरस्यांत्यघटीत्रयंपुच्छंज्ञेयम् तत्रभद्राकर्माणि वसिष्ठः वधबंधविषाग्न्यप्सुछेदनोच्चाटनादियत् तुरंगमहिषोष्ट्रादिकर्मविष्ट्यांतुसिद्ध्यति अंगविभागः कश्यपसंहितायाम् मुखेपंचगलेत्वेकावक्ष्यस्येकादशस्मृताः नाभौचतस्रः षट्कट्यांतिस्रः पुच्छेतुनाडिकाः कार्यहानिर्मुखेमृत्युर्गलेवक्षसिनिःसृता कट्यामुन्मत्ततानाभौच्युतिः पुच्छेध्रुवोजयः अथविष्टिपरिहारमाह तथेति तिथ्यपरार्द्धजातिथ्युत्तरार्धभूताविष्टिर्वासरेदिवसेयदिस्यात् तदाशुभकरी तथान्येनैवप्रकारेणतिथिपूर्वार्द्धोत्थारात्रौशुभकरी नारदः निषेधमाह पूर्वार्द्धोत्थायदानिशि तदाविष्टिः शुभायेतिकमलासनभाषितम् ४४

पंचद्व्यद्रिकृताष्टरामरसभूयामादिघट्यः शराविष्टेरास्यमसद्गजेंदुरसरामाद्र्यश्विबाणाब्धिषु यामेष्वंत्यघटीत्रयंशुभकरंपुच्छंतथावासरेवि
ष्टिस्तिथ्यपरार्द्धजाशुभकरीरात्रौचपूर्वार्द्धजा ४४

अथभद्रानिवासंतत्फलंचानुष्टुभाह कुंभकर्केति अब्जेचंद्रेकुंभद्वयेकुंभमीनस्थे कर्कद्वयेकर्कसिंहराशिस्थितेमनुष्यलोकेतिष्ठति अथमेषात्त्रयेमेषवृषमिथुनस्थिते अलिगेवृश्चिकस्थेचंद्रेचस्वर्गलोकेभद्रातिष्ठति कन्यातुलाधनुर्मकरराशिषुचंद्रेअधःपाताललोकेभद्रातिष्ठति तत्रैवमर्त्यस्वर्गपातालेषुफलंचोक्तंशुभाशुभंभद्राददातीत्यपवादद्वाराप्रयोजनमुक्तंभवति उक्तंच मेषोक्षकौर्प्यमिथुनेघटसिंहमीनकर्केषुचापमृगतौलिसुतासुचंद्रे स्वर्गमर्त्यनागनगरीक्रमशःप्रयातिविष्टिःफलान्यपिददातिहितत्रदेशे उक्तंच भूपालवल्लभे कर्ककुंभद्वयेभूस्थाकौर्प्येजत्रितयेद्युगा कन्याचापद्वयेचंद्रेभद्रापातालवासिनी ४५ अथकालशुद्धौनिषेध्यवस्तू

कुंभकर्कद्वयेमर्त्येस्वर्गेऽब्जेजात्त्रयेऽलिगे स्त्रीधनुर्जूकनक्रेऽधोभद्रातत्रैवतत्फलम् ४५ वाप्यारामतडागकूपभवनारंभप्रतिष्ठेव्रतारंभोत्सर्ग
वधूप्रवेशनमहादानानिसोमाष्टमे गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतंनीलोद्वाहपथातिपन्नशिशुसंस्कारान्सुरस्थापनम् ४६

निशार्दूलविक्रीडितेनाह वाप्यारामेति वापीदीर्घिका आरामउपवनम् तडागःपुष्करिणी कूपःप्रसिद्धः एतेषामारंभप्रतिष्ठा आरंभोनिर्माणम् प्रतिष्ठाउत्सर्गः तत्रगृहप्रतिष्ठा गृहप्रवेशोज्ञेयः व्रतानामनंतव्रतादीनामारंभः ग्रहणंउत्सर्गउत्थापनम् महादानानितुलापुरुषादीनि सोमःसोमयागः अष्टका अष्टकाश्राद्धंगोदानंकेशांतसंज्ञंकर्म आग्रयणंनवान्नेष्टिः प्रपाजलशाला प्रथमकोपाकर्मप्रथमारभ्यमाणंश्रावणीकर्म वेदव्रतंमहानाम्न्यादित्रयं महानाम्नीव्रतं उपनिषद्व्रतंवेदव्रतंच नीलोद्वाहःकाम्यवृषोत्सर्गः अतिपन्नशिशुसंस्काराः अतिपन्नाःअतिक्रांताःजातकर्मादयःशिशूनांसंस्काराः देवस्थापनं ४६ अथान्यानिशार्दूलविक्रीडितेनाह दीक्षा

मौंजीति दीक्षामंत्रग्रहणादिकामौंजिविवाहादौप्रसिद्धौ मुंडनंचौलम् अपूर्वंदेवेक्षणंतीर्थेक्षणंच संन्यासःप्रसिद्धः अग्निपरिग्रहोऽग्निहोत्रम् अपूर्वराजदर्शनंराजाभिषेकेश्च गमंगमनंअपूर्वमेव चातुर्मास्यंचातुर्मास्ययागः समावृत्तिःमौंजीविसर्गः श्रवणायोर्वेधःकर्णवेधः परीक्षातस्समासादिरूपादिव्यमितियावत् एतानिकर्माणिबुधोनकुर्यात् कदाईज्यसितयोर्बृहस्पतिशुक्रयोर्वृद्धत्वे अस्तेचशिशुत्वेबाल्येच तथान्यूनाधिकमासेअधिकमासेचनकुर्यात् अत्रमूलवचनानि शातातपः अस्तंगतेगुरौशुक्रेबाले वृद्धे मलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेत् ऋक्षोच्चयः वापीकूपतडागयागगमनंक्षौरंप्रतिष्ठाव्रतंविद्यामंदिरकर्णवेधनमहादानंवनंसेवनम् तीर्थस्नानविवाहदेवभवनंमंत्रादिदेवेक्षणंदूरेणैवजिजीविषुःपरिहरेदस्तंगतेभार्गवे उपनयनंगोदानंपाणिग्रहणंगृहप्रवेशगमनानि अस्तमितेषुनकुर्यात्सुरगुरुभृगुपुत्रचंद्रेषु अस्तमयादिफलमाहबादरायणः गुरोरस्तेपतिंहन्याच्छुक्रास्तेचैवकन्यकाम् चंद्रेनष्टेउभौहन्यात्तस्मादस्तंविवर्जयेत् बालभावेस्त्रियंहन्याद्वृद्धभावेनरंतथा तस्माद्बाल्येचवार्द्धक्येचविवाहंनैवकारयेत् अथाधिमासेवर्ज्यानिगृह्यपरिशिष्टे सोमयागादिकर्माणिनित्यान्यपिमलिम्लुचे तथैवाग्रयणाधानचातुर्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यदिकर्मयत् स्पष्टमासाविशेषाख्यविहितंवर्जयेन्मले गर्गबृहस्पती अग्न्याधानंप्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतवृषोत्सर्गचूडाकरणमेखला मांगल्यमभिषेकंच

दीक्षामौंजिविवाहमुंडनमपूर्वंदेवतीर्थेक्षणंसंन्यासाग्निपरिग्रहौनृपतिसंदर्शाभिषेकौगमम् चातुर्मास्यसमावृतीश्रवणयोर्वेधंपरीक्षांत्य
जेद्वृद्धत्वास्तशिशुत्वईज्यसिततयोर्न्यूनाधिमासेतथा ४७

मलमासेविवर्जयेत् मरीचिः गृहप्रवेशगोदानस्थानाश्रयमहोत्सवम् नकुर्यान्मलमासेतुसंसर्पीहस्पतौतथा वसिष्ठः वापीकूपतडागादिप्रतिष्ठायज्ञकर्मच नकुर्यान्मलमासेतुसंसर्पीहस्पतौतथा यदाक्षयमासोभवतितदाक्षयमासस्यपूर्वोत्तरावधिमासौभवतः तत्रपूर्वः संसर्पः द्वितीयों ऽ हस्पतिः एतानिगुरुशुक्रयोरस्तादावपिवर्ज्यानीत्याहुः गार्ग्यः बालेवायदिवावृद्धे शुक्रेवास्तंगतेगुरौ मलमासइवैतानिवर्जयेद्देवदर्शनम् अपूर्वदेवतांदृष्ट्वाशुचः स्युर्नष्टेभार्गवे मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत् अनावृत्ताअपूर्वतीर्थयात्रा अत्रनियतकालानिसीमंतनामकरणादीनिपूर्वादस्तादिसत्त्वेपिस्वस्वकालएवकार्याणि गुरुः मासप्रयुक्तकार्येषुमूढत्वंगुरुशुक्रयोः नदोषकृन्मलेमासेगुर्वादित्यादिकंतथा अन्यत्रापि सीमंतजातकादीनिप्राशनांतानियानिवै नदोषोमलमासस्य मौढ्यस्यगुरुशुक्रयोरिति वसिष्ठः अतीतकालान्यखिलानितानिकार्याणिसौम्यायनगेदिनेशे सितेगुरौवाप्यथदृश्यमानेतदुक्तपंचांगदिनेप्यखंडे अत एवातिपन्नशिशुसंस्कारानित्युक्तम् ४७ अथसिंहमकरस्थगुर्वादिष्वतिदेशमाह अस्तेवर्ज्यमिति यदस्तेगुर्वस्तेवर्ज्यंनिषिद्धमुक्तंतत्सिंहस्थेगुरौ मकरस्थेचगुरौवर्ज्यंनिषिद्धम् देवीपुराणे सिंहसंस्थेगुरौयत्नात्सर्वारंभान्विवर्जयेत् पुत्रभ्रातृकलत्राहिहन्याच्छीघ्रंनसंशयः कारकोव्रजतेनाशं संतानंम्रियतेऽचिरात् देवारामतडागानिप्रपोद्यानगृहाणिच विवाहयज्ञोपनयचूडादिचनसिध्यति यथासिंहस्थितोजीवस्तथैवमकरस्थितः अयमपि निषेधोनियतकालानांनसंग्रहः वसिष्ठः नीचराशिगतोजीवः प्रशस्तः सर्वकर्मसु नीचेनीचांशकस्त्याज्योयस्मादंशेषुनीचता विशेषोमांडव्येनोक्तः देवीपुराणे मकरस्थोयदाजीवोवर्जयेत्संचमांशकम् शेषेष्वपिचभागेषुविवाहः शोभनोमतः तोडरानंदः अतिचारेसप्तदिनंवक्रेद्वादशमेवच नीचास्थितेपिवागीशेमा-

समेकंविवर्जयेत् ज्योतिर्निबंधे हरिनीचारिभागेपिव्रतोद्वाहादिमंगलम् ननिषिद्धंयदिस्वोच्चेस्वभेवासंस्थितोगुरुः मघांत्यक्त्वायदागच्छेत्फाल्गुनींचबृहस्पतिः पुत्रिणीधनिनीकन्यासौभाग्यंसुखमश्नुतेइति क्वचिदपूर्वतीर्थयात्रायांमौढ्यादिदोषोनास्ति गोदावर्यांगयायांचश्रीशैलेग्रहणद्वये सुरासुराणांगुर्वीश्चमौढ्यदोषोनविद्यते वायुपुराणेत्रिस्थलीसेतौ गयायांसर्वकालेषुपिंडंदद्याद्विधानतः अधिमासेजन्मदिनेऽस्तेचगुरुशुक्रयोः नत्यक्तव्यंगयाश्राद्धंसिंहस्थेचबृहस्पतौ अधिमासेसिंहगुरावस्तेचगुरुशुक्रयोः तीर्थयात्रानकर्तव्यागयांगोदावरींविनेति अथगुर्वाद्यस्तेयद्वर्ज्यंतद्वक्रगेगुरौ अतिचारगेपिगुरौवर्ज्यम्

अस्तेवर्ज्यंसिंहनक्रस्थजीवेवर्ज्यंकेचिद्वक्रगेचातिचारे गुर्वादित्येविश्वघस्रेपिपक्षेप्रोचुस्तद्वद्दंतरत्नादिभूषाम् ४८

वात्स्यः यात्रोद्वाहप्रतिष्ठांचगृहच्चूडाव्रतादिकम् वर्जयेद्यत्नतश्चैवजीवेवक्रातिचारगे अस्यापवादोराजमार्तंडे वक्रातिचारगेजीवेवर्जयेत्तदनंतरम् व्रतोद्वाहादिच्चूडायामष्टाविंशतिवासरान् दीपिकायाम् त्रिकोणजायाधनलाभराशौवक्रातिचारेणगुरुःप्रयातः यदातदाप्राहशुभंविलग्नंविवाहपाणिग्रहणंवसिष्ठः अथकेचिद्गुरुसहितेआदित्येएकराशिगतौगुरुसूर्याविति यावत् गुर्वादित्येपिसर्वंशुभकर्मवर्ज्यं शौनकः एकराशिगतौसूर्यजीवौस्यातांयदापुनः व्रतबंधविवाहादिशुभंकर्माखिलंत्यजेत् अथकेचिद्विश्वघस्रेपिपक्षे यस्मिन्पक्षेतिथिद्वयनाशः सत्रयोदशदिनःपक्षः सोतिनिंद्यः उक्तंच पक्षस्यमध्येद्वितिथावपेतांतदाभवेद्रौरवकालयोगः पक्षेविनष्टेसकलंविनष्टमित्याहुराचार्यवराःसमस्ताः तथा त्रयोदशदिनेपक्षेतदासंहरतेजगत् अपिवर्षसहस्रेणकालयोगःप्रकीर्तितइति तस्मिन्पक्षेशुभक

अथभद्रानिवासंतत्फलंचानुष्टुभाह कुंभकर्केति अब्जेचंद्रेकुंभद्वयेकुंभमीनस्थे कर्कद्वयेकर्कसिंहराशिस्थितेमनुष्यलोकेतिष्ठति अथमेषात्त्रयेमेषवृषमिथुनस्थिते अलिगेवृश्चिकस्थेचंद्रेचस्वर्गलोकेभद्रातिष्ठति कन्यातुलाधनुर्मकरराशिषुचंद्रेअधःपाताललोकेभद्रातिष्ठति तत्रैवमर्त्यस्वर्गपातालेषुफलंचोक्तंशुभाशुभंभद्राददातीत्यपवादद्वाराप्रयोजनमुक्तंभवति उक्तंच मेषोक्षकौर्प्यमिथुनेघटसिंहमीनकर्केषुचापमृगतौलिसुतासुचंद्रे स्वर्गमर्त्यनागनगरीःक्रमशःप्रयातिविष्टिःफलान्यपिददातिहितत्रदेशे उक्तंच भूपालवल्लभे कर्ककुंभद्वयेभूस्थाकौर्प्येजत्रितयेद्युगा कन्याचापद्वयेचंद्रेभद्रापातालवासिनी ४५ अथकालशुद्धौनिषेध्यवस्तूनिशार्दूलविक्रीडिते

कुंभकर्कद्वयेमर्त्येस्वर्गेऽब्जेजात्त्रयेऽलिगे स्त्रीधनुर्जूकनक्रेऽधोभद्रातत्रैवतत्फलम् ४५ वाप्यारामतडागकूपभवनारंभप्रतिष्ठेव्रतारंभोत्सर्गवधूप्रवेशनमहादानानिसोमाष्टमे गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतंनीलोद्वाहमथातिपन्नशिशुसंस्कारान्सुरस्थापनम् ४६

नाह वाप्यारामेति वापीदीर्घिका आराम उपवनम् तडागःपुष्करिणी कूपःप्रसिद्धः एतेषामारंभप्रतिष्ठा आरंभोनिर्माणम् प्रतिष्ठाउत्सर्गः तत्रगृहप्रतिष्ठागृहप्रवेशोज्ञेयः व्रतानामनंतव्रतादीनामारंभः ग्रहणंउत्सर्गउद्यापनम् महादानानितुलापुरुषादीनि सोमःसोमयागः अष्टकाअष्टकाश्राद्धं गोदानंकेशांतसंज्ञंकर्म आग्रयणंनवान्नेष्टिः प्रपाजलशाला प्रथमकोपाकर्मप्रथमारभ्यमाणंश्रावणीकर्म वेदव्रतंमहानाम्न्यादित्रयं महानाम्नीव्रतं उपनिषद्व्रतंवेदव्रतंच नीलोद्वाहः काम्यवृषोत्सर्गः अतिपन्नशिशुसंस्काराः अतिपन्नाः अतिक्रांताःजातकर्मादयःशिशूनांसंस्काराः देवस्थापनं ४६ अथन्यानिशार्दूलविक्रीडितेनाह दीक्षामौंजीति दीक्षामं

दीक्षामौंजिविवाहमुंडनमपूर्वंदेवतीर्थेक्षणंसन्यासाग्निपरिग्रहौनृपतिसंदर्शाभिषेकौगमम् चातुर्मास्यसमावृतीश्रवणयोर्वेधंपरीक्षां
त्यजेद्वृद्धत्वास्तशिशुत्वईज्यसितयोर्न्यूनाधिमासेतथा ४७

थग्रहणादिका मौंजिविवाहादौ प्रसिद्धौ मुडनंचौलम् अपूर्वदेवेक्षणंतीर्थेक्षणंच संन्यासः प्रसिद्धः अग्निपरिग्रहोऽग्निहोत्रम् अपूर्वराजदर्शनंराजाभिषेकश्च गमंगमनं अपूर्वमेव चातुर्मास्यंचातुर्मास्ययागः समावृत्तिः मौंजीविसर्गः श्रवणयोर्वेधः कर्णवेधः परीक्षातप्तमासादिरूपादिव्यमितियावत् एतानिकर्माणिबुधोनकुर्यात् कदा ईज्यसितयोर्बृहस्पतिशुक्रयोर्वृद्धत्वे अस्तेचशिशुत्वेबाल्येव तथान्यूनाधिकमासे क्षयमासेअधिकमासेचनकुर्यात् अत्रमूलवचनानि शातातपः अस्तंगतेगुरौशुक्रेबालेवृद्धेमलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेत् ऋक्षोच्चयः वापीकूपतडागयागगमनंक्षौरंप्रतिष्ठाव्रतंविद्यामंदिरकर्णवेधनमहादानंवनंसेवनम् तीर्थस्नानविवाहदेवभवनंमंत्रादिदेवेक्षणंदूरेणैवजिजीविषुःपरिहरेदस्तंगतेभार्गवे उपनयनंगोदानंपाणिग्रहणंगृहप्रवेशगमनानिअस्तमितेषुनकुर्यात्स्फुरगुरुभृगुपुत्रचंद्रेषु अस्तमयादिफलमाहबादरायणः गुरोरस्तेपतिंहन्याच्छुक्रास्तेचैवकन्यकाम् चंद्रेनष्टेउभौहन्यात्तस्मादस्तंविवर्जयेत् बालभावेस्त्रियंहन्याद्वृद्धभावेनरंतथा तस्माद्बाल्येचवार्धक्येचविवाहंनैवकारयेत् अथाधिमासेवर्ज्यानिगृह्यपरिशिष्टे सोमयागादिकर्माणिनित्यान्यपिमलिम्लुचे तथैवाग्रयणाधानचातुर्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यतिकर्मयत् स्पष्टमासविशेषाख्यविहितंवर्जयेन्मले गर्गबृहस्पती अग्न्याधानंप्रतिष्ठांचयज्ञदानव्रतानिच वेदव्रतवृषोत्सर्गचूडाकरणमेखला मांगल्यमभिषेकं

चमलमासेविवर्जयेत् मरीचिः गृहप्रवेशगोदानस्थानाश्रयमहोत्सवम् नकुर्यान्मलमासेतुसंसर्पांहस्पतौतथा वसिष्ठः वापीकूपतडागादिप्रतिष्ठायज्ञकर्मच नकुर्यान्मलमासेतुसंसर्पांहस्पतौतथा यदाक्षयमासोभवतितदाक्षयमासस्यपूर्वोत्तरावधिमासौभवतः तत्रपूर्वः संसर्पः द्वितीयोंऽ हस्पतिः एतानिगुरुशुक्रयोरस्तादावपिवर्ज्यानीत्याहुः गार्ग्यः बालेवायदिवावृद्धे शुक्रेवास्तंगतेगुरौ मलमासइवैतानिवर्जयेद्देवदर्शनम् अपूर्वदेवतांदृष्ट्वाशुक्रचःस्युर्नष्टेभार्गवे मलमासेप्यनावृत्ततीर्थयात्रांविवर्जयेत् अनावृत्ताअपूर्वतीर्थयात्रा अत्रनियतकालानिसीमंतनामकरणादीनि पूर्वादस्तादिसत्त्वेपिस्वस्वकालएवकार्याणि गुरुः मासप्रयुक्तकार्येषु मूढत्वंगुरुशुक्रयोः नदोषकृन्मलेमासे गुर्वादित्यादिकंतथा अन्यत्रापि सीमंतजातकादीनिप्राशनांतानियानिवै नदोषोमलमासस्यमौढ्यस्यगुरुशुक्रयोरिति वसिष्ठः अतीतकालान्यखिलानितानिकार्याणि सौम्यायनगेदिनेशे सितेगुरौवाप्यथदृश्यमानेतदुक्तपंचांगदिनेष्वखंडे अतएवातिपन्नशिशुसंस्कारानित्युक्तम् ४७ अथसिंहमकरस्थगुर्वादिष्वतिदेशमाह अस्तेवर्ज्यमिति यदस्तेगुर्वस्तेवर्ज्यंनिषिद्धमुक्तंतत्सिंहस्थेगुरौ मकरस्थेचगुरौवर्ज्यंनिषिद्धम् देवीपुराणे सिंहसंस्थेगुरौयत्नात्सर्वारंभान्विवर्जयेत् पुत्रभ्रातृकलत्राहिहन्याच्छीघ्रंनसंशयः कारकोव्रजतेनाशंसंतानंम्रियतेऽचिरात् देवारामतडागानिप्रपोद्यानगृहाणिच विवाहयज्ञोपनयचूडादिचनसिद्ध्यति यथासिंहस्थितोजीवस्तथैवमकरस्थितः अयमपिनिषेधो नियतकालानांनसंग्रहः वसिष्ठः नीचराशिगतोजीवः प्रशस्तः सर्वकर्मसु नीचेर्नीचांशकस्त्याज्योयस्मादंशेषुनीचता विशेषोमांडव्येनोक्तः देवीपुराणे मकरस्थोयदाजीवोवर्जयेत्संचमांशकम् शेषेष्वपिचभागेषुविवाहःशोभनोमतः तोडरानंदः अतिचारेसप्तदिनंवक्रेद्वादशमेवच नीचस्थितेपिवागीशेमासमेकं

विवर्जयेत् ज्योतिर्निबंधे हरिनीचारिभागेपि व्रतोद्वाहादिमंगलम् ननिषिद्धंयदिस्वोच्चेस्वभेवासंस्थितोगुरुः मघांत्यऋक्षायदागच्छेत्फाल्गुनींचबृहस्पतिः पुत्रिणीधनिनीकन्यासौभाग्यंसुखमश्नुते इति क्वचिदपूर्वतीर्थयात्रायांमौढ्यादिदोषोनास्ति गोदावर्यांगयायांचश्रीशैलेग्रहणद्वये सुरासुराणांगुर्वोश्चमौढ्यदोषोनविद्यते वायुपुराणेत्रिस्थलीसेतौ गयायांसर्वकालेषुपिंडंदद्याद्विधानतः अधिमासेजन्मदिनेह्यस्तेचगुरुशुक्रयोः नत्यक्तव्यंगयाश्राद्धंसिंहस्थेचबृहस्पतौ अधिमासेसिंहगुरावस्तेचगुरुशुक्रयोः तीर्थयात्रानकर्तव्यागयांगोदावरींविनेति अथगुर्वाद्यस्तेयद्वर्ज्यंतद्वक्रगेगुरौ अतिचारगेपिगुरौवर्ज्यम् वात्स्यः

अस्तेवर्ज्यंसिंहनक्रस्थजीवेवर्ज्यंकेचिद्वक्रगेचातिचारे गुर्वादित्येविश्वघस्रेपिपक्षेप्रोक्तंतद्वद्दंतरत्नादिभूषाम् ४८

यात्रोद्वाहप्रतिष्ठांचगृहचूडाव्रतादिकम् वर्जयेद्यत्नतश्चैवजीवेवक्रातिचारगे अस्यापवादोराजमार्तंडे वक्रातिचारगेजीवेवर्जयेत्तदनंतरम् व्रतोद्वाहादिचूडायामष्टाविंशतिवासरान् दीपिकायाम् त्रिकोणजायाधनलाभराशौवक्रातिचारेणगुरुःप्रयातः यदातदाप्राहशुभंविलग्नंविवाहपाणिग्रहणंवसिष्ठः अथकेचिद्गुरुसहिते आदित्ये एकराशिगतौगुरुसूर्याविति यावत् गुर्वादित्येपिसर्वशुभकर्मवर्ज्यं शौनकः एकराशिगतौसूर्यजीवौस्यातांयदापुनः व्रतबंधविवाहादिशुभंकर्माखिलंत्यजेत् अथकेचिद्विश्वघस्रेपिपक्षे यस्मिन्पक्षेतिथिद्वयनाशः सत्रयोदशदिनःपक्षःसोतिनिंद्यः उक्तंच पक्षस्यमध्येद्वितिथावपेतांतदाभवेद्रौरवकालयोगःपक्षेविनष्टेसकलंविनष्टमित्याहुराचार्यवराःसमस्ताः तथा त्रयोदशदिनेपक्षेतदासंहरतेजगत् अपिवर्षसहस्रेणकालयोगःप्रकीर्तितइति तस्मिन्पक्षेशुभक

र्मवर्ज्यमित्याहुः चंडेश्वरः त्रयोदशदिनेपक्षेविवाहादिनकारयेत् गर्गादिमुनयःप्राहुःकृतेमृत्युस्तदाभवेत् उपनयनंपरिणयनंवेश्मारंभादिपुण्यकर्माणि यात्रांहि
क्षयपक्षेकुर्यान्नजिजीविषुःपुरुषः अथतद्वत्तेनप्रकारेणदंतरत्नादिभूषाम् दंताहस्तिदंतास्तत्संबंधिनींभूषाम् रत्नसंबंधिभूषांच आदिशब्दात् सुवर्णमणिसंबंधिनींच
भूषांवर्ज्यांप्रोचुः पूर्वस्मिन्निषेधकालेइत्यर्थः राजमार्त्तंडः यात्रांचूडांविवाहंश्रुतिविवरविधिंशंखसद्मप्रवेशप्रासादोद्यानहर्म्यंसुरनरभवनारंभविद्या
विधाने मौंजीबंधंप्रतिष्ठांमणिकनकरदाधारणंकुर्वतेयेमृत्युः सिंहस्थितेज्येगुरुदिनकरयोरेकराशिस्थयोश्चेति सिंहस्थगुरोरुपलक्षणत्वात् गुर्वस्तादा

सिंहेगुरौसिंहलवेविवाहोनेष्टोऽथगोदोत्तरतश्चयावत् भागीरथीयाम्यतटंहिदोषोनान्यत्रदेशेतपनेऽपिमेषे ४९

वपिप्रथमकर्त
व्यसुवर्णादिधारणनिषेधइत्यर्थः ४८ अथसिंहस्थगुरोःप्रकारत्रयेणपरिहारमुपेंद्रवज्रयाह सिंहेगुराविति अत्रप्रथममंशभेदेनपरिहारः सिंहस्थे-
गुरौसत्यपिसिंहांशेसत्र्यंशत्रयोदशांशे १३ २० भ्योनंतरंसत्र्यंशमंशत्रयम् ३ २० पंचमोनवांशःसिंहांशस्तत्रगुरौसतिविवाहोनेष्टः सिंहराशौतुसिंहां
शेयदाभवतिवाक्पतिः सर्वदेशेष्वयंत्याज्योदंपत्योर्निधनप्रदइतिराजमार्त्तंडोक्तेः अतोवशिष्टांशेषुविवाहादिशुभंभवतीत्यर्थः सिंहेपिभगदैवत्येगुरौपु
त्रवतीभवेत् अत्यंतसुभगासाध्वीधनधान्यसमृद्धिदेत्यादितत्रैवोक्तेः अथदेशभेदेनद्वितीयपरिहारउच्यते अथगोदोत्तरतः गोदावरीनदीतस्याउत्तर
तीरमारभ्यभागीरथीयाम्यतटंदक्षिणकूलंमर्यादीकृत्यगोदावरीगंगांतरालवर्तीयोदेशः तत्रसिंहस्थगुरुर्वर्ज्यःनान्यदेशे लल्लः गोदावर्युत्तरतीरेयावद्भागीरथीतटं

याम्यम् तत्रविवाहोनेष्टःसिंहस्थेदेवपतिपूज्ये अर्थाद्गोदावरीदक्षिणतटेभागीरथ्युत्तरदेशेचसिंहस्थगुरुदोषोनास्ति वसिष्ठः भागीरथ्युत्तरेकूलेगौतम्यादक्षिणेतथा विवाहोव्रतबंधोवासिंहस्थेज्येनदुष्यतीति अत्रविवाहव्रतबंधावेवननिषिद्धौ आभ्यामन्यानिशुभकर्माणिनिषिद्धान्येव अपवादस्यसंकोचाश्रयत्वादुपलक्षणायोगात् अथतृतीयःपरिहारः तपनेसूर्येमेषराशौविद्यमानेसतिवासिंहस्थगुरोर्दोषोनास्ति ज्योतिर्निबंधे मंगलानीहकुर्वीतसिंहस्थेवाक्पतिर्यदा भानौमेषगतेसम्यगित्याहुःशौनकादयइति ४९ सिंहराशिगतगुरुनिषेधवाक्यानांप्रतिप्रसववाक्यानांचनिर्गलितार्थमनुष्टुब्द्वयेनाह मघादिपंच

मघादिपंचपादेषुगुरुःसर्वत्रनिंदितः गंगागोदांतरंहित्वाशेषांघ्रिषुनदोषकृत् ५० मेषेर्केसन्व्रतोद्वाहौगंगागोदांतरेपिच सर्वःसिंहगुरुर्वर्ज्यःकलिंगेगौडगुर्जरे ५१ रेवापूर्वेगंडकीपश्चिमेचशोणस्योदग्दक्षिणेनीचईज्यः वर्ज्योनायंकौंकणेमागधेचगौडेसिंधौवर्जनीयःशुभेषु ५२ गोजांत्यकुंभेतरभेतिचारगोनोपूर्वराशिंगुरुरेतिवक्रितः

पादेष्वित्यादि ५० मेषेर्कइत्यादिच ५१ अथमकरस्थगुरोःप्रकारद्वयेनपरिहारंशालिन्याह रेवापूर्वेइति रेवायाःनर्मदायाःपूर्वदेशेगंडकीनद्याःपश्चिमेविभागेशोणनदस्यउत्तरदक्षिणभागेनीचईज्यः मकरस्थगुरुर्नवर्ज्यः लल्लः नर्मदापूर्वभागेतुशोणस्योत्तरदक्षिणे गंडक्याःपश्चिमेभागेमकरस्थोनदोषभाक् अन्यदेशेषुनिषिद्धस्तत्रनिषिद्धदेशानाह अयमिति अयं मकरस्थगुरुः कौंकणदेशेगौडदेशेसिंधुदेशेचशुभकृत्येषुवर्ज्योनिषिद्धः उक्तंच मागधेगौडदेशेचसिंधुदेशेचकोंकणे व्रतंचूडांविवाहंचवर्जयेन्मक

रेगुरौ एभ्योन्यदेशेषुमंगलमर्थान्मध्यमम् ५२ अथलुप्तसंवत्सरदोषंसापवादंवंशस्थवृत्तेनाह गोजांत्येति गौर्वृषः अजोमेषः अंत्योमीनः कुंभःप्रसिद्धः एभ्यइतरभेअन्यराशौमिथुनादौअतिचारगोगुरुः महातिचारेणसमागतः सन् पश्चात्क्रियद्भिर्दिनैः वक्रितः यदापूर्वराशिंनोएतिभुक्तराशिंनागच्छति तदाविलुप्ताब्दः लुप्तसंवत्सरउच्यते सलुप्तसंवत्सरः शुभकृत्ये अतिनिंदितः निषिद्धः उक्तंच अतिचारगतोजीवस्तंराशिंनैतिचेत्पुनः लुप्तः संवत्सरोज्ञेयोगर्हितः सर्वकर्मसु यदातुगोजांत्यकुंभेषुपूर्वराशेः सकाशान्महातिचारेणायातिपूर्वराशिंचनैतितदानलुप्तसंवत्सरदोषः गुरुः मेषेवृषेझषे

तदाविलुप्ताब्दइहातिनिंदितः शुभेषुरेवासुरनिम्नगांतरे ५३ पादोनरेखापरपूर्वयोजनैः फलैर्युतोनास्तिथयोदिनार्द्धतः

कुंभेयद्यतीचारणेगुरुः नतत्रकाललोपः स्यादित्याह भगवान्यमः दशमासभोगानंतरं अतिचारेपिलुप्ताब्ददोषोनास्ति च्यवनः मासान्दशैकादशवाप्रभुज्यराशेर्यदाराशिमुपैतिजीवः भुक्तेनपूर्वंचपुनस्तथापिनलुप्तसंवत्सरमाहुरार्याः पूर्वराशिभेदेनपरिहारमुक्त्वेदानींदेशभेदेनपरिहारमाह लुप्तसंवत्सरोरेवानर्मदासुरनिम्नगा भागीरथीतयोर्नद्योरंतरेऽतिनिषिद्धः उक्तंच लुप्ताब्ददोषोऽत्रिमतेनमध्येसोमोद्भवायाः सुरनिम्नगायाः इतिनारदेनसमसप्तकदोषोविवाहेवर्जितः समदृष्टिर्गुरोः शुक्रेतन्मासेतुप्रयत्नतः विवाहादिनकुर्वीतनर्मदातीरउच्यते ५३ अथवारप्रवृत्तिमुपजात्याह पादोनेति रेखाभूमध्यरेखापुरीराक्षसीदेवकन्याथकांचीत्याद्युक्ता लंकातआरभ्यसुमेरुमस्तकदत्तसूत्राधोवर्त्तिदेशास्तेमध्यरेखाब्देनोच्यंते यस्मिन्देशेवारप्रवृत्तिश्चिकीर्षितासदेशोरेखातः प्राक्पश्चि

मे यावंतियोजनानि भवंतितानिस्वचतुर्थांशोनानिकृत्वातावद्भिः पलैः तिथ्यः पंचदशघटिकायुक्तोनाः कार्याः यदामध्यरेखातः प्रत्यग्योजनानितदायुक्ताः यदातु प्राग्योजनानि तदोनाः कार्याः अथयद्दिनेवारप्रवृत्तिरिष्टातद्दिवसेयद्दिनार्द्धंचरपलयुतहीनानाडिकाः पंचचंद्राइत्यादिप्रकारसिद्धम् तस्माद्दिनार्द्धात्संस्कारविशिष्टाः पंचदशऊनाधिकाश्चेद्भवंतितदातद्विवरोद्भवैः पलैर्दिनार्द्धस्यसंस्कारविशिष्टपंचदशानांचयद्विवरं अंतरं तत्संबंधेनोत्थैरुत्पन्नैः पलैरूर्ध्वंतथाधोदिनपरस्यवारस्यप्रवेशः यदासंस्कारविशिष्टाः पंचदशादिनार्द्धतश्चेदूनाः स्युस्तदासूर्योदयादूर्ध्ववारप्रवृत्तिः यदासंस्कारविशिष्टाः पंचदशदिनार्द्धतोभ्यधिकास्तदासूर्योदयात्प्राक्वारप्रवृत्तिरित्यर्थः यथावाराणसीरेखाभिधानात् कुरुक्षेत्रात् प्राक्त्रिषष्टियोजनानि ६३ पादेनचतुर्थांशेनोनानि

ऊनाधिकास्तद्विवरोद्भवैःपलैरूर्ध्वंतथाधोदिनपप्रवेशनम् ५४ वारादेर्घटिकाद्विघ्नाः स्वाक्षाप्तच्छेषवर्जिताः

४७ १५ प्राग्योजनत्वादेतैः पलैरूनाः पंचदशघटिकाजाताः १४ १३ दिनार्द्धं १६ ३० अस्मान्न्यूनाइतिविवरम् २ १७ तेनाभिर्घटिकाभिः सूर्योदयादूर्ध्ववारप्रवृत्तिः यदादिनार्द्धं १३ १५ अस्मादधिका इतिविवरम् ० २३ एताभिर्घटीभिः सूर्योदयात्प्राक्वारप्रवृत्तिरित्यर्थः ५४ अथवारप्रवृत्तियोजनपुरःसरं कालहोरामनुष्टुभाह वारादेरिति वारप्रवृत्तिप्रकारेणयस्मिन्क्षणेवारप्रवृत्तिर्जातातत इष्टघट्योद्विगुणाः कार्याः ताद्विस्थानेस्थाप्याः तत्रपंचभिर्भक्तेयल्लब्धंतत्त्याज्यम् यच्छेषंतद्द्विगुणघटीमध्येवर्जितंकार्यम् एवंविधाघट्यः सैकाएकयुक्ताः कार्याः सप्तभिस्तष्टाअवशिष्टाः कालहोरेशाः स्युः तेदिनपात् वारात्क्रमात् गणनी

याः यथारविवारेइष्टघटिकाः ६ द्विगुणाः १२ पृथगस्ता ५ सशेष २ वर्जिता १० सैका ११ नगै ७ स्तष्टाशेषं ४ रविवारेक्रमाद्गणनयाचतुर्थोबुधस्तस्यहोराइत्यादि विवाहवृंदावने उदयमारभ्यहोराउक्ताः यथा तत्कालार्कन्यूनलग्नांशपिंडोभक्तः पंचखोणिभिर्भुक्तहोराः भास्वच्छुक्रज्ञेंदुसौरेज्यभौमाः संख्यायेरन्वारतस्तेनदीशाइति अनयोर्विषयविभागोवसिष्ठसंहितायाम् वारप्रवृत्तिविज्ञानंक्षणवारार्थमेवहि अखिलेष्वन्यकार्येषुदिनादिरुदयाद्भवेत् क्षणवारःकालहोरारूपः तदर्थेवारप्रवृत्तिः अन्यकार्येषुदिक्शूलादिषुतिथिवारप्रयुक्तेषुवायोगेषुचसूर्योदयादेववारोग्राह्यः ५५ अथकालहोराप्रयोजनंशालिन्याह वारेप्रोक्तमिति यत्कर्मयस्मिन्वारेप्रोक्तंतद्दिनस्यसदोषत्वादत्यावश्यककृत्येतस्यकालहोरायांकर्त्तव्यम् नारदः यस्यखेटस्ययत्कर्मवारेप्रोक्तंविधीयते ग्रहस्यक्षणवारेपितस्यतत्कर्मसर्वदा अत्रकेचित् यस्यवारे कर्मप्रोक्तंतस्यबलिनोनवांशेसूर्यश्चंद्रोवाचेत्तिष्ठतितदातत्कर्मकार्यमित्याहुः उक्तंच यस्यग्रहदिनेकर्मयत्किंचिदभिधीयते यस्यांशसंस्थितेचंद्रेसूर्येवातद्विधीयतइति अथ धिष्ण्येनक्षत्रेयत्कर्मवस्त्रपरिधानादिकमुक्तंतदत्यावश्यकत्वे अस्यधिष्ण्यस्यस्वामितिथ्यंशकेस्वामिनोमुहूर्त्तेकुर्यात् नारदः यस्मिन्नृक्षेतुयत्कर्मनिखिलंकथितंचयत् तद्दैवत्येतन्मुहूर्त्तेकार्यंयात्रादिकंतथेति मुहूर्त्तस्वामिनोविवाहप्रकरणेवक्ष्यंते क्षणेषुमुहूर्त्तेषुदिक्शूलाद्यंदिक्शूलंवारशूलंनक्षत्रशूलं

सैकास्तष्टानगैःकालहोरेशादिनपात्क्रमात् ५५ वारेप्रोक्तंकालहोरासुतस्यधिष्ण्येप्रोक्तंस्वामितिथ्यंशकेऽस्य कुर्याद्दिक्शूलादिविं
त्यंक्षणेषुनैवोल्लंघ्यःपारिघश्चापिदंडः ५६

चिंत्यंविचारणीयम् एवंपारिघोदंडः क्षणेषुमुहूर्त्तेषुनैवोल्लंघ्यःदिक्शूलादिकमखिलंपारिघदंडादिविज्ञेयमितिवसिष्ठोक्तेः ५६ अथमन्वादीन्युगादींश्चशार्दूलविक्रीडितेनाह मन्वाद्याइति सितेशुक्लपक्षे एतामन्वादयः मधौचैत्रेत्रितिथी तृतीयापौर्णिमे ऊर्जेकार्तिकेतिथिरवी पूर्णिमाद्वादश्यौ शुचौआषाढेदिक्तिथी दशमीपूर्णिमे ज्येष्ठे अंत्येफाल्गुनेचतिथिः उभयत्रपूर्णिमैव इषेआश्विनेनवमी तपसिमाघेअश्वाःसप्तमी सहस्येपौषेशिवाएकादशीभाद्रपदे अग्निस्तृतीयातु इतिपुनः नभसः श्रावणस्यकृष्णापक्षे अमावास्याअष्टमी अथयुगाद्याश्चत्वारः बाहुलराधयोः बाहुलःकार्तिकः राधोवैशाखः तयोः शुक्लपक्षेगोग्नी

मन्वाद्यास्त्रितिथीमधौतिथिरवीऊर्जेशुचौदिक्तिथीज्येष्ठेंत्येचतिथिस्त्विषेनवतपस्यश्वाःसहस्येशिवा भाद्रेग्निश्चसितेत्वमाष्टनभ
सःकृष्णेयुगाद्याःसितेगोग्नीबाहुलराधयोर्मदनदर्शौभाद्रमाघासिते ५७ इतिमुहूर्तचिंतामणौप्रथमंशुभाशुभप्रकरणंसमाप्तम् १

नवमीतृतीयेयुगादिः कार्तिकशुक्लनवमीकृतयुगादिः वैशाखशुक्लतृतीयात्रेतादिः भाद्रमाघासितेमदनदर्शौयुगादिःमदनस्त्रयोदशी दर्शअमावास्या भाद्रकृष्णात्रयोदशीकलियुगादिः माघकृष्णाअमावास्याद्वापरादिः अत्रशुक्लादयोमासाग्राह्याः कार्तिकेशुक्लनवमीचादिःकृतयुगस्यसा त्रेतादिर्माधवेशुक्लात्तृतीयापुण्यसंमिता कृष्णापंचदशीमाघेद्वापरादिरुदीरिता कल्पादिःस्यात्कृष्णापक्षेनभस्यैवत्रयोदशीतिनारदोक्तेः ५७ इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्त्तचिंतामणिटीकायांप्रमिताक्षरायांशुभाशुभप्रकरणंसमाप्तम् १ ७ ७ ७

अथनक्षत्रप्रकरणंव्याख्यायते तत्रादौनक्षत्रस्वामिनःशार्दूलविक्रीडितेनाह नासत्येति एतेनासत्यांतकादयः ऋक्षेशानक्षत्रेशाः क्रमात्स्युः १ अथध्रुवनक्षत्राणितत्कृत्यंचानुष्टुभाह उत्तरात्रयेति उत्तरात्रयंरोहिणीच एतानिनक्षत्राणि रविवारश्च ध्रुवसंज्ञानिस्थिरसंज्ञानिचेतिसंज्ञाद्वयम् एवमुत्तरत्रापिव्याख्येयम् ध्रुवनक्षत्रेषुस्थिरादिकर्मकार्यम् आदिग्रहणान्मृदुनक्षत्रोक्तंग्राह्यं वसिष्ठः मृदुवृंदेकथितान्यपिस्थिरवृंदेतानिकार्याणीति २ अथचरभानितत्कृत्यंचानुष्टुभाह स्वात्यादित्येति आदिशब्दाल्लघुनक्षत्रोक्तमपि ३ अथोग्रनक्षत्राणिचानुष्टुभाह पूर्वात्रयमिति आदिशब्दाद्दारुणनक्षत्रोक्तमपि ४ अथमिश्राण्यनुष्टुभाह विशाखेति आदिग्रहणादुग्रभोक्तमपि ५ अथलघुनक्षत्राण्यनुष्टुभाह हस्तेति शिल्पंवर्धकिविकृत्यादिकलानृत्यादिकाश्चतुःषष्टिः आदिशब्दाच्चरभोक्तमपि ६ अथमृदुनक्षत्राण्यनुष्टुभाह मृगांत्येति ७

अथनक्षत्रप्रकरणम् नासत्यांतकवन्हिधातृशशभृद्रुद्रादितीज्योरगाऋक्षेशाःपितरोभगोर्यमरवीत्वष्टासमीरःक्रमात् शक्राग्नीखलुमित्रइंद्रनिऋतिःक्षीराणिविश्वेविधिर्गोविंदोवसुतोयपाजचरणाहिर्बुध्न्यपूषाभिधाः १ उत्तरात्रयरोहिण्योभास्करश्चध्रुवंस्थिरम् तत्रस्थिरंबीजगेहशांत्यारामादिसिद्धये २ स्वात्यादित्येश्रुतेस्त्रीणिचंद्रश्चापिचरंचलं तस्मिन्गजादिकारोहोवाटिकागमनादिकम् ३ पूर्वात्रयंयाम्यमघेउग्रंक्रूरंकुजस्तथा तस्मिन्घाताग्निशाठ्यानिविषशस्त्रादिसिद्ध्यति ४ विशाखाग्नेयभेसौम्योमिश्रंसाधारणंस्मृतं तत्राग्निकार्यंमिश्रंचवृषोत्सर्गादिसिद्ध्यति ५ हस्ताश्विपुष्याभिजितःक्षिप्रंलघुगुरुस्तथा तस्मिन्पण्यरतिज्ञानभूषाशिल्पकलादिकम् ६ मृगांत्यचित्रामित्रर्क्षंमृदुमैत्रंभृगुस्तथा तत्रगीतांबरक्रीडामित्रकार्यविभूषणं ७

अथतीक्ष्णभान्यनुष्टुभाह मूलेति अभिचारः कर्मणांभयंकरकृत्यंमारणादि पशुदमः पशुशिक्षा आदिशब्दाद्बंधनादिकंस्थिरंच ८ अथाधोमुखोर्ध्वमुखतिर्यङ्मुखनक्षत्राणींद्रवज्रयाह मूलाहीति मूलंअहिः आश्लेषामिश्रंकृत्तिकाविशाखे उग्रंपूर्वात्रयमघाभरण्यः एतानिनवभानि अधोमुखानिज्ञेयानि आर्द्रापुष्यःश्रवणत्रयंरोहिण्युत्तरात्रयंचनवभान्यूर्ध्वमुखानिमैत्राणि चित्रारेवत्यनुराधाः हस्तस्वातीपुनर्वसुज्येष्ठा अश्विनीएतानिनवभानितिर्यङ्मुखानि एषुअधोमुखोर्ध्वमुखतिर्यङ्मुखेषुभेषुईदृशंकृत्यं अधोमुखोर्ध्वमुखतिर्यङ्मुखकृत्यंसत्भवति गरुडपुराणे भरणीकृत्तिकाश्लेषामघामूलविशाखिकाः तिस्रःपूर्वास्तथाचैव अधोव

मूलेंद्रार्द्राहिभंसौरिस्तीक्ष्णंदारुणसंज्ञकम् तत्राभिचारघातोग्रभेदाःपशुदमादिकं ८ मूलाहिमिश्रोग्रम
धोमुखंभवेदूर्ध्वास्यमार्द्रेज्यहरित्रयंध्रुवं तिर्यङ्मुखंमैत्रकरानिलादितिज्येष्ठाश्विभानीदृशकृत्यमेषुसत् ९

क्त्राः प्रकीर्तिताः एषुवापीतडागादिकूपभूमितृणानिच देवागारस्यखननंनिधानखननंतथा गणितंज्योतिषारंभंखनीबिलप्रवेशनम् कुर्यादधोगतान्येवकार्याणिवृषभध्वज रोहिण्यार्द्रातथापुष्योधनिष्ठाचोत्तरात्रयम् वारुणंश्रवणंचैवनवचोर्ध्वमुखास्तथा एषुराज्याभिषेकंच पट्टबंधंचकारयेत् ऊर्ध्वमुखान्युच्छ्रितमुखानिसर्वाण्येषुचकारयेत् रेवतीचाश्विनीचित्रास्वातीहस्तःपुनर्वसुः अनुराधामृगोज्येष्ठाएतास्तिर्यङ्मुखाःस्मृताः गजोष्ट्राश्वबलीवर्ददमनंमाहिषस्यच बीजानांवपनंकुर्याद्गमनागमनादिकम् चक्रयंत्ररथादीनांनौकादीनांप्रवाहणम् पार्श्वेषुयानिकार्याणिकुर्यादेषुचतान्यपि इदंच

नक्षत्रविशेषविहितानांकर्मणामावश्यकर्त्तव्यत्वेमुहूर्त्तलब्धौसत्यांकर्मणः अधोमुखाद्याकारंज्ञात्वातत्तन्नक्षत्रेषुतानिकर्माणिकार्याणि यानिचसर्वथानोक्ता
निबिलप्रवेशादीनितान्येष्वेवनक्षत्रेषुकार्याणीत्येतदर्थमुक्तम् ९ अथप्रवालादिधारणमुहूर्त्तंवसंततिलकेनाह पौष्णध्रुवेति रेवत्यादिनक्षत्रेषुतथारिक्ताति
थिशनिचंद्रभौमवर्जितेऽन्हिदिवसेप्रवालंविद्रुमंशंखः शंखवलयादिवस्त्रंश्वेतम् एतानिधार्याणि रक्तंमंजिष्ठादिरंगेणरंजितंवस्त्रंभौमवारेपिधार्यम् अथसु
भगासभर्त्तृकाध्रुवादितियुगेरोहिण्युत्तरात्रयेषु अदितियुगेपुनर्वसौपुष्येचप्रवालादिकंनदध्यात् क्वचिच्छततारायांस्नानमपिनिषिद्धम् उक्तंच रोहिणी

पौष्णध्रुवाश्विकरपंचकवासवेज्यादित्येप्रवालरदशंखसुवर्णवस्त्रम् धार्यंविरिक्तशनिचंद्रकुजेन्हिरक्तंभौमेध्रुवादितियुगेसुभगानद
ध्यात् १० वस्त्राणांनवभागकेषुचचतुष्कोणेऽमराराक्षसामध्यत्र्यंशगतानरास्तुसदशेपाशेचमध्यांशयोः दग्धेवास्फुटितेऽबरेनवतरेपं
कादिलिप्तेनसद्रक्षोंशेनृसुरांशयोः शुभमसत्सर्वांशकेप्रांततः ११
गुरुपुनर्वसूत्तरेयाबिभर्त्तिनववस्त्रविभूषणम् सानयोषिदवलंबतेपतिं
स्नानमाचरतिवारुणेपियाइति १० अथनवधाविभक्तस्यवस्त्रस्यदग्धादिदोषेशुभाशुभफलंशार्दूलविक्रीडितेनाह वस्त्राणामिति वस्त्राणांनवभागाः
कार्याः कोणचतुष्टयेअमरादेवाः स्थाप्याः राक्षसामध्यगतांशगताज्ञेयाः नराः दशासहितेपाशेचपुनर्मध्ययोरंशयोर्ज्ञेयाः तत्रचेद्रक्षोंशेनवतरेनूतनेवस्त्रे
दैवाद्दग्धेअग्निस्पृष्टे स्फुटितेपाषाणाद्याघातादिभिर्निहते पंकेनकर्दमेन आदिशब्दात्गोमयादिभिरुपहतेसतितद्वस्त्रंनसत् शुभफलजनकंनभवतीत्यर्थः

नृसुरांशयोः एवंवस्त्रदाहादिके सति शुभं कल्याणं स्यात् अथ सर्वांशके राक्षसमनुष्यदेवांशकेषु प्रांततः प्रांतभागे असत् अनिष्टफलगमकम् इदं सर्वं शय्यापादुकास्वपि ज्ञेयम् श्रीपतिः कज्जलकर्दमगोमयलिप्ते वाससि दग्धवति स्फुटिते च चिंत्यमिदं नवधा विहितेऽस्मिन्निष्टमनिष्टफलं च सुधीभिः अत्र राक्षसांशे ध्वजच्छत्रादिसदृशीच्छेदाकृतिः शुभफला ज्ञेया देवमनुष्यांशेपि काकोलूकसदृशी छेदाकृतिरशुभफलदा कश्यपः शंखवस्त्रांबुजच्छत्रध्वजतोरणसन्निभा श्रीवत्ससर्वतोभद्रनद्यावर्त्तगृहोपमा वर्धमानस्वस्तिकेभमृगकूर्मझषाकृतिः छेदाकृतिर्दैत्यभागेप्यायुरर्थप्रदा नृणाम् खरोष्ट्रोलूककाकादिजंबूकम्वट्टकोपमा त्रिकोणसूर्या

विप्राज्ञयातथोद्वाहे राज्ञा प्रीत्यार्पितं च यत् निंद्येपि धिष्ण्ये यवारादौ वस्त्रं धार्यं जगुर्बुधाः १२ राधामूलमृदुध्रुवर्क्षवरुणाक्षिप्रैर्लतापादपारोपो योनृपदर्शनं ध्रुवमृदुक्षिप्रभश्रवोवासवैः तीक्ष्णोग्रांबुपभेषु मद्यमुदितं क्षिप्रांत्यवन्हींदुभादित्येंद्रांबुपवासवेष्वहिगवां शस्तः क्रयो विक्रयः १३

कृतयो देवभागेप्यशोभनाः निंदितं वसनं दद्याद्द्विजेभ्यः स्वर्णसंयुतं आशिषोवाचनं कृत्वा त्वन्यद्वस्त्रं च धारयेदिति ११ अत्र कश्चिद्दुष्टदिनेपि वस्त्रपरिधानमनुष्टुभाह विप्राज्ञयेति धिष्ण्ये नक्षत्रे वारादौ वारतिथियोगादौ व्यतीपातभद्रादिदुष्टयोगे निंद्येपि यद्वस्त्रं ब्राह्मणानुज्ञया तथोद्वाहे राज्ञा प्रीत्या संतोषेणार्पितं दत्तं वस्त्रं धार्यमिति बुधा जगुः १२ अथ पादपारोपण राजदर्शन मद्य गोविक्रयमुहूर्तान् शार्दूलविक्रीडितेनाह राधामूलेति राधा विशाखा एतदादिचतुर्दशनक्षत्रैर्लतानां वल्लीनां पादपानां वृक्षाणां चारोपो वापः कार्यः अथ राजदर्शनं ध्रुवमृदुक्षिप्रश्रवोवासवैः त्रयोदशभैः कार्यम् अथ मद्यं मद्यारंभः तीक्ष्णोग्रांबुपभेषु नवनक्षत्रेषु उदितः कथितः

अथगवांक्रयोमूल्येनपरस्माद्ग्रहणं विक्रयोमूल्यग्रहणपूर्वकंदानंक्षिप्रांत्यवन्हींदुभादित्येंद्रांबुपवासवेषुहिनवनक्षत्रेषुशस्तःप्रशस्तः अत्रभीमपराक्रमेण पंचदशभानि अभिहितानि हस्तेनुराधात्रितयेसपौष्णेमृगेचपूर्वाश्विविशाखभेषु पुष्येधनिष्ठाद्वितयेदितीशेगवांक्रयंविक्रयमामनंति १३ अथपशूनांरक्षामुहूर्त्तंस्थितिनिवेशनिषेधमुहूर्तंचेंद्रवज्रयाह लग्नेशुभेइति शुभेशुभस्वामिकेलग्ने अष्टमशुद्धिसंयुते शुभपापाक्रांताष्टमभावरहितेसतिपशूनांरक्षारक्षणंप्रवेशादिकंचसत् तथास्वीययोनिनक्षत्रेचरभेचसत् यथाऽश्वानांयोनिभंअश्विनीशततारकेतत्रचतुष्पदानांरक्षाशस्ता तीक्ष्णेषुपशूनांदम

लग्नेशुभेचाष्टमशुद्धिसंयुतेरक्षापशूनांनिजयोनिभेचरे रिक्ताष्टमीदर्शकुजश्रवोध्रुवत्वाष्ट्रेषुयानंस्थिति वेशनंनसत् १४
भैषज्यंसल्लघुमृदुचरेमूलभेद्व्यंगलग्नेशुक्रेंद्वीज्येविदिचदिवसेचापितेषांरवेश्च

नंवरंस्यात्पशुपोषणमितिवचनात् ४१ १४ ऽष्टमी८दर्शोमावास्या कुजोभौमः श्रवःश्रवणं ध्रुवाण्युत्तरात्रयरोहिण्यः त्वाष्ट्रंचित्राएषुपशूनांयानंगृहाद्बहिर्निः सारणंस्थितिर्गोष्ठादिवेशनंनसत् शुभंनव्यवहारोच्चये पूर्वात्रयेधनिष्ठेंद्रपौष्णेसौम्यविशाखयोः आश्लेषायामथाश्विन्यांयात्रासिद्धिश्चतुष्पदामिति १४ अथौषधसूच्योर्मुहूर्त्तंमंदाक्रांतयाह भैषज्यंसदिति भैषज्यंऔषधंप्रारब्धंभक्षितंचसत् लघुमृदुचरनक्षत्रेमूलेचद्व्यंगलग्नेद्विस्वभावराशिषुमिथुनकन्याधनुर्मीनेषु लग्नगतेषुसत्सुशुक्रेंद्वीज्यबुधेषुद्विस्वभावलग्नस्थेषुसत्सुचपुनस्तेषांशुक्रेंद्वीज्यबुधानांरवेश्चदिवसेवारेसन्तिथौरिक्तामारहिततिथौभैषज्यंसत् शुभंस्यात् दीपिकायां

द्व्यंगोदयेगुरुबुधेंदुसितेप्रशस्तेतेषांरवेश्चसुविधौसुतिथौसुयोगे भेषूग्रपन्नगविशाखशिवेतरेषुजन्मर्क्षविष्टिरहितेषुकृतःशुभायइति अथरिःफल्गुनमृतिगृहेलग्नात् द्वादशसप्तमाष्टमगृहेषु शुद्धेषुशुभपापग्रहरहितेषुसत्सुऔषधंतुवर्षफलप्रश्नादिनाआयुर्निश्चयेनचसत् द्यूनशत्रुनिधनव्ययशुद्धौसद्गृहेषुनितरांबलवत्सुआयुषश्चहितकारिणियोगेकीर्तितानियतमौषधसेवेतिश्रीपद्मभट्टोक्तेः अथजनेर्भेजन्मनक्षत्रेनोभैषज्यंसत् जन्मनक्षत्रगतश्चंद्रः प्रशस्तःसर्वकर्मसु क्षौरभेषजवादाध्वकेतनेषुविवर्जयेत् इतिवचनात् अथसूचीकर्मसूच्याःसंबंधिकर्मघटनसीवनादि अदिति वसु भत्वाष्ट्रमित्राश्वि-

शुद्धेरिःफल्गुनमृतिगृहेसत्तिथौनोजनेर्भेसूचीकर्माप्यदितिवसुभत्वाष्ट्रमित्राश्विपुष्ये १५ क्षयर्क्षेविक्रयोनेष्टोविक्रयर्क्षेक्रयोपिन
पौष्णांबुपाश्विनीवातःश्रवश्चित्राक्रयेशुभाः १६

पुष्येनक्षत्रेसत् स्यात् व्यवहारोच्चये अदितिर्वासवंत्वाष्ट्रमैत्रभेंदववाजिनः सूचीकर्मतनुत्राणमेभिर्ऋक्षैः प्रशस्यतइति १५ अथान्यदनुष्टुभाह क्रयर्क्षइति क्रयर्क्षेवक्ष्यमाणक्रयनक्षत्रेविक्रयोनकार्यः तथाविक्रयनक्षत्रेक्रयोपिनकार्यः दीपिकायां यमाहिशक्राग्निविशाखपूर्वानेष्टाः क्रयेविक्रयणेतिशस्ताः पौष्णाश्विचित्रामृतविष्णुवाताः शस्ताःक्रयेविक्रयणेनिषिद्धाइति ननुयदायेनक्रयः कर्तव्यः तदाअन्येनविक्रयः कर्तव्यः तत्रक्रयविक्रयनक्षत्राणांमहाभेदादुभयविधमुहूर्त्तानुपपत्तिः उच्यते विक्रेतायदामुहूर्त्तेविक्रयार्थंगृह्यतेततदावस्तुपृथक्क्रियतेतत्कर्मविक्रयशब्दवाच्यम् यदाक्रयिणाक्रयार्थंमुहूर्तः प्रार्थ्यतेतदाविक्रेत्रेमूल्यद्रव्यंदत्त्वापृथक्कृतंविक्रेतृवस्तुग्राह्यंतत्क्रयशब्दवा

च्यमिति मत्वायथाकथंचित्समाधेयं तत्रक्रयमुहूर्तः रेवतीशततारा अश्विनीस्वातीश्रवणाचित्राएतानिभानिक्रयेशुभानिविक्रयेनिषिद्धानिच १६ अथविक्रयविपण्योर्मुहूर्तंशार्दूलविक्रीडितेनाह पूर्वाद्वीशेति द्वीशांविशाखा पूर्वादिनक्षत्रेषुकेंद्रेषुप्रथमचतुर्थसप्तमेषुद्वितीयेकोणेनवपंचमेशुभैः सद्भिः षट्त्र्यायेषुपापग्रहैः सद्भिः घटतनुंकुंभलग्नंविनात्यन्त्कासत्तिथौरिक्तामारहिततिथौविक्रयः सन्शुभोज्ञेयः अथविपणिः पण्यवीथिकागृहे स्थित्वाक्रयविक्रयाख्यंकर्मरिक्तातिथिभौमवारकुंभलग्नानिवर्जयित्वान्येषुतिथिवारलग्नेषुमित्राणिमृगरेववतीचित्रानुराधाः ध्रुवाणिरोहिण्युत्तरात्रयंक्षिप्राणिहस्ताश्विपुष्याः एतैर्भैः लग्नेचंद्रस्थितेमूर्तौचंद्रेसितेचसतिव्ययाष्टरहितैः पापग्रहैः सद्भिः शुभैर्द्व्यायखेद्वितीयैकादशदशमेषुसद्भिर्विपणिः शुभास्यात् १७

पूर्वाद्वीशकृतानुसार्पयमभेकेंद्रत्रिकोणेशुभैः षट्त्र्यायेष्वशुभैर्विनाघटतनुंसन्विक्रयः सत्तिथौ रिक्ताभौमघटान्विनाच्चविपणिर्मित्रध्रुव
क्षिप्रभैर्लग्नेचंद्रसितेव्ययाष्टरहितैः पापैःशुभैर्द्व्यायखे १७ क्षिप्रांत्यवस्विंदुमरुज्जलेशादित्येष्वरिक्तारदिनेप्रशस्तं

अथाश्वगजमुहूर्त्तमिंद्रवज्रयाह क्षिप्रांत्येति क्षिप्रादिनक्षत्रेषुरिक्ताभौमव्यतिरिक्तदिनेवाजिकृत्यमश्वानांक्रयविक्रयशिक्षास्थानाभरणादिकार्यंप्रशस्तंस्यात् श्रीपतिः पुष्यश्रविष्ठाश्विनिसौम्यभेषुपौष्णानलादित्यकराह्वयेषु सवारुणर्क्षेषुबुधैः स्मृतानिसर्वाणिकार्याणितुरंगमाणांअश्वारोहणेचक्रं अश्वाकारंलिखेच्चक्रंसाभिज्ञानिविन्यसेत् स्कंधेतुसूर्यभात्पंचपृष्ठेचदशभानिच पुच्छेद्वेस्थापयेत्प्राज्ञश्चतुष्पादेचतुष्टयं उदरेविन्यसेत्पंचमुखेद्वेतुरगस्यच अर्थलाभोमुखेसम्यग्वाजीनश्यतिचोदरे चरणस्थेरणे-

भंगः पुच्छेपत्नीविनश्यति अर्थसिद्धिर्भवेत्पृष्ठेस्कंधेस्कंधपतिर्भवेदिति अथविद्वान् ज्ञातामृदुक्षिप्रचरनक्षत्रेषुरिक्तामाभौमवर्जितदिनेचहस्तिकृत्यंगजानांकार्यं क्रयविक्रयभूतादिकुर्यात् वसिष्ठः हस्तत्रयेसौम्यहरित्रयेचपौष्णद्वयेपुष्यपुनर्वसौच मैत्रेचसर्वाण्यपिकुंजराणांकर्माणिशस्तान्यखिलानियानीति १८ अथभूषणघटनमुहूर्त्तंशार्दूलविक्रीडितेनाह स्याद्भूषेति त्रिपुष्करदिनलक्षणं भद्रातिथीरविजेत्योदिनावक्ष्यति एवंविधेत्रिपुष्करदिनेचरक्षिप्रध्रुवनक्षत्रेषुभूषाघटनमाभरणघटनंशुभंस्यात् वसिष्ठः क्षिप्राचलचरऋक्षेरिक्तामावर्जितेषुदिवसेषु निखिलेष्वपिवारेष्वपित्रिपुष्करेभूषणंकार्यं अथतद्भूषणंरत्नयुतंमा

स्याद्वाजिकृत्यंत्वथहस्तिकार्यंकुर्यान्मृदुक्षिप्रचरेषुविद्वान् १८ स्याद्भूषाघटनंत्रिपुष्करचरक्षिप्रध्रुवेरत्नयुक्तत्तीक्ष्णोग्रविहीनभेरविकु
जेमेषालिसिंहेतनौ तन्मुक्तासहितंचरध्रुवमृदुक्षिप्रेशुभेसत्तनौतीक्ष्णोग्राश्विमृगेद्विदैवदहनेशस्त्रंशुभंघट्टितम् १९

णिक्यादियुतंचेत्तदातीक्ष्णोग्रविहीनभे तीक्ष्णानिमूलज्येष्ठार्द्राश्लेषाख्यानिउग्राणिपूर्वात्रयमघाभरण्यः एतद्व्यतिरिक्तेष्वष्टादशनक्षत्रेषुतथारविभौमवारेपिकार्यं तथामेषवृश्चिकसिंहलग्नेषुच वसिष्ठः स्थिरसाधारणचरभेलघुमैत्रेष्वर्ककुजवारे तेषामेवविलग्नेमाणिक्यमयभूषणंकार्यमिति कर्कवृषतुलालग्नेषुकार्यमित्यपिज्ञेयम् वसिष्ठः क्षिप्रमृदुध्रुवचरभेशशिसितयोर्वासरेषुतल्लग्ने मुक्ताफलरजतमयंभूषणमखिलंसवज्रकंकार्यम् अथतीक्ष्णानि मूलज्येष्ठार्द्राश्लेषाः उग्राणिचपूर्वात्रयभरणीमघाः अश्विनीमृगौ द्विदैवंविशाखादहनः कृत्तिका एषुनक्षत्रेषुघट्टितंशस्त्रंशुभंस्यात् अदितिर्वासवत्वष्टामैत्रमैंद

ववाजिनः सूचीकर्मतनुत्राणमेभिर्ऋक्षैःप्रशस्यतइतिऋक्षोच्चयोक्तेः अथसुवर्णरूप्यादिपात्रेभोजनमुहूर्त्तमाह वसिष्ठः लघुमैत्रध्रुवचरभेसितेंदुबुधजीववारेषु हेमरजतादिभाजनभोजनमारोग्यामृतयोग्येषु १९ अथमुद्रापात नमुहूर्त्तंवस्त्रक्षालनमुहूर्त्तंच स्रग्धरयाह मुद्राणामिति ध्रुवमृदुचरक्षिप्रसंज्ञकैर्नक्षत्रैः कृत्वाराजमुद्रांकितसुवर्णरूप्यादि निष्पादनंमुद्रापातनमित्युच्यते टंकसालेतिभाषया वींदुसौरे घस्रेचंद्रशनैश्चरवर्जितवारे तथापूर्णाजयाख्ये पूर्णाःपंचमीदशमीपूर्णिमाः जयास्तृतीयाष्टमीत्रयोदश्यः एतासुतिथिष्वित्यर्थःशुभंस्यात् तथागुरुशुक्रास्तेनशुभम् विलग्नेशुभैः लग्नेशुभग्रहैः सद्भिरित्यर्थः उक्तंच मृदु

मुद्राणांपातनंसद्ध्रुवमृदुचरभक्षिप्रभैर्वींदुसौरेघस्रेपूर्णाजयाख्येनचगुरुभृगुजास्तेविलग्नेशुभैःस्यात् वस्त्राणांक्षालनंसद्वसुहय
दिनकृत्पंचकादित्यपुष्येनोरिक्तापर्वषष्ठीपितृदिनरविजज्ञेषुकार्यंकदापि २०

ध्रुवक्षिप्रचरेषु भेषु योगेप्रशस्ते शनिचंद्रवर्ज्ये वारेतिथौ पूर्णजयाह्वयेच मुद्राप्रतिष्ठाशुभदानराणाम् गुर्वस्तेवासितास्तेवामुद्राणांघटनंक्वचित् क्रूरग्रहर्क्षांशलग्नेनकार्यंभूतिमिच्छता अथवसुधनिष्ठाहृयोश्विनीदिनकृत्हस्तः तस्मात्पंचकेहस्ताचित्रास्वातीविशाखानुराधासु आदित्यंपुनर्वसुः पुष्येवस्त्राणांक्षालनंरजकाधीनार्थंदानंसत् शुभंस्यात् रिक्तापूर्वाणि पूर्वोक्तानितिथिप्रकरणे षष्ठीपितृदिनंश्राद्धदिनंएतेषुरविजज्ञेषुशनिबुधवारेषुकदापिवस्त्रक्षालनंनोकार्यम् २० अथखड्गादिधारणंशय्याद्युपभोगमुहूर्त्तंचस्रग्धरयाह संधार्याइति विरिक्ते रिक्तावर्जितशुक्रबृहस्पतिरविवारेतथामैत्रध्रुवलघुसंज्ञकनक्षत्रसहितपुनर्वसुज्येष्ठाविशाखानक्षत्रेषु-

कुंतादयः संधार्याः कुंतोभल्लः वर्मकवचम् इषवोबाणाअस्यते अनेनेतीष्वसनंधनुः शरोबाणः खड्गः असिपुत्री छुरिकासन्नाहोपीतिकेचित् तथास्थिराख्ये वृषसिंहवृश्चिककुंभाख्येलग्ने चंद्रेअपिशब्दात् लग्नेपिशुभग्रहदृष्टेशुभैः केंद्रगैःसद्भिः कुंतादिधारणंहितम् ऋक्षोच्चये पुष्येचादितिचित्रपद्मतनयेशक्रोत्तरारेवतीवाजीहस्तविशाखमित्रसहितेभानौगुरौभार्गवे कुंभेकीटगृहेवृषेमृगपतौचंद्रेशुभैर्वीक्षितेसन्नाहंशर खड्गकुंतछुरिकाधार्यानृपाणांहितेति यत्तुदीपिकायाम् मूलेंदुपूर्वात्रययाम्यपित्र्यशक्राश्विसार्पानलभ्शूलिनश्च शस्त्रादिसंधारणमेषुकुर्यात्तिथौविलग्नेचशुभेशुभाहे इति तदासन्नयुद्धादिविषयम् अथध्रुवमृ-

संधार्याःकुंतवर्मेष्वसनशरकृपाणासिपुत्र्योविरिक्ते शुक्रेज्यार्केन्हिमैत्रध्रुवलघुसहितादित्यशाक्रद्विदैवे स्युर्लग्नेहिस्थिराख्येशशिनिच
शुभदृष्टेशुभैःकेंद्रगैःस्याद्भोगःशय्यासनादेर्ध्रुवमृदुलघुहर्यंतकादित्यइष्टः २१ अंधाक्षंवसुपुष्यधातृजलभद्वीशार्यमांत्याभिधंमंदाक्षंरविविश्व
मैत्रजलपाश्लेषाश्विचांद्रंभवेत् मध्याक्षंशिवपित्रजैकचरणत्वाष्ट्रेंद्रविध्यंतकंस्वक्षंस्वात्यदितिश्रवोदहनभाहिर्बुध्न्यरक्षोभगम् २२

दुलघुनक्षत्रेषु हरौश्रवणे अंतकेभरण्यांआदित्येपुनर्वसौ एषुशय्यासनादेः शय्याखट्वादिरूपा आसनंपीठमृगत्वगादि आदिशब्दात्पादुकातेषामुपभोगः इष्टःहितः दीपिकायाम् मैत्रेंदुपुष्ययमभादितिवज्रिचित्राहस्तोत्तरात्रयहरीज्यविधातृभानि एतेष्वतीवशयनासनपादुकानांसंभोगकार्यमुदितंमुनिभिः शुभाहे इति २१ अथांधादिनक्षत्राणिशार्दूलविक्रीडितेनाह अंधाक्षमिति धातारोहिणीविधिरभिजित् दहनभंकृत्तिकाभगः पूर्वाफाल्गुनीअन्यत्स्पष्टम् २२ ५ ६ ६

अंधादिनक्षत्राणांफलमनुष्टुभाह विनष्टार्थइति अंधनक्षत्रेषुविनष्टस्यापहृतस्यार्थस्यलाभः शीघ्रंभवति मंदनक्षत्रेषुविनष्टार्थस्यप्रयत्नतोलाभोभवतिमध्येमध्यनक्षत्रेविनष्टार्थस्यदूरंस्वनगरादतीवदूरदेशेश्रवणंत्वदीयद्रव्यममुकेनहृतं अमुकस्थलेतिष्ठतीतिलोकवार्त्ताभवतिलब्धिस्तुनास्ति सुलोचननक्षत्रेषुश्रुत्यासीनश्रवणमपिलब्धिरपिनभवतीत्यर्थः २३ अथधनप्रयोगेनिषिद्धनक्षत्राण्यनुष्टुभाह तीक्ष्णेति एतैस्तीक्ष्णादिनक्षत्रैर्यद्द्रव्यंसुवर्णादिदत्तंकालांतरंविनादत्तंनस्वसत्तापरित्यागेननिवेशितंस्वेष्टसमीपेप्रत्ययार्थंस्थापितं प्रयुक्तंकालांतररीतिपुरःसरम् कस्मैचिद्दत्तंविनष्टंचौरादिनाहृतं स्वयमेववाक्वचित्त्यक्तंद्रव्यंद्रव्यनिश्चयेन

विनष्टार्थस्यलाभोंऽधेशीघ्रंमंदेप्रयत्नतः स्याद्दूरेश्रवणंमध्येश्रुत्यासीनसुलोचने २३ तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यंदत्तंनिवेशितं प्रयुक्तंच
विनष्टंचविष्ट्यांपातेचनाप्यते २४ मित्रार्कध्रुववासवांबुपमघातोयांत्यपुष्येंदुभिः पापैर्हीनबलैस्तनौस्मरगुरौज्ञेवाभृगौरवेविधौ

कदापिनाप्यतेतथाविष्ट्यांभद्रायांपातेव्यतीपातेमहापातेवाहृतंद्रव्यंनाप्यते चकारात् ग्रहणेपि वसिष्ठः ध्रुवोग्रसाधारणदारुणर्क्षेनिक्षिप्तसमर्थंत्वथवाप्रनष्टम् चौरैर्हृतंदत्तमुपप्लुवंवाविष्ट्यांचपातेननलभ्यतेतदिति अत्रेदमनुसंधेयम् तीक्ष्णमिश्रादिपंचदशभेषुमध्येरोहिण्यार्यमविश्वजलभहीशेषुदत्तनिवेशितप्रयुक्तद्रव्यस्यैवाऽप्राप्तिः चौरापहृतस्यस्वतोगतस्यवाधनस्यलाभएव तेषांरोहिण्यादीनांमध्यलोचनभेषुपाठसामर्थ्यादितिभावः २४ अथजलाशयखनननृत्यारंभयोर्मुहूर्त्तंशार्दूलविक्रीडितेनाह मित्रार्केति अनुराधादित्रयोदशनक्षत्रैःसद्भिःपापग्रहैर्हीनबलैर्बलरहितैःसद्भिः तनौलग्नेसुरगुरौसतिबुधेवासतिरवेदशमेभृगौ

शुक्रेसति आप्येजलराशौविधौसतिसर्वतोयाशयानांवापीकूपतडागादीनांतोयाधाराणांखननंहितंस्यात् आप्यांबुपांत्यपितृमित्रवसूत्तरार्केकेंद्रीज्यभेषुखननंस-
लिलाशयानामितिव्यवहारतत्वोक्तेः श्रीपतिः लग्नेजीवेज्ञेथवादुर्बलैश्चक्रूरैः शुक्रेवापिमेषूरणस्थे आप्येचंद्रेसर्वतोयाशयानामारंभाःस्युःसिद्धयेनिर्विकल्पमिति
अथनृत्यारंभः तैःप्रागुक्तैर्नक्षत्रैर्व्यंभोमघैः पूर्वाषाढामघारहितैः सेंद्रभैर्ज्येष्ठासहितैः मित्रार्कध्रुववासवांबुपांत्यपुष्येंदुज्येष्ठानक्षत्रैः नृत्यारंभः शुभः स्यात् शुभैर्न-
हिबुकेचतुर्थस्थानेलग्नेज्ञेसति अब्जेचंद्रेज्ञराशौमिथुनकन्यास्थेसतीत्यर्थः २५ अथसेवकस्यस्वामिसेवायांमुहूर्तंशालिन्याह क्षिप्रेति क्षिप्राणिहस्ताभिजि

आप्येसर्कजलाशयस्यखननंव्यंभोमघैःसेंद्रभैस्तैर्नृत्यंहिबुकेशुभैस्तनुगृहेज्ञेब्जेज्ञराशौशुभं २५ क्षिप्रेमैत्रेविसितार्केज्यवारेसौम्येलग्ने
कैकुजेवारबलाभे योन्योर्मैत्र्यांराशिपोश्चापिमैत्र्यांसेवाकार्यास्वामिनःसेवकेन २६ स्वात्यादित्यमृदुद्विदैवगुरुभेकर्णत्रयाश्वेचरेलग्नेधर्म
सुताष्टशुद्धिसहितेद्रव्यप्रयोगःशुभः

दश्विपुष्याःमैत्राणिमृगरेवतीचित्रानुराधाःएतेषुनक्षत्रेषुबुध शुक्रसूर्यगुरुवारेसौम्येशुभग्रहेलग्नगेसति अर्केभौ
मेवारबलाभेदशमेएकादशेचस्थितेसतिसेवकेनस्वामिनःसेवाकार्या तत्रस्वामिसेवकनक्षत्रयोन्योर्मैत्र्यांच पुनःराशिपोः सेव्यसेवकयोराशिस्वामिनोर्मैत्र्यांप्रीतौस
त्यांसेवाकार्या अन्यथानकार्या २६ अथद्रव्यप्रयोगऋणग्रहणमुहूर्तंशार्दूलविक्रीडितेनाह स्वात्यादित्येति स्वात्याद्येकादशनक्षत्रेषुचरेमेषकर्कतुलामकराणामन्य
तमेलग्नेधर्मेनवमम् सुतःपंचमम् एतेषांशुद्धिःनवपंचमयोःपापग्रहराहित्यम् अष्टमेतुशुभपापराहित्यमेवंरूपाशुद्धिस्तयासहितेलग्नेद्रव्यप्रयोगः ऋणदानंशु

भंस्यात् भौमपराक्रमे मृदुपुष्याश्विनीचैवविशाखाश्रवणात्रयम् पुनर्वसौचशंसंतिधनादिविधिवर्त्तनम् वर्त्तनंऋणादिरूपेणादानम् मिश्रनक्षत्रत्वाद्विशाखायांनिषधे प्राप्तेऋणदानेएवविधिः हृतेनष्टादौनिषिद्धेव शक्रेड्येषुधर्मात्मजनैधनेषुचरेविलग्नेद्रविणप्रयोगइति अथारेभौमवारेऋणंनग्राह्यम् ऋणंभौमेनगृह्णीयान्नदेयंबुधवासरे ऋणच्छेदंकुजेकुर्यात्संचयंसोमनंदने अथतु विशेषे संक्रमदिने संक्रांतिदिवसे वृद्धौवृद्धियोगे करेहस्तनक्षत्रे अर्केऽह्निरविवारे इतिवत् तत्रापिन ग्राह्यमित्येवंसंबंधः यत् यस्माद्धेतोः तदृणंतद्वंशेषुऋणगृहीतुः कुलेषुभवेत् तत्पुत्रपौत्रादिभिरपिपरिहर्त्तुमशक्यमित्यर्थः हस्तेऽर्कवारे संक्रांतौयदृणंस्यात्कुलेषुतत् वृद्धि

नारेग्राह्यमृणंतुसंक्रमदिनेवृद्धौकरेऽर्केह्नियत्तद्वंशेषुभवेदृणंनचबुधेदेयंकदाचिद्धनम् २७ मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैर्विनार्कंशनिंपापैर्ही
नबलैर्विधौजललवेशक्रेविधौमांसले लग्नेदेवगुरौहलप्रवहणंशस्तंनसिंहेघटेकर्कजैणधटेतनौक्षयकरंरिक्तासुषष्ठ्यांतथा २८

योगेतथाज्ञेयमृणच्छेदंतुकारयेदितिज्योतिः प्रकाशोक्तेः बुधवारेऋणंकदापिनदेयम् २७ अथहलप्रवाहमुहूर्त्तंशार्दूलविक्रीडितेनाह मूलद्वीशेति एतैःमूलादिभिरेकोनविंशतिनक्षत्रैः विनार्कंशनिंरविशनिवारौवर्जयित्वान्यवारेषु तत्रपापैर्हीनबलैर्निर्बलैः चंद्रेजलराशिनवांशकेसति शक्रेचंद्रेचमांसलेपुष्टेसति उदितेइत्यर्थः गुरौलग्नेचसति तदाप्रथमंहलप्रवहणंशस्तंस्यात् कश्यपः गुरौलग्नगतेशक्रेबलिन्याप्योदयेविधौ शस्ताकृषिक्रियातत्रदुर्बलैःक्रूरखेचरैः अथसिंहेघटेकुंभेकर्केअजेमेषेएणेमकरे धटेतुलायाम् तथारिक्तासुषष्ठ्याम् तथाशब्दोऽनुक्तसमुच्चयार्थस्तेनाष्टम्यामपिनशस्तम् यस्मात्संक्षयकरम् २८

अथबीजोप्तिमुहूर्त्तंफणिचक्रंच शार्दूलविक्रीडितेनाह एतेष्विति पूर्वोक्तनक्षत्रेषु श्रुतिवारुणादितिविशाखोडूनिविनाश्रवणादिवर्जितेषु मूलमघाध्रुवमृदुक्षिप्रधनिष्ठास्वातीषु भौमंविनाभौमवारव्यतिरिक्तवारेषुबीजोप्तिः बीजवापनंशुभंज्ञेयम् नारदः मृदुध्रुवक्षिप्रभेषुपितृवायुवसूडुषु समूलभेषुबीजोप्ति रत्युत्कृष्टफलप्रदा रवौ-रौद्राद्यपादस्थेभूमौसंजायतेरजः तस्माद्दिनत्रयंतत्रबीजवापंपरित्यजेदितिराजमार्तंडे आर्द्राप्रथमदिनत्रयनिषेधः अथबीजोप्तौफणिचक्रम् अगुभतोनविद्यंतेगावोयस्येति अगुः राहुः तस्यभंतदाक्रांतनक्षत्रंतस्मादादौ अष्टौभानिअसंति असमीचीनानि ततस्त्रीणिशुभकराणि ततएकमशुभम् ततस्त्रीणि

एतेषुश्रुतिवारुणादितिविशाखोडूनिभौमंविनाबीजोप्तिर्गदिताशुभात्वगुभतोष्टाग्नींदुरामेंदवः रामेंद्वग्नियुगान्यसच्छुभकराण्युप्तौ
हलेर्कोज्झिताद्भाद्रामाष्टनवाष्टभानिमुनिभिःप्रोक्तान्यसत्संतिच २९

शुभक॰ ततएकम॰ ततस्त्रीणिशुभक॰ ततएकम॰ ततस्त्रीणिशुभ॰ ततश्चत्वार्यशुभानि एवंबीजोप्तौसप्तविंशतिनक्षत्राणांशुभाशुभत्वमुक्तम् रत्नमालायाम् मूर्ध्नित्रीणिगलेत्रयंचजठरेधिष्ण्यानिचद्वादशेत्यादि लग्नशुद्धिमाहवसिष्ठः भवरिपुसहजेपापैस्त्रिकोणकेंद्रस्थितैश्चशुभैः कथितेशुभधिष्ण्येपिचशुभलग्नेबीजवापनंकार्यम् अथहलचक्रमुच्यते हले इतिहलचक्रे अर्कोज्झितात् भात् नक्षत्रात् क्रमेणत्रीणि असंति शुभानि ततोऽष्टभानिसंतिशुभानि ततोनवभानि असंति ततोऽष्टौभानिसंति यथासूर्य आर्द्रायांभुक्तभंमृगः ततआरभ्यत्रीणिअशुभानि ततःपुष्यतोऽष्टभानिशुभानि ततोविशाखातोनवभान्यशुभानि ततःशततारकातोऽष्टभानिशुभानि

एवमष्टाविंशतिभानिजातानि तथावसिष्ठः अर्कगतागतसंस्थेभत्रितयंनेष्टमुभयतस्त्विष्टम् षोडशधिष्ण्यंनवकंशिष्टमनिष्टंचलांगलेचक्रे कश्यपोपित्रिष्वष्टसुनवर्क्षेषुसप्तस्वर्कविमुक्तभाक् हानिर्वृद्धिः कर्तृनाशोलक्ष्मीप्राप्तिर्यथाक्रमादिति एवंबहुमुनिसंवादेसति इनभोज्झितर्क्षात् त्रिवन्हित्रीषुत्रीषुरामा ३ ३ ३ ५ ३ ५ ३ ३ पयशुभदशुभानिक्रमाल्लांगलाख्यैरितियदुक्तंगणेशदैवज्ञैर्मुहूर्त्ततत्वेतत् चिंत्यंऋषिवाक्यमूलाभावात् ननुश्रीपतिवाक्यम् अर्कक्रांतगतागतान्यनडुहांनाशाय भान्यग्रतोवृद्ध्यै भत्रितयंततस्तुकृषिकृत् घातायमूलत्रये धिष्ण्यानांनवकंतदंतरगतेस्यातांश्रियै पंचके यच्चान्यत्त्रितयंतदत्रगदितं चक्रेशुभेलांगले इतिमूलंचेत् नह्यपाश्रयति वाक्येशब्दार्थः किंतुमूलवाक्याबोधेनस्वाज्ञानप्रकाशकः वाक्यार्थस्तु अर्कक्रांतगतानित्रीणिभानि दूषनाशकराणिस्युः ततस्त्रीणिवृद्ध्यै ततःपंचनक्षत्राण्यपास्य अग्रिमाणिनवभानिमूलत्रयेत्रिकंत्रिकंकृषिकृद्घातायस्थाप्यानि नन्वत्रपंचनक्षत्रत्यागेकोहेतुरित्यतआह तदंतरगते पंचकइति तच्छब्देनहलोर्ध्वदंडामूलोर्ध्वदंडाउच्यते अर्कक्रांतगतागतान्यनडुहांनाशायभान्यग्रतोवृद्ध्यैभत्रितयं अयमंतरस्यपूर्वावधिः मध्येततःपदोपादानात् तुशब्दस्तु आनंतर्यद्योतनार्थः तुअनंतरंमूलत्रयेधिष्ण्यानांनवकंकृषिकृद्घातायेति अंतरस्योत्तरावधिः तदंतरगतेमध्ये विद्यमानानांधिष्ण्यानांपंचकंचपंचकंचश्रियैस्थाप्येनक्षत्रदशकमितियावत् यच्चान्यत्त्रितयंहलदंडोर्ध्वभागेशुभफलदंलेख्यम् एवंचसतिकृषिवाक्यैः सहास्यैकार्थतैवसंपद्यते अनेनमहेश्वरादयोपिप्रत्युक्ताः २९ अथशिरामोचनविरेचनादिमुहूर्त्तंशार्दूलविक्रीडितेनाह त्वाष्ट्रादिति द्वाष्ट्राद्वये चित्रास्वात्यौ मित्रभाद्वये अनुराधाज्येष्ठेकभाद्वयेरोहिणीमृगौ श्रोत्रंश्रवणः चित्रादिषु एकादशसुनक्षत्रेषु भौमार्कगुरुवारेशिरामोक्षणंरुधिरवाहिनीनाडिकाशिरातस्याः सू-

क्ष्म शस्त्रघातेननरशिरातोरक्तमोक्षणंकुर्यात् अथबुधार्कौविनाबुधशनिवारौत्यक्त्वान्यवारेषुपूर्वोक्तनक्षत्रेषुचविरेकवमनाद्यम् औषधेनसुखप्रवृत्तिर्विरेकः व
मनवांतएतदाद्यंकुर्यात् मित्रक्षिप्रचरध्रुवेषुत्रयोदशनक्षत्रेषु रविवारेशुभग्रहवारेचविदोबुधस्यलग्नवर्गेजीवस्यापिलग्नवर्गेयास्मिन्कस्मिंश्चिल्लग्नेपिगुरुबुध
योः षड्वर्गेसतितनौलग्नेगुरौचसतिकर्त्तुर्गुरुबलेचसतिधर्मक्रियाकोटिहोमरुद्रानुष्ठानादिरूपानिगदिताकथिता ३० अथधान्यच्छेदनंवसंततिलकयाह
तीक्ष्णाजपादेति एतेष्वेकोनविंशतिनक्षत्रेषु तथाभौमशनिरिक्तावर्जितदिनेस्थिरलग्नेसतिधान्यादीनांयवादीनांछिदाछेदनंनिगदिताकथिता ३१

त्वाष्ट्रान्मित्रकभाद्द्वयेंऽबुपलघुश्रोत्रेशिरामोक्षणंभौमार्केज्य दिनेविरेकवमनाद्यंस्याद्बुधार्कौविना मित्रक्षिप्रचरध्रुवेरविशुभाहेलग्नवर्गेवि
दोजीवस्यापितनौगुरौनिगदिताधर्मक्रियातद्बले ३० तीक्ष्णाजपादकरवन्हिवसुश्रुतींदुस्वातीमघोत्तरजलांतकतक्षपुष्ये मंदाररिक्तरहि
तेदिवसेऽतिशस्ताधान्यच्छिदानिगदितास्थिरभेविलग्ने ३१ भाग्यार्यमश्रुतिमघेंद्रविधातृमूलमैत्रांत्यभेषुकथितंकणमर्दनंसत् ईशाज-
पान्निर्ऋतिधातृशतार्यमर्क्षैसस्यस्यरोपणमिहार्किकुजौविनासत् ३२

अथकणमर्दनंसस्यरोपणंचवसंततिलकयाह भाग्येति विधिःरोहिणीअं
त्यंरेवतीएषुनवभेषुकणानांचणकादीनांमर्दनंयष्टिघातादिनावितुषीकरणंतत्समीचीनंस्यात् अथविशाखादिषण्णक्षत्रैः आर्किकुजौविनाशनिभौमतोऽन्य
वारेषुसस्यस्यधान्यस्यरोपणंसत्शुभम् ३२ अथधान्यस्थितिंधान्यवृद्धिंचवसंततिलकयाह मिश्रोग्रेति मिश्रोग्रादिविभिन्नेषुमिश्रादिदशनक्षत्रेभ्योऽन्येषु

सप्तदशनक्षत्रेषुतथाकर्कमेषतुलारहितेलग्नेमकरस्थिरद्विस्वभावलग्नेषुशुभाहेचंद्रबुधगुरुशुक्रवारेधान्यानांस्थितिः एकत्रस्थलेस्थापनंसाशुभकरीनिगदिता अन्यध्रुवेज्यादित्रयोदशनक्षत्रेषुधान्यवृद्धिः मह्यमेतावद्धान्यंदेहि ततोमासद्वयानंतरंसपादंसार्द्धंवादास्यामीत्येवंरूपावृद्धिर्निगदिता ३३ अथशांतिकपौष्टिकादिकंवसंततिलकयाह क्षिप्रेति क्षिप्रादिनक्षत्रेषुपौष्टिकमंगलाभ्यांसहपौष्टिककर्मणाग्रहशांत्यामंगलकर्मणाविनायकशांत्यासह शांतिके दुष्टफलदंमूलादिनक्षत्रोत्पन्नंशांत्यादिशुभंस्यात् लग्नात्खेदशमेर्केसतिविधौचंद्रेसुखगतेचतुर्थेगुरौलग्नस्थेसतितत् शांतिकंमौढ्यादिदुष्टसमयेगुरु-

मिश्रोग्ररौद्रभुजगेंद्रविभिन्नभेषुकर्काजतौलिरहितेचतनौशुभाहे धान्यस्थितिःशुभकरीगदिता ध्रुवेज्यद्वीशेंद्रदस्त्रचरभेषुचधान्यवृद्धिः ३३ क्षिप्रध्रुवांत्यचरमैत्रमघासुशस्तंस्याच्छांतिकंसहचमंगलपौष्टिकाभ्याम् खेर्केविधौसुखगतेतनुगेगुरौनोमौढ्यादिदुष्टसमयेशुभदंनिमित्ते ३४ सूर्यभात्त्रित्रिभेचांद्रेसूर्यविच्छुक्रपंगवः चंद्रारेज्यागुशिखिनोनेष्टाहोमाहुतिःखले ३५

शुक्रास्तादिदुष्टकालेनोशुभदम् तथा निमित्तेकेत्वाद्युत्पातदर्शनेसतिगुरुशुक्रास्तादावपिशुभंस्यात् उक्तंच शांतिकर्माणिकुर्वीतरोगेनैमित्तिकेतथा गुरुभार्गवमौढ्येपिदोषस्तत्रनविद्यते ३४ अथहोमाहुतिशुद्धिमनुष्टुभाह सूर्यभादिति सूर्याक्रांतनक्षत्रात्त्रित्रिभे नक्षत्रत्रयमध्येचांद्रेचंद्रनक्षत्रेदिननक्षत्रेसतिक्रमात्सूर्यादिमुखेहोमाहुतिः पतति यथासूर्याक्रांतनक्षत्रात् नक्षत्रत्रयमध्येहोमारंभेसूर्यमुखेहोमाहुतिपातः ततोनक्षत्रत्रयेषुबुधस्य ततःशुक्रस्य ततःपंगोः शनेः ततश्चंद्रस्य ततः आ

रस्य भौमस्य ततईज्यस्यगुरोः ततः अगोः राहोः ततःशिखिनः केतोः एवंसतियद्दिनेखलेपापग्रहमुखेहोमाहुतिः पततिसानेष्टा नशुभदा अर्थाच्छुभग्रहमुखेशुभासूर्यनक्षत्राच्चंद्रनक्षत्रपर्यंतंगणना ३५ अथयद्दिनेहोमश्चिकीर्षितस्तद्दिनेवन्हिनिवासवशेनशुभाशुभफलमिंद्रवज्रयाह सैकेति शुक्लादिगणनयावर्तमानतिथिर्गण्या एकयुतावर्तमानवारयुताचतुर्भक्तायच्छेषंतच्चेद्गुणमितंत्रिमितंशून्यमितंच तदाभुविभूमौवन्हेर्वासोवसतिः फलमाह सौख्यायहोमेहोमदिनेभूमावग्नेर्वासेसतिसौख्यंभवति अथशशियुग्मशेषे एकमितशेषेऽग्निवासोदिविस्वर्गेफलंकर्त्तुःप्रणाशः द्विमितेशेषेऽग्निवासोभूतले तत्फलंकर्त्तुरर्थनाशः उक्तं

सैकातिथिर्वारयुताकृताप्ताशेषेगुणेऽभ्रेभुविवन्हिवासः सौख्यायहोमेशशियुग्मशेषेप्राणार्थनाशौदिविभूतलेच ३६ नवान्नंस्याच्चर
क्षिप्रमृदुभेसत्त नौऽशुभं विनानंदाविषघटीमधुपौष्णार्किभूमिजान् ३७

च तिथिर्वारयुता सैकावेदभक्तावशेषकात् निवासोऽग्नेर्व्योम्निरूपेवित्तप्राणविनाशदः पाताले द्विकशेषेण धनसंचयनाशनः गुणवेदावशेषेण भूमौविपुलसौख्यदः संस्कारेषुविचारोस्यनकार्योनापिवैष्णवे नित्यनैमित्तिकेकार्ये नचाब्देमुनिभिःस्मृतः कैश्चित्खेटसुप्तमपिहोमेवर्ज्यमित्युक्तं तद्यथा अर्कश्चंद्रादष्टमेज्ञाच्चतुर्थेमंदः शुक्रादष्टमेंगारकश्च राहुर्धर्मेजीवतः खेटसुप्ते होमेनाशः पुत्रदाराधनानामिति ३६ अथप्रतिवर्षोत्पन्ननवान्नभक्षणमनुष्टुभाह नवान्नमिति चरादिद्वादशभेषुसत्तनौसमीचीनलग्नेशुभंग्रहैर्युतेदृष्टेन्चेत्यर्थः नंदादितिथयः १ ६ ११ विषघटीविवाहप्रकरणोक्ताः मधुश्चैत्रः पौषःआर्किःशनिः भूमिजोभौमः एतान्विनावर्जयित्वानवान्नभक्षणंशुभम् ३७ ७

अथनौकाघटनमनुष्टुभाह याम्यत्रयेति याम्यत्रयंभरणीकृत्तिकारोहिण्यः ईशआर्द्रा अन्यानिप्रसिद्धानि एभ्योभिन्ननक्षत्रेषुशुक्रगुरुरविवारे सत्तनौशुभयुत
दृष्टेलग्नेनौकाघटनंनौकानिर्माणंशुभम् नौकाचालननौकागमनमुहूर्त्तौदिपिकायां शुभाहेविष्णुयुग्मेंदुभगमैत्राश्विपाणिषु चालनंघटनस्थानान्नावःशुभ
तिथींदुषु अश्विकरेज्यसुधानिधिपूर्वामित्रधनाच्युतभेशुभलग्ने तारकयोगतिथींदुविशुद्धौनौकागमनंशुभदंशुभवारे ३८ अथवीरसाधनाभिचारयोर्मु
हूर्त्तमनुष्टुभाह मूलेति मूलादिनक्षत्रपंचकेतथाघटेतनौकुंभलग्नेसौम्येबुधेसतितथाशुक्रेसुखेचतुर्थे अष्टमेशुद्धे ग्रहरहितेतादृशेलग्नेवीरस्यधनस्यअभि

याम्यत्रयविशाखेंद्रसार्पपित्र्येशभिन्नभे भृग्वीज्यार्कदिनेनौकाघटनंसत्तनौशुभम् ३८ मूलार्द्राभरणीपित्र्यमृगेसौम्येघटेतनौ सुखेशुक्रेऽ
ष्टमेशुद्धे सिद्धिर्वीराभिचारयोः ३९ व्यंत्यादितिध्रुवमघानिलसार्पधिष्ण्यैरिक्तेतिथौचरतनौविकवींदुवारे स्नानंरुजाविरहितस्यजनस्य
शस्तंहीनेविधौखलखगैर्भवकेंद्रकोणे ४०

चारस्यकर्मणःसिद्धिःनिष्पत्तिः ३९ अथरोगनिर्मुक्तस्नानंवसंततिलकयाह व्यंत्येति विगतान्यंत्यादीनिरेव
त्यादीनिनवधिष्ण्यानियेभ्यस्तेष्वष्टादशभिष्टनक्षत्रेषु तथारिक्तासंज्ञासुतिथिषुचरलग्नेतथाशुक्रचंद्रवर्जितवारे तथाविधौचंद्रेहीनेनिषिद्धस्थानस्थेनिषिद्धस्था
नानिगोचरप्रकरणे तथापापग्रहैर्भवेएकादशेकेंद्रेप्रथमचतुर्थसप्तमदशमे १ ४ ७ १० कोणेनवपंचमेस्थानेस्थितैःसद्भिःएवंविधेलग्नेरुजाविरहितस्यरोगनि
र्मुक्तस्यजनस्यस्नानंआरोग्यस्नानंशस्तंशुभम् नारदः स्थिरेज्यादितिसार्पांत्यपितृवारुणभेषुच नकुर्याद्रोगमुक्तस्तुस्नानंवारेऽब्जशुक्रयोरिति ४० ७

अथशिल्पविद्यामनुष्टुभाह मृदुध्रुवेति मृदुध्रुवादिनक्षत्रेज्ञेबुधेदशमेलग्नेवासति अथवागुरौदशमेलग्नेवासति तथाविधौचंद्रेबुधगुरुषड्वर्गस्थेचसतिशिल्पविद्यानानावर्णादिनिर्मितंमूर्त्यादिकंतद्विधायाः प्रारंभःप्रशस्यते ४१ अथसंधानमनुष्टुभाह सुरेज्येति पुष्यादिनक्षत्रेतथाऽष्टम्यांतिथौहरौद्वादश्यांचतिथौ तैतिलकरणेच तथाशुक्रदृष्टेयुतेचलग्नेतथाशुभग्रहाणांवारेसंधानंसंधिर्मैत्रीतियावत् इष्यतेतथाचकश्यपः भाग्येपुष्येसमैत्रेचलग्नेशुक्रेक्षितेयुते करणेतैतिलेष्टम्यांद्वादश्यांसंधिरिष्यते ४२ अथपरीक्षामुहूर्त्तंवसंततिलकयाह त्यक्तेति भूतश्चतुर्दशी जनुर्भमासौजन्मर्क्षजन्ममासश्चजन्मराशेरष्टमंसूर्यंचंद्रंचनाड्याः भानिजन्मभकर्मभादिनक्षत्राणिनाडीनक्षत्राणि एतानित्यक्त्वा द्व्यंगेद्विस्वभावेचरलग्नेवातन्नवांशेच चंद्रशुद्धौताराशुद्धौगुरुशुद्धौचसत्यांकरोहस्तः अदितिःपुनर्वसुः हरिःश्रवः इंद्रोज्येष्ठा कंजलंतत्स्वामीवरुणः तस्यनक्षत्रंशततारका एषुभेषुपरीक्षाकार्या अन्यत्स्पष्टम् परीक्षानामसुवर्णस्तेयादिपातकाभिशस्तस्यशुद्ध्यशुद्धिविचारपूर्वकंतप्तमाषादिरूपादिव्यमितियावत् उक्तंचदीपिकायाम् नोशुक्रास्तेऽष्टमार्के गुरुसहितरवौजन्ममासेऽष्टमेंदौविष्टौमासेमलाख्येकुजशनिदिवसेजन्मतारासुचाथ नाडीनक्षत्रहीनेसुरगुरुरजनीनाथताराविशुद्धौप्रातः कार्यापरीक्षाहितनुचरगृहांशोदयेशस्तलग्ने इतिव्यवहारोच्चये अष्टम्यांच-

मृदुध्रुवक्षिप्रचरेज्ञेगुरौवारवलग्नगे विधौज्ञजीववर्गस्थे शिल्पविद्याप्रशस्यते ४१ सुरेज्यमित्रभाग्येषुचाष्टम्यांतैतिलेहरौ शुक्रदृष्टेत
नौसौम्यवारेसंधानमिष्यते ४२ त्यक्ताष्ट८भूत१४ शनिवित्ज्ञ कुजान्जनुर्भमासौ८मृतौरविविधूअपिभानिनाड्याः

चतुर्दश्यांप्रायश्चित्तपरीक्षणे नपरीक्षाधिवासश्चशनिभौमदिनेभवेत् ज्येष्ठाश्रवणहस्तश्चतथाज्ञेयःपुनर्वसुः तद्वच्छतभिषाप्रोक्ताह्यभियुक्तविचारणे इति
नाडीनक्षत्राणिदीपिकाकारवचनात् जन्मर्क्षमाद्यंदशमंचकर्मसंघातिकंषोडशभंचमानसम् स्यात्पंचविंशंसमुदायमष्टादशंत्रयोविंशतिभंविनाशकम् एवंषट्
भोजनः सर्वोजातिदेशाभिषेकभैः नवभोनृपतिर्ज्ञेयोनाडीताराःस्मृताअमूरिति नृजातिनक्षत्राणिवराहसंहितायाम् पूर्वात्रयंसानलमग्रजानांराज्ञांचपुष्येण
सहोत्तराच सपौष्णमैत्रंपितृदैवतंचप्रजापतेर्भंचकृषीवलानाम् आदित्यहस्ताभिजिदश्विनानिवणिग्जनस्वाम्यमुपागतानि मूलत्रिनेत्रानिलवारुणानि

ध्यंगेचरेतनुलवेशशिजीवताराशुद्धौकरादितिहरींद्रकपेपरीक्षा ४३ व्ययाष्टशुद्धोपचयेलग्नगेशुभदृग्युते चंद्रेत्रिषड्दशायस्थेसर्वारंभःप्र
सिद्ध्यति ४४

भान्यग्रजातेःप्रभविष्णुतायाः सौम्येंद्रचित्रावसुदैवतानिसेवाजनस्वाम्यमुपागतानि सार्पविशाखाश्रवणेभरण्याश्चांडालजातेरभिनिर्दिशंती
ति देशोवाराणस्यादिकस्तन्नक्षत्रंशतपदचक्रोक्तम् यथावाराणस्याः नक्षत्रंरोहिणीति अभिषेकभे यस्मिन्पुष्यादिकेनक्षत्रेराजाभिषेकोजातस्तदभिषेकर्क्षमिति
राज्ञांनवभानि इतरेषांषडेवभानि ४३ अथसामान्यतः शुभकार्येषुलग्नशुद्धिमनुष्टुभाह व्ययेति व्ययोद्वादशमष्टमंएतत्स्थानद्वयंशुभंग्रहरहितंयस्मिन् एता
दृशेस्वजन्मराशेर्जन्मलग्नाद्वाउपचयभवनेत्रिषडेकादशदशमराशौलग्नगतेशुभैर्दृष्टेयुतेचतथाचंद्रेत्रिषड्दशायस्थेसतिसर्वेषांशुभकार्याणामारंभःसिद्ध्यति
तथाचवसिष्ठः उपचयभेलग्नगतेव्ययनैधनशुद्धिसंयुतलग्ने उपचयगेशीतकरेमंगलकर्माणिकार्याणीति ४४ छ छ छ छ

अथनक्षत्रेषुज्वरोत्पत्तौसत्यांतन्निवृत्तौदिनसंख्यांद्वितीयोपजातिकयोपेंद्रवज्रयाचाह स्वातींद्रेति मूलाग्नीति स्वातीज्येष्ठापूर्वात्रयार्द्राश्लेषासुज्वरेज्वरोत्पत्तौसत्यांमृतिर्मरणंस्यात् अथांत्यमैत्रेरेवत्यनुराधयोर्ज्वरोत्पत्तौरुजोरोगस्यास्थिरताबहुकालेनरोगनिवृत्तिःस्यात् तथाभरणीश्रवणाशततारा: तक्षभंचित्राएतेषुनक्षत्रेषुशिवाघस्राः एकादशदिवसाः रोगः द्व्यधिपंविशाखा अर्कोहस्तः वासवंधनिष्ठाएषुत्रिषुभेषुपंचदशदिवसाः रोगः ४५ मूलंअग्निःकृत्तिकादास्रमश्विनीएषुनवदिवसारोगः पित्र्यभेमघायांनखाःविंशतिर्दिवसाः बुध्न्यभंउत्तराभाद्रपदाअर्यमाउत्तराफाल्गुनीपुष्यपुनर्वसुरोहिणीषुनगाःसप्तदिवसारोगः अब्जवैश्वे

स्वातींद्रपूर्वाशिवसार्पभेमृतिर्ज्वरेंत्यमैत्रेस्थिरताभवेद्रुजः याम्यश्रवोवारुणतक्षभेशिवा ११ घस्राहिपक्षो १५ द्व्यधिपार्कवासवाः ४५मूलाग्निदास्रेनवपित्र्यभेनखा २० बुध्न्यार्यमेज्यादितिधातृभेनगाः ७ मासोब्जवैश्वेथयमाहिमूलभेमिश्रेशपित्र्येफणिदंशनेमृतिः ४६

मृगोत्तराषाढयोः मासस्त्रिंशद्दिनानिरोगस्थैर्यंततोरोगनिवृत्तिः अत्रशांतिर्वसिष्ठोक्ता रुद्रेशरूपंकनकेनकृत्वातल्लिंगमंत्रैश्चस्रग्गंधपुष्पैः वस्त्राक्षतैर्गुग्गुलधूपदीपनैवेद्यतांबूलफलैश्चसम्यक् पूजांचकृत्वामयनाशनायद्विजायदद्यादतुलंशिवाय आमयोरोगः अतुलमपरिमितद्रव्यम् अथानंतरंयमाहिमूलभेभरण्याश्लेषामूलेषुकृत्तिकाविशाखार्द्रामघासुचसप्तनक्षत्रेषुयस्यकस्यचित्फणिदंशनेसर्पदंशनेमृतिर्भवेत् अत्रसर्पदंशेयस्यएतेषुगोचरवशेनचंद्रबलंनभवतितस्यैवसर्पदंशेन यद्यत्रचंद्रस्तस्यैवगोचरेवाशुभप्रदः तदानूनंभवेन्मृत्युःसुधासंसिक्तदेहिनइति ४६ छ छ छ

अथशीघ्रंरोगिमरणेविशिष्टयोगंद्वितीयोपजातिकयाह रौद्राहीति रौद्रादिनक्षत्रेषुपापवारेसातिरिक्ताः प्रसिद्धाः हरिर्द्वादशीस्कंददिनंषष्ठी एतासुतिथिषुए
वंविधेविशिष्टयोगेयस्यरोगोत्पत्तिर्भवति तस्यरोगिजनस्यशीघ्रंमृत्युर्भवेत् ४७ अथप्रेतदाहमुहूर्त्तंप्रेतदाहादिनिषेधंचोपेंद्रवज्रयाह क्षिप्रेति क्षिप्रादिनक्षत्रे
षुप्रेतक्रियाप्रेतानांमृतानांक्रियाउत्तमलोकप्राप्त्यर्थंश्राद्धादिक्रियास्यात् यदिदाहसमयेकारणवशान्नारब्धा अथझषकुंभगेविधौमीनकुंभस्थितेचंद्रेधनि
ष्ठोत्तरार्धादिपंचनक्षत्रेप्रेतस्यदाहं ज्वालनंत्यजेत् चपुनः यमदिग्गमंदक्षिणादिशिगमनंयात्राम् तथाशय्यायाः खट्वायाः वितानंवयनम् तथागृहगोपनं

रौद्राहिशाक्रांबुपयाम्यपूर्वाहिर्दैववस्वग्निषुपापवारे रिक्ताहरिस्कंददिनेचरोगेशीघ्रंभवेद्रोगिजनस्यमृत्युः ४७ क्षिप्राहिमू
लेंदुहरीशवायुभेप्रेतक्रियास्याज्झषकुंभगेविधौ प्रेतस्यदाहंयमदिग्गमंत्यजेच्छय्यावितानंगृहगोपनादिच ४८

गृहाच्छादनं आदिशब्देनतृणकाष्ठसंग्रहंचत्यजेत् ब्रह्मपुराणेपंचकेमरणमपिनिषिद्धम् कुंभमीनस्थितेचंद्रेमरणंयस्यजायते नतस्योर्ध्वगतिर्द्द-
ष्टासंततेर्नशुभंभवेदिति तेनपंचकेमृतस्यपंचकेदाहप्राप्तौसत्यांतत्पुत्तलविधिंकृत्वादाहः कार्यः पश्चादाशौचनिवृत्त्यनंतरंशांतिकंकार्यम् यदिपंच
कप्रवृत्तेः प्रागेवमृतः प्रतिबंधवशात्पंचकेदाहप्राप्तौपुत्तलविधिंकृत्वादाहः कार्यः आशौचनिवृत्त्यनंतरंशांतिर्नकार्या एवंरेवत्यंतमृतस्यरेवतीमपहा
यदाहः कार्यः नपुत्तलविधिः आशौचनिवृत्त्यनंतरंशांतिरेवकार्या मरणनिषेधदाहनिषेधप्रतिपादकवचनद्वयसद्भावादिति ४८ ५ ५

अथकाष्ठानांगोमयपिंडानांचसंग्रहमुहूर्त्तंशार्दूलविक्रीडितेनाह सूर्यर्क्षाद्रसभैरितिस्पष्टार्थम् ४९ अथत्रिपुष्करयोगंसफलंवसंततिलकयाह भद्रातिथि
रिति भद्रासंज्ञकतिथिर्द्वितीयासप्तमीद्वादशी शनिभौमसूर्यवारेभवति तथाद्वीशंविशाखा अर्यमोत्तराफाल्गुनी अजचरणः पूर्वाभाद्रपदा अदितिःपु
नर्वसुः वन्हिः कृत्तिका वैश्वमुत्तराषाढा एषुनक्षत्रेषु उक्तातिथिवारनक्षत्ररूपेविशिष्टयोगेसति त्रैपुष्करः त्रिपुष्करएव त्रैपुष्करः स्वार्थेऽण् त्रिपुष्क-
रसंज्ञकोयोगोभवति कीदृशः मृत्युविनाशवृद्धौत्रैगुण्यदः तद्दिनेयदिकश्चिन्म्रियेततद्दायादास्त्रयोम्रियेरन् यदिकिंचिद्वस्तुविनष्टंतदातस्यतद्व

सूर्यर्क्षाद्रसभैरधस्थलगतैःपाकोरसैःसंयुतःशीर्षेयुग्ममतैःशवस्यदहनंमध्येयुगैःसार्पभैः प्रागाशादिषुवेदभैःस्वसुहृदांस्या
त्संगमोरोगभैः काष्ठादेःकरणंकृतंचगदितंकाष्ठादिसंस्थापने ४९ भद्रातिथीरविजभूतनयार्कवारेद्वीशार्यमाजचरणादितिवन्हि-
वैश्वे

स्तुत्रयनाशः तथाकिंचिद्वस्तुलब्धंतदात्रिगुणंतद्वस्तुलाभः वसिष्ठः रविरविजभौमवारेभद्रायांविषमपादभृक्षंचेत् त्रैपुष्कराख्ययोगस्त्रि
गुणफलोयुगुलभेद्विगुणंपदानियन्नक्षत्रस्यैवचरणः पूर्वराशौचरणत्रयमपरराशौभवति तानिविषमचरणानिद्वीशार्यमीत्यादीनि अथवसुर्धनिष्ठा त
क्षंचित्रा चांद्रंमृगः एतानिभानिभद्रातिथयः रविशनिभौमवाराश्च अत्रापिविशिष्टयोगेद्विपुष्करनामयोगोभवति तत्फलं मृत्युविनाशवृद्धौद्वैगुण्यकृद्भ
वति तत्रशांतिमाह नारदः दद्यात्तद्दोषनाशायगोत्रयंमूल्यमेववा द्विपुष्करेद्वयंदद्यान्नदोषस्त्वृक्षमात्रतइति अत्रत्रिपुष्करेकश्यपेनरविस्थानेबृहस्पति

वारोप्युक्तः भद्रातिथिः शनीज्यारवारेचे द्विषमांघ्रिभम् त्रिपुष्करंत्रिगुणदं द्विगुणंद्व्यंघ्रिभंमृताविति इदमेवदृष्ट्वाश्रीपतिनाप्युक्तम् विषमचरणंधिष्ण्यमित्यादि अत्रकश्यपवाक्यंमृतावेवत्रिगुणफलतोक्ता ग्रंथकृतातु श्रीपतिवाक्यानुरोधान्मृत्युविनाशद्वन्द्वावित्युक्तम् ५० अथशवप्रतिकृतिदाहेनिषिद्धकालंशार्दूलविक्रीडितेनाह शुक्रारेति एवंविधेदिनेशवस्यप्रतिकृतिः पर्णशरादिनासावयवत्वकल्पनंतस्यदाहोनकार्यः कुतःद्विविधोहिप्रेतसंस्कारः प्रत्यक्षशरीरस्यैकः तत्रप्रतिकृतेरन्यः तस्यप्रत्यक्षशरीरसंस्कारेदिनविचाराभावः प्रत्यक्षशवसंस्कारेदिनंनैवविशोधयेदिति प्रतिकृतिसंस्कारे-

त्रैपुष्करोभवतिमृत्युविनाशद्वन्द्वौत्रैगुण्यदोद्विगुणकृद्वसुतक्षचांद्रे ५० शुक्रारार्किषुदर्शभूतमदनेनंदासुतीक्ष्णोग्रभेपौष्णेवारुणभेत्रि
पुष्करदिनेन्यूनाधिमासेयने याम्येऽब्दात्परतश्चपातपरिघेदेवेज्यशुक्रास्तकेभद्रावैधृतयोःशवप्रतिकृतेर्दाहोनपक्षेसिते ५१

कालत्रयं आशौचमध्येवर्षमध्येवर्षानंतरंचेति आशौचमध्येक्रियतेपुनःसंस्कारकर्मचेत् शोधनीयंदिनंतत्रयथासंभवमेवतु आशौचविनिवृत्तौचेत्पुनःसंस्क्रियतेमृतः संशोध्यैवदिनंग्राह्यमूर्ध्वंसंवत्सराद्यदीतिगार्ग्यवचनाद्दिनशुद्धिरुच्यते शुक्रारार्किदिनेशुक्रभौमशनिवारेशवप्रतिकृतेर्दाहोनकार्यइतिप्रत्येकंसंबंधः दर्शोमावास्याभूतश्चतुर्दशीमदनस्त्रयोदशी नंदाःप्रतिपत्षष्ठ्येकादश्यः आसुतिथिषु तथातीक्ष्णोग्रभेमूलार्द्राज्येष्ठाश्लेषास्तीक्ष्णानि पूर्वात्रयमघाभरणीउग्राणि पौष्णंरेवतीवरुणंशततारा पूर्वोक्तेत्रिपुष्करदिनेन्यूनाधिमासेक्षयमासेअधिकमासेअयनेयाम्ये अब्दात्परतः

अब्दमध्येयाम्यायनेपिकार्यः नंदामदनभूतामापातवैधृतिविष्टिषु शुक्रार्किभौमपरिघध्रुवमिश्रोग्रमैत्रभैः कर्त्तुश्चंद्रेष्टवेदांत्येजन्मप्रत्यरितारिके त्रिपाद-
भेसितेपक्षेऽयनेयाम्येऽब्दतःपरम् शवप्रतिकृतेर्दाहःशुक्रेज्यास्ताधिमासके नष्टोमध्योद्विपान्मैत्रद्वीशादितिभगध्रुवे इतिनिबंधोक्तेः दिनक्षयोपिवर्ज्यः
वर्जयेत्तुदिनक्षयमितिगार्ग्योक्तेः पातपरिघेपातोव्यतीपातोमहापातश्च परिघश्च एतेषुदाहोनकार्यः देवेज्यशुक्रास्तकेदाहोनकार्यः भद्रायांवैधृतौचत
थासितेशुक्लपक्षेइति ५१ अथतेनैव छंदसावर्ज्यैंतराण्याह जन्मप्रत्यरितारयोरिति कर्त्तुःजन्मप्रत्यरितारयोः जन्मताराउत्पत्तिनक्षत्रंदशमैकोनविं-

जन्मप्रत्यरितारयोर्मृतिसुखांत्येऽब्जेचकर्त्तुर्नसन्मध्योमैत्रभगादितिध्रुवविशाखाद्यंघ्रिभेज्ञेपिच श्रेष्ठोऽर्केज्य
विधोर्दिनेश्रुतिकरस्वात्यश्विपुष्येतथात्वाशौचात्परतोविचार्यमखिलंमध्येयथासंभवम् ५२

शंचेति प्रत्यरिताराजन्मभात्पंचमचतुर्दशत्रयोविंशंनक्षत्रम् तथाकर्त्तुर्मृतिसुखांत्येब्जो अष्टमचतुर्थद्वादशस्थेचंद्रेसतिदाहोनसत् नप्रशस्तः अ
थमध्यनक्षत्राणि मैत्रमनुराधा भगःपूर्वाफाल्गुनी अदितिःपुनर्वसुः ध्रुवाणिरोहिण्युत्तरात्रयम् विशाखाद्यंघ्रिभंमृगाचित्राधनिष्ठाः ज्ञेबुधेपि
शवदाहोमध्यमः अथोत्तमानि अर्केज्याभ्यांसहितोविधुः अर्कगुरुचंद्रवारे तथाश्रवणहस्तस्वात्यश्विनीपुष्येषुपंचनक्षत्रेषुशवप्रतिकृतेर्दाहः श्रेष्ठः
इदमखिलमाशौचात्परतः अनंतरम् मध्येतुयथासंभवंकिंचिद्गुणांगीकारणेविचार्यम् ५२ ७ ७ ७ ७ ७ ७

अथमूलनक्षत्रजातस्यविशेषमुपजातिकयाह अभुक्तमिति नारदः अभुक्तमूललक्षणंज्येष्ठांत्यमूलादिभवंघटीचतुष्टयंजगौ ज्येष्ठांत्यघटीचतुष्टयंमूलादिघटीचतुष्टयंचेत्यर्थः नारदः योज्येष्ठामूलयोरंतरालप्रहरजःशिशुः अभुक्तमूलजःसार्पमघानक्षत्रयोरपि अयमेवमुख्यःपक्षःकश्यपादिबहुमुनिसंवादात्तु कश्यपः ज्येष्ठांत्यमूलयोरंतरालयामोद्भवःशिशुः अभुक्तमूलजःसोथत्वाश्लेषापित्र्ययोरपि वसिष्ठोपि भुजंगपौरंदरपौष्णाभानांतदग्रभानांचतदंतरालम् अभुक्तमूलंप्रहरप्रमाणंत्यजेत्सुतंतत्रभवांसुतांचेति वसिष्ठएकद्विघटीमितंजगौज्येष्ठांतेएकघटिकामूलाद्यघटिकाद्वयमित्यर्थः इदंवसिष्ठेनकेचि

अभुक्तमूलंघटिकाचतुष्टयंज्येष्ठांत्यमूलादिभवंहिनारदः वसिष्ठएकद्विघटीमितंजगौबृहस्पतिस्त्वेकघटीप्रमाणकम् ५३
अथोचुरन्येप्रथमाष्टघट्योमूलस्यशाक्रांतिमपंचनाड्यः

न्मतमुक्तं यतस्तद्वाक्येकेचित् अपरेइतिपदोक्तेः तद्वाक्यंच ज्येष्ठांत्यपादघटिकामितमेवकेचिन्मूलंह्यभुक्तमपरेपुनरामनंति मूलाद्यपादघटिकाद्वितयेनसार्द्धमष्टौसमाःपरिहरेदिहजन्मभाजमिति बृहस्पतिस्तु एकघटीप्रमाणकं जगौ ज्येष्ठांत्यार्धघटिकामूलाद्याचार्धघटिकेत्यर्थः गुरुः ज्येष्ठांत्यघटिकार्द्धंचमूलादौघटिकार्द्धकम् तयोरंतर्गतानाडीह्यभुक्तंमूलमुच्यतेइति ५३ अथान्ये आचार्याउपजातिकयाहुः अथोचुरन्यइति आचार्याःप्रोचुः मूलस्यप्रथमाअष्टघटिकाः शाक्रस्यज्येष्ठायाः अंतिमाः पंचनाडिकाएवमुभयोरंतरालेत्रयोदशघटिका अभुक्तसंज्ञकाः प्रोचुःउक्तंचज्येष्ठांत्याघटिकाःपंचमूलाद्यावसुनाडिकाः अभुक्तमितितज्ज्ञेयंतत्रजातंशिशुंत्यजेदिति तत्फलमाह तत्राभुक्तमूले-

जातंशिशुंबालंबालांवापितापरित्यजेत् त्यागाशक्तोवापिताअस्यबालस्याष्टसमाः अष्टौवर्षाणिमुखंनपश्येत् नारदः अभुक्तमूलजंपुत्रंपुत्रीमपिपरित्यजेत् अथवाब्दाष्टकंतातस्तन्मुखंनविलोकयेदिति अत्रघटीनांन्यूनाधिक्यकथनंदोषस्याधिक्याल्पत्वकथनार्थंज्ञेयम् ५४ अथमूलाश्लेषाजातस्यचरणवशेनफलमुपजातिकयाह आद्येपितेति मूलप्रथमचरणेजातस्यबालस्यपितानाशंप्राप्नोति द्वितीयचरणेजननीमातानाशंप्राप्नोति सापत्नमातरिमातृशब्दोगौणः तेनगौणमुख्ययोर्मुख्येकार्यसंप्रत्ययइतिजननीपदप्रयोगः तृतीयचरणेधनंनश्यति चतुर्थचरणोबालस्यशुभः अत्रविशेषोनारदेनोक्तः

जातंशिशुंतत्रपरित्यजेद्वामुखंपितास्याष्टसमानपश्येत् ५४ आद्येपितानाशमुपैतिमूलपादेद्वितीयेजननीतृतीये

दिवाजातस्तुपितरंरात्रौतुजननींतथा आत्मानंसंध्ययोर्हंतिनास्तिगंडोनिरामयः वसिष्ठस्तु मूलाद्यपादोयदिरात्रिभागेतदात्मनोनास्तिपितुर्विनाशम् द्वितीयपादोदिनगोयदिस्यान्नमातुरल्पोपितदास्तिदोषः अथानंतरंशांत्यामूलाश्लेषाशांत्यास्त्वनुष्ठितयासर्वत्रचरणाचतुष्टयेपिशुभम् अनिष्टफलनाशकंकल्याणंस्यात् शास्त्रोक्तरीत्याखलुसूतकांतेमासेतृतीयेप्यथवत्सरांतेइतिकालत्रयंवसिष्ठेनोक्तम् गंडेतुविशेषः मातृगंडेसुतेजातंसूतकांतेविचक्षणः कुर्याच्छांतिंतदृक्षेवातद्दोषस्यापनुत्तये शिष्टास्तु सर्वत्रापियन्नक्षत्रेजन्मतन्नक्षत्रएवशांतिरितिव्यवहरंति अथाहिभेविलोममिति आश्लेषायांमूलपादोक्तंफलं — विलोमंविपरीतंज्ञेयम् मूलस्यप्रथमपादेपितृनाशइत्युक्तंस आश्लेषाचतुर्थपादोत्पन्नस्य द्वितीयपादेमातृ

नाशःसआश्लेषातृतीयचरणे तृतीयचरणेधननाशउक्तः सआश्लेषाद्वितीयचरणे चतुर्थंचरणेशुभमुक्तं तदाश्लेषाप्रथमचरणेज्ञेयम् अत्रबहुविचारोस्ति ग्रंथभूयस्त्वभयात् नलिख्यते अथकैश्चिन्मूलवृक्षादिविचारउक्तः जयार्णवे मूलंस्तंभंत्वचाशाखापत्रंपुष्पंफलंशिखा मुनयोष्टौदिशोरुद्राःसूर्याः पंचाब्धयोग्नयः मूलेतुमूलनाशःस्यात्स्तंभेवंशविनाशमम् त्वचिमातुर्भवेत्क्लेशः शाखायांमातुलस्यच पत्रेराज्यंविजानीयात् पुष्पेमंत्रिपदंस्मृतम् फलेचविपुलालक्ष्मीःशिखायामल्पजीवितम् अथमूलपुरुषयोगेघटीन्यासस्तत्रैव मूलस्यघटिकान्यासोमूर्ध्निपंचनृपोभवेत् मुखेसप्तमृतिःपित्रोः स्कंधेवेदामहाबलः बाह्वोरष्टौबलीपाण्योस्तिस्रोहत्यान्वितोभवेत् हृदिखेटाभूपमंत्रीनाभौद्वौब्रह्मविद्भवेत् गुह्येदशातिकामीस्याज्ज्ञा

धनंचतुर्थोस्यशुभोथशांत्यासर्वत्रसत्स्यादहिभेविलोमम् ५५

नुनोःषण्महामतिः पादयोःषण्मृतिस्तस्येत्युक्तवान्कमलासनइति अथमूलोद्भूतकन्यायाःफलार्थंमूलांगविभागस्तत्रैव चतस्रोनाडिकाःशीर्षेकुर्वंतिपशुनाशनम् मुखेषट्धनहानिःस्यात्कंठेपंचधनागमः कौटिल्यंहृदयेपंचबाह्वोर्वित्तागमेततः वेदाःपाण्योर्दयाधर्मंवेदगुह्येतिकामिनी ज्येष्ठमातुलनाशश्चजंघयोर्युगनाडिका ज्येष्ठभ्रातृविनाशश्चचतस्रोजानुयुग्मके पादयोर्दशनाड्यश्चतत्रवैधव्यमादिशेत् इतिमूलप्रसूतायामुनिभिःफलमीरितम् अथाश्लेषाजातयोःपुत्रकन्ययोरंगविभागेनफलंतत्रैव मूर्ध्निपंचसुराज्याप्तिर्मुखेसप्तपितृक्षयः नेत्रेद्वेजननीनाशोग्रीवायांस्त्रीषुलं

पदः स्कंधेवेदागुरौभक्तिर्हस्तेष्टौचबलीभवेत् हृद्येकादशभिश्चात्मघातीसंजायतेनरः स्त्रीवानाभौभ्रमः षड्भिर्गुदेनवतपोधनः पादेपंचधनंहंतिसार्पोदे तत्फलंक्रमात् अथाश्लेषावृक्षोपितत्रैवोक्तः फलंपुष्पंदलंशाखावल्कलतास्कंधएवच सार्पवल्यांदशाक्षांकस्वरविश्वार्कसागराः नाडिकास्तद्भवेबालेफलंज्ञेयंयथाक्रमम् श्रीःश्रीराजभयंहानिर्मातृपित्रात्मसंक्षयइति अयंविभागोनक्षत्रस्यषष्टिघटिकात्मकोज्ञेयः न्यूनातिरिक्तेअनुपातः ५५ अथमूलनिवासंसफलमिंद्रवज्रयाह स्वर्गइति शुचिराषाढः प्रोष्ठपदोभाद्रपदः इषआश्विनः माघःप्रसिद्धः एषुमासेषुमूलनक्षत्रंस्वर्गेस्ति श्रावणकार्तिकचैत्रपौषेषुभूमौतिष्ठति

स्वर्गेशुचिप्रोष्ठपदेषमाघेभूमौनभःकार्तिकचैत्रपौषे मूलंह्यधस्ताच्चतपस्यमार्गवैशाखशुक्रेष्वशुभंचतत्र ५६

तपस्यःफाल्गुनः शुक्रोज्येष्ठः फाल्गुनमार्गशीर्षवैशाखज्येष्ठेषु अधःपातालेमूलंतिष्ठति तत्फलंच यदामूलनक्षत्रंयस्मिन्मासेयत्रभवतितत्रैवस्वर्गमृत्युपातालेष्वेवप्रोक्तंशुभाशुभफलंददाति तेनद्रव्याद्यभावेस्वर्गपातालस्थेमूलेदोषाभावात् शांतेरनावश्यकत्वंज्ञेयम् यदातुभूमावेवमूलंतदाशांतिरवश्यंविधेयेतिशक्तेन उक्तंचज्योतिषार्णवे भूमिष्ठंदोषबहुलंस्वल्पमन्यत्रसंस्थितमिति ज्योतिर्निबंधे मूलाश्विपित्र्यचरणेप्रथमेचनूनंपौष्णेंद्रयोश्चफणिनश्चतुरीयपादे मातुःपितुःस्ववपुषोपिकरोतिनाशंजातोयदानिशिदिनेप्यथसंध्ययोर्वेति तत्रापिशांत्याशुभंभवतीतिज्ञेयम् ५६ ७

अथमूलप्रसंगाद्दुष्टेषुगंडांतादिनिमित्तेषुजातस्यारिष्टपरिहारंचशार्दूलविक्रीडितेनाह गंडांतेंद्रभेति एतेषुशिशोरुत्पत्तिर्नोशस्ता दुष्टफलदा गंडांतं तिथिनक्षत्रलग्नानांसंधिः तल्लक्षणंज्येष्ठापौष्णभेत्यादिनावक्ष्यति इंद्रभंज्येष्ठानक्षत्रं शूलयोगः पातोमहापातः परिघव्याघातगंडयोगाः अवमस्तिथिक्षयः संक्रांतिः सूर्यसंक्रमपुण्यकालः व्यतीपातवैधृतीयोगौ सिनीवालीदृष्टेंदुरमावास्या कुहूर्नष्टेंदुरमावास्या सादृष्टेंदुः सिनीवालीसानष्टेंदुकलाकुहूरित्यभिधानात् दर्शश्चंद्रदर्शनरहितामावास्या एतद्भेदोग्रेप्रतिपादयिष्यते वज्रेवज्रयोगे कृष्णापक्षचतुथस्याम् यमघंटेमघाविशाखेत्युक्तेदग्धयोगे सूर्येशपंचाग्निरसा

गंडांतेंद्रभशूलपातपरिघव्याघातगंडावमेसंक्रांतिव्यतिपातवैधृतिसिनीवालीकुहूदर्शके वज्रेकृष्णाचतुर्दशीषुयमघंटेदग्धयोगे
मृतौविष्टौसोदरभेजनिर्नपितृभेशस्ताशुभाशांतितः ५७

ष्टनंदाइत्युक्तेः मृतौद्वीशात्तोयादित्युक्तेर्मृत्युयोगेविष्टौभद्रायाम् सोदरस्यभ्रातुर्भगिन्यावानक्षत्रेपितृभेमाताचपिताचपितरौतयोर्भे मातृभेपितृभेच एषुनिमित्तेषुकृतस्यसुतायावाजन्मचेत्स्यात्तदाऽनिष्टकृत्स्यादित्यर्थः दुष्टनिमित्तस्योपलक्षणत्वात् त्रीतरजन्माप्यनिष्टम् सजातीयापत्यप्रसवानंतरंविजातीयापत्यप्रसवस्त्रीतरः यथापुत्रत्रयप्रसवानंतरंकन्याजन्म कन्यात्रयप्रसवानंतरंपुत्रजन्म साजनिःशांतितः वसिष्ठादिप्रोक्तशांत्यास्वनुष्ठितयाशुभा परिणामसुखदायिनीत्यर्थः ५७ अथशांतयोलिख्यंते

तत्रप्रथमंमूलशांतिरुच्यते शौनकउवाच अथातःसंप्रवक्ष्यामिमूलजातहितायच मातापित्रोर्धनस्यापिकुलेशांतिहितायच जातस्यद्वा

दशाहेतुजन्मर्क्षेवाशुभेदिने समाष्टकेवामतिमान्कुर्याद्वाशांतिमादरात् वसिष्ठः सुसमेपुण्यदेशेतुमंडपंकारयेद्बुधः कुंडंचतद्बहिः कुर्याद्ग्रहयज्ञोक्त
मार्गतः पंचामृतंपंचगव्यंपंचत्वक्पल्लवानिच उदुंबरवटाश्वत्थप्लक्षाम्रत्वक्सपल्लवाः शतौषधीमूलशंखनवरत्नानिमृत्तिकाः कुष्ठंमांसीहरिद्रेद्वेमुरा
शैलेयचंदनम् वचाचंपकमुस्ताचसर्वौषध्योदशैवहि गजाश्वरथ्यावल्मीकसंगमस्थानसंभवा ह्रदगोराजनगरद्वारतश्चाष्टमृत्तिकाः शतौषधीमूला
निच अश्मरी १ सहदेवी २ अपराजिता ३ मुंडा ४ उशीर ५ वाला ६ अधःपुष्पी ७ शंखपुष्पी ८ ज्येष्ठीमधु ९ कोरकः १० चक्रांकिता ११ विष्णुक्रांता १२
शिवक्रांता १३ मयूरशिखा १४ काकजंघा १५ भृंगराज १६ कुमारी १७ यह १८ कर्णिकार १९ अपामार्ग २० बिल्व २१ षणमूला २२ अंबुज २३ उत्तरा २४ पुत्र
जीव २५ दूर्वा २६ काश २७ कुश २८ साल २९ नाल ३० चक्रमर्द ३१ सिंही ३२ व्याघ्री ३३ अर्क ३४ प्लक्ष ३५ पलाश ३६ पिप्पल ३७ वट ३८ उदुंबर ३९ तुलसी ४० उत्पल
४१ शतपत्र ४२ अतसी ४३ सारिवा ४४ कदंब ४५ बकुल ४६ शमी ४७ राहिक ४८ निर्गुंडी ४९ मुंडी ५० दंडी ५१ ब्राह्मी ५२ अशोक ५३ सूर्यभक्ता ५४ रुद्रजटा ५५
कदली ५६ बीजपूरक ५७ दमनक ५८ मुसली ५९ पुनर्नवा ६० आम्र ६१ पाटल ६२ श्रीपर्णी ६३ करवीर ६४ चंपक ६५ गुडूची ६६ देवदारु ६७ अगरु ६८ चंदन ६९
कुटज ७० शिग्रु ७१ हरिद्रा ७२ जटामांसी ७३ वचा ७४ कुष्ठ ७५ तज ७६ दारुहरिद्रा ७७ बंधुजीव ७८ सिंधुवार ७९ सटी ८० अश्वगंधा ८१ मुस्ता ८२ कुरंटक ८३ पनस
८४ जीवक ८५ जाती ८६ मालती ८७ मधूक ८८ खदिर ८९ सप्तच्छद ९० शिरीष ९१ काकमाची ९२ शतावरी ९३ केतकी ९४ जंबू ९५ शाखा ९६ वेतस ९७ आमल
क ९८ सरल ९९ गिरिकर्णी १०० इति तिलमाषयवव्रीहिगोधूमानिप्रियंगवः चणकैःसहिताःसप्तसद्बीजानिचसर्वदा वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकम्

पंचरत्नमिदंप्रोक्तंमंत्रैःकुंभेषुनिक्षिपेत् सुवर्णेनप्रमाणेनतदर्धार्द्धेनवापुनः निर्ऋतिप्रतिमांकुर्याद्वित्तशाठ्यविवर्जितः अत्रविशेषः शौनकेन पलमानेनवार्द्धेनपादेनाथस्वशक्तितः नक्षत्रदेवतारूपंकारयित्वाविचक्षणः यद्वामूल्यंसुवर्णस्यस्थापयित्वाप्रपूजयेत् सुवर्णंसर्वदैवत्यंसर्वदेवात्मकोनलः सर्वदेवात्मकोविप्रःसर्वदेवमयोहरिरिति वस्त्राणिषोडशाष्टौचशुक्लसूक्ष्माण्यतंद्रितः ब्राह्मणान्वरयेत्पश्चात्स्वस्तिवाचनपूर्वकम् श्रोत्रियाश्चतुरोवाष्टौद्वादशत्वथषोडश प्रधानाचार्यमेतेषांश्रेष्ठंतत्प्रतिमार्चने ईशानादिचतुष्कोणेष्वव्रणान्जलपूरितान् पूर्वोक्तद्रव्यसंयुक्तान्स्थापयेद्रक्तवर्णकान् विप्रान्पृथक्पृथग्वापिमधुपर्कादिनार्चयेत् द्वारेषुजापकानष्टौद्वौद्वौचवरयेत्पुनः अब्लिंगैर्वारुणैर्मंत्रैःशुक्लपुष्पाक्षतादिभिः तत्तत्कुंभेजलंस्पृष्ट्वाकुशकूर्चैर्जपेदिति रुद्रसूक्तंचभद्राग्नेरानोभद्राइतिक्रमात् पुरुषसूक्तंचतन्मंत्रैर्देवान्ध्यात्वाप्रयत्नतः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् पंचगव्यमिदंकुंभेक्षिपेद्गजमदान्वितम् रजतंकांचनंताम्रंविद्रुमंतीर्थवारिच निक्षिपेद्धेममूलंचदशाष्टयवनिर्मितम् देवदारुश्चशैलेयंपद्मंनीलोत्पलंतथा वचांलोध्रंप्रियंगुंचशतच्छिद्रेघटेक्षिपेत् वंशपात्रोपरिन्यस्तंशतच्छिद्रेघटेस्थितम् ततश्चनिर्ऋतिंदेवमर्चयेत्पश्चिमामुखम् मोषुणास्त्वितिमंत्रेणशुक्लवस्त्राक्षतादिभिः मूलरूपंविधातव्यंश्यामंकुणपवाहनम् खड्गखेटधरंचोग्रंद्विभुजंचवृकाननं स्थापयेत्तंग्रहांश्चैववस्त्रगंधादिभिर्यजेत् चरुंचश्रपयेत्तत्रनैर्ऋतंदुष्कृतापहम् तत्रचत्वारः कुंभाश्चतुर्दिक्षुस्थाप्याः एकःकुंभोरुद्रस्थापनार्थमन्यत्रस्थाप्यःएकः शतच्छिद्रःकुंभः तस्मिन्कुंभेदेवदारुशैलेयमित्याद्यौषधानि तथासुवर्णमूलं अष्टादशयवपरिमितंनिक्षिप्यतदुपरिवंशादिपात्रंनिधायतदुपरिवस्त्रंनिधायतत्रनिर्ऋतिप्रतिमांइंद्रप्रतिमाजलप्रतिमासहितांस्थापयेत् ततःषोडशोपचारैःपंचो

पचारैर्वापूजयेत् उक्तंचशौनकेन पुण्यर्ग्भिर्मंत्रितैस्तोयैःप्रोक्षितायांक्षितौततः तत्रोदकुंभंसुश्लक्ष्णंरक्तंव्रणविवर्जितम् अकृष्णमूलंनिर्णिक्तंपूरयेन्निर्मलां
भसा आकलशेष्वित्यनयाकलशस्थापनंशुभम् इमंमइतिपंत्रेणपूरयेत्तीर्थवारिणा कुंभंचवस्त्रगंधाद्यैस्तत्तन्मंत्रैःप्रपूरयेत् याःफलिनीरित्यनयाक्षिपेद्रत्नौ
षधादिकम् वस्त्रावगुंठितंकुर्यात्पूरयेत्तीर्थवारिणा कूर्चहेमसमायुक्तंचूतपल्लवसंयुतं स्वस्तिकोपरिविन्यस्यक्षीरद्रुमसपल्लवैः द्रोणव्री हींश्चनिक्षिप्य-
ईशानेचनिधापयेत् पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं अर्चितंगंधपुष्पाद्यैःश्रीरुद्रंतत्रसंजपेत् तथाप्रतिरथंसूक्तंशतरुद्रानुवाककम् रक्षामंत्रंतथा
पुण्यंरक्षोघ्नंचस्पृशन्जपेत् त्रियंबकंजपेत्सम्यगष्टोत्तरसहस्रकम् एकवारंतथाजापीपावमानीःस्पृशन्जपेत् जपस्यपंचकुंभाश्चद्वयंवातदलाभतः श्रीरुद्र
स्यैककुंभंचसर्वसूक्तानितत्रतु तथान्यंपंचमंकुंभंपूर्वोक्तैर्लक्षणैर्युतम् चतुःप्रस्त्रवणंकुर्यात्पंचवक्त्रंचतद्भवेत् वस्त्रावगुंठितंकुर्यात्पूरयेत्तीर्थवारिणा पंचरत्नस
मायुक्तमाम्रपल्लवसंयुतं एतस्मिन्नपिपंचरत्नसप्तमृत्तिकाशतमूलदेवदारुप्रभृत्यौषधहेममूलानिक्षिपेत् तत्रशतमूलालाभे विष्णुक्रांतासहदेवीतुलसी
चशतावरी मूलानीमानिगृह्णीयाच्छतालाभेविशेषतः तस्योपरिन्यसेत्पात्रंस्वर्णंवारौप्यमृन्मयम् शुक्लवस्त्रेणसंच्छाद्यशतमूलानिनिक्षिपेत् कुंभो
परिन्यसेद्विद्वान्मूलनक्षत्रदैवतं अधिप्रत्यधिदेवौचदक्षिणोत्तरदेशयोः अधिदैवंजपेदादौज्येष्ठानक्षत्रदैवतं एवंप्रत्यधिदेवंचपूर्वाषाढर्क्षदैवतम्
स्वलिंगोक्तैश्चमंत्रैश्चप्रधानादीन्प्रपूजयेत् पंचामृतेनसंस्नाप्यआवाह्याथसमर्चयेत् उपचारैःषोडशभिर्यद्वापंचोपचारकैः रक्तचंदनगंधाद्यैःपुष्पैःकृष्णा
सितादिभिः मेषशृंगादिधूपैश्चघृतदीपैस्तथैवच सुरापोलिकमांसाद्यैर्नैवेद्यैर्भोजनादिभिः मत्स्यमांससुरादीनिब्राह्मणानांविवर्जयेत् सुरास्थाने-

प्रदातव्यंक्षीरंसैंधवमिश्रितम् पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत् उक्तगंधाद्यलाभेतु यथलाभंसमर्पयेत् पुष्पांतंतुसमभ्यर्च्यहोमंकुर्याद्यथोदितम् निर्वापप्रोक्षणादीनिचरोःकुर्याद्यथाविधि हविर्गृहीत्वाविधिनानैर्ऋतेर्वैक्रमाज्जुवेत् अत्रवसिष्ठेनविशेषोभिहितः मूलंप्रजामितिमंत्रद्वयस्य कण्वऋषिः निर्ऋतिर्देवता अनुष्टुप्छंदः मूलायस्वाहा प्रजापतयेस्वाहेत्युपहोममंत्रौ पलाशसमिदाज्येनचरुणाष्टसहस्रकम् अथवाष्टोत्तरशतंप्रत्येकंजुहुयात्ततः मूलंप्रजामित्यष्टाभिर्वाक्यैर्मंत्रद्वयेनच सावित्रसौम्यनैर्ऋत्यमंत्रैरश्वत्थसंभवैः समिद्भिश्चतिलव्रीहीन्हुत्वाव्याहृतिभिस्ततः मूलंप्रजामित्यष्टौचवाक्यान्याचार्यकोजपेत् अष्टोत्तरसहस्रंवाशतंवानियतात्मवान् अयंहोमप्रकारस्तुशाखांतरविषयोध्येयः मोषुणःपरापरेति यत्तेदेवेतिवापुनः पायसंघृतसंमिश्रंहुनेदष्टोत्तरंशतम् समिदाज्यचरून्पश्चाच्छक्तितःसंख्ययाहुनेत् अधिदैवतयोश्चैवजुहुयात्स्वस्वमंत्रकैः नक्षत्रदेवताभ्यश्चपायसेनतुहोमयेत् कृणुष्वेतिपंचदशभिर्जुहुयात्कृसरंततः गायत्र्याजातवेदसेत्रियंबकमितिक्रमात् सीरायुंजंतितामग्निंवास्तोष्पत्यग्निमेवच क्षेत्रस्यपतिनागृणानाग्निंदूतंतथैवच श्रीसूक्तेनतथाविद्वान्समिदाज्यचरून्क्रमात् अष्टोत्तरशतैर्वाथअष्टाविंशतिभिःक्रमात् अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुधः त्वंनःसोमेनपायसंजुहुयात्तुत्रयोदश चतुर्गृहीतमाज्यंचयातेरुद्रेतिमंत्रतः स्रुवेणजुहुयादाज्यंमहाव्याहृतिभिःक्रमात् हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुतीर्हुनेत् आचार्योयजमानोवाअग्नौपूर्णाहुतिंहुनेत् होमशेषंसमाप्याथवन्हिमारोपयेत्ततः कुंभाभिमंत्रणंकुर्याद्दक्षिणेनाभिमंत्रयेत् मृत्युप्रशमनार्थायजपेच्चत्र्यंबकंशतम् रुद्रकुंभोक्तमार्गेणरुद्रमंत्रंस्पृशन्जपेत् धूपंदीपंचनैवेद्यंकुंभयु

ग्मेनिवेदयेत् प्रसादयेत्ततोदेवमभिषेकार्थमादरात् भद्रासनोपविष्टस्ययजमानस्यऋत्विजः दारपुत्रसमेतस्यकुर्युःसर्वेभिषेचनम् अक्षीभ्यामिति सूक्तेनपावमानीभिरेवच आपोहिष्ठेतिनवभिरापइद्वाद्वयेनच सहस्राक्षत्र्यृचेनापिदेवस्यत्वेतिमंत्रकैः शिवसंकल्पमंत्रेणवक्ष्यमाणैश्चमंत्रकैः योसौवज्रधरोदेवोमहेंद्रोगजवाहनः मूलजातशिशोर्दोषंमातापित्रोर्व्यपोहतु योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु योसौदंडधरोदेवोधर्मोमहिषवाहनः मूलजातशिशोर्दोषंव्यपोहतुयमोमम योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः प्रशामयतुमूलोत्थंदोषंगंडांतसंभवम् योसौपाशधरोदेवोवरुणश्चजलेश्वरः नक्रवाहःप्रचेताख्योमूलोत्थाघंव्यपोहतु योसौदेवोजगत्प्राणोमारुतोमृगवाहनः प्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः योसौनिधिपतिर्देवःखड्गभृन्नरवाहनः मातापित्रोःशिशोश्चैवमूलदोषंव्यपोहतु योसौपशुपतिर्देवःपिनाकीवृषवाहनः आश्लेषामूलगंडांतदोषमाशुव्यपोहतु विघ्नेशःक्षेत्रपोदुर्गालोकपालानवग्रहाः सर्वदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः तच्छंयोरभिषेकंतुसर्वदोषोपशांतिदम् सर्वकामप्रदंदिव्यंमंगलानांचमंगलम् वस्त्रांतरितकुंभाभ्यांपश्चात्तुस्नापयेद्बुधः ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः यजमानोदक्षिणाभिस्तोषयेदृत्विगादिकान् धेनुंपयस्विनींदद्यादाचार्यायसवत्सकाम् निर्ऋतिप्रतिमांकुंभंवस्त्रंहेमंचदापयेत् ग्रहार्थवस्त्रप्रतिमास्तस्मैदद्यात्प्रयत्नतः श्रीरुद्रजापिनेदेयःकृष्णोनड्वान्प्रयत्नतः तत्कुंभवस्त्रप्रतिमास्तस्मैदद्यात्प्रयत्नतः उक्तालाभेततोदद्यादाचार्यब्रह्मऋत्विजाम् तत्तन्मूल्यंप्रदातव्यंशक्त्यावाथप्रदापयेत् दद्यादन्नंपायसादिब्राह्मणान्भोजयेच्छतम् अलाभेसतिपंचाशद्दशकंतदलाभतः सर्वशांतेश्चपठनमाशिषांग्रहणंतथा गृहीक्षमापयेद्विद्वान्निर्ऋ

तिःप्रीयतामिति इतिशौनकीयेमूलशांतिः अथाश्लेषाशांतिरप्येवमेवकार्या तत्रविभवेपूर्वोक्तवत्पंचकुंभाःस्थाप्याः असंभवेकुंभद्वयम् एकत्ररुद्रस्थापनम् द्वितीये आश्लेषाप्रतिमास्थापनम् अभिमंत्रादिपूर्ववत् तत्राश्लेषाप्रतिमासर्पाकारा अधिदैवतबृहस्पतिप्रतिमा प्रत्यधिदैवतपितृप्रतिमास्थाप्यापूज्याच्च नमो स्तुसर्पेभ्य इतिपूजामंत्रइतीरितः सर्पोरक्तस्त्रिनेत्रश्चद्विभुजःपीतवस्त्रकः फणाकाधिधरस्तीक्ष्णोदिव्याभरणभूषितः एवंध्यात्वाततोभ्यर्च्यहोमकर्मसमारभेत् अभिषेकेविशेषतः आश्लेषाऋक्षजातस्यमातापित्रोर्धनस्यच भ्रातृज्ञातिकुलस्थानांदोषंसर्वंव्यपोहतु पितरःसर्वभूतानांरक्षंतुपितरःसदा सार्पनक्षत्रजातस्यवित्तंचज्ञातिबांधवान् सर्पाधीशनमस्तुभ्यंनागानांचगणाधिप गृहाणार्घ्यंमयादत्तंसर्वारिष्टप्रशांतये इत्यर्घ्यमंत्रः मूलनक्षत्रवत्कुर्यात्सर्वदोषःस्वनामतः एतच्चमूलाश्लेषाशांतिकद्वयंविवाहेउपस्थितेश्वशुरस्यश्वश्र्वाश्चसत्वेमूलाश्लेषोत्पन्नयोरपिवधूवरयोस्तत्तदरिष्टनिवृत्त्यर्थंविधेयम् उपलक्षणत्वाच्चज्येष्ठाविशाखोत्पन्नायावध्वावरस्यज्येष्ठबंधुकष्टशांतयेन नारदः मूलजाश्वशुरंहंतिव्यालजाचतदंगनाम् ऐंद्रीपत्यग्रजंहंतिदेवरंतुद्विदैवजा शांतिर्वापुष्कलाचेत्स्यात्तर्हिदोषोनकश्चनेति इत्याश्लेषाशांतिः गंडशांतिंप्रवक्ष्यामिसोममंत्रेणभक्तिमान् कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नवम् अष्टाभिश्चचतुर्भिर्वाद्वाभ्यांवाशोभनंतथा तन्मध्येपायसंशंखेनवनीतेनपूरिते राजतंचंद्रमभ्यर्च्यसितपुष्पसहस्रकैः दैवज्ञःशुक्लवासास्तुशुक्लमाल्यांबरार्चितः सोमोहमितिसंचिंत्यपूजांकुर्यादतंद्रितः दद्याद्वैदक्षिणामिष्टांगंडदोषप्रशांतये शुक्लंवागीश्वरंचैवताम्रपात्रसमन्वितम् गंडदोषोपशांत्यर्थंदद्याद्वेदविदेशुचिः अत्रापिपूर्ववत्प्रतिमाकलशहोमाभिषेकादिकंकार्यम् तिथिगंडेत्वनड्वाहं-

नाक्षत्रेधनुरुच्यते कांचनंलग्नगंडेतु गंडदोषोविनश्यति आद्यभागेपितुर्गंडेत्रयाणामभिषेचनम् इतरत्रशिशोर्मातुरभिषेकंचकारयेत् अन्यच्च
उत्तरातिष्यचित्रासुपूर्वाषाढोद्भवस्यच कुर्याच्छांतिंप्रयत्नेननक्षत्राकारजांबुधैः चित्राद्यर्द्धेपुष्यपादेद्वितीयेपूर्वाषाढाधिष्ण्यपादेद्वितीये जातःपु-
ष्यश्चोत्तराद्येविघातीमातापित्रोर्भ्रातुरप्यात्मनश्च द्विमासश्चोत्तरादोषःपुष्यश्चैवत्रिमासकः पूर्वाषाढाष्टमेमासिचित्राषण्मासिकंफलम् नवमासं
तथाश्लेषामूलेचाष्टौसमाःस्मृताः ज्येष्ठामासेपंचदशेपुत्रदर्शनवर्जिता उत्तरंतिलपात्रंस्यात्तिष्यगोदानमिष्यते अजाचित्रासुवैदेया पूर्वाषाढेतुकां
चनम् यवांश्चव्रीहिमाषांश्चतिलमुद्गांश्चदापयेत् यथावित्तानुसारेणकुर्याद्ब्राह्मणभोजनम् पितुरायुष्यवृद्ध्यर्थंशांतिरत्रविधीयते इतिगंडां
तादिशांतिः अथज्येष्ठाशांतिः भरद्वाजः ज्येष्ठादौमातृजननींमातामहंद्वितीयके तृतीयंमातुलंहंतिचतुर्थेजननींतथा आत्मानंपंचमेहंति
षष्ठेगोत्रक्षयोभवेत् सप्तमेकुलनाशःस्यादष्टमेज्येष्ठसोदरः नवमेश्वश्रुरंहंतिसर्वस्वंदशमेतथेतिप्रत्येकंघटिकाषट्कस्यफलमुक्तम् अत्रापिमू
लशांतिवत्सर्वंकार्यम् तत्रविशेषः घटिकैकाचमैत्रांतेज्येष्ठादौघटिकाद्वयम् तयोःसंधिरितिज्ञेयंशिशृगंडांतमीरितम् ज्येष्ठांत्यपादस्तुपितुःस्वस्य
चाभिविनाशकः ज्येष्ठर्क्षेकन्यकाजाताहंतिशीघ्रंधवाग्रजम् शांतिंतस्यप्रवक्ष्यामिगंडदोषप्रशांतये तत्रचतुर्दिक्षुकुंभचतुष्टयंसंस्थाप्यतन्मध्ये
शतच्छितंपंचमंकुंभंसंस्थाप्यपूर्ववत्पूजादिविधाय तत्र वज्रांकुशधरंदेवमैरावतगजान्वितम् कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनायकम् शालितंडु
लसंपूर्णकुंभस्योपरिपूजयेत् इंद्रायेंद्रोमरुत्वतइतिमंत्रेणवाग्यतः पूजयेद्विधिनासम्यग्लोकपालगणान्वितम् रक्तवस्त्रद्वयोपेतंदेवराजंशचीपतिम् पूजयेद्वा

रुणैर्मंत्रैः कुंभान्धी मान्प्रयत्नतः त्वन्नोअग्नेजपेदादौसत्वन्नोपिद्वितीयके समुद्रज्येष्ठाइतिचेमंमेगंगेचतुर्थकम् पूजयेद्वस्त्रगंधाद्यैश्चतुरः कलशानपि आनोभद्राजपंचादौभद्राअग्नेद्वितीयकम् इंद्रसूक्तंरुद्रजाप्यंजपेन्मृत्युंजयंततः समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंशतम् सर्पिषाचरुणाचैवमूलमंत्रेणवाग्यतः हुतेजाप्यंचतेनैवयतइंद्रभयेतिच तिलान्व्याहृतिभिर्हुत्वाशतमष्टोत्तरंपृथक् ततोभिषेकःततोरूपंरूपमितिमंत्रेण तच्चक्षुरितिमंत्रेण आज्यावलोकनम् पुनर्दैवतापूजनंकृत्वा नमोस्तुस्करनाथायनमस्तुभ्यंशचीपते गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये अष्टोत्तरशतंसंख्याकुर्याद्ब्राह्मणभोजनम् अन्यत्सर्वंतुपूर्ववत् इतिज्येष्ठाशांतिः दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ शूलगंडेचपरिघेवज्रेचयमघंटके कालदंडेमृत्युयोगेदग्धयोगसमन्विते तस्मिन्गंडदिनेप्रासेप्रसूतिर्यदिजायते अतिदोषकरीप्रोक्तातत्रपापयुतेसति विचार्यतत्रदैवज्ञःशांतिंकुर्याद्यथाविधि यजनंदेवतानांचग्रहाणांचैवपूजनम् दीपंशिवालयेभक्त्यागोघृतेनप्रदापयेत् अभिषेकंशंकरायअश्वत्थस्यप्रदक्षिणाम् अभीष्टफलसिद्ध्यर्थंकुर्याद्ब्राह्मणभोजनम् गाणपत्यंपुरुषसूक्तं सौरंमृत्युंजयंशुभम् शांतिजाप्यंपुनश्चैवकृत्वामृत्युंजयीभवेत् इत्युत्तरगार्ग्येदुष्टयोगशांतिः कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः संक्रांतिश्चरवेस्तत्रजातोदारिद्र्यकारकः नवग्रहमखंकुर्यात्तस्यदोषस्यशांतये प्रथमंगोमुखाज्जन्मततःशांतिंसमाचरेत् गृहस्यपूर्वदिग्भागेगोमयेनानुलिप्यच अलंकृतस्वदेशेतुव्रीहिराशिंप्रकल्पयेत् पंचद्रोणमितंधान्यंतदर्द्धंतंदुलेनच तदर्द्धंतुतिलैःकुर्यादन्योन्योपरिकल्पयेत् द्रव्यत्रितयराशौतुअष्टपत्रंलिखेद्बुधः पुण्याहंवाचयित्वातु आचार्यंवरयेत्पुरा राशौप्रतिष्ठितंकुंभमव्रणंसुमनोहरम् तीर्थोदकेनसंभृत्यसमृदोषधिपल्लवम् पंचगव्यंपंचरत्नं-

वस्त्रयुग्मेनवेष्टयेत् तस्योपरिन्यसेत्पात्रंसूक्ष्मवस्त्रेणसंयुतम् प्रतिमांस्थापयेत्पश्चात् अधिप्रत्यधिदेवताम् चंद्रादित्याकृतीपार्श्वेमध्येवैधृतिमर्चयेत् एवमेवव्यतीपातशांतौसंक्रमणास्यच अधिदैवंभवेत्सूर्यश्चंद्रःप्रत्यधिदैवतम् तत्तद्व्याहृतिपूर्वेणतत्तन्मंत्रेणपूजयेत् त्रियंबकेनमंत्रेणरुद्रपूजांसमाचरेत् उत्सूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत् आप्यायस्वेतिमंत्रेणसोमपूजांसमाचरेत् तत्राष्टोत्तरसहस्त्रंअष्टोत्तरशतंवाअष्टाविंशतिसंख्याजपंसर्वंसौरजपंच आनोभद्राअग्नेरितिसूक्तंपुरुषसूक्तंत्रियंबकं एतान्मंत्रान्कुंभान्स्पृष्ट्वाचतुर्दिक्षुजपंकुर्युः त्रियंबकेनमंत्रेणसमिदाज्यचरून्हुनेत् अष्टोत्तरसहस्त्रकम् अष्टोत्तरशतम् अष्टाविंशतिर्वा मृत्युंजयेनमंत्रेणातिलहोमंसमाचरेत् ततःसमुद्रज्येष्ठाश्चआपोहिष्ठेत्यृचेनच अक्षीभ्यामितिसूक्तेनपावमानीभिः त्रियंबकेन उत्सूर्येति आप्यायस्वेतिवैदिकमंत्रैः सुरास्त्वामभिषिंचंत्वित्यादिकैःपौराणमंत्रैश्चाभिषेकंकुर्यात् ततआज्यावेक्षणम् अन्यद्दक्षिणादानादिकंपूर्ववत् इत्युत्तरगार्ग्येव्यतीपातवैधृतिसंक्रांतिशांतिः अथकुहूसिनीवालीदर्शशांतिः तत्रयस्याःकस्याश्चिदमावास्यायाः अष्टौभागान्कृत्वाप्रथमविभागेचंद्रदर्शनमस्तिनवेतिविचार्यम् यदाचंद्रदर्शनंतदासिनीवाली यदाचंद्रादर्शनंतदादर्शः सकलचंद्रक्षयस्तदाकुहूरित्यर्थः तदुक्तंछंदोगपरिशिष्टे इंदुक्षयकालः श्राद्धकालइतिप्रस्तुत्येंदुक्षयकालपरिगणनमुक्तम् अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचंद्रमाः अमावास्याष्टमेभागेपुनःकिलभवेदणुः अत्रेंदुराद्येप्रहरेचतिष्ठेत् चतुर्थभागोनकलावशिष्टः तदंतएवक्षयमेतिकृत्स्न एवंहिज्योतिश्चक्रविदोवदंतीति एतत्कारिकाव्याख्यानंतद्भाष्यकारेणकृतम् प्रहरनवात्मकश्चंद्रक्षयकालइति तत्रामायाः सप्तमाष्टमप्रहरौकृत्स्नक्षयका

लः चतुर्दशीशेषयामदर्शादियामौच्चचंद्रसूक्ष्मताकालइति तत्रायंमंत्रविषयविवेकः यस्याममावास्यायांप्रथमप्रहरेशास्त्रात्प्रत्यक्षतोवाचंद्रदर्शनं स्यात्सासिनीवालीसर्वदासिद्धा तत्रोत्पन्नस्यसिनीवालीशांतिर्विधेया अथतस्यामेवामावास्यायांयदानष्टेंदुकलात्वंसचकृत्स्नक्षयकालोमावास्यायांअंतिमक्षणएव तस्यचसंक्रांतिसमयवदितिसूक्ष्मत्वेनदुर्ज्ञेयत्वात् अमावास्यायाःसप्तमाष्टमप्रहरयोः कृत्स्नक्षयकालस्यभाष्यकारेण परिभाषितत्वात् सप्तमाष्टमप्रहरात्मकःकालःकुहूशब्दवाच्यस्तत्रोत्पन्नस्यकुहूशांतिः पुनस्तस्यामेवामावास्यायांप्रथमप्रहरानंतरंसप्तमप्रहरादर्वाक्प्रहरपंचात्मकः कालोदर्शशब्दवाच्यइति तत्रोत्पन्नस्यदर्शशांतिर्विधेयेति एवमेकस्यामेवामावास्यायांकालभेदेनत्रयंसंभवति यदात्वमावास्यायांचंद्रदर्शनाभावः तदाद्वयमेवदर्शत्वकुहूत्वरूपंसंभवतीति अत्रकेचिच्चतुर्दशीशेषेचंद्रदर्शनेसतिपरदिनेयाऽमावास्यासासिनीवालीइत्याहुस्तन्न दृष्टश्चंद्रोयस्यामिति अन्यपदार्थस्य अमावास्यारूपस्यैवसामानाधिकरण्येनग्रहणात् किंच सिनीशब्देनश्वेताचंद्रकलावर्णवाचिनः श्वेतशब्दाद्वर्णादनुदात्तात्तोपधात्तोनइतिङीप्नकारौसिनीतांवलतेप्राप्नोतीतिसिनीवालीतिव्युत्पत्तिश्च चतुर्दश्युदितचंद्राश्रयायाममावास्यायांनयुज्यतेइतिच तस्माद्दृष्टेंदुःसिनीवालीत्यमावास्यैवाभिधीयतइत्येवज्यायः अथगोलगणितविदोऽन्यथासमादधुः तत्रस्याद्दृष्टेंदुःसिनीवालीत्यादौउदयास्ताधिकारोक्तरीत्या दृक्कर्मद्वयसंस्कृतस्यदर्शनयोग्यत्वेसतिप्राक्क्षितिजक्रांतिवृत्तसंबंधवत्त्वंग्रहादेर्दर्शनशब्दवाच्यंमेघाद्यावरणेतुशास्त्रीयदर्शनेदृशिर्वर्त्तते आत्मादृष्टव्यइत्यादिवत् तथैवदर्शनायोग्यत्वेसतिप्राक्क्षितिजसंबंधवत्त्वमदर्शनशब्दवाच्यमित्यदर्शनलक्षणम् अतश्चंद्रदर्शनलक्षणवत्यमावास्यासिनीवा

लीनाम चंद्रादर्शनलक्षणवत्यमावास्याकुहूर्नाम लक्षणद्वयेनक्रांताऽमावास्यादर्शशब्दवाच्यइति अयमाशयः यदामावास्यासूर्योदयात्प्राक्घटिकात्रयवतीतदादृक्कर्मसंस्कारवशेनचंद्रस्यदृश्यत्वमागतंचेत्तदासासंपूर्णाऽमावास्यासिनीवालीनाम तादृश्याममायांद्वितीयसूर्योदयावधिकायामुत्पन्नस्यारिष्टशांतयेसिनीवालीशांतिस्तत्फलंचादेश्यम् अथतिथिवृद्धौवातस्याअमावास्यायाद्वितीयसूर्योदयानंतरमवशिष्टामावास्याघटीषूत्पन्नस्यकुहूशांतिरेव चंद्रादर्शनलक्षणसत्त्वात् यदिसैवामावास्यासूर्योदयात्प्राक्घटिकात्रयचतुष्टयंवाप्रतिपत्संबंधा तदासिनीवाल्येव अथतादृश्यांन्यूनायामधिकायांवाऽमावास्यायांतु दृक्कर्मसंस्कारवशेनचंद्रस्यादृश्यत्वमागतंसामावास्यासंपूर्णाकुहूर्नाम चंद्रादर्शनलक्षणसत्त्वात् तत्रापिकुहूशांतिरादेश्या यदातुसूर्योदयानंतरंकियतीषुद्वित्रिघटीषु अतिक्रांतासु अमावास्याप्रवृत्तिः पूर्वंचतुर्दश्येवास्थितातस्यामुषसिदृक्कर्मवशतश्चंद्रोदृष्टोमावादर्शि तथाप्यमावास्यायांचंद्रदर्शनलक्षणानाक्रांतत्वात्सासंपूर्णामावास्यादर्शोनाम तत्रदर्शजननशांतिर्विधेयेति एवममावास्याभेदेनसिनीवालीकुहूदर्शरूपपक्षत्रयंसावकाशमितिगोलज्ञानांमतं अथप्रकारांतरेणसिनीवालीसर्ववादिसिद्धासैव कुहूस्तुपारिभाषिकी यदाहवसिष्ठः नक्षत्रेयस्यदर्शांतोविषनाड्याभवेद्यदि कुहूयोगइतिख्याताव्याधिमृत्युभयादिकृत् अयमर्थः तस्मिन्नक्षत्रेयाविषनाड्यउक्तास्तस्मिन्कालेयदिदर्शस्यचरमघटिकाभवेत्तन्नक्षत्रंचयस्यपुरुषस्यजन्मनक्षत्रंजन्मकालेकालांतरेवास्यात्तस्यपुंसोव्याधिमृत्युकृत्कुहूयोगोज्ञेयः तत्रकुहूजननफलंशांतिश्चस्यात् कालांतरेपिकुहूयोगसंभवेशांतिर्विधेया अतएवजगन्मोहने यस्यजन्मर्क्षगश्चंद्रोविषनाड्यांकुहूर्भवेत्

अभिचारेणांकितस्यस्वयमेवमरिष्यतीति अतोविषघटिकातः पूर्वकालोदर्शशब्दवाच्यइति एवंप्रकारत्रयेणासिनीवालीकुहूदर्शानांभेदउपपादितस्तत्रयथा संप्रदायंव्यवस्थेत्यलमतिप्रसंगेन अथशांतिप्रकारः सिनीवाल्यांप्रसूतास्याद्यस्यभार्यापशुस्तथा गवाश्वमहिषीचैवशक्रस्यापिश्रियंहरेत् येवसंतिद्विजाश्चान्येस्वप्रसादोपजीविनः वर्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान् द्विजाःपक्षिणः कुहूप्रसूतिरत्यर्थंसर्वदोषकरीमता यस्यप्रसूतिरेतेषांतस्यायुर्धननाशिनी नारींविनाचशेषाणांपरित्यागोविधीयते परित्यागात्तत्रशांतिंकुर्याद्भक्त्याविचक्षणः प्रतिमांकारयेच्छंभोश्चतुर्भुजसमन्विताम् त्रिशूलखङ्गवरदाभयहस्तांयथाक्रमात् श्वेतवर्णांश्वेतपुष्पांश्वेतांबरवृषस्थिताम् त्रैयंबकेणमंत्रेणपूजांकुर्याद्यथाविधि इंद्रश्चतुर्भुजोवज्रांकुशचापससायकः रक्तवर्णोगजारूढोयतइंद्रेतिमंत्रतः पितरःकृष्णावर्णाश्चचतुर्हस्ताविमानगाः यष्ट्यक्षसूत्रकमंडल्वभयानांचधारिणः येसत्याइतिमंत्रेणपूजांकुर्यादनंतरम् कलशस्थापनपूजादिपूर्ववत् समिदाज्यचरोर्होमंतिलमाषैश्चसर्षपैः अश्वत्थप्लक्षपालाशसमिद्भिःखादिरैःशुभैः अष्टोत्तरशतंमुख्यंप्रत्येकंजुहुयाद्बुधः त्रियंबकेणमंत्रेणतिलान्व्याहृतिभिर्हुनेत् शंकरस्याभिषेकंचकुर्यादाज्यावलोकनम् अन्यत्सर्वमभिषेकादिपूर्ववत् इतिसिनीवालीकुहूशांतिः अथदर्शशांतिः अथातोदर्शजातानांमातापित्रोर्दरिद्रता तद्दोषपरिहारायशांतिंवक्ष्यामिनारद तत्रसंकल्पंविधायतन्मध्येकलशंसंस्थाप्यतन्मध्येनिक्षिपेद्द्रव्यंदधिक्षीरघृतादिकम् न्यग्रोधोदुंबरोश्वत्थाःसचूतानिंबकास्तथा एतेषांवृक्षमूलानांत्वगादीन्पल्लवांस्तथा पंचरत्नानिनिक्षिप्यवस्त्रयुग्मेनवेष्टयेत् तत्रसर्वेसमुद्राइति आपोहिष्ठात्र्यृचेनेति कयानश्चित्रइत्यृचा यत्किंचेदमृचाचैवसमुद्रज्येष्ठाइत्यृचा अभि

मंत्र्योदकुंभंतमग्नेःपूर्वेनिधापयेत् दर्शस्यदेवतायाश्चसोमःसूर्यस्वरूपकाः प्रतिमांस्वर्णजांनित्यंराजतींताम्रजांतथा आप्यायस्वेतिमंत्रेणसवितापश्चात्तमेवच
उपचारैःसमाराध्यततोहोमंसमाचरेत् समिधश्चचरुद्रव्यंक्रमेणजुहुयाद्बुही हुनेत्सवितृमंत्रेणसोमोधेनुचमंत्रतः अष्टोत्तरशतंवापिअष्टाविंशतिसंख्यया
अभिषेकादिपूर्ववत् हिरण्यंरजतंचैवकृष्णाधेनुश्चदक्षिणा ब्राह्मणान्भोजयेत्तत्रकारयेत्स्वस्तिवाचनम् इतिदर्शशांतिः कृष्णपक्षेचतुर्दश्यांप्रसूतेःषड्वि
धंफलम् चतुर्दशींचषड्भागांकुर्यादादौशुभंस्मृतम् द्वितीयेपितरंहंतितृतीयेमातरंतथा चतुर्थेमातुलंहंतिपंचमेवंशनाशनम् षष्ठेतुधनहानिःस्यादात्मनोवं
शनाशनम् तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः प्रतिमांकारयेच्छंभोःकर्षमात्रसुवर्णतः तदर्द्धार्द्धेनवाकुर्यात्सर्वलक्षणसंयुताम् वृषभेचसमासीनांवर
दाभयपाणिकाम् शुद्धस्फटिकसंकाशांश्वेतमाल्यांबरान्विताम् त्रैयंबकेणमंत्रेणपूजांकुर्याद्विधानतः तत्रमूलशांतिवत्कलशस्थापनादिकृत्वा तत्रशंभुपू
जांविधाय तत्रावाह्यवारुणीमंत्रैरनेनचविधानतः इमंमेवरुणेत्यनयातत्त्वायामीत्यृचातथा त्वंनोअग्नेइत्यनयासत्वंनइतिमंत्रतः आग्नेयंकुंभमारभ्यपू
जांकुर्याद्यथाक्रमं आनोभद्राश्चसूक्तेनभद्राअग्नेश्चसूक्तम् जस्त्वापुरुषसूक्तंचकद्रुद्रंतुक्रमाज्जपेत् ईश्वरस्याभिषेकंचग्रहपूजांचकारयेत् समिदाज्य-
चरूंश्चैवतिलमाषांश्चसर्षपान् अश्वत्थप्लक्षपालाशसमिद्भिःखादिरैःशुभैः अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा अष्टाविंशतिभिर्वापिहोमंकुर्यात्पृथ
क्पृथक् त्रैयंबकेणमंत्रेणतिलान्व्याहृतिभिःक्रमात् ग्रहाएवंचहोतव्याश्चास्मदुक्तविधानतः अन्यत्सर्वमाज्यावलोकनादिपूर्ववत् इतिकृ
ष्णाचतुर्दशीजननशांतिः एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः प्रसूतिश्चतयोर्मृत्युर्भवेदेकस्यनिश्चयात् तत्रशांतिंप्रवक्ष्यामिसर्वाचार्यम

तेनतु अग्नेरीशानभोगेतुनक्षत्रप्रतिमांततः तन्नक्षत्रोक्तमंत्रेणचार्चयेत्कलशोपरि रक्तवस्त्रेणसंच्छाद्य वस्त्रयुग्मेनवेष्टयेत् स्वस्वशाखोक्तमार्गेणकुर्यादग्निमुखंततः अनेनैवतुमंत्रेणहुनेदष्टोत्तरंशतम् प्रत्येकंसमिदन्नाद्यैःप्रायश्चित्तांतमेवच अभिषेकंततःकुर्यादाचार्यःपितृपुत्रयोः वस्त्रालंकारगोदानैराचार्यंपूजयेत्ततः ऋत्विग्भ्योदक्षिणांदद्यान्माषत्रयसुवर्णकम् देवताप्रतिमादानंधान्यवस्त्रादिभिःसह यानशय्यासनादींश्चदद्यात्तद्दोषशांतये भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः इत्येकनक्षत्रशांतिः अत्रैकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोरित्यत्रभ्राता च भ्राताचभ्रातराविति भ्रातृपुत्रौस्वसृदुहितृभ्यामिति एकशेषेसोदरयोर्भ्रातृभगिन्योरेवनिषेधःस्यान्नतुपुत्रभ्रात्रोः एवंपितृपुत्रयोरित्यत्रापिपिताचपुत्रश्चेतिद्वंद्वेपितापुत्रयोरेकनक्षत्रजनननिषेधःस्यान्नतुमातृपुत्रयोः नचमाताचपिताचपितरौमातापित्रेत्येकशेषे तथापुत्रश्चदुहिताचपुत्रौपितरौ च पुत्रौचेतिद्वंद्वे पितृपुत्राणामितिबहुवचनंस्यात् तथापिवचनांतरानुरोधात् इष्टविषयोपिसंगृहीतोभविष्यति यदाहवसिष्ठः पित्रोस्तुजन्मनक्षत्रे जातस्तुपितृमातृहा जन्मर्क्षेंशेचतल्लग्नेजातःसद्योमृतिप्रदः देवकीर्तिः यद्येकस्मिन्धिष्ण्येजायंतेदुहितरोथवापुत्राःपित्रोरंतकराःस्युर्यद्यपरेप्रीतिरतुल्यास्यात् अपरेअन्यनक्षत्रे गर्गः यस्यैवजन्मनक्षत्रेजायेद्भ्रातासुतोपिवा सजातीयःसजात्यावासोस्यप्राणान्प्रसाधयेदिति अथमूलउपलक्षणत्वेनसर्वशांतिशेषभूतोगोमुखप्रसवोभिधीयते गर्गः प्रणिपत्यरविंवक्ष्येप्रायश्चित्तमनुस्मरन् सर्वारिष्टविनाशाययदुक्तंज्योतिषार्णवे पित्ररिष्टकृतारिष्टेमात्ररिष्टेतथैवच पौष्णाश्विन्योर्गुरौंसार्पमघाचित्रेंद्रमूलभे एषुऋक्षेषुजातस्यकुर्याद्गोजननंतथा जन्मर्क्षेंवात्रिजन्मर्क्षेशुभवारे

शुभेदिने कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकम् गोमयेनोपलिप्याथयथावित्तानुसारतः नवशूर्पंतुतन्मध्येरक्तवस्त्रंप्रसारयेत् स्थापयित्वाशि
शुंतत्रपुनःसूत्रेणवेष्टयेत् गोमुखंदर्शयित्वातुपुनर्जातंतुगोमुखात् विष्णुर्योनीतिसूक्तेनगव्येनस्नापयेच्छिशुं गवामंगेषुमंत्रेणगवामंगेषुसं
स्पृशेत् विष्णोःश्रेष्ठेनमंत्रेणगोप्रसूतंतुबालकम् आचार्यस्तुसमादायपश्चान्मात्रेददात्तदा माताजघन्यभागस्थाशिशुमानीयतन्मुखात् ततः
पित्रेतदाददद्यात्ततोमात्रेप्रदापयेत् वस्त्रेसंस्थाप्यतुपितापुत्रस्यमुखमीक्षयेत् गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं आपोहिष्ठादिभिर्मंत्रैरभिषिंचे
त्ततःशिशुं मूर्ध्निचाघ्रायतंपुत्रंतन्मंत्रेणतदापिता अंगादंगात्संभवसिहृदयादधिजायसे आत्मावैपुत्रनामासिसजीवशरदःशतं मूर्धनित्रिरवघ्रायतं
शिशुंस्थापयेत्ततः पुण्याहंवाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः दरिद्रायाथविप्रायतांगांचाभ्यर्च्यदापयेत् गोवस्त्रस्वर्णधान्यादिदद्यादर्कादितःक्रमात्
यथाशक्तिधनंदद्याद्ब्राह्मणेभ्यस्तथापिता ततोहोमंप्रकुर्वीतस्वस्वशाखोक्तमार्गतः उल्लेखनादिकंकृत्वाचाज्यभागांतमाचरेत् होमस्यैशानदिग्भा
गेधान्योपरिशुभंघटं सपंचगव्यंसंस्थाप्यतिलांस्तत्रविनिक्षिपेत् क्षीरद्रुमकषायांश्चपंचरत्नानिनिक्षिपेत् वस्त्रयुग्मेनसंच्छाद्यक्षीरादिभिरथा
र्चयेत् विष्णुंवरुणमभ्यर्च्यप्रतिमांचविधानतः आपोहिष्ठेतितिसृभिरप्सुमेसोमइत्यथ तद्विष्णोःपरमंपदमक्षीभ्यामितिसूक्ततः ऋग्भिराभिःप्र
त्यृचंच अष्टाविंशतिसंख्यया अशक्तौचाष्टसंख्यंवादधिमध्वाज्यसंयुतं आदित्यादिग्रहाणांचहोमंकुर्यात्समंत्रकं इतिगोमुखप्रसवशांतिः
अथप्रसंगात्त्रीतरशांतिः सुतत्रयेसुताचेत्स्यात्तत्त्रयेवासुतोयदि मातापित्रोःकुलस्यापितदारिष्टंमहद्भवेत् जातस्यैकादशेवापिद्वादशान्

हेशुभेदिने आचार्यमृत्विजान्वृत्वाग्रहयज्ञपुरःसरम् ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृताः पूजयेद्धान्यराशिस्थकलशोपरिशक्तितः पंच
मेकलशेरुद्रंपूजयेद्रुद्रसंख्यया रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः द्विजएकोजपेद्धोमकालेस्तुचिसमाहितः आचार्योजुहुयादत्रसमिदा
ज्यतिलांश्चरून् अष्टोत्तरसहस्रंवाशतंवाविंशतिंतुवा देवताभ्यश्चतुर्वक्त्रादिभ्योग्रहपुरःसरम् कांस्याज्यवीक्षणंकृत्वाशेषंपूर्ववदाचरेत्
इतित्रीतरशांतिः अथचंद्रसूर्यग्रहणसमयजननशांतिः ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते व्याधिपीडातदास्त्रीणामादौतुऋतुदर्श
नात् शांतिरस्तेषांप्रवक्ष्यामिनराणांहितकाम्यया यस्मिन्नृक्षेविशेषेणग्रहणंसंप्रजायते तदृक्षाधिपतेरूपंसुवर्णेनप्रकल्पयेत् यथाशक्त्या
नुसारेणवित्तशाठ्यंनकारयेत् सूर्यग्रहेसूर्यरूपंसुवर्णेनस्वशक्तितः चांद्रंचंद्रग्रहेधीमान्रजतेनविशेषतः राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः
नागेनसीसकेन शुचौदेशेप्रयत्नेनगोमयेनप्रलेपयेत् तस्योपरिन्यसेद्धीमानन्नंवस्त्रंसुशोभनम् त्रयाणांचैवरूपाणांस्थापनंतत्रकारयेत्
रक्ताक्षतंरक्तगंधंरक्तपुष्पांबराणिच सूर्यग्रहेप्रदातव्यंसूर्यप्रीतिकरंचयत् श्वेतवस्त्रंश्वेतमाल्यंश्वेतगंधाक्षतादिकम् चंद्रग्रहेप्रदातव्यं
चंद्रप्रीतिकरंचयत् राहवेचैवदातव्यंकृष्णपुष्पांबराणिच दद्यान्नक्षत्रनाथायश्वेतगंधानुलेपनम् सूर्यंसंपूजयेद्धीमानाकृष्णेनेतिमंत्रतः
चंद्रग्रहेशपालाशैःसमिद्भिर्जुहुयान्नरः दूर्वाभिर्जुहुयाद्धीमान्राहोःसंप्रीणनायच सयवाः समिद्भिर्ब्रह्मवृक्षोत्थैर्भेशायजुहुयाद्बुधः भेशा
यनक्षत्राधिपतये आज्येनचरुणाचैवतिलैश्चजुहुयात्ततः पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः जलैरोषधिकल्कैश्चसहितैःकलशोदकैः

ओषधिकल्कैःसर्वौषधिकल्कैः अभिषेकंप्रकुर्वीतयजमानेप्रयत्नतः मंत्रैर्वारुणदैवत्यैरापोहिष्ठादिभिःसह इमंमेगंगेपितरस्तत्त्वायामीति मंत्रकैः अभिषेकेनिवृत्तेतुयजमानःसमाहितः अनेनविधिनाशांतिंकृत्वासम्यग्विशेषतः अकालमृत्युंशोकंचव्याधिपीडांचनाप्नुयात् सौख्यंसौमनसंनित्यंसौभाग्यंलभतेनरः इत्थंग्रहणजातानांसर्वारिष्टविनाशनम् कथितंभार्गवेनेदंशौनकायमहात्मने इतिशौनकोक्ता ग्रहणजननशांतिः अथज्वराद्युत्पत्तिकालीननक्षत्रशांतिः तत्रसाधारणोविधिः यस्मिन्नक्षत्रेज्वरादिपीडाभवतितन्नक्षत्राधिदेवता प्रतिमांसुवर्णेनकारयित्वा अमुकनक्षत्रसंभूतव्याधिशांत्यर्थंनक्षत्रशांतिंकरिष्ये इतिसंकल्प्य शुचिप्रदेशेगोमयेनोपलिप्तेतंडुलैश्चतुरस्रंमंडलंनिर्मायतन्मध्येतत्तद्देवतावर्णवस्त्रद्वयवेष्टितग्रंथिंचंदनादिचर्चितंकलशेधान्यस्योपरिविन्यस्य तत्रसर्वौषधीः पंचरत्नानिपंचगव्यानिसप्तमृत्तिकाः पंचपल्लवान्स्वस्वमंत्रेणकलशेनिक्षिप्य सर्वेसमुद्राइतितत्रतीर्थान्यावाह्यतत्त्वायामीतिवरुणमावाह्य संपूज्य स्वस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्य आज्यभागांतेतत्तन्नक्षत्राधिदेवतामंत्रेणतन्नक्षत्रपूर्वोत्तरनक्षत्रदेवतामंत्रेणतत्तद्द्रव्येणचहोमंकृत्वातेनवरुणकलशेनयजमानाभिषेके विहितेताःप्रतिमारोगीब्राह्मणायदद्यात् असौसाधारणोविधिः उक्तंच यस्मिन्नृक्षेभवेत्पीडातन्नक्षत्रस्यदेवताम् सुवर्णनिर्मितांकृत्वापूजयेत्प्रयतःशुचिः गोमयेनानुलिप्तेवैमंडलंशुभलक्षणम् कार्तितंचतुरस्रंचतंडुलैश्चकृताकृतैः कृत्वातुस्थंडिलंतत्रयत्नतःकृष्णायामृदा मृत्पार्श्वेचसुधीः कुर्यात्तंडुलानांमहाचयम् तत्रप्रमाणंखारीवाद्रोणावादशशक्तितः अभावेपंचवाद्रोणाद्द्रोणंवातदभावतः ईशानकोणदेशेतुकलशंस्थापयेन्

त्सुधीः निधायद्रविणांतत्र कलशेशक्त्यपेक्षया पीठंतुपूर्वतःस्थाप्यंनव्यवस्त्रेणसंयुतम् स्वस्तिकंतंडुलानांचशुभानांतत्रसंलिखेत् तन्मध्येदेव
तास्तिस्त्रोनक्षत्रत्रितयस्यवै यस्मिन्नृक्षेभवेद्रोगस्तस्यपूर्वापरेसुधीः उडूनिपूजयेद्यत्नादधिप्रत्यधिदैवते देवतायस्यऋक्षस्यमंत्रस्तल्लिंगएवच
इत्थंचलस्ययत्प्रोक्तंप्रभवंप्रकृतंतथा तत्सर्वंविदुषानीयहोमंतत्रप्रकल्पयेत् स्वगृह्योक्तविधानेनकुर्यादग्निमुखंसुधीः कलशंजलपूर्णंचवस्त्रयुग्मेन
वेष्टितम् निधायचौषधीस्तत्रपंचपल्लवसंयुताः सप्तस्थानमृदःकुंभेआक्तवालंप्रकल्पयेत् इमंमेवरुणइत्येवंजलमंत्रेणवापुनः सर्वेसमुद्राःसरि
त इतिमंत्रंचसंस्मरेत् यच्चिद्धितेविशोयथेत्यादिसूक्तंजपेत्पुनः आवाहयेद्घटेदेवंवरुणंपयसांपतिम् एवंनक्षत्रशांत्यर्थंविदध्यात्पूर्वपीठकाम्
सामान्योऽयंविधिःप्रोक्तोनक्षत्राणांप्रपूजने सर्वौषधीनांदुःप्राप्तौभवेदेकाशतावरी सर्वेषामपिगंधानामभावेचंदनंमतम् शतपत्रंसुमनसांधूपा
भावेचगुग्गुलुः नैवेद्यानामभावेतुपायसंसघृतंस्मृतम् मंत्राणामप्यभावेतुगायत्रीमंत्रउत्तमः होमद्रव्यस्यदुःप्राप्तौतिलाःप्रोक्तामनीषिभिः
अष्टोत्तरसहस्रंचतथाशतमुदाहृतमिति अथनक्षत्रदेवताध्यानानि देवतेअश्विनौतत्रद्विभुजौशुक्लवर्णकौ सुधाकलशसंयुक्तौ
कमंडलुधरौशुभौ १ यमस्तुदेवतातत्रकृष्णवर्णोद्विबाहुकः लुलायवाहनःश्रीमान्पाशदंडधरःप्रभुः २ अग्निस्तुदेवतातत्ररक्तवर्णो-
जवाहनः चतुर्भुजोधृतामात्रस्त्रुवस्त्रुग्वरदाभयः ३ रक्तवर्णश्चतुर्बाहुर्हंसारूढश्चतुर्मुखः पद्माक्षसूत्रवरदाभयहस्तोनिरामयः ४
सोमोहिदेवतातस्यश्वेतवर्णःशुभाकृतिः दशाश्वरथमारूढःश्वेताश्वोपिनिगद्यते ५ रुद्रोहिदेवतायस्यवृषारूढश्चतुर्भुजः त्रिशूलखड्गवरदा

भयहस्तश्चकीर्तितः ६ चतुर्भुजादितिःपीतसाक्षसूत्रकमंडलुः वरदाभयहस्तासाकार्यास्वर्णमयीशुभा ७ चतुर्भुजःपीतवर्णोदेवतास्यबृहस्प
तिः दंडाक्षसूत्रपाणिस्तुसाभयःसकमंडलुः ८ सर्पस्तुदेवतातत्रमहामंडलरूपधृक् सुविस्तृतशिरश्चंडोमकपिंगललोचनः ९ पितरोदेवता-
स्तत्रकृष्णावर्णाश्चतुर्भुजाः भद्राक्षसूत्राभयदाःकमंडलुधराःशुभाः १० पूर्वाफाल्गुनिकायांचभागोदेवःप्रकीर्तितः रक्तवर्णोऽबुजासीनोद्विभु
जोभयपद्मकः ११ आर्यमादेवतापद्ममध्यस्थःपद्मवर्णकः पद्माभयकरःश्रीमान्स्वर्णमूर्तिर्महाद्युतिः १२ सवितादेवतातस्यसप्ताश्वर-
थवाहनः द्विभुजोरक्तवर्णःस्यात्पद्मासनसमाश्रयः १३ त्वष्टापद्मस्थितश्चित्रवर्णःस्यात्सचतुर्भुजः पद्माक्षसूत्रवलयः पद्मी पद्मकरः
प्रभुः १४ वायुश्चदेवतातत्रमृगारूढश्चमोचकः अजाचर्मधरःश्रीमान्द्विभुजःपरिकीर्तितः १५ इंद्राग्नीदेवतातत्रगजाजावाहनावुभौ
चतुर्बाहूरक्तवर्णौनिजशस्त्रधरौतथा १६ चापांकुशाभयैर्युक्तौतथासमविराजितौ पद्मासनोरक्तवर्णोमित्रस्तस्यात्तुदेवता पद्माभय
करःश्रीमान्द्विभुजःपरिकीर्तितः १७ शक्रऐरावतारूढोदिव्यसिंहासनोविभुः श्वेतवर्णोवज्रधरोऽभयपाणिर्महाभुजः १८ निर्ऋति
र्देवतातत्रप्रेतारूढश्चमोचकः खड्गखेटकधारीचद्विभुजःपरिकीर्तितः १९ जलंतुदेवतातस्यशुक्लवर्णाशुभाकृतिः वरुणोऽस्यजलस्यापि
स्वामीपूज्यतमोमतः २० मकरेवाहनेविष्टोभवेत्पद्मकरोध्रुवम् विश्वेदेवादेवताश्चश्वेतवर्णाश्चतुर्भुजाः वरदाभयहस्ताश्चसाक्षसूत्रांबुभा
जनाः २१ विष्णुस्तुकृष्णवर्णःस्यात्पन्नगाशनवाहनः शंखचक्रगदापाणिःपीतवासाश्चतुर्भुजः २२ वसवोदेवतास्तत्रश्वेतवर्णाश्चतुर्भुजः वरदाभयहस्ता

श्वसाक्षसूत्रांबुजासनाः २३ वरुणोदेवतातत्रमकरोपरिसंस्थितः यष्टिपाशधरःश्रीमान्गदापद्मधरस्तथा २४ अजैकचरणोरुद्रोदेवतास्यप्रकीर्तिता खड्गचर्मधरोवाग्मीभुजद्वयसमावृतः २५ अहिर्बुध्न्याभिधोरुद्रोदेवतास्यप्रकीर्तिता श्वेतश्चतुष्करःपद्मवरदाभयपाशभृत् २६ पूषातुदेवतातत्रपद्मवर्णोंबुजासनः द्विभुजःपद्मपाणिःस्यात्पयोगर्भप्रियोविभुः २७ इतिनक्षत्रदेवताध्यानम् अथोपयुक्तत्वान्नारदीयोक्ताकाकमैथुनदर्शनशांतिः दिवावायदिवारात्रौयःपश्येत्काकमैथुनम् सनरोमृत्युमाप्नोतित्वथवास्थाननाशनम् काकघातव्रतंयद्वाविदधीतायवत्सरम् पितृन्देवान्द्विजान्भक्त्याप्रत्यहंवाभिवादयेत् जितेंद्रियोजितक्रोधःसत्यधर्मपरायणः तद्दोषशमनार्थायशांतिकर्मसमारभेत् गृहस्येशानदिग्भागेहोमस्थानंप्रकल्पयेत् गृह्योक्तविधिनातत्रप्रतिष्ठाप्यहुताशनम् प्रतिमंत्रंत्र्यंबकेणअथमृत्युंजयेनच व्याहृतिभिर्व्रीहितिलैर्जपाद्यंतंप्रकल्पयेत् पूर्णाहुतिंचजुहुयात्कर्ताशक्राचिरलंकृतः स्वर्णशृंगींरौप्यखुरांकृष्णांधेनुंपयस्विनीम् वस्त्रालंकारसंयुक्तांनिष्कद्वादशसंयुताम् तदर्धेनतदर्धेनदद्याद्दक्षिणयायुताम् यथावित्तानुसारेणन्यूनाधिकत्वकल्पना आचार्यायश्रोत्रियायतांगांदद्यात्कुटुंबिने यस्मात्त्वंपृथिवीसर्वाधेनोवैकृष्णसन्निभे सर्वमृत्युहरानित्यमतःशांतिंप्रयच्छमे ब्राह्मणेभ्योविशिष्टेभ्योयथाशक्तिचदक्षिणाम् ब्राह्मणान्भोजयेत्पश्चाच्छांतिवाचनपूर्वकम् एवंयः कुरुतेसम्यक्तस्माद्दोषात्प्रमुच्यते इतिकाकमैथुनदर्शनशांतिः तत्रैवकपोतादिशांतिः आरोहयेद्गृहंयस्यकपोतोवाप्रवेशयेत् स्थानहानिर्भवेत्तस्ययद्वानर्थपरंपरा दोषायधनिनांगेहेदरिद्राणांशिवायच तस्यशांतिश्चकर्तव्याजपहोमविधानतः ब्राह्मणान्वरयेत्तत्रस्वस्तिवाचनपूर्वक

म् षोडशद्वादशाष्टौवाश्रौतस्मार्तक्रियापरान् देवाःकपोतइत्यादिऋचाभिःपंचभिर्जप लक्षंकृत्वाप्रयत्नेनस्वगृह्योक्तविधानतः ईशान्यांस्थापयेद्वह्निं-
मुखांतेऽष्टोत्तरंशतम् प्रत्येकंसमिदाज्यान्नैःप्रतिप्रणवपूर्वकम् यतइंद्रभयामहेस्वस्तिदेतित्र्यंबकैः त्रिभिर्मंत्रैश्चजुहुयात्तिलान्व्याहृतिभिस्ततः
जपाहुतीस्ततोहुत्वाकुर्यात्पूर्णाहुतिंस्वयम् विप्रेभ्योदक्षिणांदद्याद्द्यौःशांतिंचततोजपेत् ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः एवंयःकुरु
तेसम्यक्तस्माद्दोषात्प्रमुच्यते पिंगलायाःस्वरेप्येवंमधुवल्मीकयोरपि संपूर्णमंदिरेहानिःशून्यसद्मनिमंगलम् प्राकारेचपुरद्वारेदेवागारेचवी
थिषु ग्रामस्यतत्फलंचैवगुरुकल्पनयाततः शांतिकर्माखिलंकार्यंपूर्वोक्तेनक्रमेणतु इतिकपोतपिंगलामधुवल्मीकादिशांतिः अथपल्ल्याः
पतनेसरठस्यवारोहणेफलंशांतिश्च पादयोर्जघनेपाण्योर्गुदेगुह्येचजंघयोः पल्ल्याःपातेतथारोहेसरठस्यफलंनसत् अन्यत्रशुभदंपश्चात्स
चैलंस्नानमाचरेत् दत्वाशिवालयेदीपंमुखमाज्येविलोकयेत् पल्लीसरठयोरूपंसुवर्णेनविनिर्मितम् तदर्धार्धप्रमाणेनवित्तशाठ्यविवर्जितः
वस्त्रयुग्मेनसंवेष्ट्यश्रोत्रियायनिवेदयेत् इतिपल्लीसरठयोःशांतिः ५७ अथनक्षत्रप्रसंगादेवाश्विन्यादीनांभानांतारकाउपजातिकयाह त्रित्र्यं
गेति तथाचश्रीपतिः वन्हित्रिऋत्विषुगुणेंदुकृताग्निभूतबाणाश्विनेत्रशरभूकुयुगाब्धिरामाः रुद्राब्धिरामगुणवेदशतद्वियुग्मदंताबुधैर्निगदि
ताःक्रमशोभताराइति नन्वत्रसंमतिवाक्येसप्तविंशतिभानिप्रतीयंते मूलेष्वष्टाविंशतिरितिविरोधःउच्यते उत्तरार्द्धेरुद्राब्धीत्यत्राब्धयश्चत-
स्रस्ताराः पूर्वाषाढोत्तराषाढयोर्ज्ञेयाः द्वेपूर्वाषाढायामितिनारदेनापितथैवाभिधानात् तत्राश्विन्यास्तिस्रस्ताराः एवंभरण्यादीनांसाभिजितम्

तारासंज्ञाज्ञेया तारामानोक्तिप्रयोजनमाह वराहः नक्षत्रजमुद्वाहेफलमब्दैस्तारकामितैः सदसद्दिवसैर्ज्वरस्यनाशोव्याधेरन्यस्यवावाच्यइति
५८ अथाश्विन्यादीनामाकृतिमुपजातिकरथोद्धताभ्यामाह अश्व्यादिरूपमिति अश्विन्यादिनक्षत्राणांरूपमाकृतिरुच्यते तत्राश्विन्यास्तुरगा
स्यं आश्वमुखसदृशंरूपंभरण्यायोनिर्भगसदृशं कृत्तिकायानापितक्षुरसदृशंरोहिण्याअनःशकटसदृशंमृगस्यएणास्यंहरिणमुखसदृशं आर्द्रायामणिस
दृशंपुनर्वसोर्गृहसदृशंपुष्यस्यपृषत्कोबाणस्तत्सदृशं आस्लेषायाश्चक्राकारंमघायाभवनंगृहसदृशं पूर्वाफाल्गुन्याः मंचः खट्वाकारं उत्तराफाल्गुन्याःशय्याकारं

त्रित्र्यंगपंचाग्निकुवेदवन्हयः शरेषुनेत्राश्विशरेंदुभूकृताः वेदाग्निरुद्राश्वियमाग्निवन्हयोऽब्धयःशतंद्विद्विरदाभतारकाः ५८ अश्व्यादिरू
पंतुरगास्ययोनी क्षुरोनएणास्यमणिर्गृहंच पृषत्कचक्रेभवनंचमंचःशय्याकरोमौक्तिकविद्रुमंच ५९ तोरणंबलिनिभंचकुंडलंसिंहपुच्छगज
दंतमंचकाः त्र्यस्त्रिचत्रिचरणाभमर्दलोवृत्तमंचकयमाभमर्दलाः ६०

हस्तस्यहस्ताकारं चित्रायामौक्तिकाकारं स्वात्याविद्रुमंप्रवालसदृशम् ५९
तोरणंबलिनिभमिति विशाखायास्तोरणाकारम् अनुराधायाबलिनिभंभक्तपुंजाकारम् ज्येष्ठायाःकुंडलाकृतिः मूलस्यसिंहपुच्छाकारम् पूर्वाषाढायागजदंतसदृशा
म् उत्तराषाढायामंचकसदृशम् अभिजितस्त्रिकोणाकारम् श्रवणस्यत्रिचरणासदृशम् धनिष्ठायामर्दलसदृशम् शततारायावृत्तंवर्त्तुलम् पूर्वाभाद्रपदायामंचकस
दृशम् उत्तराभाद्रपदायायमलाभम् रेवत्यामर्दलः मृदंगाकारंस्वरूपमित्यर्थः ६० ध ध ध ध ध ध

अथजलाशयारामदेव प्रतिष्ठामुहूर्तंसामान्यतोलग्नशुद्धिंदेवताविशेषेणलग्नशुद्धिंनक्षत्रविशेषंचोपजातिकात्रयेणाह जलाशयेति रिक्तारेति शिवोनृयुग्मेतिच जलाशयाः वापीकूपतडागादयः तेषांप्रतिष्ठाउत्सर्गः आरामउपवनम् तस्याप्युत्सर्गः सुरादेवाविष्णवादयः तेषांप्रतिष्ठापनम् सौम्यायनेउत्तरायणे तथाजीवशशांकशुक्रेदृश्येउदितेसति तथामृदुध्रुवक्षिप्रचरनक्षत्रे तथासितेशुक्लेपक्षे तथास्वर्क्षतिथिक्षणेवा ६१ तथारिक्तावर्जेदिवसेरिक्तातिथि भौमवारव्यतिरिक्ततिथिवारेषु एवंविधेदिने प्रतिष्ठा जलाशयारामदेवानांक्रमेण कर्मार्हत्वोपभोग्यत्वपूजायोग्यत्वरूपाअतिशस्तास्यात् तथा

जलाशयारामसुरप्रतिष्ठासौम्यायनेजीवशशांकशुक्रे दृश्येमृदुक्षिप्रचरध्रुवेस्यात्पक्षेसितेस्वर्क्षतिथिक्षणेवा ६१ रिक्तार
वर्जेदिवसेऽतिशस्ताशशांकपापैस्त्रिभवांगसंस्थैः व्यंत्याष्टगैः सत्खचरैर्मृगेंद्रेसूर्येघटेर्केयुवतौचविष्णुः ६२

चगार्ग्यः देवतारामवाप्यादिप्रतिष्ठामुत्तरायणे माघादिपंचमासेषु कृष्णेप्यापंचमीदिनम् दक्षिणेत्वयनेकुर्वन्न तत्फलमवाप्नुयात् यदातुदक्षिणायनएवजलस्थितिसंभवः तदानकालनियमः नकालनियमस्तत्र कारणमिति भविष्यपुराणोक्तेः अथक्रूरप्रकृतीनांदक्षिणायनेपिस्थापनं कार्यमित्युक्तं वैखानससंहितायाम् मातृभैरववाराहनरसिंहत्रिविक्रमाः महिषासुरहंत्रीचस्थाप्यावैदक्षिणायने नारदः विचैत्रेष्वेवमासेषुमाघादिषुचपंचसु यद्दिनंयस्यदेवस्यतद्दिनंतस्यसंस्थितम् अथलग्नशुद्धैः शशांकपापैः चंद्रसूर्यभौमशनिराहुकेतुभिः त्रिभवांगसंस्थैः

तृतीयषष्ठैकादशस्थानस्थितैरुपलक्षितेलग्नेतथासत्खचरैः शुक्रबुधगुरुभिः व्यंत्याष्टगैः द्वादशाष्टमव्यतिरिक्ताखिलस्थानस्थैः सद्भिः देवाधिप्रतिष्ठा अतिशस्ता अथसूर्योमृगेंद्रेसिंहलग्नेस्थाप्यः तथाकोब्रह्माघटेकुंभेविष्णुर्युवतौकन्यायाम् ६२ शिवोमहादेवोनृयुग्मेमिथुनेचपुनर्देव्योदुर्गादयोद्वितनौद्विस्वभावराशौमिथुनकन्याधनुर्मीनलग्नेषुक्षुद्रादेव्यश्चतुःषष्टियोगिनीप्रभृतयः चरलग्नेमेषकर्कतुलामकरेषुसर्वेइमेउक्तानुक्ताश्चास्थिरर्क्षेवृषसिंहवृश्चिककुंभेषु अथपुष्येग्रहाइति ग्रहाश्चंद्रादयोष्टौपुष्यनक्षत्रेस्थाप्याः उपलक्षणमेतत् सूर्यस्यहस्तनक्षत्रेस्थापनम् इंद्रब्रह्मणोः

शिवोनृयुग्मेद्वितनौचदेव्यः क्षुद्राश्चरेसर्वइमेस्थिरर्क्षे पुष्येग्रहाविघ्नपयक्षसर्पभूतादयोंत्येश्रवणेजिनश्च ६३ इतिमुहूर्तचिंतामणौद्वितीयंनक्षत्रप्रकरणंसमाप्तम् २

पुष्यश्रवणाभिजित्सुकुबेरस्कंधयोरनुराधायाम् दुर्गादीनांमूले सप्तर्षीणांस्वाधिष्ठितनक्षत्रे लक्ष्मीव्यासवाल्मीक्यगस्त्यानांपुष्येस्थापनम् तदुक्तंरत्नमालायां पुष्यश्रुत्यभिजित्सुचेश्वरकयोर्वित्ताधिपस्कंदयोर्मैत्रेतिग्मरुचेः करेनिर्ऋतिभेदुर्गादिकानांशुभम् सप्तर्षयोयत्रवसंतिधिष्ण्ये कार्याप्रतिष्ठाखलुतत्रतेषाम् श्रीव्यासवाल्मीकिघटोद्भवानांतथास्मृतावाक्पतिभेग्रहाणामिति अथविघ्नपोगणेशः यक्षोदेवयोनिः सर्पावासुक्यादयः भूतोदेवयोनिः विद्याधरोप्सरोयक्षरक्षोगंधर्वकिन्नराः पिशाचोगुह्यकःसिद्धोभूतोमीदेवयोनयइत्यमरः आदिशब्देनराक्षसासुरप्रथमसरस्वतीप्रभृतयः अंत्येरेवत्यांस्थाप्याः तथाश्रवणेजिनोबौधश्चस्थाप्यः उपलक्षणंचैतत् इंद्रकुबेर

वर्जितानांलोकपालानांधनिष्ठायांस्थापनं तथाच्श्रीपतिः गणपतिहृदरक्षोयक्षभूतासुराणांप्रथमफणिसरस्वत्यादिकानांचपौष्णेश्रवसिसुगतनाम्नोवा सर्वेलोकपानांनिगदितमखिलानांस्थापनंहिस्थिरेषु ६३ इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्त्तचिंतामणिटीकायांप्रमिताक्षरायां नक्षत्रप्रकरणंसमासम् २ ७ अथसंक्रांतिप्रकरणंव्याख्यायते तत्रप्राग्राशितोपरराशौसंक्रमणंनामगमनंसंक्रांतिस्तस्याः नक्षत्रविशेषवशेनवारवशेनचसंज्ञाफलंचसार्द्धवसंततिलकयाह घोरार्केति विप्रांश्चेति अर्कसंक्रमणमर्कसंक्रांतिः उग्ररवौ उग्रनक्षत्रेषुरविवारे चेत्स्यात्तदा घोरेतिसंज्ञा

घोरार्कसंक्रमणमुग्ररवौहिशूद्रान् ध्वांक्षीविशोलघुविधौचचरर्क्षभौमे चौरान्महोदरयुतान्नृपतीन् ज्ञमैत्रेमंदाकिनीस्थिरगुरौसुख
येच्चमंदा १

साशूद्रान् सुखयेत् सुखमुत्पादयेत् उग्ररवाविति उग्रैःसहितोरविः उग्ररविः तस्मिन्नुग्ररवाविति मध्यमपदलोपीतत्पुरुषः ततःसप्तम्येकवचनम् अथवासमाहारद्वंद्वे अनित्यसागमशासनमितिनुमभावः एवंलघुविधावित्यादिष्वपिसमाधेयम् अथलघुनक्षत्रेषुविधौसोमवारे सूर्यसंक्रांतिर्ध्वांक्षीनाम्नीविशोवैश्यान् सुखयेत् चरर्क्षभौमेचरनक्षत्रेभौमवारेवासूर्यसंक्रमणंचेन्महोदरयुतामहोदरीसंज्ञकाचोरान्सुखयेत् ज्ञमैत्रेबुधवारे मैत्रसंज्ञानक्षत्रेषुवाऽर्कसंक्रांतिर्मंदाकिनीनाम्नीनृपतीन् राज्ञःसुखयेत् स्थिरगुरौस्थिरनक्षत्रेषुगुरुवारेचार्कसंक्रांतिर्मंदानाम्नीविप्रान् ब्राह्मणान्सुखयेत् मिश्रभभृगौमिश्रनक्षत्रयोर्भृगुवारेवाऽर्कसंक्रांतिर्मिश्रानाम्नीपशून् सुखयेत् तीक्ष्णार्कजेतीक्ष्णसंज्ञकनक्षत्रेषु अर्कजेशनिवारेवाराक्षसीनाम्नी

अंत्यजसुखा अंत्यजान् चांडालान् सुखयतीति अंत्यजसुखास्यात् १ अथदिनरात्रिविभागेनसंक्रांत्यशुभफलंउत्तरायणदक्षिणायनसंज्ञांचसार्द्धवसंततिलकयाह त्र्यंशेइति अस्तेइति अत्रार्कसंक्रमणमित्यनुवर्तते दिनमानेत्रिभिर्भक्तेत्र्यंशोभवति तत्रदिनस्यप्रथमेत्र्यंशेऽर्कसंक्रमणंनृपतीन्हंति मध्येद्वितीयत्र्यंशेद्विजान्ब्राह्मणान्हंति अपरेतृतीयेत्र्यंशेवैश्यान्हंति इत्येवंसर्वत्रव्याख्येयम् अस्तेसूर्यास्तमयेऽर्कसंक्रमणंशूद्रान्हंति २ अथरात्रिसंक्रांतिफलम्

विप्रांश्चमिश्रभभृगौतुपशूंश्चमिश्रातीक्ष्णार्कजेंत्यजसुखाखलुराक्षसीन्च त्र्यंशेदिनस्यनृपतीन्प्रथमेनिहंतिमध्येद्विजानपिविशोपरकेच
शूद्रान् २ अस्तेनिशाप्रहरकेषुपिशाचकादीन्नक्तंचरानपिनटान्पशुपालकांश्च

रात्रिप्रथमप्रहरेपिशाचकान् आदिशब्देनभूतान् द्वितीयप्रहरेनक्तंचरान् राक्षसान् तृतीयप्रहरेनटान्नर्तकान् चतुर्थप्रहरेपशुपालकान् आभीरान् सूर्योदयेसमकालेऽर्कसंक्रमणंसकललिंगिजनंपाखंड्यादिकंहंतीत्यर्थः पाखंडाःसर्वलिंगिजनइत्यभिधानात् क्रूरसौम्यवारपरत्वेनफलमाहवसिष्ठः रविरविजभौमवारेसंक्रांतौदिनकरस्यतन्मासे पित्तकफानिलजामयनरपतिकलहस्त्ववृष्टिश्च बुधगुरुसितचंद्राह्वेसतिसंक्रांतावनामयंनृणाम् क्षितिपतिनिकरक्षेमंसस्यविवृद्धिर्विधर्मिणांपीडा जन्मनक्षत्रेसंक्रांतिफलंदीपिकायाम् यस्यजन्मर्क्षमासाद्यरविसंक्रमणंभवेत् तन्मासाभ्यंतरेतस्यरोगक्लेशधनक्षयाः तगरसरोरुहपत्रैरजनीसिद्धार्थलोध्रसंयुक्तैः स्नानंजन्मन्यृक्षेरविसंक्रांतौनृणांशुभदम् अन्यच्चवसिष्ठः अजकन्याझषकर्किणिसंक्रांतौयदिनच्चेहर्षम् आमयमरणंभूभृद्युद्धमनर्घ्यत्ववृष्टिश्च वृषवृश्चिकतुलामकरे

वृष्टिः स्यात्संक्रमविषये विस्फोटामयतरकरपीडावृष्टिः कृशानुभयम् अथसौम्ययाम्यायनमिति मकरकर्कटयोः संक्रांतिश्चेत्तदाक्रमेणसौम्ययाम्यायनंनिरुक्तम् मकरेउत्तरायणंकर्केयाम्यायनंस्यात् ३ अथावशिष्टसंक्रांतिषुषडशीत्यादिसंज्ञाअनुष्टुभाह षडशीत्याननमिति धनुर्मिथुनकन्यामीनेषु अर्कसंक्रमणंषडशीत्याननंषडशीमुखसंज्ञंस्यात् तुलामेषयोः संक्रांतिर्विषुवसंज्ञा वृषसिंहवृश्चिककुंभेष्वर्कसंक्रांतिर्विष्णुपदसंज्ञका ४ संक्रांतौगौणमुख्यकालउपजात्याह संक्रांतिकालादिति गणितमार्गेणयउष्णगोः सूर्यस्यसंक्रांतिकालआगतः ततउभयत्रपूर्वतः परतश्चषोडशषोडशनाड्यो

सूर्योदयेसकललिंगिजनंचसौम्ययाम्यायनंमकरकर्कटयोर्निरुक्तम् ३ षडशीत्याननंचापनृयुक्कन्याझषेभवेत् तुलाजौविषुवंविष्णुपदंसिंहालिगोघटे ४ संक्रांतिकालादुभयत्रनाडिकाःपुण्यामताःषोडशषोडशोष्णगोः

घटिकाःपुण्यसंपादकत्वात् पुण्यामताः ब्रह्मसिद्धांते संक्रांतेःप्राक्परस्ताच्चसार्द्धाः षोडशनाडिकाः त्रयस्त्रिंशत्संक्रमस्यपुण्याः सर्वस्यचनाडिकाः अनेनसंक्रांतेःपुण्यकालस्तुषोडशोभयतः कलाइतिस्मृतिवाक्ये पूर्वतः परतश्च अष्टौअष्टौघटिकाइत्येवंषोडशेति व्याख्यातंतदपाकृतंभवति सूर्यसिद्धांतेपि अर्कमानकलाःषष्ठ्यागुणिताभुक्तिभाजिताः तदर्द्धनाड्यः संक्रांतेरर्वाक्पुण्यंतथापरेइति अथनिशीथतइति निशीथतोऽर्द्धरात्रात् अर्वाक्पूर्वपरत्रपश्चाच्च संक्रांतिकालेसति पूर्वापराह्नांतिमपूर्वभागयोः पूर्वापरयोरन्होः क्रमेणांतिमपूर्वभागयोरुभयत्रषोडशषोडशघटिकाःपुण्याइति पूर्वेणसंबंधः अयमर्थः यद्यर्द्धरात्रात्प्राक्संक्रांतिस्तदा

पूर्वदिनस्यउत्तरार्द्धपुण्यम् यद्यर्द्धरात्रादुपरिसंक्रांतिस्तदोत्तरादिनस्यपूर्वार्द्धमेवपुण्यमित्यर्थः ५ अथार्द्धरात्रसंक्रमणेमकरकर्कटयोश्चविशेषमुपजातिकयाह पूर्णेइति पूर्णेनिशीथेअर्धरात्रेयदिसंक्रमः स्यात्तदादिनद्वयंपूर्वदिनंपरदिनंचपुण्यमुक्तम् उक्तंच यद्यर्द्धरात्रएवस्यात्संपूर्णेसंक्रमोरवेः तदादिनद्वयंपुण्यंस्नानदानादिकर्मसु अथेति अथानंतरमुदयास्तात्सूर्योदयात्सूर्यास्ताच्चपूर्वपरस्ताच्चयदियाम्यसौम्यायनेकर्कमकरसंक्रांतीभवतः तदापूर्वदिनेपुण्येस्यातां अयमर्थः सूर्योदयात्पूर्वंकर्कसंक्रमणंस्यात्तदापूर्वदिनएवपुण्यकालोनोत्तरदिने तथायदिसूर्यास्तानंतरंमकरसंक्रांतिः

निशीथतोर्वाऽगपरत्रसंक्रमेपूर्वापराह्णांतिमपुण्यभागयोः ५ पूर्णेनिशीथेयदिसंक्रमःस्याद्दिनद्वयंपुण्यमथोदया
स्तात् पूर्वपरस्ताद्यदियाम्यसौम्यायनेदिनेपूर्वपरेतुपुण्ये ६ संध्यात्रिनाडीप्रमितार्कबिंबादर्धोदितास्तादधऊर्ध्वमत्र

स्यात्तदोत्तरदिनएवपुण्यकालोनपूर्वदिने गार्ग्यः यदास्तमानवेलायांमकरंयातिभास्करः प्रदोषेचार्द्धरात्रेवास्नानंदानंपरेऽह्नि अर्द्धरात्रेतदूर्ध्वंवासंक्रांतौदक्षिणायने पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति वाइवार्थे प्रदोषलक्षणंस्कांदे त्रिमुहूर्तःप्रदोषःस्याद्भानावस्तंगतेसतीति ६ अथोदयास्तादितिवचनस्यापवादमिंद्रवज्रयाह संध्यात्रीति अर्कमंडलादर्धोदितादर्धास्ताच्चाधऊर्ध्वंक्रमात्त्रिभिर्नाडीभिर्मितासंध्यासंध्याकालःस्यात् अर्धोदितार्कबिंबात् पूर्वंत्रिनाडीमिताप्रातःसंध्या तथार्धास्तादर्कबिंबादुपरित्रिनाडीमितासायंसंध्येत्यर्थः तत्प्रयोजनमाह अत्रे

ति अत्रप्रातः संध्यायांसायंसंध्यायां चक्रमात् याम्यसौम्ये अयनेस्तः तदानींपरपूर्वदिवसौपुण्यौ यदिप्रातःसंध्यायां दक्षिणायनप्रवृत्तिः तदासूर्योदयानंतरंसंपूर्णमहः पुण्यम् तथायदिसायंसंध्यायांउत्तरायणप्रवृत्तिस्तदासूर्यास्तात्पूर्वंसंपूर्णमहः पुण्यंस्यादित्यर्थः तदाहनारदः सूर्यास्तमनसंध्यायांयदिसौम्यायनंभवेत् तदोदयादहः पुण्यंपूर्वाहःपरतोयदीति उदयसंध्यास्तसंध्ययोर्लक्षणंतत्रैव अर्धार्कास्तमनात्संध्याघटिकात्रयसंमिता तथैवार्धोदयात्प्रातर्घटिकात्रयसंमितेति एवंसत्यर्कबिंबस्यार्धास्तादर्धोदयाद्वाक्रमात् पश्चात्प्राक्त्रिघटीमिता अस्तसंध्योदयसंध्या चोच्यते तत्रा

चेद्याम्यसौम्ये अयनेक्रमात्स्तः पुण्यौतदानींपरपूर्वघस्रौ ७

स्तसंध्यायांयदिमकरसंक्रमः स्यात्तदातद्दिनएवपुण्यकालोनोत्तरदिने यद्यस्तसंध्यामतिक्रम्यमकरसंक्रांतिस्तदोत्तरदिनएवपुण्यकालोनपूर्वदिने एवंयद्युदयसंध्यायांकर्कसंक्रांतिस्तदासूर्योदयानंतरमेवपुण्यकालोनप्राग्दिने यद्युदयसंध्यातःप्राक्कर्कसंक्रमस्तदाप्राग्दिनएवपुण्यकालोनोत्तरदिने इतिनिष्कृष्टोर्थः अथरात्रौस्नानंनकुर्वीतदानंचैवविशेषतइतिरात्रौस्नानदानादिनिषेधेपि नैमित्तिकंतुकुर्वीतस्नानंदानंचरात्रिष्वितिसुमंतुवाक्यशेषात् सुतजननेसंक्रांतावुपरागेसूर्यचंद्रयोर्नित्यम् रात्रावपिकर्तव्यंस्नानंदानंविशेषतोनृणामितिवसिष्ठवचनात् राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकंकार्यंनिशिकाम्यव्रतेषुचेति रात्रौसंक्रमणेरात्रौस्नानंप्रासंतत्कर्कमकरसंक्रांतौस्नानदानादौदेशप्रसिद्धशिष्टाचारेणव्यवस्थावगंतव्या तत्रगौं-

र्जरास्तु ग्रहणवदयनद्वितिस्वीयसूत्रं स्नानंदानंग्रहणवत्सौम्ययाम्यायनद्वयइतिकश्यपसंहितोक्तंचानुसृत्यरात्रावयनसंभवेसतिरात्रावेवस्नानादिकंकुर्वंति दाक्षिणात्यास्तु कार्मुकंतुपरित्यज्यझषंयातिदिवाकरइत्यादिभविष्योत्तरादिवाक्यमंगीकृत्यदिवसएवस्नानादिकंकुर्वंति तत्रापिनारदोक्तसंध्याकालसंक्रमेविशेषोध्येयइत्यलम् ७ अथपूर्वपराः षोडशघटिकाः पुण्याइति पूर्वंसामान्येनोक्तमिदानींविष्णुपदादिविशेषमनुष्टुभाह याम्यायनइति कर्कसंक्रांतौविष्णुपदेवृषसिंहवृश्चिककुंभसंक्रांतिषुसंक्रांतिकालाद्याः प्रथमाः षोडशघटिकाः अतिपुण्यदाः स्नानदानादौअनंतपुण्यदाज्ञेयाः अग्रिमास्तुनतथा तुलाजयोः तुलामेषयोः मध्याउभयतः षोडशघटिकाः संक्रांतिकालात्प्रागष्टौपरतश्चाष्टाविति दीपिकाकारेणव्याख्यातं यदुक्तं-

याम्यायनेविष्णुपदेचाद्यामध्यास्तुलाजयोः षडशीत्याननेसौम्येपरानाड्योतिपुण्यदाः ८

गुरुणा वर्तमानेतुलामेषेनाड्यस्तूभयतोदशेति मध्यमतृतीयांशाभिप्रायेणेतिज्ञेयंतथाषडशीत्याननंमिथुनकन्याधनुर्मीनसंक्रांतिषुसौम्येयने-मकरसंक्रांतौचसंक्रांतिकालात्पराग्रिमषोडशघटिकाअतिपुण्याः प्रथमास्तुनतथा एवंनिर्णीतेपुण्यकालेस्नानाद्यवश्यंविधेयम् तत्रस्नानाद्यकुर्वतः प्रत्यवाहमाहवसिष्ठः विषुवत्ययनेग्रहणेसंक्रांतौपुण्यदिवसेवा पितृतृप्तिंनकरोतिहिदत्वाशापंव्रजतितस्यपिता षडशीत्यांतुयद्दानंयद्दानंविषुवद्वये दृश्यतेसागरस्यांतस्तस्यांतोनैवदृश्यतइति भरद्वाजोक्तेः अयंचनिर्णयश्चंद्रादीनामपिसंक्रमेज्ञेयः तत्रहेमान्द्यादौकालनिर्णयकारादिभिः याः पु

ण्यकालघटिकाः उपनिबद्धास्ताः स्थूलास्तेनषष्टिघ्नाबिंबंग्रहभुक्तिभक्तमित्यादिप्रकारेणग्रहमध्येतु भुक्तिमध्यमाविवरानीताः सूक्ष्माघटिकालिख्यंते स्फुटमतिस्फुटबिंबैश्चेत् साध्यंतेता अतिसूक्ष्मास्तासामतिपातत्वात् श्लोकंअनुपातिवधः मध्यमास्तुयथा नाड्योरामगुणा ३२ रवेरथविधोःषड्दोः पलैर्युग्हयं २ २६ भौमस्याब्धिपलैर्युतानव ९ ४ विदोयुक्ताःपलैःखाश्विभिः षण्णाड्यो ६ २० ष्टगजा ८८ गुरोरथभृगोर्नंदाः पलैरष्टभिः ९ ८ पुण्याः स्युः खन्नृपाः १६० शनेरुभयतीरास्पृक्षयोः संक्रमैरिति ८ निरयनांशसंक्रांतिमभिधायेदानींसायनांशसंक्रांतिंसपुण्यकालामुपजात्याह तथेति

तथायनांशाःखरसाहताश्चस्पष्टार्कगत्याविहृतादिनाद्यैः मेषादितःप्राक्चलसंक्रमाःस्युर्दानेजपादौबहुपुण्यदास्ते ९

यथाराशिसंक्रमाबहुपुण्यदास्तथाचलसंक्रमा अपीतिव्यवहितस्तथाशब्दः अयनांशाः षष्ट्यागुणयाः स्पष्टसूर्यगत्याविहृतालब्धैर्दिनाद्यैः दिनघटीपलैः कृत्वामेषादिद्वादशसंक्रमाः स्युस्तेचलसंक्रमादानेजपादौजपश्राद्धहोमादौबहुपुण्यदाभवंति पुलस्त्यः अयनांशसंस्कृतोभानुर्गोलेचरति सर्वदा अमुख्याराशिसंक्रांतिस्तुल्यः कालविधिस्तयोः स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः सुकृतंचलसंक्रांतावक्षयंपुरुषोऽश्नुत इतिजाबालिरपि संक्रांतिषुयथाकालस्तदीयेप्ययनेतथा अयनेविंशतिःपूर्वामकरेविंशतिःपरेति अत्रमकरायणेपूर्वाविंशतिर्घटिकाःपुण्याःमकरसंक्रांतौतुपराविंशतिर्घटिकाःपुण्यकालः मकरव्यतिरिक्तैकादशसंक्रांतिषुतत्तत्संक्रमवत्पुण्यकालोज्ञेयः अयनांशानयनादिविचारः सिद्धांताद-

वगंतव्यः ईश्वरेच्छालोकादृष्टवशात्तत्तद्राश्यादिविभागस्यसूर्यतेजः संपर्कश्चलसंक्रमः मंडलसंक्रमश्चराशिसंक्रमइतिविषयविवेकः तत्रनिरयनगणन
यैवसकलव्यवहारः साध्यः सायनगणनातुनियतविषयैव अयनांशैः प्रदातव्यालग्नेक्रांतौचरागमे वित्रिभेसत्रिभेपातेतथादृक्कर्मपातयोरिति
एवंद्वयोरपिमानयोरसंकीर्णोव्यवहारइतिसर्वमनाकुलम् पुण्यकालस्तुउभयविधसंक्रमेपिज्ञेयः पूर्वलिखितवाक्यस्यस्वरसात् ९ अथसं-
क्रांत्युपयोगाज्जघन्यबृहत्समनक्षत्राण्युपजात्याह समामिति मृदुक्षिप्रवसुश्रवोग्निमघात्रिपूर्वास्त्रपभंसमम् अस्त्रपभंमूलः एतानिपंचदश

समंमृदुक्षिप्रवसुश्रवोग्निमघात्रिपूर्वास्त्रपभंबृहत्स्यात् ध्रुवद्विदैवादितिभंजघन्यंसार्पांबुपार्द्रानिलशाक्रयाम्यम् १० जघन्य
भेसंक्रमणेमुहूर्त्ताः शरेंदवोबाणकृताबृहत्सु खरामसंख्यासमभेमहर्घंसमर्घसाम्यंविधुदर्शनेपि ११

भानिसमसंज्ञानिज्ञेया-
नि ध्रुवद्विदैवादितिभंबृहत्स्यात् ध्रुवादिषड्भानिबृहत्संज्ञकानि सार्पांबुपार्द्रानिलशाक्रयाम्यंजघन्यंस्यात् आश्लेषादिषट्भानिजघन्यसंज्ञानि
१० अथसंज्ञाप्रयोजनमुपेंद्रवज्रयाह जघन्यभेइति जघन्यनक्षत्रेर्कसंक्रमणेपंचदशमुहूर्त्ताज्ञेयाः बृहन्नक्षत्रेर्कसंक्रमणेबाणकृताःपंचचत्वारिंशन्मु
हूर्त्ताज्ञेयाः समनक्षत्रेर्कसंक्रमणेखरामसंख्यास्त्रिंशन्मुहूर्त्ताज्ञेयाः उक्तंच नारदेन तासांप्रमाणंघटिकास्त्रिंशन्नवतिषष्ट्यइति फलमाह महर्घसमर्घसा
म्यमिति पंचदशमुहूर्त्तायांसंक्रांतौसर्वमन्नंमहर्घंदुष्प्रापंभवति पंचचत्वारिंशन्मुहूर्त्तेसंक्रांतौसमर्घंत्रिंशन्मुहूर्तायांसंक्रांतौसमंयथास्थितंभवतिविधुद

र्शनेपीति चंद्रदर्शनेप्येवमेवफलंवाच्यम् अयमर्थः जघन्यभेचंद्रदर्शनेमहर्घम् बृहन्नक्षत्रेचंद्रदर्शनेसमर्घम् समभेचंद्रदर्शनेसाम्यम् ११ अथप्रसंगात्कर्कसंक्रांतौमेघविंशोपकाननुष्टुभाह अर्कादीति कर्कसंक्रांतौ अर्कादिवारेसति एतेशब्दविंशोपकाज्ञेयाः यथारविवारेकर्कसंक्रांतौदशविंशोपकाः एवं सोमेविंशतिः भौमेष्टौज्ञेद्वादश गुरौधृत्योष्टादश शुक्रेष्टादश शनौपंचेत्यर्थः १२ अथकीदृशस्यरवेः संक्रमोजातस्तत्फलमिंद्रवज्रयाह स्यात्तैतिलेइति रविस्तैतिलेकरणेनागकरणेचतुष्पदेचकरणेसुप्तः संक्रमितः स्यात् गरादिपंचकेगरेवणिजेभद्रायांबवे बावेचनिविष्टः संक्रमितः स्यात् किंस्तुघ्नेसकौलवेशकुनौ च ऊर्ध्वः ऊर्ध्वस्थितः संक्रमितः स्यात् इहकरणाधिकरणकसंक्रांतौरविः अर्घवर्षणे अर्घेमूल्येवर्षणेवृष्ट्यै उपलक्षणत्वादन्नेपिक्रमादनिष्टः समः श्रेष्ठः स्यात् अयमर्थः सुप्तरविसंक्रमा अर्घवर्षणधान्येष्वनिष्टः महार्घवृष्ट्याभावधान्याभावकारकाः एवंविनिष्टःसमः तथोर्ध्वः श्रेष्ठःउक्तंच श्रीपतिना धान्यार्घवृष्टिषु भवेत्क्रमशस्त्वनिष्टमध्येष्टतेति १३ अथरविसंक्रांतेः करणपरत्वेन वाहनवस्त्रायुधभक्ष्यलेपनजातिपुष्पाणिसफलानि शार्दूलविक्रीडितत्रयेणोपजातिकयाचाह सिंहेति खड्गेति यावश्चेति स्यान्मल्लिकेति बवतोबवमारभ्यै

अर्कादिवारेसंक्रांतौकर्कस्याब्दविशोपकाः दिशोनखागजाःसूर्याधृत्योष्टादशसायकाः १२ स्यात्तैतिलेनागचतुष्पदेरविःसुप्तोनिविष्टस्तुगरादिपंचके किंस्तुघ्नऊर्ध्वःशकुनौसकौलवेऽनिष्टःसमःश्रेष्ठइहार्घवर्षणे १३ सिंहव्याघ्रवराहरासभगजावाह्हद्विषद्घोटकाःश्वाजोगौश्चरणायुधश्च बवतोवाहारवेःसंक्रमे

कादशकरणेष्वुत्क्रमेणवाहनादीनिस्युः वाहनानिसिंहादीनि राजसभोगर्दभः वाहद्विषन्महिषः लुलायोमहिषोवाहद्विषत्कासरसैरिभाइत्यमरः
अजोमेषः चरणायुधः कुक्कुटः नारदेनतुविशेषउक्तः खशवाल्मीकवंगेषुसंक्रांतेर्धिष्ण्यवाहनम् अन्यदेशेषुतिथ्यर्धवाहनाःस्युर्बवादयइति अश्वि
न्यांयदासंक्रांतिस्तदाश्विन्याः योऽश्वस्तद्वाहनंस्यात् खशादिदेशेषु एवंसर्वनक्षत्रेषु अथवस्त्रंश्वेतादिहारितकंनीलवर्णं पांडु अरुणवर्णम् का
लंश्यामलम् असितंश्वेतवर्णरहितम् गर्दभवर्णमित्यर्थः दिग्वस्त्राभावः घनाभंमेघवर्णम् अथशस्त्रम् भुशुंड्यादीनि आयुधानिप्रसिद्धानि अथ

वस्त्रंश्वेतसुपीतहारितकपांड्वारक्तकालासितंचित्रंकंबलदिग्घनाभमथशस्त्रंस्याद्भुशुंडीगदा १४ खड्गोदंडशरासतोमरमथोकुंतश्च
पाशोंकुशोस्त्रंबाणस्त्वथभक्ष्यमन्नपरमान्नंभैक्ष्यपक्वान्नकम् दुग्धंदध्यपिचित्रितान्नगुडमध्वाज्यंतथाशर्कराऽथोलेपोमृगनाभिकुं
कुममथोपाटीरमृद्रोचनम् १५ यावश्चोतुमदोनिशांजनमथोकालागरुश्चंद्रकोजातिर्दैवतभूतसर्पविहगाःपश्वेणाविप्रास्ततः भक्ष्यम् अ

न्नंभक्तः परमान्नंपायसम् भैक्ष्यंभिक्षासमूहः पक्वान्नमपूपादि चित्रितान्नंहरिद्रादिरंजितम् अथलेपोविलेपनंमृगनाभिः कस्तूरीकुंकुमंकेशरंपाटी-
रंचंदनं मृत्प्रसिद्धारोचनंगोरोचनमिति १४ १५ यावोऽलक्तकः ओतुमदोमार्जारघर्मः भाषयाजवादिरिति निशाहरिद्रा अंजनंकज्जलम् कालाग
रुरगरुविशेषः चंद्रकःकर्पूरः अथजातिः संकरभवा अनुलोमजाः प्रतिलोमजाश्च अथपुष्पम् पुन्नागकंनागकेशरपुष्पम् मल्लिकावेलिःजपा ओंड्रपुष्प

मृजासवम् शेषाणिप्रसिद्धानिसर्वत्र क्वचिद्द्वयोप्युक्तम् शिशुःकुमारश्चगतालकायुवाप्रौढाप्रगल्भाचततश्चवृद्धा वंध्यातिवध्यान्चसुतार्थिनीन्चप्रव्राजिकाजेतिबवादिकानामिति तथाक्वचिद्भोजनपात्रमप्युक्तम् सुवर्णरौप्यताम्राणिलोहंसीसंत्रपुस्तथा कांस्यपाषाणकाष्ठंचमृत्पात्रंवेणुपात्रकमिति एवंसंक्रमकालेयानिवस्त्राशनवाहनादीन्यभिहितानि आदिशब्देनायुधलेपनजातिपुष्पाणितेषांनाशोभवेत् चपुनस्तद्वृत्त्युपजीविनांवस्त्रादिवृत्त्युपजीविनांनाशोभवेत् स्थितोपविष्ट स्वपतांचस्यात्तैतिलेइत्यादिनासुसत्वादीन्युक्तानितद्गुणविशिष्टानांनाशः स्यादित्यर्थः १६ १७ अथसंक्रांतिवशेन

क्षत्रावैश्यकश्शूद्रसंकरभवाः पुष्पंचपुन्नागकंजातीबाकुलकेतकानिचतथाबिल्वार्कदूर्वांबुजम् १६ स्यान्मल्लिकापाटलिकाजपान्चसं
क्रांतिवस्त्राशनवाहनादेः नाशश्चतद्वृत्त्युपजीविनांन्चस्थितोपविष्ट स्वपतांन्चनाशः १७ संक्रांतिधिष्ण्याधरधिष्ण्यतस्त्रिभेस्वभेनिरुक्तं
गमनंततोऽगभे सुखंत्रिभेपीडनमंगभेंशुकंत्रिभेर्थहानीरसभेधनागमः १८

नप्रतिमनुष्यंशुभाशुभमुपजात्याह संक्रांतीति संक्रांतिर्यस्मिन्नक्षत्रेस्यात्ततोऽधरधिष्ण्यंपूर्वनक्षत्रंतस्मात्स्वजन्मनक्षत्रगण्यम् तच्चेत्प्रथमत्रिभेभवतितदागमनंयात्रास्यात् ततः प्रथमत्रिकानंतरं अंगभेषण्णक्षत्रेषुयदिस्वभेतदासुखंस्यात् ततस्त्रिभेपीडनंशरीरपीडा पुनरंगभे अंशुकंवस्त्रादिप्राप्तिः ततः त्रिभेस्वभेऽर्थहानिः ततोरसभेस्वभेधनागमोधनप्राप्तिः स्यादित्यर्थः अशुभफलदायांसंक्रांतौदानमाहनारदः तिलोपरिलिखेच्चक्रंत्रित्रिशूलंत्रिकोणकम् तत्रहेमविनिक्षिप्यदद्याद्दोषापनुत्तयेइति १८

अथकार्यविशेषग्रहविशेषबलंसामान्यतोग्रहबलंचोपजात्याह नृपेक्षणमिति रवेरितिल्यप्लोपेपंचमी सूर्यबलेसति एतानिकार्याणि यथारवेः अर्कबलेवारेवानृपेक्षणंराजदर्शनंविधेयम् एवंचंद्रादावपिव्याख्येयम् चंद्रेसर्वकृतिः सर्वकृत्यानि भौमेसंगरायुद्धम् बुधेशास्त्रमध्येयम् अध्याप्यंवागुरौविवाहः शुक्रेगमनम् शनौदीक्षणाभ्यागमादिदीक्षाविधेयाइत्यर्थः अथेति ताराबलतोविधुः शुभोज्ञेयः यदाचंद्रसंक्रमणंस्यात्तदाताराबलंचेत्तदासपाददिनद्वयंचंद्रोऽशुभोपिशुभः तारादौष्ट्येशुभोप्यशुभः एवंविधोर्बलाद्रविः संक्रमणेऽशुभोपि मासपर्यंतंशुभः शुभस्तुसुतरांसमीचीनएव चंद्रदौष्ट्येशुभोप्यशुभइत्यर्थः

नृपेक्षणंसर्वकृतिश्चसंगरःशास्त्रंविवाहोगमदीक्षणोरवेः वीर्येऽथताराबलतःशुभोविधुर्विधोर्बलेऽर्कोऽर्कबलेकुजादयः १९ स्पष्टार्क
संक्रांतिविहीनउक्तोमासोऽधिमासःक्षयमासकस्तु

परेभौमादयः संक्रांतिचिकीर्षवस्तत्तद्बलतः सूर्यबलादशुभा अपिशुभाज्ञेयाः रविदौष्ट्येतुशुभा अप्यशुभाः १९ अथाधिमासक्षयमासयोर्लक्षणमुपजात्याह स्पष्टार्केति शुक्लप्रतिपदिदर्शांतश्चांद्रोमासः सचेत्स्पष्टसूर्यसंक्रांत्याविहीनोरहितोभवेत्तदाधिमासउक्तः चांद्रोमासोह्यसंक्रांतोमलमासः प्रकीर्तितइतिब्रह्मसिद्धांतोक्तेः तुविशेषेकदाचित्सचांद्रोमासोद्विसंक्रमः द्वौसंक्रमौयस्मिन्मासोद्विसंक्रमः स्पष्टसूर्यसंक्रांतिद्वययुतस्तदाक्षयमाससंज्ञकउक्तः आद्यंतदर्शयोर्मध्येभानोरेवतयोर्यदा संक्रांतिद्वितयंचेत्स्यात्क्षयमासः सउच्यते इति वसिष्ठोक्तेः तत्रक्षयमासेजातानांवर्धापनेमृतानांश्राद्धेचतिथेर्विभागयोः पूर्वोत्तरदलयोः संबंधेनप्रथमांतसंज्ञौमासौस्तः स्याताम् तिथिपूर्वार्द्धजातानां

मृतानांच पूर्वमासेवर्धापनंश्राद्धंचविधेयम् तिथ्युत्तरार्द्धेजातानांमृतानांचोत्तरमासेवर्धापनंश्राद्धंचविधेयम् तिथ्यर्द्धेप्रथमेपूर्वोऽपरस्मिन्नपरस्तथा
मासावितिबुधैश्चिंत्यौक्षयमासस्यमध्यगाविति मासादिलक्षणभेदविचारस्तुग्रंथगौरवभयान्नलिखितः २० इतिश्रीदैवज्ञानंतसुतदैवज्ञरामवि
रचित० प्रमिताक्षरायांसंक्रांतिप्रकरणंसमाप्तम् ३ ७ अथग्रंथांतरसंग्रहः योगिनीस्थितकाष्ठातःसंक्रांतेरागमोमतः चंद्रस्थदिशिदृ
ष्टिःस्याद्गमनंवारदिक्स्मृतमितिक्वचित् रवौसंक्रमणेपूर्वेमुखंजीवेतुउत्तरे प्रत्यङ्मुखंशनौसोमेशेषेदक्षिणतोमुखमिति बवेपूर्वमुखंप्रोक्तंबालवेय

द्विसंक्रमस्तत्रविभागयोःस्तस्तिथेर्हिमासौप्रथमांत्यसंज्ञौ २० इतिमुहूर्त्तचिंतामणौतृतीयंसंक्रांतिप्रकरणंसमाप्तम् ३ ७
अथ गोचरप्रकरणप्रारंभः सूर्योरसांत्येखयुगेग्निनंदे शिवाक्षयोर्भौमशनीतमश्च रसांकयोर्लाभशरेगुणांत्येचंद्रोंबराब्धीगुणनं
दयोश्च १
मदिङ्मुखम् कौलवेपश्चिममुखंतैतिलेचोत्तरेमुखम् गरेवायव्यदिग्वस्त्रंवणिज्याग्नेयदिङ्मुखम् भद्रायामीशदिग्वक्त्रंशकुनौनैर्ऋतौमुख
म् चतुष्पदिचपातालेनागेचोर्ध्वमुखीभवेत् किंस्तुघ्नेसर्वदिग्वस्त्रंसंक्रांतिमुखलक्षणम् अथदृष्टिः चंद्रेगुरौदृष्टिर्विदि क्कुशाशनौ सूर्येसितेनैर्ऋतिकोणगादृ
क् धात्रीसुतेदृक्पवनेनिरुक्ताबुधेशनौरुद्रदिशीक्षणंभवेत् अथगमनम् मंदेचंद्रेगमःसौम्येबुधेभौमेचवारुणे रवौशुक्रेगमोयाम्येगुरौप्राग्गमनेस्मृतमि-
ति ७ अथगोचरप्रकरणंव्याख्यायते तत्रजन्मराशेःसकाशात्ग्रहाणांचारवशेनयच्छुभाशुभफलंतद्गोचरफलमित्युच्यते तत्ररविचंद्रयोर्गोचरफलमुप

जातिकयाह सूर्यइति रसांत्येइत्यादौसमाहारद्वंद्वः शिवाक्षयोरित्यादावितरेतरयोगः अंबराब्धावित्यमागमशासनमितिनुमभावोध्येयः एवंसर्वत्र स्वजन्मराशेरिति पंचमश्लोकस्थमत्राध्याहार्यम् ततःसूर्यः क्रमात् रसांत्येशुभोविद्धश्चस्यात् सूर्योजन्मराशेः सकाशात् षष्ठस्थानेशुभः यदिततएवजन्मराशेर्द्वादशस्थानस्था अन्येग्रहाः तदाविद्धःसूर्यः शुभोप्यशुभफलदाता अत्रशनेः सूर्यपुत्रत्वात्तद्वेधोनांगीकृतः यतः पितुर्जनकस्यस्कृतसंबंधिवेधनंवेधंनाहुः सुतस्यापिपितृसंबंधिनंवेधंनाहुः तथारवयुगेजन्मराशेर्दशमेसूर्यः शुभश्चेच्चतुर्थस्थानेशनिवर्जिता अन्येग्रहाः स्युस्तदाविद्ध इत्येवंश्लोकत्रयंसम्यग्व्याख्येयम् तथाग्निनंदेतृतीयनवमयोः शिवाक्षयोरेकादशपंचमयोः क्रमाच्छुभोविद्धश्चज्ञेयः भौमेति भौमशनी तमोगुश्चत्रयोपिजन्मराशितः रसांकयोः लाभशरे

लाभाष्टमेचाद्यशरेरसांत्येनगद्वयेज्ञोब्धिशरेब्धिरामे रसांकयोर्नागविधौरवनागेलाभव्ययेदेवगुरुःशराब्धौ २

गुणांत्येक्रमाच्छुभाविद्धाश्चेत्यर्थः परंतुशनेः सूर्यवेधोनास्तीत्युक्तंप्राक् चंद्रोंबराब्धौइत्यग्रे १ अथबुधगुरुशुक्राणांगोचरफलंउपजातिकेंद्रवज्राभ्यामुपजातिकापूर्वार्द्धेनाह चंद्रइति जन्मभात् अंबराब्धौ गुणानंदयोः लाभाष्टमे आद्यशरे रसांत्येनगद्वये चंद्रः क्रमाच्छुभोविद्धश्चज्ञेयः चंद्रस्यबुधवेधोनास्ति अथज्ञ इतिद्विशरे अब्धिरामे रसांकयोः नागविधौ रवनागेलाभव्ययेज्ञोबुधः क्रमाच्छुभोविद्धश्चज्ञेयः अत्रचंद्रवेधोनास्ति अथदेवगुरुरिति जन्मभात् शराब्धौ व्यंत्येनवांशे अद्रिगुणे शिवाहौ देवगुरुर्बृहस्पतिः क्रमाच्छुभोविद्धश्चज्ञेयः अथशुक्रइति जन्मराशेः सकाशात् कुनागे द्विनगे अग्निरूपे वेदांबरे पंचनिधौ गजेषौ

नंदेशयोः भानुरसे शिवाग्नौ शुक्रः क्रमाच्छुभोविद्धश्चज्ञेयः अत्रेदंतात्पर्यम् सूर्योरसांत्येइत्यादिप्राक् पठितस्थानेषु विद्यमानः सन्ग्रहः शुभदः तदनंतरंपठितस्थानेषुस्थितोऽशुभफलदाता अर्थादेवानुक्तस्थानेषुनशुभोनाप्यशुभइति २ ३ अथवामवेधंशुक्लपक्षेचंद्रबलंचोपजात्युत्तरार्द्धेनाह दुष्टोपीति दुष्टोपि स्वजन्मराशेः सकाशादनंतरं पठितविरुद्धस्थानस्थितोपि विपरीतवेधाद्वामवेधाच्छुभः यथासूर्योद्वादशोऽनिष्टइत्युक्तंप्राक्सयदिशनिवर्जितैर्ग्रहैः षष्ठस्थानस्थितैर्विद्धः सन् शुभफलदाता एवमुत्तरस्थानस्थितोयः कश्चिद्ग्रहः प्राक्पठितस्थानस्थितैर्ग्रहैः विद्धैः शुभइतिसर्वत्रव्याख्येयम् अयमेववामवेध

द्व्यंत्येनवांशेऽद्रिगुणेशिवाहौशुक्रःकुनागेद्विनगेग्निरूपे वेदांबरेपंचनिधौगजेषौनंदेशयोर्भानुरसेशिवाग्नौ ३ क्रमाच्छुभो
विद्धइतिग्रहःस्यात्पितुःसुतस्यात्रनवेधमाहुः दुष्टोपिखेटोविपरीतवेधाच्छुभोद्विकोणेशुभदःसितेब्जः ४

इत्युच्यते कश्यपः अपविद्धोग्रहः किंचिन्नददातिशुभंफलम् वामवेधविधानेनत्वशुभोपिशुभप्रदः द्विकोणेइति सितेशुक्लपक्षे अब्जश्चंद्रोद्वितीयनवमपंचमेषुस्थितःशुभदः अत्रापिक्रमेणषष्ठाष्टमचतुर्थस्थानस्थितैर्बुधवर्जितैर्ग्रहैर्यदिनविद्धः तदाशुभइतिध्येयम् नारदः शुक्लपक्षेशुभश्चंद्रोद्वितीयनवपंचमे रिपुमृत्य्वंबुसंस्थैश्चनविद्धोगगनेचरैरिति ४ अथद्विविधमतमुपजात्याह स्वजन्मराशेरिति इहद्विविधवेधविधौ अन्येनारदादयः स्वजन्मराशेःसकाशात् द्विविधमपिवेधमाहुः तथाचोभयत्रापिनारदेनजन्मत इत्युक्तम् अन्येकश्यपादयःसपुनर्द्विविधोग्रहाधिष्ठितराशितः ग्रहोय

स्मिन् राशौतिष्ठतिततएवक्रमाद्वेधोवामवेधश्च भवति यथासूर्योजन्मराशेः षष्ठस्थितः शुभः ससूर्याक्रांतराशेः द्वादशस्थानस्थितैः शनिवर्जितैर्ग्रहैर्नविद्धः तथा
सूर्योद्वादशस्थानस्थितोऽनिष्टः सूर्यः स्वाक्रांतराशेः षष्ठस्थानस्थितैः शनिवर्जितैर्ग्रहैर्विद्धश्चेत्तदाशुभफलदइत्यर्थः अथद्विविधवेधस्यैवविषयकल्पनोच्य
तेहिमाद्रीतिहिमाचलविंध्याचलयोर्मध्यवर्तिन्येवदेशेसवेधोज्ञेयः नसर्वदेशेष्वितिकाश्यपोक्तिः काश्यपवचनेयदाह ज्ञातव्यंजन्मराशेस्तु निखिलंयद्बला
बलं हिमाद्रिविंध्ययोर्मध्येवेधजंतद्ग्रहालयम् अपरेतु सूर्योरसांत्यइतिक्रामिकावेधोजन्मराशेरेवज्ञेयः विपरीतवेधस्तुग्रहाधिष्ठितराशितएवेति वदंति
गुरुः जन्मतः क्रमवेधः स्याद्वामेवेधोग्रहालयादिति इदमपिहिमाद्रिविंध्यांतरविषयमेवेत्यन्ये एतद्ज्ञानंदुर्घटमित्याहनारदः अज्ञात्वाद्विविधंवेधंयोग्र

स्वजन्मराशेरिहवेधमाहुरन्येग्रहाधिष्ठितराशितःसः हिमाद्रिविंध्यांतरएववेधोनसर्वदेशेष्वितिकाश्यपोक्तेः ५

हज्ञोबलंवदेत् समृषावचनाभाषीहास्यंयातिजनेसदेति एवंगोचरदौष्ट्येयात्रादिनकार्यम् तत्रशांतिमाहनारदः ग्रहेषुविषमस्थेषुशांतिंयत्नात्समाच
रेदिति सौम्येक्षितेनिष्टफलः शुभदः पापवीक्षितः निष्फलौतौग्रहौस्वेनशत्रुणाचावलोकितः नीचराशिगतःस्वस्यशत्रुःक्षेत्रगतोपिवा शुभाशुभ
फलंनैवदद्यादस्तंगतोपिवेति एतादृशस्थलेदुष्टत्वाभावादेवशांत्यभावइतिफलितोर्थः ५ अथगोचरप्रस्तावात् ग्रहणीयनक्षत्रफलंग्रहणीयरा
हुगोचरफलंग्रहणाशुभप्रतीकारंचदुष्टंचग्रहणदर्शननिषेधंचशार्दूलविक्रीडितेनाह जन्मर्क्षेइति यस्यजन्मनक्षत्रेग्रहेग्रहणेसतिनिधनंमरणंस्यात्

जन्मर्क्षेनिधनंग्रहेजनिभतोघातःक्षतिःश्रीर्व्यथाचिंतासौख्यकलत्रदौःस्थ्यमृतयःस्युर्माननाशःसुखम्

वसिष्ठः यस्यैवजन्मनक्षत्रेग्रस्यतेशशिभास्करौ तस्यव्याधिभयंघोरंजन्मराशौधनक्षयइति विशेषोभार्गवीये यस्यराज्यस्यनक्षत्रेस्वर्भानुरुपरुज्यते राज्यभंगंसुहृन्नाशंमरणंवात्रनिर्दिशेत् इति राज्यनक्षत्रेराज्याभिषेकनक्षत्रे अथराशिफलम् जनिभत इति जन्मराशेरारभ्यग्रहणेसतिक्रमेणघातादिकंफलंभवति यथाजन्मराशौग्रहणेसतिघातः शरीरपीडा द्वितीयराशौक्षतिर्द्रव्यनाशः तृतीयराशौश्रीर्लक्ष्मीप्राप्तिः चतुर्थराशौ व्यथाशरीरपीडा पंचमराशौचिंतापुत्रादीनाम् षष्ठराशौसौख्यं सप्तमराशौकलत्रदौःस्थ्यंस्त्रीकष्टम् अष्टमराशौमृतिर्मरणम् नवमराशौमाननाशः दशमराशौसुखम् एकादशराशौलाभः प्राप्तिः द्वादशराशौ अपायोनाशः आत्मनइतिकेचित् द्रव्यस्येत्यपरे इदंषण्मासपर्यंतमितिज्ञेयम् तदनंतरंग्रहणांतरसंभावनाय उक्तंचदैवज्ञमनोहरे घातंहानिमथश्रियंजननभाद्ध्वस्तिंचचिंताक्रमात्सौख्यंदारवियोजनंचकुरुतेव्याधिंचमानक्षयं सिद्धिं लाभमपायकर्मशशिनोः षण्मासमध्येग्रह इति अथाशुभसूचकग्रहणप्रतीकारमाह तदशुभेति तस्यग्रहणाशुभस्यध्वस्त्यैनाशायजपस्वर्णगोदानं जपोगायत्र्यादिमंत्राणां स्वर्णंसुवर्णं गौर्धेनुः भूमिर्वा उपलक्षणत्वादन्येषांरूप्यादीनांयथाशक्त्यादानंकार्यमितिशेषः तद्दौःस्थ्यप्रणुकदुक्तवज्जपविधिस्वर्णादिदानंभवेदित्युक्तेः दानंज्योतिर्निबंधे सुवर्णनिर्मितंनागंसतिलंताम्रभाजने सदक्षिणंसवस्त्रंचश्रोत्रियायनिवेदयेत् मंत्रश्च तमो

मयमहाभीमसोमसूर्यविमर्दन हेमनागप्रदानेनममशांतिप्रदोभवेतिस्कांदे गोदानंभूमिदानंचस्वर्णदानंविशेषतः ग्रहणेक्लेशनाशायदैवज्ञायनिवेदयेत् इतिव्यासेनोक्तम् सर्वंगंगासरित्तोयंसर्वेब्रह्मसमाद्विजाः सर्वंभूमिसमंदानंग्रहणेचंद्रसूर्ययोरिति अन्यच्च ग्रस्तमानेभवेत्स्नानंग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयतइति सूर्येंदुग्रहणंयावत्तावत्कुर्याज्जपादिकमितिशिवरहस्योक्तेः जपमादिशब्दाद्देवार्चनादिकार्यम् अथस्थानविशेषेणग्रहणमरिष्टजनकमित्युक्तम् तद्दृष्टमुपादृष्टमपीतिसंशयेनिर्णयमाह अथोइतितुविशेषेपरेआचार्याः अशुभदंग्रहणंतुनोवीक्ष्यंनद्रष्टव्यमित्याहुः उक्तंच जन्मसप्ताष्टरिःफांकदशमस्थेनिशाकरे दृष्टोरिष्टप्रदोराहुर्जन्मर्क्षेनिधनेतथा जन्मर्क्षंजन्मनक्षत्रंनिधनंवधःतारा

लाभोपायइतिक्रमात्तदशुभध्वस्त्यैजपःस्वर्णगोदानंशांतिरथोग्रहंत्वशुभदंनोवीक्ष्यमाहुःपरे ६

समी अत्रदृष्टइतिपदश्रवणाद्दर्शनंचाक्षुषंविवक्षितमितितेषामाशयश्चाक्षुषज्ञानएवदृशेर्मुख्यत्वेइतिपरेषांमतम् तदसत् अदृश्यरूपाःकालस्यमूर्तयोभगणाःश्रिताः शीघ्रमंदोच्चपाताख्याग्रहणांगतिहेतवेइतिसूर्यसिद्धांतेपातानामदृश्यतोक्ता पातोराहुश्चपर्यायः दक्षिणोत्तरयोरेवंपातोराहुश्चरंहसा विक्षिपत्येवविक्षेपश्चंद्रादीनामयंक्रमादिति सूर्यसिद्धांतोक्तेः अतःपातानामदृश्यत्वात् राहोर्दर्शनमेवानुपपन्नम् ननुग्रहणेचंद्रसूर्ययोश्छादकोराहुर्दृश्यतएव अतएवराहुग्रस्तेनिशाकरेइत्यादिपुराणोक्तिरपीतिचेन्न भानोर्भार्धेमहीछायातत्तुल्येर्कसमेपिवा शशांकपा

तेग्रहणंकियद्भागाधिकोनकइत्युपक्रम्य छादकोभास्करस्येंदुरधःस्थोघनवद्भवेत् भूछायांप्राङ्मुखश्चंद्रोविशत्यस्यभवेदसौ असौभूछायाअस्यचंद्रस्यछादकाभवेदित्यर्थः सूर्यसिद्धांते छाद्यछादकभावोऽभिहितःस्पष्टएव पुराणविरोधपरिहारस्तुभास्करेणैवराहुः कुंभामंडलगः शशांकमित्यादिनाक्तं वराहेणापितस्मिन्कालेसान्निध्यमस्यतेनोपचर्यतेराहुरित्युक्तं तस्माद्राहोर्दर्शनंनास्त्येव तन्मतेदर्शनंचाक्षुषमेवविवक्षितम् एवंचराहोर्दर्शनंराहुदर्शनमितितत्पुरुषोनुपपन्नः तस्माद्दर्शनशब्देनोपरागोलक्ष्यते राहुदर्शनंराहूपरागस्तस्मिन्राहुदर्शनेइति अयमर्थः राहुर्नामपातस्तत्संबंधेनदर्शनमुपरागइति नचराहुरेवलक्षणयोपरागपरस्तस्यदर्शनमितिपूर्वपक्षाभिमतार्थसिद्धिरितिवाच्यम् लक्षणयातुअर्थांतरासंभवेसतिवक्तव्याः अत्यंतादर्शनाराहोतथाचात्यंतदर्शने प्रजापीडाविनिर्देश्याव्याधिदुर्भिक्षकारकैरिति विष्णुधर्मोत्तरादिवाक्येषुपदांतरा सन्निधानाद्राहुशब्देनोपरागोलक्ष्यते इहचराहोःपाताख्यंग्रहगतिरूपमर्थांतरमस्तीत्यतोराहुदर्शनग्रहपातयोःसमानार्थकंनास्तीत्येवसिद्धमिति प्रागुक्तानांसर्ववचसांग्रहणेस्नानादित्येकवाक्यार्थः फलितोभवति केचित्तुदर्शनादर्शनविषयकयोस्तुविध्योस्तुल्यबलत्वात्सकृदृष्ट्वास्नायादितिवदंति तदसत् जन्मसप्ताष्टरिःफांकेत्यादिनासामान्यतोनिषिद्धस्यउपरक्तदर्शनस्य नेक्षेतोद्यंतमादित्यं नास्तंयांतंकदाचन नोपरस्थंनवारिस्थंनमध्यंनभसोगतमिति मनूक्तोपरस्तुदर्शनस्य पुनर्निषेधानुपपत्तेः प्रागुक्तदिशाराहुदर्शनपदस्यराहूपरागलक्षकत्वेनतुल्यबलत्वाभावात् तस्मादुपरक्तयोः सूर्याचंद्रमसोर्यस्यकस्यापिदर्शननिषेधसत्वात् ग्रहणेचस्नानदानाद्युक्तेस्तद्दानंचज्योतिः

शास्त्रैकदेशगणितग्रंथेभ्योबुध्वातस्मिन्कालेदानादिविधेयमितिसिद्धांतः अतएवमेघाद्यावृतेप्युपरागेस्नानादिविधेयमेव रात्रौसूर्योपरागेदिवाचंद्रोपरागेचस्नानादिकंतुवचनान्नभवति तदुक्तंनिगमे सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहोयदि तत्रस्नानंनकुर्वीतदद्याद्दानंनचक्वचिदिति तादृशेग्रहणेदृष्टेपिदोषोनास्तीत्यपिसूचितम् जाबालिवचनंतु संक्रांतेःपुण्यकालस्तुषोडशोभयतःकलाः चंद्रसूर्योपरागेतुयावद्दर्शनगोचरइति ग्रस्तस्यास्तमयनपर्यंतंदर्शनगोचरत्वात्तावान्कालःपुण्यकालोभवतीतिव्याचख्युः तदुक्तंविश्वरूपनिबंधे दिवाचंद्रग्रहोरात्रौसूर्यपर्वनपुण्यदम् संधिस्थंपुण्यवज्ज्ञेयंयावद्दर्शनगोचरइति अन्येतु सूर्यस्यादर्शनंरात्रिर्दिनंतद्दर्शनात्मकम् भुजवृत्तादुपरिचस्थितोर्कोदर्शनंस्मृतमिति वसिष्ठसिद्धांतवचनान्मेघावृतेऽनावृतेचोपरागेगणितागतस्थितिघटिकाःपुण्यकालइत्याहुः यत्राकाशंभूम्यासहसंलग्नमिवदृश्यन्ते सप्रदेशोभुजशब्दवाच्यः अर्कइत्युपलक्षणंचंद्रादिग्रहनक्षत्राणाम् विष्णुधर्मोत्तरे अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपरमिति ग्रस्तास्तेगुरुः ग्रस्तावेवास्तमानंतुरवींदूप्राप्नुतोयदि तयोःपरेद्युरुदयेस्नात्वाभ्यवहरेन्नरः इत्यनयोर्वाक्ययोर्दर्शनोदयशब्दौभुजवृत्तोपरिस्थितत्वलक्षकौ अन्यथामेघाद्यावरणेनपरदिवसेपिदर्शनाभावेउपवासःप्रसज्येत तथायत्रस्पर्शकालेग्रहणंदृष्ट्वास्नानंविहितंतत्रांतरेमेघावरणाद्रविचंद्रयोर्दर्शनाभावोदिवसद्वयंत्रयंवास्यात्तत्राप्युपवासप्रसंगःस्यात् नचशिष्टास्तथाचरंति तस्माद्दृशिर्दर्शनार्थएव तस्माच्छास्त्रीयग्रहणज्ञानेसतिमेघानावृतेपिग्रहणेग्रहणमदृष्ट्वैवचक्षुष्मता अंधेनगतुमशक्तेनचवृद्धादिना-

सच्छास्त्रीयंविधेयमितितात्पर्यार्थः अतएवभागवतेकुरुक्षेत्रेस्नानार्थंमिलितानांपांडवीयलौकानांमध्येधृतराष्ट्रोपिपरिगणितइतिशिष्टाचारोप्येवमेवास्ति एवंचारिष्टजनकत्वेतस्माज्जन्मसप्तांकेतिपद्यंनिर्मूलत्वादुपेक्ष्यम् किंच मत्पक्षोक्तलब्धवसिष्ठमत्स्यपुराणादिवाक्येदर्शपदाभावाच्च अतएवमूलेपरे इतिपदंप्रयुक्तंशांतिस्तुदर्शनाभावेपिविधेया यतोरिष्टयोगानांस्वरूपसतामेवारिष्टजनकत्वात् अथग्रहणशांतिः येषांतुविषमस्थानेराहुश्चंद्रमुपक्रमेत् कर्मक्षयपरिक्लेशान्प्राप्नुवंतिचतेजनाः पितृपक्षविनाशायसूर्यस्थानेभवेद्ग्रहः होरायांगृह्यतेयस्यनक्षत्रेवानिशाकरः प्राणसंदेहमाप्नोतिअथवारणमृच्छति यस्यत्रिजन्मनक्षत्रेग्रहणेशशिभास्करौ तज्जातानांभवेत्पीडायेनराःशांतिवर्जिताः संक्रमइनस्ययेषांजन्मतृतीयेथवाग्रहणम् बहुरोगमृत्युजननोक्तदानाहुतयोजपाश्चकर्तव्याः तस्माद्दानंचहोमंचदेवार्चनजपौतथा उपरागाभिषेकंचकुर्याच्छांतिर्भविष्यति नक्षत्रदानंयथा रूपंविधायभुजगस्यतुकांचनेनपिष्टेनवाहिमकरेदिवसाधिपेच ग्रस्तेत्रिजन्मदिवसेतमसाप्रदद्याद्द्विजायवेदविदुषेसुपरीक्षिताय यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः तत्रस्नानंप्रवक्ष्यामिमंत्रौषधिसमन्वितम् चंद्रोपरागंसंप्राप्यकुर्याद्ब्राह्मणवाचनम् संपूज्यचतुरोविप्रान्शुक्लमाल्यानुलेपनैः पूर्वमेवोपरागस्यसमानीयौषधादिकम् स्थापयेच्चतुरःकुंभानग्रतःसागरानिव गजाश्वरथ्यावल्मीकसंगमह्रदगोकुलात् राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंचकुंभेषुशुद्धमुक्ताफलानिच रोचनंपद्मकंशंखंपंचरत्नसमन्विताम् स्फटिकंचंदनंश्वेतंतीर्थवारिचपल्लवान् गजदंतंकुंकुमंचसर्षपोशीरगुग्गुलून् तत्सर्वंनिक्षिपेत्पूर्वंकुंभेष्वावाहयेत्सुरान् सर्वेसमुद्राःसरितस्ती

र्थांनिजलदानदाः आयांतुममशांत्यर्थंदुरितक्षयकारकाः तिलहोमंव्याहृतिभिः सहस्रंचाष्टसंयुतम् एवंकृत्वाप्रयत्नेन स्नानकर्मसमारभेत् आमंत्र्यनवभिर्मंत्रैः कुंभान्संकल्पपूर्वकम् योसौवज्रधरोदेवोह्यादित्यानांप्रभुर्मतः सहस्रनयनःशक्रोग्रहपीडांव्यपोहतु मुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः चंद्रोपरागसंभूतामग्निःपीडांव्यपोहतु यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः यमश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु निर्ऋतिःकौणपोदेवःप्रलयानलसन्निभः खड्गव्यग्रोतिभीमश्चरक्षःपीडांव्यपोहतु नागपाशधरोदेवःसदामकरवाहनः सजलाधिपतिश्चंद्रग्रहपीडांव्यपोहतु प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु योसौनिधिपतिर्देवःखड्गशूलगदाधरः चंद्रोपरागकलुषंधनक्षेत्रेव्यपोहतु योसाविंदुयुतोदेवोभवानीपतिरीश्वरः चंद्रोपरागजांपीडांसनाशयतुशंकरः त्रैलोक्येयानिभूतानिच ततोमैत्रान्विलिख्यकान्वितान् वस्त्रेपट्टेऽथवाभूर्जेपंचरत्नसमन्वितान् यजमानस्यशिरसिनिदध्युस्तेद्विजोत्तमाः ततोतिवाहयेद्वेलामुपरागानुमानिनीं प्राङ्मुखंपूजयित्वातेनत्वाष्टाभीष्टदेवते चंद्रग्रहेविनिवृत्तेकृतशौचात्ममंगलः कृतस्नानंचतत्सर्वंब्राह्मणायनिवेदयेत् अनेनविधिनायस्तुग्रहस्नानंसमाचरेत् नतस्यग्रहपीडास्यान्नचबंधुधनक्षयः सूर्यग्रहेसूर्यनामसदामंत्रेषुकीर्तयेत् यइदंशृणुयान्नित्यंश्रावयेद्वापिवानरः सर्वपापविनिर्मुक्तःसर्वत्रसुखवान्भवेदिति इतिमत्स्यपुराणोक्ताग्रहणशांतिः अथौषधीभिर्ग्रहणशांतिः रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनम् शुक्तिस्फटिकतीर्थांबुसितसर्षपगुग्गुलून् मधुकंदेवदारुंचविष्णुक्रांताशतावरी वेलांचसहदेवींचनिशा

द्वितयमेवच्च दूर्वांकुरोशीरशमीशिलाजित् सर्वार्थसर्वौषधिपंचमृद्भिः स्नानंविदध्याद्ग्रहणोरवींद्वोःपीडाकरंशांतिवहंचयस्येति ६ अथचंद्रब
लविशेषमनुष्टुप्छंदसाह पापांतइति शुभफलदोपि-चंद्रः पापांतः पापद्वयमध्यवर्तीपापयुक् पापग्रहयुक्तः पापात् द्यूनेसप्तमेवर्तमानस्तदासु
भोपिअसत् अशुभएव यदात्वशुभोपिचंद्रः शुभांशेशुभग्रहनवांशेअथवाधिमित्रनवांशे तथागुरुणादृष्टः सत् शुभफलदाताभवेत् ७ अन
न्यदप्यनुष्टुभाह सितेति शुक्लपक्षादौप्रतिपदिसमीचीनचंद्रेसतिसंपूर्णः शुक्लः शुभः असितादौकृष्णपक्षप्रतिपदिदुष्टेचंद्रेसतिसंपूर्णःकृष्णःशुभः

पापांतःपापयुग्द्यूनेपापाच्चंद्रःशुभोप्यसत् शुभांशेचाधिमित्रांशेगुरुदृष्टोऽशुभोपिसत् ७ सितासितादौसद्दुष्टेचंद्रेपक्षौशुभा
शुभौ व्यत्यासेचाशुभौप्रोक्तौसंकटेब्जबलंत्विदम् ८ वज्रेशुक्रेऽब्जेसुमुक्ताप्रवालंभौमेऽगौगोमेदमार्कौसुनीलं केतौवैडूर्यं
गुरौपुष्पकंज्ञेपाचिःप्राङ्माणिक्यमर्केतुमध्ये ९

व्यत्यासेच पूर्वोक्तादर्थाद्वैपरीत्येद्वावपिपक्षावनिष्टौ यदाशुक्लप्रतिपदिचंद्रोदुष्टश्चेत्त
दासकलपक्षोऽनिष्टः कृष्णप्रतिपदिचंद्रः शुभश्चेत्तदासंपूर्णःकृष्णपक्षेऽनिष्टःइदमेतावत् अब्जबलंचंद्रबलंसंकटेविवाहयात्रादौ अवश्यक
र्तव्येतात्कालिकचंद्रबलाभावेचग्राह्यम् नान्यथेत्यर्थः ८ अथग्रहदौष्ट्यपरिहारपूर्वकंतुष्टिसंपादनार्थंनवरत्नसमुदायधारणंशालिन्याह वज्रमिति
अत्रसुवर्णमुद्रिकायांनवधाभक्तायांप्रागादिक्रमेणनवरत्नानिनिधेयानि तत्रप्रागिति पंचम्यंतमव्ययंपंचमीचेयंल्यब्लोपे तेनप्रागादिदिक्ष्वित्ययमर्थोजातःतत्र

शुक्रप्रीतयेपूर्वस्यांदिशिवज्रंश्वेतहीरकंनिधेयम् एवंचंद्रप्रीतयेस्फुमुक्ताशोभनमुक्ताफलमाग्नेय्याम् भौमप्रीत्यर्थंदक्षिणस्यांप्रवालम् अंगोराहौनैर्ऋत्यांगोमेदम् आर्कौशनौपश्चिमायांशोभनंनीलंकेतौवायव्यांवैडूर्यम् गुरौउत्तरस्यांपुष्पकंपुष्पराजम् बुधेईशान्यांपाचिःमध्येमध्यमकोष्ठेअर्कप्रीत्यैमाणिक्यंनिधेयम् ९ अथसतिसामर्थ्येनवरत्नसमुदायधारणमुक्तम् इदानीमसतिसामर्थ्येयद्ग्रहकृतदौष्ट्यंतद्ग्रहरत्नधारणमिंद्रवज्रयान-ह माणिक्येति सूर्यप्रीत्यर्थंमाणिक्यंधार्यम् एवंचंद्रस्यमुक्ताफलम् भौमस्यविद्रुमंप्रवालम् बुधस्यगारुत्मकंगरुडःपाचिःगुरोःपुष्पकंपुष्पराजःशु

माणिक्यमुक्ताफलविद्रुमाणिगारुत्मकंपुष्पकवज्रनीलम् गोमेदवैडूर्यकमर्कतःस्यूरत्नान्यथोज्ञस्यमुदेसुवर्णम् १० धार्यंला
जावर्त्तकंराहुकेत्वोरौप्यंशुक्रेंद्वोश्चमुक्तागुरोस्तु लोहंमंदस्यारभान्वोःप्रवालंताराजन्मर्क्षाच्चिराद्दूषितःस्यात् ११

क्रस्यवज्रंहीरकःशनेर्नीलंलहसुणिया राहोर्गोमेदं केतोर्वैडूर्यमित्येवमर्कतोऽर्कादीनांग्रहाणांरत्नानिधार्याणिस्युः तत्रयद्ग्रहकृतदौष्ट्यंतस्यग्रहस्यतुष्ट्यैतद्रत्नमेवधार्यमित्यर्थः अथोज्ञस्यमुदेसुवर्णमित्यग्रिमश्लोकेनसंबंधः १० अथमहामूल्यरत्नधारणस्यासामर्थ्येअल्पमूल्यानिरत्नानिताराबलंचशालिन्याह धार्यमिति अथोज्ञस्यबुधस्यमुदेसंतोषार्थंसुवर्णंयथाशक्तिधार्यम् राहुकेत्वोस्तुष्ट्यैलाजावर्तकंमणिविशेषोधार्यः शुक्रेंद्वोस्तुष्ट्यैरूप्यम् गुरोस्तुष्ट्यैमुक्ताफलम् शनेस्तुष्ट्यैलोहम् आरभान्वोस्तुष्ट्यैप्रवालंधार्यम् तारेति यद्दिनेताराबलंचिकीर्षितंतद्दिनेयातारासाजन्मन

क्षत्रात्त्रिरावृत्तितः पुनः पुनरावृत्तित्रयेणगणनीयास्स्यात् त्रिरितिसुबतमव्ययंजन्मनक्षत्रात् दिननक्षत्रगणितेनवभिर्भक्तेतिस्त्रआवृत्तयोभवंति अवशिष्टतारायाः शुभमशुभंचव्याख्यातमितिफलितोर्थः ११ अथशेषक्रमेणसकलास्तारासंज्ञा अनुष्टुभाह जन्माख्येति स्पष्टोर्थः १२ अथावश्यकृत्येदुष्टताराणांप्रकारद्वयेनपरिहारंशार्दूलविक्रीडितेनाह मृत्यौस्वर्णतिलानिति मृत्यौवधतारायांस्वर्णतिलान् यथाशक्तिब्राह्मणायदद्यात् विपदिविपत्तारायांगुडमिक्षुविकारंदद्यात् त्रिजन्मसुतिसृषुजन्मतारासुशाकंवृंताकादिदद्यात् अथोप्रत्यरितारकासु पंचमतारायांलवणंदद्यात् नारदः जन्मत्रिपंचसप्ताख्यास्तारानिष्टफलाःस्मृताः शाकंगुडंचलवणंसतिलं कांचनंक्रमात् अनिष्टपरिहारायदद्याद्दानंद्विजातयेइति अथद्वितीयःपरिहारः तत्रादिमपर्ययेप्रथमावृत्तौविपत्प्रत्यरिर्मृत्युश्चतृतीयपंचमीसप्तम्यस्ताराः सर्वाअपिसामान्यतःषष्टिघटिकात्मिकानशुभदाःस्युः अथद्वितीयेपर्ययेद्वितीयावृत्तौविपत्प्रत्यरिमृत्यूनां आदिप्रांत्यतृतीयकाअंशानशुभदाःविपत्तारायामाद्यांशः प्रथमचरणोनिषिद्धः प्रत्यरितारायाप्रत्यांशश्चतुर्थचरणस्त्याज्यः मृत्युतारायांतृतीयोंशः तृतीयचरणस्त्याज्यइति अथतृतीयावृत्तौ विपत्प्रत्यरि-

जन्माख्यसंपद्विपदः क्षेमप्रत्यरिसाधकाः वधमैत्रातिमैत्राः स्युस्तारानामसदृक्फलाः १२ मृत्यौस्वर्णतिलान्विपद्यपिगुडंशाकं
त्रिजन्मस्वथोदद्यात्प्रत्यरितारकासुलवणंसर्वोविपत्प्रत्यरिः मृत्युश्चादिमपर्ययेनशुभदोथैषांद्वितीयेंशकानादिप्रांत्यतृतीयका
अथस्तुभाःसर्वेतृतीयेस्मृताः १३

मृत्युश्चैतेसर्वेषष्टिघटिकात्मिका अपिशुभाः उक्तंचदीपिकायाम् पर्यायेप्रथमेवर्ज्याविपत्प्रत्यरिनैधनाइति १३ अथचंद्रावस्थागणनोपायमनुष्टुभाह षष्टिघ्नमिति अश्विनीमारभ्यगतभानिषष्ट्यागुण्यानिवर्तमाननक्षत्रभुक्तघटीयुतानितानिपुनर्युगैश्चतुर्भिराहतानि शराब्धिहृत् ४५ पंचचत्वारिंशताभाज्यानि यल्लब्धमागतंगतावस्थास्ताः शेषंवर्तमानावस्थायाः तत्रलब्धांकस्यापिद्वादशाधिक्ये द्वादशाभिर्भागशेषंप्रवासाद्यवस्थाश्चंद्रस्यगताः स्युः ताअवस्थामेषराशेः पुंसः प्रवासादिसंज्ञाः वृषराशेर्नष्टादिसंज्ञाः एवंमिथुनादिदशराशिषुमृतादिसंज्ञावस्थादितोद्वादशावस्थाः क्रमेणभवंती

षष्टि ६० घ्नंगतभंभुक्तघटीयुक्तंयुगा ४ हतम् शराब्धिहृल्लब्धतोर्कशेषेवस्थाःक्रियाद्विधोः १४ प्रवासनाशौमरणंजयश्चहास्यारतिः
क्रीडितसुप्तभुक्ताः ज्वराख्यकंपस्थिरताअवस्थामेषात्क्रमान्नामसदृक्फलाःस्युः १५ लाजाकुष्ठबलाप्रियंगुघनसिद्धार्थैर्निशा-
दारुभिः पुंखालोध्रयुतैर्जलैर्निगदितंस्नानंग्रहोत्थाघहृत्

त्यर्थः १४ अथद्वादशावस्थानामानिसफलान्याह प्रवासनाशाविति स्पष्टार्थम् १५ अथग्रहाणांवैकृतपरिहारार्थंसौषधस्नानंदक्षिणाश्चशार्दूलविक्रीडितेनाह लाजाकुष्ठेति लाजाभ्रष्टशालयः इतिकेचित् वस्तुतस्तुऔषधीसाहचर्यात्तुलाजाशब्देनलज्जावतीगृह्यते कुष्ठंप्रसिद्धम् बलावरियाप्रियंगुःफल्लिनी घनोमुस्ता सिद्धार्थाःसर्षपाः निशाहरिद्रा दारुःदेवदारुः पुंखाशरपुंखालोध्रंप्रसिद्धम् एतैरौषधैर्युतैर्जलैः स्नानंग्रहोत्थाघहृत् दुष्टग्रहसूचितारिष्टनाशकंस्यात् सप्रियंगु रजनीद्वयमांसीकुष्ठलाजतिलसर्ष-

परखंडैः वारिभिः सहवन्नैः सहलोध्रैः स्नानमार्त्तिनिखिलग्रहपीडामित्युक्तेः अथरवेः रविमारभ्यदक्षिणाउच्यंतेसूर्यायधेनुम् चंद्रायकंबुः शंखः शं
खःस्यात्कंबुरस्त्रियामित्यमरः भौमायारुणोवृषः बुधायसुवर्णम् गुरवेपीतांबरम् तच्च यथाविभवंकार्पासंकोशजंवा शुक्रायश्वेतोघोटकः शन
येश्यामवर्णागौः राहवेमहासिर्महामूल्यखड्गम् केतवेछागोमेषःएताःदक्षिणाः १६ अथग्रहाः गंतव्यराशेःप्राक्कियद्भिर्दिनैः फलंदद्युरित्येत
दुपजात्याह सूर्यरिति जिगमिषितराशेः पुरस्तात्पूर्वंतत्तत्संख्यघटीदिवसमासान् शुभाशुभफलदाःस्युः यथासूर्योगंतव्यराशेः प्राक्पंचदि

धेनुःकंब्वरुणोवृषश्चकनकंपीतांबरंघोटकः श्वेतोगौरसितामहासिरजइत्येतारवेर्दक्षिणाः १६ सूर्यारसौम्यास्युजितोक्षनाग
सप्ताद्रिघस्रान्विधुरग्निनाडीः तमोयमेज्यास्त्रिरसाश्विमासान् गंतव्यराशेःफलदाःपुरस्तात् १७ दुष्टेयोगेहेमचंद्रेचशंखंधान्यं-
तिथ्यर्द्धैतिथौतंडुलांश्च वारेरत्नंभेचगांहेमनाड्यांदद्यात्सिंधूत्थंचतारासुराजा १८

नानिफलप्रदः भौमोष्टदिवसान् बुधःसप्तदिव
सान् शुक्रोपिसप्तदिवसान् चंद्रोग्निनाडीत्रयम् राहुःगंतव्यराशेः पूर्वंत्रिमासान् शनिःषण्मासान् गुरुर्मासद्वयम् पूर्वंफलदइत्यर्थः १७ अथा
वश्यकृत्ये तिथ्यादौशालिन्यादानमाह दुष्टेयोगइति राजादुष्टेव्यतीपातादियोगे तथानाड्यांघटिकायांदुर्मुहूर्तादिदुष्टायांसुवर्णंयथाशक्तिद
द्यात् एवंसर्वत्र शेषंस्पष्टम् १८ अथवसंततिलकयान्यदाह राश्यादीति पूर्वार्धंस्पष्टम् अध्वान्नेति यस्मिन्मासेस्वजन्मनक्षत्रप्रवेशेसूर्यादिवा

राश्चेत्स्युस्तस्मिन्मासेअध्वादीनिफलानिवाच्यानि यत्रमासिरविवारेजन्मनक्षत्रेसति अध्वामार्गोभवति एवंचंद्रवारेअन्नंभक्ष्यप्राप्तिरित्यादि १९
इतिश्रीदैवज्ञानंतसुतदैव॰ प्रमिताक्षरायांचतुर्थगोचरप्र॰ समाप्तं ४ अथसंस्कारप्रकरणंव्याख्यायते तत्रसंस्क्रियते अनेनश्रौतस्मार्त्तेनवाकर्म
णापुरुषइतिसंस्कारः स्वीयस्वीयजातौसामान्यविशेषविहितवैदिकस्मार्तकर्मानुष्ठानद्वाराऽदृष्टविशेषाधायकइतियावत् लक्षणयातदर्थोक्तदिन
शुद्ध्यादिःसंस्कारशब्देनोच्यते तस्यप्रकरणमुपक्रमः तेचसंस्कारागर्भाधानादयोऽष्टचत्वारिंशत् तत्रगर्भाधानंप्रथमसंस्कारः सचरजस्वला-

राश्यादिगौरविकुजौफलदौसितेज्यौमध्येसदाशशिसुतश्चरमेऽब्जमंदौ अध्वान्नवह्निभयसन्मतिवस्त्रसौख्यदुःखानिमासिज
निभेरविवासरादौ १९ इतिचतुर्थगोचरप्रकरणंसमाप्तम् ४ अथसंस्कारप्रकरणंप्रारभ्यते आद्यंरजःशुभंमाघमा
र्गराधेषफाल्गुने ज्येष्ठश्रावणयोःशुक्लेसद्वारेसत्तनौदिवा १

स्त्र्यधीनः ततोरजोदर्शनाच्छुभाशुभफलमुक्तंवसिष्ठेन प्रथमरजोद
र्शनतः शुभाशुभंभवतिसर्वलोकानामिति तत्रशुभसूचकरजोदर्शनमनुष्टुभाह आद्यमिति राधोवैशाखः इषआश्विनः अन्येप्रसिद्धाः एषु-
मासेषु आद्यंरजः प्रथमोद्भवंरजोदर्शनंस्त्रीधर्मः शुभंभविष्यच्छुभसूचकं तथाशुक्लेशुक्लपक्षेकृष्णपक्षेतुदशमीपर्यंतंमध्यमंज्ञेयम् कृष्णपक्ष
स्यदशमीमध्यमंफलमादिशेदिति यावदितिशेषः सद्वारेसतांचंद्रबुधगुरुशुक्राणांवारे सत्तनौसमीचीनलग्नेशुभस्वामिकलग्नेदिवादिवसेआद्यंरजोद

शीनंशुभमित्यर्थः अत्राशुभफलापवादमाहवसिष्ठः अशुभमपिसमस्तंचार्तवंसंप्रभूतंसुरगुरुसितयुक्तेवीक्षितेवाथलग्ने तिमिरमिवकठोरज्योतिरुत्प
त्तिकालेक्षयमथसमुपैतिप्राप्नुयादीप्सितानि कठोरज्योतिःसूर्यः १ अथात्रशुभमध्याशुभनक्षत्राण्यनुष्टुभाह श्रुतित्रयेति श्रवणत्रयमृदुक्षिप्रध्रुव-
स्वातीनक्षत्रेषु सितांबरेश्वेतवस्त्रेचाद्यंरजः शुभमितिपूर्वेणसंबंधः मूलेऽदितिभंपुनर्वसुःपितरोमघा मिश्रेकृत्तिकाविशाखेएतेषुनक्षत्रेषुमध्यमम् परे
षुभरणीज्येष्ठार्द्राश्लेषापूर्वात्रयेषु असत् अनिष्टम् अत्रविशाखामूलयोः मध्यमत्वाभिधानंवसिष्ठवाक्येदुष्टफलश्रवणात् द्विदैवभेपुष्पवतीप्रथम

श्रुतित्रयमृदुक्षिप्रध्रुवस्वातौसितांबरे मध्यंचमूलादितिभेपितृमिश्रेपरेष्वसत् २ भद्रानिद्रासंक्रमेदर्शरिक्तासंध्याषष्ठीद्वादशी
वैधृतीषु रोगेष्टम्यांचंद्रसूर्योपरागेपातेचाद्यंनोरजोदर्शनंसत् ३ हस्तानिलाश्विमृगमैत्रवसुध्रुवाख्यैः शक्रान्वितैःशुभतिथौशुभ
वासरेच स्नायादथार्त्तववतीमृगपौष्णवायुहस्ताश्विधातृभिररंलभतेचगर्भम् ४

ताकृत्वैवमोघामयवैरिसंघा मूलेप्रकामाधिकहीन-
सत्वाव्ययसूर्भुभुक्षोऽद्भुतदोषाचित्तेति २ अथानिंद्यरजोदर्शनंशालिन्याह भद्रेति भद्राप्रसिद्धा निद्रानिद्रावस्थायाम् संध्याप्रातर्मध्यान्हसायंसंध्या
उपरागेग्रहणे पातेव्यतीपातेमहापातेच शेषंस्पष्टम् आद्यंरजोदर्शनंनोसत् अनिष्टफलमित्यर्थः ३ अथरजस्वलास्नानमुहूर्तंवसंततिलकयाह ह
स्तानिलेति एषुएकादशनक्षत्रेषुशुभतिथौरिक्तामारहिततिथौ शुभवारे चंद्रबुधगुरुशुक्रवारे आर्तववतीऋतुमतीस्त्रीस्नायात् अथविशेषमाह

मृगेति मृगरेवतीस्वातीहस्ताश्विनीरोहिणीनक्षत्रैः स्नाताऋतुमती अरंशीघ्रंगर्भंलभते लघुक्षिप्रमरंद्रुतमित्यमरोक्तेः दाक्षिणात्यास्तुचतुर्थेदिवसएवंस्नानंकुर्वंति अन्येविहितदिनेकुर्वंति तत्रदेशाचारतोव्यवस्थाइति ४ अथगर्भाधानंशार्दूलविक्रीडितशालिनीभ्यामाह गंडांतमिति अत्रस्वपत्नीगमे गर्भाधानेएतान्दोषांस्त्यजेदितिसंबंधः एतान्कान्कान्त्रिविधंतिथिनक्षत्रलग्नानांगंडांतंश्रीपतिः नक्षत्रतिथिलग्नानांगंडांतंत्रिविधंस्मृतम् नवपंचचतुर्थीनांत्येकार्धघटिकामितमिति निधनजन्मर्क्षेनिधनतारांजन्मतारांच मूलंअंतकं भरणीदास्त्र माश्विनी पौष्णंरेवती मघाम् उपरागंग्रहणम् पातंव्यतीपातं महापातंच वैधृतिम् पित्रोःमातापित्रोःश्राद्धदिनम् दिवादिवसे परिघयोगस्याद्यार्धम् उत्पातहतानिदिव्यभौमांतरिक्षैस्त्रिविधोत्पातैर्हतानिदूषितानिभानि जन्मर्क्षतः जन्मराशेर्जन्मलग्नाद्वामृत्युभवनमष्टमलग्नंपापयुतंभम् ५ भद्राषष्ठीति पर्वाणिविष्णुपुराणे चतुर्दश्यष्टमीचैव अमावास्याचपूर्णिमा पर्वाण्येतानिराजेंद्र रविसंक्रांतिरेवचेति स्कांदेतु कृष्णाष्टमीचतुर्दश्यौपूर्णिमादर्शसंक्रमइति संध्याद्वयम् भौमसूर्यशनिवारान् आद्यरात्रीः रजोदर्शनमारभ्यदिनचतुष्टयंत्यजेत् कालविधाने षष्ठ्यष्टमीपंचदशी चतुर्दशीमप्यु-

गंडांतंत्रिविधंत्यजेन्निधनजन्मर्क्षेचमूलांतकंदास्त्रंपौष्णमघोपरागदिवसान्पातंतथावैधृतिम् पित्रोःश्राद्धदिनंदिवाचपरिघाद्यर्धंस्वपत्नी
गमेभान्युत्पातहतानिमृत्युभवनंजन्मर्क्षतःपापभम् ५ भद्राषष्ठीपर्वरिक्ताश्चसंध्याभौमार्कार्कीनाद्यरात्रीश्चतस्त्रः गर्भाधानंत्र्युत्तरेंद्वर्क
मैत्रब्राह्मस्वातीविष्णुवस्वंबुपेसत् ६

भयत्रहित्वा शेषाः शुभाः स्युस्तिथयो निषेके वाराः शशांकार्यसितेकुजेनामिति गर्भाधानमिति त्र्युत्तराः इंदुर्मृगः अर्कोहस्तः मैत्रमनुराधा रोहिणीस्वातीश्रवणधनिष्ठाशततारकासु गर्भाधानंसत् शुभम् गुरुः हरिहस्तानुराधाश्विस्वातीवरुणवासवम् उत्तरात्रितयंसौम्यंरोहिणीचशुभाः स्मृताः आधानेमूलसार्पंत्यमशुभंसममन्यभमिति ६ अथगर्भाधानेलग्नमिंद्रवज्रयाह केंद्रेति शुभैः केंद्रत्रिकोणेषुसद्भिः पापग्रहैस्त्र्यायारिगैः सद्भिः पुंग्रहैः रविभौमगुरुभिर्दृष्टेलग्नेसति तथाऽब्जेचंद्रेओजांशगेविषमराशीनांनवांशगेसति अपिशब्दाल्लग्नेपिविषमांशगेयुग्मरात्रौसमरात्रौगर्भाधानंकार्यम् मध्य

केंद्रत्रिकाणेषुशुभैश्चपापैस्त्र्यायारिगैः पुंग्रहदृष्टलग्ने ओजांशगेऽब्जेपिचयुग्मरात्रौचित्रादितीज्याश्विषुमध्यमंस्यात् ७ जीवार्कारदिनेमृगेज्यनिर्ऋतिश्रोत्रादितिब्रध्नभेरिक्तामार्करसाष्टवर्ज्यतिथिभिर्मासाधिपेपीवरे

मभान्याह चित्रादितीज्याश्विषुतद्गर्भाधानंमध्यमंस्यात् गुरुः चित्रादित्येतथातिष्येतुरगेचेतिमध्यमा शेषाण्यृक्षाणिदुष्टानिस्युर्निषेकाख्यकर्मणीति एवंगर्भाधानंविधायपुंसांकिंकार्यमित्याह विष्णुः निद्रासमयमासाद्यतांबूलंवदनात्त्यजेत् पर्यंकात्प्रमदांभालात्तुडुंपुष्पाणिमस्तकात् इतिगर्भाधानम् ७ अथसीमंतोन्नयनंशार्दूलविक्रीडितेनाह जीवार्केति गुरुरविभौमवारेनिर्ऋतिर्मूलं ब्रध्नभंहस्तः एतैर्नक्षत्रैः रिक्ता ४ ९ १४ अमा ३० अर्को १२ रसाः ६ अष्ट अष्टमी अभिवर्जिततिथिभिः उपलक्षितेदिने मासाधिपेपीवरे पुष्टेसतीत्यर्थः एतादृशसमये अष्टमषष्ठमासि अष्टममासेषष्ठमासेवासीमंतः सीमंतकर्मा-

ख्योगर्भसंस्कारः कार्यः तत्रशुभग्रहैः केंद्रत्रिकोणेसद्भिः खलैःपापैः लाभारित्रिषुसद्भिः पुंभांशकेलग्नेपुरुषराशौविषमराशौलग्नेनवांशेचविषमराशौसतितदासीमंतः अत्रविशेषमाह कश्यपः चंद्रोपिशुभदोज्ञेयस्त्यक्त्वाषष्ठाष्टमव्ययान् सीमंतलग्नादेःकोपिक्रूरःपंचाष्टारिःफगः हंतिसीमंतिनींसोपितद्गर्भवानसंशयः ननैधनेतयोर्लग्नेनैधनेशुद्धिसंयुते तयोःस्त्रीपुंसयोः अस्यापवादः लग्नादष्टमराशीशःकेंद्रगःशुभवीक्षितः यद्यप्यष्टमभस्योक्तंदोषपापंव्योहति गर्गः सीमंतोन्नयनंकार्यंशुभांगेशुभलग्नगे कुलीरयुगकन्याश्चवर्ज्याःशेषाश्चशोभनाइति अत्रग्रहबलेसतिकुलीरमिथुनकन्याअपिग्राह्याइतिज्ञेयम् अतएवमूलेलग्नविचारोनकृतः कारिकायाम् पुन्नक्षत्राणिचैतानितिष्योहस्तःपुनर्वसुः अभिजित्प्रोष्ठपच्चैव अनुराधा

सीमंतोष्टमषष्ठमासिशुभदैःकेंद्रत्रिकोणेखलैर्लाभारित्रिषुवाध्रुवांत्यसदहेलग्नेचपुंभांशके ८

श्विपुकृतया ऋक्षस्यमध्यमेपादेद्वयेसीमंतइष्यतेइत्युक्तम् अथमतांतरंवा ध्रुवांत्यसदहे ध्रुवाणिरोहिण्युत्तरात्रयम् अंत्यंरेवती एषुतथासतांशुभग्रहाणांचंद्रज्ञगुरुशुक्राणांवारेवाकार्यम् गुरुःरोहिण्यैंदवमादित्यंपुष्यहस्तोत्तरात्रयम् पौष्णंवैष्णवभंचैवसीमंतेसौम्यवासराइति सीमंतादिषुशोभनाइत्यर्थः जन्मभंसीमंतेनिषिद्धमाह वसिष्ठः बालान्नभुक्तौव्रतबंधनेचराजाभिषेकेखलुजन्मधिष्ण्यम् शुभंत्वनिष्टंसततंविवाहसीमंतयात्रादिषुमंगलेषु गुरुः मासप्रयुक्तकार्येषुमूढत्वंगुरुशुक्रयोः नदोषकृन्मलोमासोगुर्वादित्यादिकंतथा यद्यपिपुंसवनस्यप्रथमकर्त्तव्यत्वात्तत्पू-

र्वनिरूपणमावश्यकम् तथापिक्वचित् सीमंतेनसहैवविधानात् बहुषुतथैवाचारदर्शनात् सीमंतमुहूर्तएवप्रथममुक्तः नृसिंहः सीमंतोन्नयनस्योक्ततिथिवारभराशिषु पुंसंचकारयेद्विद्वान्सहवैकदिनेथवाइति ८ अथमासेश्वराःस्त्रीणांचंद्रबलंचवसंततिलकयाह मासेश्वराइति अष्टममासेआधानलग्नाधिपःस्त्रीणामिति विवाहेगर्भसंस्कारेगर्भाधानपुंसवनसीमंतादिरूपेस्त्रीणामधिचंद्रबलंग्राह्यम् इतरकर्मसु वस्त्रालंकारादिधारणादिषुभर्त्तुरेवचंद्रबलंग्राह्यं यदाभर्त्तामृतस्तदापुनःस्त्रीणामेव राजमार्तंडः विवाहकार्येकुसुमप्रतिष्ठागर्भप्रतिष्ठावनिताविशुद्धौ अन्यानिकार्याणिधव-

मासेश्वराःसितकुजेज्यरवींदुसौरचंद्रात्मजास्तनुपचंद्रदिवाकराःस्युः स्त्रीणांविधोर्बलमुशंतिविवाहगर्भसंस्कारयोरितरकर्म
सुभर्त्तुरेव ९ पूर्वोदितैःपुंसवनंविधेयंमासेतृतीयेत्वथविष्णुपूजा मासेऽष्टमेविष्णुविधातृजीवैर्लग्नेशुभेमृत्युगृहेचशुद्धे १०

स्यशुद्धौपत्योर्विहीनेप्रमदात्मशुद्ध्या ९ अथयेषांपृथगेवपुंसवनमित्याचारः तदर्थंपुंसवनमुहूर्त्तंविष्णुपूजामुहूर्त्तंचेंद्रवज्रयाह पूर्वोदितैरिति पूर्वोदितैःसीमंतकर्मण्युदितैस्तिथ्यादिभिरुपलक्षिततृतीयेमासिपुंसवनाख्यंकर्मविधेयम् पुमान्सूयतेऽनेनेतिपुंसवनं कर्मणःपुंस्त्वहेतुना अथेति सीमंतानंतरमष्टमेमासिविष्णुविधातृजीवैः श्रवणरोहिणीपुष्ये उपलक्षितेदिवेतथालग्नेशुभेशुभस्वामिकेशुभयुते दृष्टेवा मृत्युग्रहे अष्टमस्थानेशुद्धेसर्वग्रहरहितेचसतिविष्णुपूजाकार्या १० अथजातकर्मनामकरणयोर्मुहूर्त्तमुपजात्याह तज्जातकर्मादीति जातक

र्मयद्यपिजन्मनोनंतरमेवविहितंतथापिसंक्रांतिव्यतीपातादिदुष्टदिवसतयापित्राद्यसन्निधानेच तन्नकृतंतदामुहूर्त्तविचारेणकार्यम् गर्गः व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि श्राद्धंविनाशुभंकर्मप्राप्तेकालेपिनाचरेदिति अतएवकालविकल्पोक्तोनारदेन तस्मिन्जन्ममुहूर्त्तेतुसूतकांतेसदाशिशोः जातकर्मचकर्तव्यंपितृपूजनपूर्वकमिति अतएवजातकर्मादीनि जातकर्मादीनितस्यजातस्यशिशोर्जातकर्म आदिशब्दान्नामकर्मोच्यते पर्वाणिचतुर्दश्यष्टमीकृष्णोत्यादिपूर्वोक्तानि रिक्ताभिश्चऊनतिथौवर्जिततिथौ शुभेऽन्हि शुभवारे तथाएकादशेद्वादशेवापिघस्रेदि

तज्जातकर्मादिशिशोर्विधेयंपर्वाख्यरिक्तोनतिथौशुभेन्हि एकादशेद्वादशकेपिघस्रेमृदुध्रुवक्षिप्रचरोडुषुस्यात् ११

वसे तथामृदुध्रुवक्षिप्रचरनक्षत्रेषुशस्तंस्यादितिक्रांतंजातकर्मादिविधेयंकर्त्तव्यम् तच्चश्रवणानंतरंसचैलंस्नानंकृत्वाकार्यम् वसिष्ठः श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेत् उत्तराभिमुखोभूत्वानद्यांवादेवखातके तच्चशीतोदकेन कुर्यान्निमित्तिकंस्नानंशीताभिःकाम्यमेवचेति रात्रावपिकार्यम् वसिष्ठः पुत्रजन्मनियज्ञेचतथासंक्रमणेरवेः राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशीति सूतकेतुसमुत्पन्नेपुत्रजन्मयदाभवेत् कर्त्तुस्तात्कालिकीसुद्धिः पूर्वाशौचेनसिद्ध्यति रात्रौजलाशयेगमनाशक्तौसांख्यायनः दिवायदाहृतंतोयंकृत्वास्वर्णयुतंतुतत् रात्रिस्नानेतुसंप्राप्तेस्नायादनलसन्निधाविति जातकर्मप्रयोजनमाहगुरुः जातकर्मक्रियांकुर्यात्पुत्रायुःश्रीविवृद्धये ग्रहदोषविनाशायसूतकाशुभविच्छिदे कुमारग्रहनाशायपुंसांसत्त्ववि-

द्ध्यइति वसिष्ठः एकादशोन्हिविप्राणांक्षत्रियाणांत्रयोदशे वैश्यानांषोडशेनाममासांतेशूद्रजन्मनइति वसिष्ठेनमासनामान्युक्तानि चैत्रादिमासनामानिवैकुंठोथजनार्दनः उपेंद्रोयज्ञपुरुषोवासुदेवस्त्रिविक्रमः योगीशःपुंडरीकाक्षःकृष्णोनंतोऽच्युतस्तथा चक्रधारीतिचैतानिक्रमादाहुर्मनीषिणइति ११ अथसूतिकास्नानमुहूर्त्तंवसंततिलकयाह पौष्णेति हयोअश्विनी एषुरेवत्यादिनक्षत्रेषु समित्रभरवीज्यकुजेषु अनुराधानक्षत्रसूर्यगुरुभौमवारसहितेषुसूत्याः प्रसूतायाःस्त्रियाःस्नानंशस्तम् आर्द्रात्रयेश्रवणमघाभरणीमिश्रेकृत्तिकाविशाखेमूलाचित्रासुनशस्तम् बुधवारेशनिवारे वसुरष्टमीषट्षष्ठीरविर्द्वादशीरिक्तातिथिषुचन शस्तं स्तन्यपानमुहूर्त्तंदैवज्ञवल्लभे रिक्तांभौमंपरित्यज्यविष्टिंपातंसवैधृतिम् मृदुध्रुवक्षिप्रभेषुस्तनपानंहितंशिशोरिति १२ अथप्रसंगात्प्रथमादिमासोत्पन्नदंतफलंशार्दूलविक्रीडितेनाह मासेचेदिति बालश्चेज्जन्मानंतरंप्रथमेमासेचेत्सदशनोदंतयुक्तोभवेत् तदास्वयंबालोनश्येत् ततोद्व्यादिकेद्वितीयादिमासेअनुजातभगिनीमात्रग्रजान् क्रमाद्धंति द्वितीयेमासियदिदंतोत्पत्तिस्तदाऽनुजातंकनिष्ठभ्रातरंहंति एवंतृतीयेभगिनीम् चतुर्थेमातरं पंचमेज्येष्ठभ्रातरं षष्ठादिमासेषु अतुलंभोगं

पौष्णध्रुवेंदुकरवातहयेषुसूतीस्नानंसमित्रभरवीज्यकुजेषुशस्तम् नार्द्रात्रयश्रुतिमघांतकमिश्रमूलत्वाष्ट्रेज्ञसौरिवसुषड्वि
रिक्ततिथ्यां १२ मासेचेत्प्रथमेभवेत्सदशनोबालोविनश्येत्स्वयंहन्यात्सक्रमतोऽनुजातभगिनीमात्रग्रजान्द्व्यादिके

लभते सप्तमेतातात्पितुःसुखम् अष्टमेपुष्टताम् नवमेलक्ष्मीम् दशमेसौख्यम् अग्रेपिसुखाधिक्यमेव अथोइति अथोजनौजन्मकालएवसदशनः
दंतयुक्तः स्वपित्रादिहास्वमात्मानंपितरंच आदिशब्दान्मातरमपिनाशयतीतिस्वपित्रादिहा वोर्ध्वमितिवा अथवाऊर्ध्वेऊर्ध्वपंक्तौजन्मानंतरंविहि
तेनिषिद्धेपिकालेसदशनश्चेत्स्यात् तदापिस्वपित्रादिहा आत्मपितृनाशकइति उक्तंचविष्णुधर्मोत्तरे उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः तैर्वा
सहचघस्यस्याज्जन्मभार्गवसत्तम मातरंपितरंचाथस्वदेहात्मानमेवचेति तत्रैवशांतिरपि गजपृष्ठगतंबालंनौस्थंवास्नापयेद्द्विजः तदभावेतुधर्मज्ञ-

षष्ठादौलभतेहिभोगमतुलंतातात्सुखंपुष्टतांलक्ष्मींसौख्यमथोजनौसदशनोवोर्ध्वेस्वपित्रादिहा १३ दोलारोहेऽर्कभात्पंचशरपंचेषुसप्तभैः
नैरुज्यंमरणंकार्श्यंव्याधिःसौख्यंक्रमाच्छुशोः १४

कांचनेतुवरासने सर्वौषधैः सर्वगंधैर्बीजैः पुष्पैःफलैस्तथा पंचगव्येनरत्नैश्चमृत्तिका
मिश्रभार्गव स्थालीपाकेनधातारंपूजयेत्तदनंतरम् सप्ताहंचात्रकर्तव्यंतथाब्राह्मणभोजनम् अष्टमेऽह्निविप्राणांतथादेयाचदक्षिणा कांच
नंरजभागाश्चभुवंवासनमेवचेति १३ अथदोलाचक्रमनुष्टुभाह दोलेति तत्रबालस्यदोलायांरोहेस्थापयेअर्कभात् सूर्याक्रांतनक्षत्रात् पंचनक्षत्रैर्नैरुज्यम्
तदग्रिमपंचनक्षत्रैर्मरणम् तदग्रिमपंचनक्षत्रैर्देहकार्श्यम् कृशत्वंस्यात् तदग्रिमैरिषुभिः पंचनक्षत्रैर्व्याधिः रोगःततःसप्तन
क्षत्रैःसौख्यम् शिशोरेवंफलंसंस्कार्यत्वात् उक्तंच सूर्यभाच्चंद्रभंयावत्पंचपंचचतुर्दिशाम् मध्येतुसप्तमेयानिदोलिकाचक्रमुत्तमम् पूर्वभा

गेनिरोगित्वंदक्षिणेमरणंध्रुवम् पश्चिमेतुकृशोबालउत्तरेव्याधिसंभवः शेषेषुसप्तधिष्ण्येषुबालकःशयनेसुखी १४ अथदोलारोहणमुहूर्त्तंव
संततिलकापूर्वार्द्धेनोत्तरार्द्धेननिष्क्रमणमुहूर्त्तंचाह दंतार्केति दंताद्वात्रिंशत् अर्काद्वादश भूपाःषोडश धृतयोऽष्टादश दिशोदश एतस्मिन्दि
वसेतथाशुभवारेमृदुलघुध्रुवनक्षत्रैरुपलक्षितेबालानांदोलाधिरूढिः दोलायामधिरूढिरारोहःस्यात् अथचतुर्थमासेगमोक्तसमयेयात्राप्रक
रणोक्तसमीचीनकालेशिशूनांनिष्क्रमणाख्यंसंस्कारपूर्वकंगृहाद्बहिर्गमनंस्यात् वा अथवा अर्कमितेऽन्हिद्वादशदिवसेकुर्यात् गृहान्निष्क्रम-

दंतार्कभूपधृतिदिङ्मितवासरेस्याद्वारेशुभेमृदुलघुध्रुवभैःशिशूनाम् दोलाधिरूढिरथनिष्क्रमणंचतुर्थमासेगमोक्तसमयेऽर्क
मितेऽन्हिवास्यात् १५ कवीज्यास्तचैत्राधिमासेनपौषे जलंपूजयेत्सूतिकामासपूर्तौ बुधेंद्वीज्यवारेविरिक्तेतिथौहिश्रुतीज्या
दितींदर्कनैर्ऋत्यमैत्रे १६

णंसूनोश्चतुर्थेमासिकारयेत् यत्रोक्तेसमयेमासितृतीयेद्वादशेऽन्हिवेतिगुरुवचनात् १५ अथजलपूजामु
हूर्त्तंभुजंगप्रयातेनाह कवीज्यास्तेति शुक्रगुर्वोरस्तेचैत्रे अधिमासेपौषेमाससमाप्तौसूतिकाप्रसूतास्त्रीजलंनपूजयेत् एतद्व्यतिरिक्तकालेतथा
बुधचंद्रगुरुवारेरिक्तावर्जिततिथौहिनिश्चितंश्रवणपुष्यपुनर्वसुमृगहस्तमूलानुराधा एभिर्नक्षत्रैःसहितेदिनेजलंपूजयेत् अथकश्चिद्दुग्धपान
मुहूर्तः एकत्रिंशेवासरेवाद्वितीयेजन्मर्क्षेवाशुद्धलग्नेऽनुकूले शंखेक्षीरंसन्निदध्याच्छिशूनांचक्रेधात्रीपूज्यपूजांविधाय १६ ७ ७

अथान्नप्राशनंस्रग्धरयाह रिक्तानंदेति अथोनिष्क्रमणानंतरमेवंविधेकालेबालकानामन्नप्राशनंसत् शुभंस्यात् तत्रैतान्हित्वा एतेवर्ज्याः रिक्तानंदाष्टदर्शाः ४ ९ १४ १ ६ ११ ८ ३० हरिदिवसंद्वादशी उपलक्षणत्वात्तिथिक्षयंहित्वा शनिभौमरविवारांश्चहित्वा जन्मर्क्षलग्नाष्टमगृहलवगंलग्नंच हित्वाजन्मर्क्षेजन्मलग्नेताभ्यामष्टमलवोऽष्टमगृहं अष्टमलवोष्टमनवांशस्तौगच्छति प्राप्नोति एवंविधंलग्नंत्यजेदित्यर्थः जन्मराशिविलग्नाभ्यांनैधनेंऽशेचवर्जयेदितिकश्यपोक्तेः तथामीनमेषालिकंच अलिर्वृश्चिकः एतानिलग्नानिहित्वा गोश्वकुंभतुलाकन्यासिंहकर्कनृयुग्मकाः शुभदाराशयश्चैतेनमीनमेषवृश्चिकाइतिकश्यपोक्तेः

रिक्तानंदाष्टदर्शंहरिदिवसमथोसौरिभौमार्कवारान्लग्नंजन्मर्क्षलग्नाष्टमगृहलवगंमीनमेषालिकंच हित्वाषष्ठात्समेमास्यथहि
मृगदृशांपंचमादोजमासेनक्षत्रैःस्यात्स्थिराख्यैःसमृदुलघुचरैर्बालकान्नाशनंसत् १७

षष्ठादिति षष्ठमासमारभ्यसममासेषष्ठाष्टमदशमद्वादशमासेषुबालानामन्नप्राशनंकार्यम् पुंबालविषयमेतत् अथानंतरंहिनिश्चयेनमृगदृशांकन्यानां पंचमादोजमासे पंचमसप्तमनवमैकादशेषु अन्नप्राशनं तथाचवसिष्ठः युग्मेषुमासेषुच षष्ठमासात्सांवत्सरे वानियतंशिशूनाम् अयुग्ममासेषुचकन्यकानांनवान्नसंप्राशनमिष्टमेतदिति अत्रानेककालाभिधानेपिस्वगृह्योक्तकालोमुख्यस्तत्र शुक्रास्तादिविचारोनास्ति इतरेषुगौणकालेषुशुक्रास्तविचार आवश्यकएवेति नक्षत्रैरिति मृदुलघुचरसहितैः स्थिरनक्षत्रैःकुर्यात् १७ ५ ५ ५ ५

लग्नबलंवसंततिलकयाह केंद्रत्रिकोणइति लग्नेखदशमशुद्धसहितेसर्वग्रहरहितेदशमेइत्यर्थः केंद्रत्रिकोणसहजेषु शुभैः सद्भिः त्रिलाभरिपुगैः पापैः
सद्भिः लग्नाष्टषष्ठस्थानसहितंचंद्रंच अन्नप्राशनेप्रशस्तंवदंति नारदः दशमशुद्धिसंयुक्तेशुभलग्नेशुभांशके शुक्लपक्षेचपूर्वाण्हेसौम्ययुक्तनिरीक्षि
ते त्रिषष्ठलाभगैः पापैः केंद्रधीधर्मगैः शुभैः व्ययंत्यारिनिधनस्थेनचंद्रेण प्राशनंशुभम् विशेषमाहगुरुः शुक्रारज्ञाः क्रमाद्याताः सप्तमाष्टमधर्मगाः
भोज्यंभोक्तुर्नवत्वेतु सर्वदामरणप्रदाइति भोज्यमन्नंगोधूमादितस्यनवत्वेन भक्षणीयत्वेसति भोक्तुरन्नप्राशनकर्तुर्बालस्यनबलेसति वाशुक्रः

केंद्रत्रिकोणसहजेषु शुभैः खशुद्धेलग्नेत्रिलाभरिपुगैश्चवदंतिपापैः लग्नाष्टषष्ठरहितंशशिनंप्रशस्तंमैत्रांबुपानिलजनुर्भमसच्च
केचित् १८

सप्तमः भौमोऽष्टमः बुधोनवमः एतेग्रहाः मरणप्रदाइत्यर्थः मैत्रेति अनुराधाशततारकास्वातीजन्मनक्षत्राणिकेचित् असद्वदंति
श्रीपतिना अनुक्तत्वादितिभावः जन्मनक्षत्रनिषेधोगुरुणोक्तः जन्मर्क्षेकर्मनक्षत्रे आधानर्क्षेचवर्जयेत् कर्णवेधंतथापानक्षुरकर्मान्नभोजनमिति ज
न्मनक्षत्रान्नस्यभोजनमिति तत्रान्नस्यभोजनमितिव्युत्पत्त्यावार्षिकनवान्नभोजनविषयमेतत् नपुनर्बालान्नप्राशनपरम् तत्रनारदेनातिप्राश
स्त्याभिधानात् तथाचनारदः पट्टबंधनचौलान्नप्राशनेचोपनायके शुभदंजन्मनक्षत्रमशुभंत्वन्यकर्मणीति १८ अथग्रहाणांस्थानवशा
त्फलान्यनुष्टुब्द्वयेनाह क्षीणेंद्विति त्रिकोणव्ययकेंद्राणिदशमरहितानि ९ ५ १२ १ ४ ७ अष्टौ ८ एषुस्थितैः क्षीणेंद्वादिभिः अष्ट

भिर्भिक्षाशीत्यादिफलंभवति यथा एषुस्थानेषुस्थितः क्षीणचंद्रश्चेत्तदान्नप्राशनकृत्बालोभिक्षाशीदरिद्रःस्यात् पूर्णचंद्रश्चेत्तदाज्योतिष्टोमादिय-
ज्ञकृत् गुरुश्चेद्दीर्घजीवी बुधश्चेत्ज्ञानीभौमश्चेत्पित्तरुक् पित्तकृतारुगस्यासौपित्तरुक् अर्कश्चेत्कुष्ठी आर्किः शनिश्चेदन्नाभावसंबंधीक्लेशोऽन्नक्लेशः
वातप्रधानोव्याधिर्वातव्याधिः एतौविद्येतेयस्यसोऽन्नक्लेशवातव्याधिमान्स्यात् राहुकेत्वोरप्येतदेवफलम् शुक्रश्चेद्भागभाक्स्यात् क्षीणचंद्र-
पूर्णचंद्रयोर्लक्षणमाह वसिष्ठः संपूर्णेंदूभयाष्टम्योर्मध्येंदुःपूर्णसंज्ञकः विनष्टेंदूभयाष्टम्योर्मध्येऽसौक्षीणसंज्ञकइति १९ २० अथभूम्यु

क्षीणेंदुपूर्णचंद्रेज्यज्ञभौमार्कार्किभार्गवैः त्रिकोणव्ययकेंद्राष्टस्थितैरुक्तंफलंग्रहैः १९ भिक्षाशीयज्ञकृद्दीर्घजीवीज्ञानीचपित्तरु
क् कुष्ठीचान्नक्लेशवातव्याधिमान्भोगभागिति २० पृथ्वींवराहमभिपूज्यकुजेविशुद्धेरिक्तेतिथौव्रजतिपंचममासिबालम् ब
ध्वाशुभेऽन्हिकटिसूत्रमथध्रुवेंदुज्येष्ठर्क्षमैत्रलघुभैरुपवेशयेत्कौ २१

पवेशनंवसंततिलकयाह पृथ्वीमिति कुजेविशुद्धेभौमबले
सति रिक्तावर्जितेतिथौ पंचममासिव्रजतिलग्नेसतिशुभेऽन्हि शुभग्रहवारे तथाध्रुवमृगेज्यानुराधालघुनक्षत्रैरुपलक्षितेकालेकटिसूत्रंपट्टसूत्रा
दिनिर्मितंकटिस्थलेबध्वाकौपृथिव्यांबालमुपवेशयेत् मंत्रपाठपुरःसरंउपवेशनाख्यंसंस्कारंकुर्यात् मंत्राश्चपद्मपुराणे रक्षैनंवसुधेदेविसदास-
र्वगतंशुभे आयुःप्रमाणंसकलंनिक्षिपस्वहरिप्रिये अचिरादायुषस्तस्य येकेचित्परिपंथिनः जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान् धारि

ण्यशेषभूतानांमातस्त्वमधिकाद्यसि कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यताम् तस्योपवेशनंकृत्वाभूमौब्राह्मणभोजनं ततःकृत्वाततःकुर्यादुत्सवंपूर्व
वह्निजइति उत्सवोनीराजनादिः इदंकन्यापुत्रयोः साधारणम् विशेषाभावात् इतिभूम्युपवेशनम् २१ अथजीविकापरीक्षांभूम्युपवेशनकालएवशा
लिन्याह तस्मिन्कालइतिस्पष्टार्थम् आजीवैर्जीविकाभिः आजीवोजीविकावार्ताइत्यभिधानात् २२ अथशिशोस्तांबूलमुहूर्तंस्रग्धरयाह वारेभौ
मार्कहीनेइति भौमशनिवर्जितेवारेश्रवणमूलपुनर्वसुज्येष्ठास्वातीधनिष्ठासहितैः ध्रुवमृदुलघुनक्षत्रैरुपलक्षितेकालेमिथुनमकरकन्याकुंभवृषमीना

तस्मिन्कालेस्थापयेत्तत्पुरस्ताद्वस्त्रंशस्त्रंपुस्तकंलेखनींच स्वर्णंरौप्यंयच्चगृण्हातिबालस्तैराजीवैस्तस्यवृत्तिःप्रदिष्टा २२ वारेभौमार्कि
हीनेध्रुवमृदुलघुभैर्विष्णुमूलादितींद्रस्वातीवस्वभ्युपेतैर्मिथुनमृगसुताकुंभगोमीनलग्ने सौम्येकेंद्रत्रिकोणैरशुभगगनगैःशत्रुला
भत्रिसंस्थैस्तांबूलंसार्द्धमासद्वयमितसमयेप्रोक्तमन्नाशनेवा २३

नां अन्यतमेलग्नेसौम्यग्रहैः केंद्रत्रिकोणगतैः अशुभगगनगैःपापग्रहैः
षष्ठैकादशतृतीयगैः सार्द्धमासद्वयेसमयेबालकस्य तांबूलदानंप्रोक्तम् वा अथवाअन्नाशनेअन्नप्राशनसमयेप्रोक्तम् २३ अथकर्णवेधमुहूर्तंस्रग्ध
रयाह हित्वैतानिति एतान्पदार्थान्हित्वाकर्णवेधःप्रशस्तइत्यन्वयः हरिशयनं आषाढशुक्लैकादशीमारभ्यकार्तिकशुक्लैकादशीपर्यंतम् जन्ममा
संयस्मिन्चांद्रमासेचैत्रादौजन्मसजन्ममासः केचित् आरभ्यजन्मदिवसंयावत्त्रिंशद्दिनंभवेत् जन्ममासःसविज्ञेयोवर्जितःसर्वकर्मसुइति ल-

क्षणलक्षितंवर्जयंतिरिक्ताम् ४ ९ १४ युग्माब्दंसमवर्षंद्वितीयचतुर्थादिकम् जन्मतारांप्रथमदशमैकोनविंशात्मिकांचहित्वा ऋत्विति ऋतुमुनिवसुभिः संमितेमासि षष्ठसप्तमाष्टममासेषु अथोवाजन्माह्नात्सूर्यैः द्वादशभिः भूपैः षोडशभिः परिगणितेदिवसेसौरसावनेबुधगुरुशुक्रचंद्रवारे ओजाब्देविषमवर्षे विष्णुयुग्मंश्रवणाधनिष्ठे पुनर्वसुमृदूनिमृगरेवतीचित्रानुराधाः लघूनिहस्ताश्विपुष्याभिजित एतैर्नक्षत्रैः कर्णवेधः प्रशस्तः २४ अथकर्णवेधेलग्नशुद्धिंप्रहर्षिण्याह संशुद्धइति मृतिभवनेऽष्टमस्थाने संशुद्धेग्रहरहितेसति शुभग्रहैः त्रिकोणकेंद्रत्र्याय-

हित्वैतांश्चैत्रपौषावमहरिशयनंजन्ममासंचरिक्तां युग्माब्दंजन्मतारामृतुमुनिवसुभिःसंमितेमास्यथोवा जन्माह्नात्सूर्यभूपैःपरि
मितदिवसेज्ञेज्यशुक्रेंदुवारेथोजाब्देविष्णुयुग्मादितिमृदुलघुभैःकर्णवेधःप्रशस्तः २४ संशुद्धेमृतिभवनेत्रिकोणकेंद्रत्र्यायस्थैः
शुभखचरैःकवीज्यलग्ने पापाख्यैररिसहजायगेहसंस्थैर्लग्नस्थेत्रिदशगुरौशुभावहःस्यात् २५

९ ५ १ ४ ७ १० ३ ११ स्थैः सद्भिः कवीज्यलग्ने शुक्रगुर्वोर्लग्ने वृषतुलाधनुर्मीनाख्ये पापाख्यैः ग्रहैः तृतीयषष्ठैकादशस्थानस्थैः गुरौलग्नस्थेसति कर्णवेधः शुभावहः शुभजनकःस्यात् अथाब्दपूर्तिमुहूर्त्तः प्रसंगात् विधिरत्ने अब्देनसौरेणशिशोःसमांतेबालंसुसंस्नाप्यच जन्मधिष्णये कृत्वायुषोवृद्धिकरंचकर्मतद्धारयेद्वस्त्रसुवर्णसूत्रम् तत्रखंडनक्षत्रे गर्गः उदयव्यापिजन्मर्क्षेतस्माद्ग्राह्यंतुजन्मतः संगवव्यापिखंड

क्षेतन्नजन्मकरंशुभम् दाक्षिणात्यास्तुजन्ममासीयजन्मतिथावब्दपूर्तिंकुर्वंतीति २५ अथचूडाकर्ममुहूर्त्तंविवक्षुस्तन्निषेधकंप्रसंगतोऽन्यकर्मनिषेधकं
चकालंस्रग्धरयाह गीर्वाणेति गीर्वाणाःदेवाः अंबुजलंजलाशयः तयोःप्रतिष्ठाउत्सर्गःपरिणयोविवाहः दहनाधानमग्न्याधानम् गेहप्रवेशोगृहप्र-
वेशः चौलराजाभिषेकौप्रसिद्धौ व्रतमुपनयनं इदंसर्वंयाम्यायनेदक्षिणायनेशुभदंनस्यात् तथा गुरुशुक्रयोर्बाल्ये अस्ते वार्द्धक्येच पूर्वोक्तंन-
शुभदंस्यात् अथकेतूदयेधूमकेतोरुदयेपिपूर्वोक्तंनशुभंस्यात् चंडेश्वरः केतोरस्तदिनादूर्ध्वंसप्ताहंमंगलंत्यजेत् यावत्केतूदयस्तावद-

गीर्वाणांबुप्रतिष्ठापरिणयदहनाधानगेहप्रवेशाश्चौलंराजाभिषेकोव्रतमपिशुभदंनैवयाम्यायनेस्यात् नोवाबाल्यास्तवा
र्द्धेसुरगुरुसितयोर्नैवकेतूदयेस्यात्पक्षंवार्द्धंचकेचिज्जहतितमपरेयावदीक्षांतदुग्रे २६

शुभ्रः समयोहिसः अत्रकेचित्केतूदयेजातेसतिपक्षंपंचदशदिनानिजहतिवर्जयंति वराहः दृष्टः षोडशवासरान्नशुभदः कैश्चित्प्रादिष्टः शिखीति के
चित्तुपक्षांतरे अर्द्धपक्षार्द्धसप्तदिनानिकेतूदयानंतरंजहति इदमपितत्रैव केतूदयेसप्तदिनानिचोर्ध्वंविहाययात्रादिषुगर्हितानि दिनानिशेषाणिशुभा
निनूनंवदंतिरैभ्यप्रमुखामुनींद्राः तमिति अपरेआचार्याःतंकेतुंयावदीक्षांयावद्दर्शनंयज्जहतितदुग्रे केतौद्वित्रिचूडोजामसकीलकादावतिदुष्ट
फलंद्रष्टव्यम् तेषांलक्षणमाहगर्गः त्रिशिखाश्चत्रिताराश्चरक्तलोहितरश्मयः प्रायशस्तूत्तरामाशांसचंतेनित्यमेवहीति वयंतु यावद्दर्शनंके-

तूदयेनिषिद्धमित्युक्तंतदुग्रेब्रह्मपुत्राख्येकेतौज्ञेयम् ज्योतिर्निबंधे केतोरस्तादिनादूर्ध्वंसप्तरात्राणिवर्जयेत् ब्रह्मपुत्रोद्गमेवर्ज्यंव्रतयात्राचमंगलम् तल्ल
क्षणमाह वराहः ब्रह्मसुतएवत्रिशिखोवर्णै स्त्रिभिर्युगांतकरः अनियतदिवसंप्रभवोविज्ञेयोब्रह्मदंडाख्यइति २६ अथशुक्रगुर्वोर्बाल्यवार्ध
क्ययोर्दिनसंख्यामनुष्टुभाह पुरःपश्चादिति भृगोःशुक्रस्यपुरः पूर्वस्यांदिश्युदितस्यपाश्चिमदिश्युदितस्यचयथासंख्यंत्रिदशाहंबालत्वंस्यात्
पूर्वस्यांत्रिदिनंपश्चाद्दशदिनमित्यर्थः चपुनः भृगोर्वार्धकंपूर्वस्यामस्तेपक्षंपंचदशदिनानि पश्चादस्तेपंचदिनानिगुरोस्तेबाल्यवार्द्धकेपक्षंपंचद

पुरःपश्चाद्भृगोर्बाल्यंत्रिदशाहंचवार्द्धकम् पक्षंपंचदिनंतेद्वेगुरोःपक्षमुदाहृते २७ तेदशाहंद्वयोःप्रोक्तेकैश्चित्सप्तदिनंपरैः
त्र्यहंत्वात्ययिकेप्यन्यैरर्द्धाहंचत्र्यहंविधोः २८

शदिनानिउदाहृतेकथिते २७ अथापरमतेनबाल्यवार्द्धकंचानुष्टुभाह तेदशाहमिति दि
ङ्नियमंत्यक्त्वाद्वयोर्गुरुशुक्रयोः तेबाल्यवार्द्धकेदशाहंदशदिनंप्रोक्तेकैश्चित् अपरैस्तुसप्तदिनंबाल्यवार्द्धकेप्रोक्ते अन्यैस्त्र्यहंत्रिदिवसंतेबाल्यवार्द्धकेप्रोक्तेपरंतु आत्ययिकेकार्यस्यावश्यंभावः अत्ययःसप्रयोजनमस्येति आत्ययिकंतस्मिन् लग्नांतराभावेसति अतिकालस्यबटोः
अवश्यदेयायाः कन्यायावायथासंभवंदशसप्तत्रिदिनानिवर्ज्यानि नान्यथेत्यर्थः अथदेशभेदेनवाव्यवस्था गर्गः शुक्रोगुरुःप्राक्परतश्चबालो
विंध्येदशावंतिषुसप्तरात्रम् वंगेषुहूणेषुचषट्चपंचशेषेतुदेशेत्रिदिनंनिषिद्धम् चंद्रस्यविशेषमाह अर्धाहमितिविधोस्तेबाल्यवार्द्धकेक्रमेणार्द्धाहं-

ऱ्यहंच भवतः बाल्यमर्द्धदिनं वार्द्धकंत्रिदिनंचंद्रस्येत्यर्थः उक्तंचवसिष्ठेन वृद्धत्वमिंदोस्त्रिदिनंदिनार्द्धं बालत्वमस्तत्वमहर्द्वयंचापिनोक्तमेकदिवसं शिशुत्वमित्येतदिंदोस्तदयुक्तमेवेति कश्यपेनबालोपींदुः शुभएवोक्तः वृद्धचंद्रः स्त्रियंहंति पतिंहंत्यस्तमागतः यतस्त्वमृतरश्मित्वाद्बालोपिशुभदः शशीति अतएवसंपूर्णायामपिप्रतिपदिद्वितीयादिनेद्वितीयायांप्राप्तिर्यज्ञोपवीतादिकंशिष्टाः कुर्वंति २८ अथचौलमुहूर्त्तं स्रग्धरारथोद्धताभ्यामाह चूडावर्षादिति क्षीणचंद्रेति तृतीयाद्वर्षादितिल्यब्लोपेपंचमी तेनगर्भाधानकालाज्जन्मकालाद्वातृतीयेवर्षेपंचमेवाचूडाकरणंप्रभवतिकृतंशुभोदर्कं भवतीत्यर्थः तृतीयेब्देशिशोर्गर्भाज्जन्मतोवाविशेषतः पंचमेसप्तमेवापिस्त्रियाःपुंसोपिवासममिति मनुनाप्रथमेवर्षेअप्युक्तम् चूडाकर्मद्विजातीनांसर्वे

चूडावर्षात्तृतीयात्प्रभवतिविषमेऽष्टर्करिक्ताद्यषष्ठीपर्वोनाहेविचैत्रोदगयनसमयेज्ञेंदुशुक्रेज्यकानाम्

षामेवधर्मतः प्रथमेब्देतृतीयेवाकर्तव्यंश्रुतिनोदनादिति अत्रबहुकालोक्तौयथागृह्यंव्यवस्था स्वगृह्येविशेषकालानुक्तौतु समबलत्वात्सर्वेषांविकल्पः अष्टमीअर्कोद्वादशीरिक्ता आद्याप्रतिपत् षष्ठीपर्वाणि पूर्वोक्तानिचतुर्दश्यष्टमीत्यादीनि एतैरूनेरहितेऽन्हि गुरुणालग्नग्रहोपिनिषिद्धः विद्यारंभं व्रतोद्देशंक्षौरंचैवविशेषतः गलग्रहेनकर्त्तव्यंयदीच्छेत्सुतजीवितमिति विचैत्रइति चैत्ररहितेउत्तरायणेचूडास्यात् शुभाशुभप्रकरणोक्तोजन्ममास निषेधोत्रापिज्ञेयः तथाज्ञेंदुशुक्रेज्यकानांवारे लग्नांशयोश्चेति सौम्यग्रहाणांवारे सौम्यग्रहाणांलग्नेतेषामेवनवांशेच चूडास्यात् पापग्रहाणांवा

रेपिविप्राणांतुशुभोरविः क्षत्रियाणांतु भूसुनुर्विट्स्शूद्राणांशनिः शुभइतिप्रयोगपारिजातोक्तेः तथास्वभनिधनतनौभंलग्नंराशिश्चस्वस्यभेस्वस्व
भाभ्यांनिधनंअष्टमंलग्नंतन्नविद्यतेयस्मिंस्तनौस्वजन्मलग्नजन्मराशिभ्यामष्टमलग्नरहितेलग्नेचूडास्यात् तथानैधनेअष्टमस्थानेशुद्धियुक्तेशु
क्रव्यतिरिक्तसर्वग्रहरहितेलग्नेचूडास्यात् अष्टमस्थाग्रहाः सर्वेनेष्टाः शुक्रविवर्जिताः शुक्रस्तुनिधनेचौलेसर्वसंपत्करःशिशोरिति पराशरोक्तेः
ज्येष्ठायुक्तैरनुराधारहितैर्मृदुचरलघुभैर्द्वादशनक्षत्रैः अथलग्नबलम् एकादशषष्ठतृतीयस्थानस्थैः पापग्रहैः सद्भिः तथाक्षीणचंद्रोभौमशनि
सूर्यैः केंद्रगतैः क्रमेणयथासंख्यंमृदुः शस्त्रान्मृतिः पंगुताखंजत्वम् ज्वरःएतानिफलानिस्युः बुधजीवभार्गवैस्तुकेंद्रस्थैः शुभंकल्याणंस्या-

वारेलग्नांशयोश्चास्वभनिधनतनौनैधनेशुद्धियुक्तेशाक्रोपेतैर्विमैत्रैर्मृदुचरलघुभैरायषड्त्रिस्थपापैः २९

त् वसिष्ठेनलग्नादिविषयेविशेषउक्तः मेषेदुःखीमृगेंद्रेचवृश्चिकेव्यसनंभवेत् राजाबौधेचधनुषिशुभयुक्तेनदुष्यति विषशस्त्रजलैर्घोरैः पी-
ड्यतेमरणान्वितः क्षौरेमृत्युर्घटेलग्नेशुभयुक्तेपिसक्षतः जामित्रेभास्करेक्षौरेमृत्युःस्याद्भूमिजेतथा शुक्रेसौख्यविनाशःस्यान्मंदभाग्यंश
नैश्चरेइति नक्षत्रेषुविशेषमाह गुरुः हस्ताश्विविष्णुपौष्णानिश्रविष्ठादित्यपुष्यभम् सौम्यचित्रेतथाक्षौरेउत्तमानवतारकाः त्रीण्युत्तराणिवाय
व्यंरोहिणीवारुणंतथा क्षौरेषण्मध्यमाःप्रोक्ताःशेषाद्वादशगर्हिताइति क्षौरादिषुजन्मलग्नंशुभमाहभृगुः कृषिंप्रयाणंक्षौरंचविवाहःप्राशनंतथा शिशो

र्वस्त्रंचपानंचजन्मराशौशुभंभवेत् जन्मलग्नेशुभंक्षौरंमध्येवर्ज्यंव्ययेष्टमइति गर्गस्तु आत्मराश्युदयेषष्ठेद्वादशेनिधनेतथा शत्रुक्षेत्रेचनीचेचक्षौरंनैवप्रशस्यते जन्मलग्नंसतिसंभवेवर्ज्यमित्यनयोर्व्यवस्थाचपुनरिष्टतारयागोचरप्रकरणोक्तयाशुभफलदयातारयाचूडास्यात् केशवमानर्तपुरंपाटलिपुत्रंपुरीमाहिच्छत्रम् दितिमदितिंचस्मरतांक्षौरविधौभवति कल्याणमिति २९ ३० अथसगर्भायांसंस्कार्यमातरिविशेषमनुष्टुभाह पंचमासाधिकेति संस्कार्यमातुर्गर्भेपंचमासेभ्योधिकेसतिचौलंशुभंनस्यात् पंचमासेभ्यः पूर्वंचौलंशुभमित्यर्थः गर्भेमातुः कुमारस्यनकुर्याच्चौ

क्षीणचंद्रकुजसौरिभास्करैर्मृत्युशस्त्रमृतिपंगुताज्वराः स्युःक्रमेणबुधजीवभार्गवैःकेंद्रगैश्चशुभमिष्टतारया ३० पंचमासाधिकेमातुर्गर्भेचौलंशिशोर्नसत् पंचवर्षाधिकश्चेष्टंगर्भिण्यामपिमातरि ३१ तारादौष्ट्येब्जेत्रिकोणोच्चगेवाक्षौरंसत्स्यात्सौम्यमित्रस्ववर्गे

लकर्मच पंचमासादधःकुर्यादतऊर्ध्वंनकारयेदिति वसिष्ठोक्तेः अस्यापवादमाह पंचवर्षाधिकस्येतिउल्लंघितपंचवर्षस्यशिशोर्मातरिगर्भिण्यामसत्यांपंचमादूर्ध्वमपिचौलमिष्टम् नारदः सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् पंचमाब्दात्प्रागथोर्ध्वंगर्भिण्यामपिकारयेत् सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यतेइति अत्रतुपंचवर्षाणांन्यूनाधिकभावोनापेक्षितः सर्वापवादकत्वात् ३१ अथचौलेताराबलमावश्यकमित्युक्तंतत्रदुष्टतारापवादंशालिन्याह तारादौष्ट्येति दुष्टतारायामपिसत् अब्जेचंद्रेत्रिकोणोच्चगेत्रिकोणगे-

उच्चगेवासति क्षौरंसत् शुभंस्यात् वा अथवा सौम्यमित्रस्ववर्गेसौम्यानां बुधगुरुशुक्राणांषड्वर्गेचंद्रेसति अथवा स्वस्यैवषड्वर्गेसति क्षौरंसतस्या
त् सौम्येति सौम्येभेशुभग्रहराशौचंद्रेसति स्वस्यगोचरेणशोभनेसति दुष्टतारापिक्षौरयात्रादिकृत्येशोभनासमीचीनाज्ञेया ३२ अथविशे
षमनुष्टुभाह ऋतुमत्याइति ऋतुमत्यारजस्वलायाः तथासूतिकायाजातापत्यायाश्च सूनोश्चौलोपनयनविवाहादिकृत्यं बालस्यबालिकायाश्च
वानाचरेत् नकुर्यात् उक्तंच प्रचेतसा यस्यमांगलिकंकृत्यंतस्यमातारजस्वला तदासमृत्युमाप्नोतिपंचमंदिवसंविनेति विवाहोत्सवकार्ये

सौम्येभेज्ञेशोभनेदुष्टताराशस्ताज्ञेयाक्षौरयात्रादिकृत्ये ३२ ऋतुमत्याःसूतिकायाःसूनोश्चौलादिनाचरेत् ज्येष्ठापत्यस्य
नज्येष्ठेकैश्चिन्मार्गेपिनेष्यते ३३ दंतक्षौरनखक्रियात्रविहिताचौलोदितेवारभेपातंग्याररवींन्विहायनवमंघस्रंचसंध्यांतथा

षुमाताचैवरजस्वला वैधव्यंजायतेतत्रनृनार्योःपाणिपीडनेइति ज्येष्ठापत्यस्याद्यगर्भसुतस्यकन्यायावाशुभकृत्यंचौलादिकंज्येष्ठेमासिन
भवति कैश्चिदिति मार्गशीर्षेपिकैश्चिदाचार्यैराद्यगर्भसुतकन्ययोर्मंगलकृत्यंनेष्यते भरद्वाजः मार्गशीर्षेतथाज्येष्ठेक्षौरंपरिणयंव्रतम्
आद्यगर्भदुहित्रोश्चयत्नेनपरिवर्जयेदिति ३३ अथसामान्यतःक्षौरमुहूर्त्तंतन्निषिद्धंकालंच शार्दूलविक्रीडितेनाह दंतक्षौरेति चौलोदितेवारे
नक्षत्रेदंतक्रियाघर्षणादिका क्षौरक्रियाविहिताउक्ता निषिद्धकालमाह पातंगीति पतंगस्यसूर्यस्यापत्यंपातंगिः शनिः शनिभौमरविवारान्त्यन्

त्का नवमंघस्त्रंयद्दिनेक्षौरंकृतंततोनवमदिनेपुनः क्षौरंनकार्यम् तथासंध्यांप्रातःसायंकालौविहाय तथारिक्ताम् पर्वाणिपूर्वोक्तानिनिशांरात्रिंचविहाय अथाधिकारिणः हितप्रेप्सुभिः स्वशुभमिच्छद्भिः एतादृशैर्हिनिश्चयेनक्षौरक्रियानकार्याकैर्निरासनैः आसनरहितैः रणःसंग्रामः ग्रामप्रयाणमर्थयात्राएतदर्थमुद्यतैः कृतोद्योगैः स्नातैःकृतस्नानैः अभ्यक्तैःकृततैलाभ्यंगैः कृताशनैः कृतभोजनैः सुवर्णाद्यलंकारभूषितैरित्यपिध्येयम् ३४ अथमंजुभाषिण्याविशेषमाह ऋतुपाणिपीडेति ऋतौयज्ञे तथापाणिपीडोविवाहस्तत्रश्मश्रुकर्मादौ मृतौमातापित्रोर्मरणे बंधमोक्षणेकारागृहेबद्धस्यमोक्षणे द्विजाज्ञयाब्राह्मणाज्ञयाबंधमोक्षणेराजाज्ञया दुष्टेपिवारनक्षत्रे क्षौरंचरेत्कुर्यात् अन्यच्च गंगायांभास्करक्षेत्रेमातापित्रोर्मृतेऽह्नि आधानेसोमपानेचषट्सु क्षौरंविधीयते अन्यच्च राजकार्यनियुक्तानांनटानांरूपजीविनाम् श्मश्रुरोमनखच्छेदेनास्तिकालविशोधनमिति अथशवेति गर्भिणीगर्भवतीतस्याः भर्ताशववाहंमृतकवहनम् तीर्थगमंतीर्थयात्राम् उपलक्षणत्वाद्विदेशगमनमपि सिंधुमज्जनंसमुद्रस्नानम् क्षौरं एतानिकर्माणिनाचरेत् नकुर्यात् उक्तंच सिंधुस्नानंद्रुमच्छेदंवपनंप्रेतवाहनम् विदेशगमनंचैवनकुर्याद्गर्भिणीपतिः राजायोगीपुरंध्रीचमातौपित्रोस्तुजीवतोः मुंड-

रिक्तांपर्वनिशांनिरासनरणग्रामप्रयाणोद्यतस्नाताभ्यक्तकृताशनैर्नहिपुनःकार्याहितप्रेप्सुभिः ३४ ऋतुपाणिपीडमृतिबंधमोक्षणे
क्षुरकर्मचद्विजनृपाज्ञयाचरेत् शववाहतीर्थगमसिंधुमज्जनंक्षुरमाचरेन्नखलुगर्भिणीपतिः ३५

नंसर्वतीर्थेषुनकुर्याद्गर्भिणीपतिः नारदः वपनंमैथुनंतीर्थंवर्जयेद्गर्भिणीपतिः श्राद्धंचसप्तमान्मासादूर्ध्वंचान्यत्रवेदवित् ३५ अथराज्ञांक्षौरेविशेषं सर्वथावर्ज्यनक्षत्राणिचभुजंगप्रयातेनाह नृपाणामिति नृपाणांपंचमेपंचमेदिनेक्षौरनक्षत्रेश्मश्रुकर्महितंस्यात् पंचमेदिनेयदिक्षौरनक्षत्राभावस्तदर्थमाह अस्योदयेवेति अथवाऽस्यक्षौरभस्य उदयेश्मश्रुकर्मकार्यम् उदयशब्देनतन्नक्षत्रस्यस्वामिनोमुहूर्तः तथाचगर्गः क्षौरकर्ममहीशानांपंचमेपंचमेऽहनि कर्त्तव्यंक्षौरनक्षत्रेप्यथवातन्मुहूर्तकेइति उत्पलेनतुवाराहपद्यव्याख्यानावसरे अस्यउदये अस्यक्षौरभस्यउदयेलग्ने इतिव्या

नृपाणांहितंक्षौरभेश्मश्रुकर्मदिनेपंचमेपंचमेस्योदयेवा षडग्निस्त्रिमैत्रोष्टकःपंचपित्र्योऽब्दतोऽब्ध्यर्यमाक्षौरकृन्मृत्युमेति ३६

ख्यातम् तथामेषलग्नंत्रिंशद्भागात्मकंतत्राद्यास्त्रयोदशभागाविंशतिकलाधिकायावताकालेनमेषलग्नेउदयंयांतितावदश्विनीनक्षत्रमुदयंयातीति तदनंतरंयावंतएवांशायावताकालेनोदयंयांतितावद्भरण्युदयइत्यनेनन्यायेनसर्वेषांनक्षत्राणामुदयाज्ञेयाः भ्रातरस्तु एवंव्याकुर्युरस्तुयस्मिन्काले अश्विन्याउदयांक्षितिजसंबंधः संपद्यतेतत्समयमारभ्ययावद्भरण्याउदयांक्षितिजसंबंधः तदंतरेयावान्कालः सोश्विन्याउदयउच्यते एवंसत्युदयलग्नद्वयांशांतरालात् गणितमार्गेणयावानिष्टकालआगच्छेत् सएवतन्नक्षत्रोदयइतिनिष्कृष्टोर्थः षडग्निरिति अग्निःकृत्तिकाक्षौरावृत्त्याषड्वारंकृत्तिकायस्यसः एवंत्रीणिमैत्राणि अनुराधायस्य अष्टौकाःरोहिण्योयस्य पंचपित्र्याणिमघायस्य अब्ध्यश्चत्वारः अर्यमाणउत्त

राफाल्गुनीयस्यसएतादृशः क्षौरकृदब्दतोवर्षानंतरंमृत्युंमरणामेतिप्राप्नोति वसिष्ठः अष्टाब्जर्क्षैः पितृपंचकस्थषड्वन्हिधिष्ण्ययाश्चतुर्यमर्क्षैः त्रिमैत्रभः पद्मजसन्निभोपिक्षौरीनरोऽब्दान्निधनंगतः सद्यइति क्षौरम् ३६ अथप्राप्तकालत्वादक्षरारंभमुहूर्तंपंचचामरच्छंदसाह गणेशेति गणेशविष्णूप्रसिद्धौ वाक्सरस्वती रमालक्ष्मीः एतादेवताः प्रपूज्यपंचमेवर्षेसति शिवएकादशीद्वादशीदशमीद्वितीयाषष्ठीपंचमीतृतीया आसामन्यतमतिथौरवावुदक् उत्तरायणगतेसति तथालघुनक्षत्राणिहस्ताश्विपुष्यः श्रवणस्वातीरेवतीपुनर्वसुः ईशआर्द्रातक्षाचित्राः मित्रमनुराधाएषामन्यतमनक्षत्रेस

गणेशविष्णुवाग्रमाः प्रपूज्यपंचमाब्दकेतिथौशिवार्कदिग्द्विषट्शरत्रिकेरवावुदक् लघुश्रवोनिलांत्यभादितीशतक्षमित्रभेचरोनस
त्तनौशिशोर्लिपिग्रहःसतांदिने ३७ मृगात्कराच्छ्रुतेस्त्रयेश्विमूलपूर्विकात्रयेगुरुद्वयेऽर्कजीववित्सितेऽन्हिषट्शरत्रिके शिवार्कदिग्द्वि
केतिथौध्रुवांत्यमित्रभेपरैः शुभैरधीतिरुत्तमात्रिकोणकेंद्रगैःस्मृता ३८

ति तथासतांसोमज्ञगुरुशुक्राणांदिनेदिवसे तथाचरराशयोमेषकर्कतुलामकरास्तद्रहितशुभस्वामिकेवृषमिथुनकन्याधनुर्मीनानामन्यतमेलग्नेसतिशिशोर्लिपिग्रहोनूतनाक्षरालेखनप्रारंभःकार्यः ३७ अथविद्यारंभमुहूर्त्तंपंचचामरेणाह मृगादिति मृगात्त्रयेमृगार्द्रापुनर्वसुषुहस्तात्त्रयेहस्तचित्रास्वातीषु श्रुतेः श्रवणात्त्रयेश्रवणधनिष्ठाशतभेषु अश्विन्याम् मूलेपूर्वात्रयेगुरुद्वयेपुष्याश्लेषयोः तथासूर्यगुरुबुधशुक्राणांदिने तथाषष्ठीपंचम्यादितिथिषु शुभैः केंद्रत्रिकोणगैःसद्भिः आधीतिः शुभास्मृता अधीति

रध्ययनम् परैः ध्रुवांत्यमित्रभेअधीतिः शुभाप्रोक्ता इदंवचनंविद्याविषयमितिदीपिकोक्तेः विद्यारंभेश्रवणत्रयोपादानंमहेश्वरादिमतम् वसिष्ठादिभिः श्रवणस्यकेवलस्यनोक्तत्वात् इतिविद्यारंभः ३८ अथव्रतबंधइति विंशतिपद्यैः प्रोच्यते इतिशेषः तस्यात्रिविधोपिकालोनित्यः काम्योगौणश्च-क्रमेणातंशार्दूलविक्रीडितेनाह विप्राणामिति गर्भदिनमारभ्याष्टमेसौरे वर्षेऽथवाजनेरुत्पत्तिदिनात्सौर वर्षेऽष्टमेसतिविप्राणांव्रतबंधनंनित्यंगदितम् अथकाम्यम् विप्राणामेवगर्भाज्जनेर्वापंचमेवर्षेकार्यम् एवंक्षितिभुजांक्षत्रियाणांगर्भाज्जनेर्वाषष्ठेकाम्यम् गर्भाज्जनेर्वाएकादशेसौर वर्षेन

विप्राणांव्रतबंधनंनिगदितंगर्भाज्जनेर्वाष्टमेवर्षेवाप्यथपंचमेक्षितिभुजांषष्ठेतथैकादशे वैश्यानांपुनरष्टमेप्यथपुनःस्याद्द्वादशे
वत्सरे कालेथद्विगुणेगतेनिगदितेगौणंतदाहुर्बुधाः ३९

नित्यंवैश्यानांपुनस्तथैवाष्टमेकाम्यम् तथैवगर्भाज्जनेर्वाद्वादशेनित्यम् नारदः आधानादष्टमेवर्षेगर्भतोवाग्रजन्मनाम् राज्ञामेकादशेमौंजीबंधनंद्वादशेविशा मिति अत्रफलाश्रवणान्नित्यमित्यवसीयते मनुः ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे राज्ञोबलार्थिनःषष्ठेवैश्यस्यार्थार्थिनोष्टमे अत्रफलश्रवणात्काम्यतापैठीनसिनागर्भपंचमेव्रतबंधनमुक्तम् गर्भपंचमेब्राह्मणमुपनयेदिति गर्भषष्ठेष्टमेचक्षत्रियविशोर्ज्ञेयः गर्भादिसंख्यावर्षाणामितिस्मृतेश्च आपस्तंबसूत्रेगर्भाष्टमेषु ब्राह्मणमुपनयेद्गर्भैकादशेषु वैश्यमितिबहुत्वान्यथानुपपत्त्यागर्भषष्ठसप्तमाष्टमेष्विति वृत्तिकृद्व्याख्यानात्त्रयाणामपिनित्यकालता एवंग

र्भैकादशेष्वित्यादावपिव्याख्येयम् एतच्चतच्छाखाध्यायिविषयंज्ञेयम् अथगौणकालउच्यते निगदितेप्रोक्तेगर्भाज्जनेर्वाष्टमेइत्यादिकेकालेतस्मिन् द्विगुणेगतेसतितद्व्रतबंधनंगौणमाहुः यथा ब्राह्मणस्यषोडशवर्षपर्यंतम् क्षत्रियस्यद्वाविंशतिवर्षपर्यंतम् वैश्यस्यचतुर्विंशतिवर्षपर्यंतंगौणमित्यर्थः मनुः आषोडशाद्ब्राह्मणस्यसावित्रीनाभिवर्तते आद्वाविंशाद्ब्रह्मबंधोराचतुर्विंशतिर्विशः अतऊर्ध्वंत्रयोप्येतेयथाकालमसंस्कृताः सावित्रीपतिताब्राह्मीभवत्यपिचगर्हिताइतिकेशवः स्वस्वमौंजीमुख्यकालेश्रेष्ठमध्याधमाः समाःतिस्त्रः केशवदैवज्ञैः प्रोक्तामौंजी

क्षिप्रध्रुवाहिचरमूलमृदुत्रिपूर्वारौद्रेर्कविद्गुरुसितेंदुदिनेव्रतंसत्

निबंधनेइति ३९ अथव्रतबंधेनक्षत्रादिकंवसंततिलकयाह क्षिप्रेति गीर्वाणांबुप्रतिष्ठेत्यादिनादक्षिणायननिषेधादुत्तरायणमासषट्कंप्रशस्तमिति मासानामुक्तत्वान्नक्षत्रादिकमेवोक्तम् तत्रकाश्यपः ऋतौवसंतेविप्राणांग्रीष्मे राज्ञांशरद्यथा विशांमुख्यंचसर्वेषांद्विजानांचोपनायम् साधारणंचमासेषुमाघादिषुचपंचसु क्षिप्रेतिक्षिप्राणिहस्ताश्विपुष्याः ध्रुवाणिरोहिण्युत्तरात्रयम् अहिराश्लेषाचराणिश्रवणधनिष्ठाशततारापुनर्वसुस्वात्यः मूलम् मृदूनिमृगरेवतीचित्रानुराधाःतिस्त्रः पूर्वारौद्रे आर्द्रायाम् एषुद्वाविंशतिभेषुव्रतबंधनंसत् उक्तंच प्राजापत्यादिषडृक्षे भगर्क्षादिषुपंचसु मूलादिदशकेचैवसमैत्रेव्रतबंधनमिति अर्थाद्भरणीकृत्तिकामघाविशाखाज्येष्ठासुनकार्यमित्यर्थः एतानिसर्वशाखानक्षत्रमेलकाभिप्रायेणो-

क्तानि क्वचिज्येष्ठाशततारापिगृहीता श्रीपतिनिबंधे अश्विनीमृगचित्रासुहस्तेस्वात्यांचशक्रभे पुष्येचपूर्वाफल्गुन्यांश्रवणेपौष्णभेतथा वासवेशततारासुव्रतबंधःप्रशस्यते भुजबलराजमार्तंडयोरपि हस्तत्रयेदैत्यरिपुत्रयेचशाक्रेंदुपुष्याश्विनीरेवतीष्विति हस्तेशक्राश्विचित्रादितिवसुवरुणोपेंद्रपुष्येंदुपौष्णस्वातीष्वव्याहतासुस्मृतमुपनयनंभार्गवाद्यैर्मुनींद्रैरितिच अर्केति सूर्यबुधगुरुशुक्रचंद्रदिवसेषुव्रतंसत् अर्थात् भौमशनीनिषिद्धौ नारदः आचार्यसौम्यकाम्यानांवाराःशस्ताःशशीनयोः वारौतौमध्यफलदावितरौनिंदितौव्रते तत्राप्यस्तंगतबुधस्यवर्ज्यः अस्तंगतस्यसौम्यस्यवारोवर्ज्योद्विजन्मनीतिनारदोक्तेः द्वित्रीष्विति द्वितीयात्तृतीयापंचम्येकादशीद्वादशीदशमीसंज्ञासुतिथिषुचव्रतंसत्स्यात् नारदेनसप्तमीत्र-

द्वित्रीषुरुद्ररविदिक्प्रमितेतिथौच्चकृष्णादिमत्रिलवकेपिनचापराण्हे ४०

योदश्योः प्राशस्त्यमुक्तंतद्वसंताभिप्रायेणेतिज्ञेयम् उक्तंचतेनैव विनर्तुनावसंतेनकृष्णपक्षेगलग्रहे अपराण्हेचोपनीतःपुनःसंस्कारमर्हतीति कृष्णादिमेति विहितमासानांकृष्णपक्षस्यादिमात्रिलवकेपंचमीपर्यंतंव्रतंसत् त्यक्त्वाचतुर्थीमपिकृष्णपक्षेत्वाद्येत्रिभागेशुभदंव्रतंसदेति वसिष्ठोक्तेः नचेति त्रिधाविभक्तदिनस्यत्रयोविभागाः क्रमेणपूर्वाण्हमध्यान्हापराण्हसंज्ञकाभवंति तत्रापराण्हभागेव्रतंनसत् अपराण्हेचोपनीतः पुनःसंस्कारमर्हतीतिनारदोक्तेः त्रिधाविभज्यदिवसंतत्रादौकर्मदैविकं द्वितीयामानुषंकार्यंतृतीयेंशेतुपैतृकमितिनारदोक्तेः ४०

अथव्रतबंधेसामान्यतोलग्नभंगयोगंप्रमाणिकयाह कवीज्येति रिपौषष्ठेमृतावष्टमस्थानेचेच्छुक्रगुरुचंद्रलग्नस्वामिनोभवंतितदा अधमामरणकार
काः अब्जभार्गवौचंद्रशुक्रौव्ययेअधमौ खलाःपापग्रहाःलग्नाष्टमपंचमस्थानेषुस्थिताः अधमाः ४१ अथसामान्यतोलग्नमनुष्टुभाह व्रतबंधइति शु
भग्रहाः अष्टमषष्ठद्वादशस्थानस्थिताश्चेत्स्युर्नशोभनाः अन्यस्थानेव्रतबंधेशोभनाःखलाःपापाःतृतीयषष्ठैकादशस्थानेषुशोभनाःस्युःगोकर्के-
तिपूर्णःशुक्लपक्षीयोविधुः वृषभस्थः कर्कस्थश्चतनौयदिभवेत्तदासत्शोभन नान्यथा गुरुः चंद्रेलग्नेभिशस्तः स्यात्क्षयरोगीसितेतरे शुक्लपक्षे

कवीज्यचंद्रलग्नपारिपौमृतौव्रतेधमाः व्ययेब्ज भार्गवौतथातनौमृतौसुतेखलाः ४१ व्रतबंधेऽष्टषड्रिःफवर्जिताःशोभनाःशुभाः ४
त्रिषडायेखलाःपूर्णोगोकर्कस्थोविधुस्तनौ ४२ विप्राधीशौभार्गवेज्यौकुजार्कौराजन्यानामोषधीशोविशांच शूद्राणांज्ञश्चांत्यजा
नांशनिःस्याच्छाखेशाःस्युर्जीवशुक्रारसौम्याः ४३

भवेधज्वास्चभेतुंगेविशेषतइति कश्यपस्तूच्चस्थंचंद्रंसदाएवन्यषेधत् वर्धमा
नोपिवापूर्णश्चंद्रोयदिविलग्नगःनिःस्वंकरोतिव्रतिनंलग्नगः क्षयरोगिणमिति उच्चस्थसंबंधिनोः पक्षयोर्देशाचारतोव्यवस्था स्वगृहगस्तुउ
त्तमः मतद्वये ४२ अथवर्णेशशाखेशान् शालिन्याह विप्राधीशाविति शुक्रबृहस्पती ब्राह्मणाधीशौ भौमसूर्यौ क्षत्रियाणांस्वामिनौ
ओषधीशश्चंद्रोवैश्यानांस्वामीबुधः शूद्राणांस्वामी शनिरंत्यजानांचांडालानांस्वामी ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणइति वेदक्रमाज्जी

वशुक्रारसौम्याः शाखेशाःस्युः ऋग्वेदस्यगुरुःयजुषःशुक्रःसाम्नोभौमः अथर्वणोबुधःस्वामी ४३ वर्णेशशाखेशयोःप्रयोजनंवसंततिलकयाह शाखेशेति यःस्वशाखाधिपस्तस्यवारस्तनुर्लग्नंच वीर्यंबलंगोचरप्रकारेणस्वगृहाद्यवस्थितत्वेनवाबलवत्त्वंचव्रतबंधेऽतीवशस्तम् यथागुरुःऋग्वेदिनामीशोतो गुरुवारे गुरुलग्ने धनुर्मीनाख्ये गुरुबलेचसति उपनयनमतीवशुभंएवंसर्वत्रविज्ञेयं नारदः शाखाधिपतिवारश्च शाखाधिपबलं शिशोः शाखाधिपतिलग्नंचात्रियतंदुर्लभंव्रते शाखेति शाखावेदस्तस्येशः स्वोक्तेःजीवेइति जीवेभृगौचकाराच्छाखेशेवर्णेशेवाविजितेयुद्धेपराजितेनीचराशिस्थेचसति व्रतेनानुष्ठितेनसतावेदशास्त्रविधिनावेदाध्ययनविधिर्नित्यनैमित्तिकश्रौतस्मार्त्तकर्मानुष्ठानाख्यस्तेषांसमाहारद्वंद्वस्तेनरहितोव्रतीस्यात्

शाखेशवारतनुर्वीर्यमतीवशस्तंशाखेशसूर्यशशिजीवबलेव्रतंसत् जीवेभृगौरिपुगृहेविजितेचनीचेस्याद्वेदशास्त्रविधिनारहितोव्रतेन४४

वसिष्ठः शाखेशगुरुशुक्राणांमौढ्येबाल्येचवार्द्धके नैवोपनयनंकार्यंवर्णेशेदुर्बलेसतीति तेनभौमबुधयोरस्तेसामगाथर्वणशाखिनोरुपनयनादिनभवतीतितत्त्वम् तत्रनीचाद्यवस्थितत्वेऽपिशाखेशेपरिहारमाह वसिष्ठः शत्रुनीचाधिशत्रुस्थेस्वांशेवास्वोगभागगे शाखेशेवागुरौशुक्रेन नीचफलमश्नुतइति शुक्रस्यशत्रुराशिस्थत्वंवृषभस्थेर्के कदाचित्संभवति नीचगत्वंशरदिवैश्यमुपनयेदिति वैश्योपनयनंसंभवतीतिज्ञेयम् ४४ अथजन्ममासादेःप्रतिप्रसवमाह जन्मर्क्षेति जन्मनक्षत्रेजन्ममासेजन्मलग्नेआदिशब्देनजन्मतिथौविप्राणांब्राह्मणानां आ-

द्यगर्भेपि अपिशब्दात्द्वितीयगर्भादावपिव्रती बालोव्रतेयज्ञोपवीतेविद्याधिकःस्यात् क्षत्रादीनांक्षत्रियवैश्यानांपुनरनादिमेद्वितीयगर्भादिबालके सतिजन्मर्क्षमासलग्नादौविद्याधिकोव्रतीस्यात् आद्यगर्भेतुतेषांसर्वथानिषेधएव शौनकः जन्मोदयेजन्मसुतारकासुमासेतथाजन्मतिथौचराशौ व्रतेनविप्रोल्पपरिश्रुतोपिप्राज्ञोविशेष प्रथितःपृथिव्याम् गर्भाष्टमेगर्गपराशराद्यैःफलंयदुक्तंव्रतबंधनेतु ततोधिकंजन्मसुतारकासुमासेथवाजन्मनिवाडवानाम् विप्रभूदेववाडवाइत्यभिधानात् प्रथमदशमैकोनविंशनक्षत्राणांग्रहणार्थंजन्मसुतारकास्वित्युक्तम् जन्ममासनिषेधस्तुआद्यगर्भविषयः क्षत्रियवैश्ययोःविप्राणांतुवाडवानामितिविशेषोक्तेराद्यगर्भानाद्यगर्भसाधारणंजन्ममासेउपनयनम् जन्ममासादौशस्तमितिज्ञेयम् ४५

जन्मर्क्षमासलग्नादौव्रतेविद्याधिकोव्रती आद्यगर्भेपिविप्राणांक्षत्रादीनामनादिमे ४५ बटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः

अथगुरुबलमनुष्टुभाह बटुकन्येति बटुरुपनयनाधिकारी तथाकन्यास्त्रीजात्यपत्यंजन्मराशेर्नवपंचमैकादशद्वितीयसप्तमस्थानस्थितोगुरुः श्रेष्ठउत्तमः दशषट्तृतीयप्रथमस्थानस्थितोगुरुः पूजयापूजाविधानेनानुष्ठितेनश्रेष्ठः अन्यत्रचतुर्थाष्टमद्वादशस्थानस्थोनिंद्योनिषिद्धइत्यर्थः नारदः बालस्यबलहीनोपिशांत्याजीवोबलप्रदः यथोक्तवत्सरेकार्यमनुक्तेनोपनायनम् वसिष्ठः उक्तेपिवर्षेनगुरुर्बलीचेच्छांत्याप्रशस्तंव्रतबंधकर्म अनुक्तवर्षेसुबलप्रदोपिनैवैतयोरब्दबलंगरीयइति गर्गः व्रतबंधेविवाहेचप्रतिष्ठायांविशेषतः गोचरेणैवकर्तव्यंवेधादिकमकारणमिति वेधस्तु

व्ययेपक्षौस्त्रिगेशैलैः खगेनंदैः सुखेशरैः रंध्रेरुद्रैर्ग्रहैर्विद्धोगुरुःशुद्धोशुभोन्यथा प्राच्यास्तुगोचरबलाभावेऽष्टकवर्गबलमाहुः राजमार्त्तंडः अष्टवर्गविशुद्धेषुगुरुशीतांशुभानुषु अतोद्वाहौतुकर्त्तव्यौगोचरेणकदाचनेति अन्यच्च अष्टवर्गेणयेशुद्धास्तेशुद्धाःसर्वकर्मसु सूक्ष्माष्टवर्गसंशुद्धिस्तुलाशुद्धिस्तुगोचरे तत्रगुरोरष्टवर्गोबृहज्जातके दिक्स्वाद्याष्टमदायबंधुषुकुजात्स्वात्सत्रिकेष्वंगिराः सूर्यात्सत्रिनवेषुधीस्वनवदिग्लाभारिगोभागवात् जायायार्थनवात्मजेषुहिमगोर्मंदात्त्रिषट्धीव्ययेदिग्धीषट्स्वसुखायपूर्वनवगोज्ञात्ससमरेषूदयात् वराहः पूजाभिलाषंप्रतिनिःस्पृहेपि

श्रेष्ठोगुरुःखषट्त्र्याद्येपूजयान्यत्रनिंदितः ४६ स्वोच्चेस्वभेस्वमैत्रेवास्वांशेवर्गोत्तमेगुरुः

कुर्याद्गुरौशुद्धिविवर्जितेपि वरस्यलाभेशुभदंविवाहं वदंतिगर्गच्यवनादिसुख्याः अत्रचतुर्थाष्टमद्वादशस्थानस्थितत्वेनगुरोर्द्विगुणात्रिगुणादिकां पूजांविधायविवाहव्रतबंधादिशुभमितिसंप्रदायविदः ४६ अथगुरुदौष्ट्यापवादमनुष्टुभाह स्वोच्चइति गुरुश्चतुर्थादिनिंद्यस्थानस्थितोपिस्वोच्चेकर्केस्वभेधनुर्मीने स्वमैत्रेमेषसिंहवृश्चिके स्वांशेधनुर्मीननवांशे वर्गोत्तमेनवांशेयथा वृषराशौवृषनवांशेगुरुवर्गोत्तमइति वर्गोत्तमलक्षणम् वर्गोत्तमानवांशाश्चरादिषुप्रथममध्यांताइति एषुस्थितोगुरुः इष्टः शुभफलदाता अन्येषुएतादृशोगुरुः अतीवशुभः भुजबलः वर्गोत्तमेस्वभवनेभवनेथमैत्रेमित्रांशकेस्वभवनोच्चनवांशकेवा जन्माष्टरिःफरिपुखत्रिचतुर्थगोपिजीवः सुखार्थसुखवृद्धिकरोविवाहे नीचेति नीचंम-

करः अरिस्थः मिथुनकन्यातुलावृषराशिस्थः शुभोप्यसन् अनिष्टफलदातेत्यर्थः उक्तंच उच्चस्थः स्वगृहे सुहृद्भवनगो वाच्चस्पतिर्नित्यशः पूर्णायुर्वि
विधार्थसौख्यजनको जन्माष्टमस्थोपि चेत् नीचस्थोरिगृहे दिवाकरं करच्छायानुगामी सदापीष्टोऽनिष्टफलं ददाति नियतं वैधव्यदुःखास्पदम् अ
त्राष्टमस्थोपि चेदित्यपिशब्देन चाष्टमं लक्षगुणं प्रपूजयेदिति विधानात् पूजामनीहमानेष्वुपनयनादि शुभं स्यात् द्वादशचतुर्थस्थानस्य तु द्विगुण
पूजामिच्छतः तथा तृतीयादिस्थानस्य पूजामात्रापेक्षस्य गुरोः शुभफलदातृतास्तीति किं वक्तव्यमितीति कैमुतिकन्यायसूचनार्थोपि शब्दः न
चाष्टमं लक्षगुणं पूजयेदिति शत्रुगृहस्थितगुर्वभिप्रायम् अस्यापवादो रत्नकोशे गोचराष्टकवर्गाभ्यां यस्य शुद्धिर्न लभ्यते तस्योपनयनं कार्यं चै

रिःफाष्टतुर्यगोपीष्टो नीचारिस्थः शुभोप्यसन् ४७ कृष्णे प्रदोषेऽनध्याये शनौ नित्यपराण्हके

त्रे मीनगते रवौ हरौ सिंहांशगे जीवे नीचर्क्षे नीचभागगे मौंजीबंधः शुभः प्रोक्तश्चैत्रे मीनगते रवौ पाठांतरम् जन्मभादष्टगे सिंहे नीचे वा शत्रुगे गुन
राविति अर्थाच्चैत्रे मेषगोर्को निषिद्धः तथा चोक्तम् सौम्यायने व्रतं कार्यं चैत्रे मासि विशेषतः झषेन निंद्यो यदि फाल्गुने स्यादजस्तु वैशाखगतो न
निंद्यः मध्वाश्रितौ द्वावपि वर्जनीयावित्यादिवाचामप्येवं युक्तिरिति इदं गणेशदैवज्ञैरभ्यधायि तन्निर्मूलमिव प्रतिभाति मूलवाक्याभावात् ४७
अथ व्रतबंधे वर्ज्याननुष्टुभाह कृष्णेति एषु व्रतबंधो नेष्टः कृष्णे प्रथमत्रिभागरहिते कृष्णे पक्षे प्रदोषे यस्मिन्दिने संध्याकाले प्रदोषो भवे-

तद्दिवसे प्रदोषलक्षणमर्कतर्केत्याद्यग्रेवक्ष्यति अनध्यायेवक्ष्यमाणे निशीति अंगवंगकलिंगेषुसौराष्टुमगधेषुच तीर्थयात्रांविनागच्छन्पुनःसंस्कारमर्हतीतिपुनः संस्कारप्राप्तौनिमित्तानंतरमेवनैमित्तिकमितिन्यायेनयदिरात्रिसद्भावस्तदोपनयनंमाभूदितिरात्रिपदोक्तिः तथाप्राक्संध्या प्रातःसंध्यातस्यांगर्जितेमेघशब्दे वसिष्ठः व्रतेहिपूर्वसंध्यायांवारिदोयदिगर्जति तद्दिनंस्यादनध्यायंव्रतंतत्रविवर्जयेदिति अपरार्कः क्षीणे चंद्रेऽष्टमेशुक्रेनिरंशेचैवभास्करे कर्त्तव्येनोपनयनंनानध्यायेगलग्रहे राशेःप्रथमभागस्थेनिरंशःसूर्यउच्यते तथागलग्रहे गलग्रहानाहगुरुः

प्राक्संध्यागर्जितेनेष्टोव्रतबंधोगलग्रहे ४८ क्रूरोजडोभवेत्पापःपटुःषट्कर्मकृद्बटुः यथार्थभाक्तथामूर्खोरव्याद्यंशेतनौक्रमात् ४९ विद्यानिरतःशुभराशिलवेपापांशगतेहिदरिद्रतरः चंद्रेस्वलवेबहुदुःखयुतःकर्णादितिभेधनवान्स्वलवे ५०

त्रयोदश्यादिचत्वारिसप्तम्यादिदिनत्रयम् चतुर्थीचैकतःप्रोक्ताअष्टावेतेगलग्रहाः दैवज्ञमनोहरे प्रदोषेनिश्यनध्यायेमंदेकृष्णोगलग्रहे मधुंविनोपनीतस्तुपुनःसंस्कारमर्हति गलग्रहेप्रदोषेचस्वल्पायुरुपजायतेइतिच ४८ अथांशफलमनुष्टुभाह क्रूरोजडइति षट्कर्माणि यजनंयाजनंचैवतथादानप्रतिग्रहौ अध्यापनंचाध्ययनंषट्कर्माधर्मभाग्द्विजइति अन्यत्स्पष्टम् ४९ अथचंद्रनवांशफलंस्वनवांशेसापवादंताज्जौलगुरुवद्मोटनकमितिलक्षणलक्षितेनमोटनकच्छंदसाह विद्यानिरतइति यस्मिन्कस्मिन्राशौचंद्रोयदिशुभग्रहराशिनवांशेचेत्तदाव्रतीविद्यानिरतोभवेत्

यदिपापग्रहराशिनवाशेचंद्रस्तदादरिद्रतरः धनरहितः यदिस्वलवेकर्कांशेस्यात् तदाबहुदुःखसहितोभवेत् अथस्वांशगतचंद्रस्यापवादमाह कर्णौति कर्णेश्रवे अदितौपुनर्वसौनक्षत्रेउपनयनेस्वांशेचंद्रःस्यात्तदाधनवान्भवेत् नारदः श्रवणादितिनक्षत्रेकर्कांशस्थेनिशाकरे तदाव्रतीवेदशास्त्रधनधान्यसमृद्धिमान् ५० केंद्रस्थानांफलमनुष्टुभाह राजसेवीति केंद्रेसूर्यादिखेचरैः प्रत्यकंसहितेक्रमादिदंफलंज्ञेयम् अन्यत्स्पष्टम् अत्रलग्नस्थंचंद्रकेंद्रस्थंशनिंचविनासर्वेग्रहाः शुभाइत्यवगम्यते मुनिभिस्तुकेंद्रपापानिषिद्धाइत्युक्तम् नारदः स्फूर्जितंकेंद्रगेभानौव्रतिनोवं

राजसेवीवैश्यवृत्तिःशास्त्रवृत्तिश्चपाठकः प्राज्ञोर्थवान्म्लेंच्छसेवीकेंद्रेसूर्यादिखेचरैः ५१ शुक्रेजीवेतथाचंद्रेसूर्यभौमार्कि
संयुते निर्गुणःक्रूरचेष्टःस्यान्निर्गुणःसद्युतेपटुः ५२ विधौसितांशगेसुतेत्रिकोणगेतनौगुरौ समस्तवेदविद्वतीयमांशगेतिनिर्घृणः ५३

शनाशनं कूजितंकेंद्रगेभौमेशिष्याचार्यविनाशनम् अत्रस्वगृहोच्चाद्यवस्थिताः पापाःकेंद्रस्थाः शुभफलदातारः अन्यथानेतिविरुद्धार्थवचनयोर्विषयविवेकः ५१ अथान्यदाह शुक्रेति शुक्रेजीवेचंद्रेप्रत्येकंसूर्यसंयुतेव्रतीनिर्गुणःस्यात् भौमसंयुतेक्रूरचेष्टः क्रूराहिंसनशीलाचेष्टायस्यतादृशः स्यात् तथाशनिसंयुतेनिर्घृणोनिर्लज्जोनिर्दयोवास्यात् तथातस्मिन्नेवजीवेशुक्रेचंद्रेवाप्रत्येकंसद्भिर्युतेबटुः सर्वविद्यानिपुणःस्यात् ५२ अथान्यत्प्रमाणिकयाह विधौसितांशगेति चंद्रेशुक्रांशगेत्रिकोणगेगुरौतनौलग्नेचसति व्रतीबटुःसमस्तांश्चतुरोवेदान्वेत्तीतिसमस्तवेदवित् एवंयमां

शगेशनिनवांशसंस्थितेचंद्रेसति लग्नेगुरौचसतिसितेत्रिकोणगेसति अतिनिर्घृणः कृतघ्नःस्यात् महेश्वरः जीवेलग्नमधिष्ठितेभृगुसुतेधर्मात्मजस्थेविधौशुक्रांशेऽखिलवेदविद्रविसुतस्यांशेकृतघ्नोऽधमइति नारदः लग्नंसर्वगुणोपेतंलभ्यतेऽन्यदिनेनसत् दोषाल्पत्वंगुणाधिक्यंबहुसंमतमिष्यते दोषदुष्टोहिकालोयःसगृहीतुंनशक्यते दोषावेधादयोमहादोषाइत्यर्थः ५३ अथानध्यायान्जघनचपलार्ययाह शुचिशुक्रेति अनध्यायाः आषाढशुक्लदशमी ज्येष्ठशुक्लद्वितीया पौषशुक्लैकादशी माघशुद्धदशमी एतेअनध्यायाः भूतश्चतुर्दशी तदादित्रितयंचतुर्दशी

शुचिशुक्रपौषतपसांदिग्द्विरुद्रार्कसंख्यसिततिथयः भूतादित्रितयाष्टमीसंक्रमणंचव्रतेष्वनध्यायाः ५४

पूर्णिमाप्रतिपदः कृष्णपक्षेअमावास्यातन्मध्येअष्टमीचतयोःसमाहारः तथासंक्रमणंसूर्यस्यनिरयनंसंक्रांतिदिनं चकारान्मन्वाद्यास्त्रितिथीमध्वावित्यादिनोक्ताः तत्राषाढशुक्लदशमीपौषशुद्धैकादशीचमन्वादी ज्येष्ठशुक्लद्वितीयामाघशुद्धद्वादशीचसोपपदे यद्यपिचैत्रशुद्धतृतीया मन्वादिः वैशाखशुद्धतृतीयायुगादिस्तथापितेउभेतृतीयेनानध्यायौ तथैवफाल्गुनकृष्णाद्वितीयाचातुर्मास्यद्वितीयापिनानध्यायः तासांप्रशस्त्याभिधानात् तथाचवसिष्ठः याचैत्रवैशाखसितातृतीयामाघस्यसप्तम्यथफाल्गुनस्य कृष्णेद्वितीयोपनयेप्रशस्ताप्रोक्ताभरद्वाजवसिष्ठमुख्यैरिति अन्यासांयुगादिमन्वादीनांव्रतबंधे अप्रसंगादेव अग्रहणम् केचिदाचार्याः याचैत्रवैशाखेतिवचनंलिखित्वापिस्वेच्छयानांगीकुर्वंति तत्र

शपथमात्रमेवप्रमाणंनपश्यामइत्यलं तन्मतेतृतीयेअनध्यायत्वेनज्ञेयेव्रतेष्वितिपदमावश्यकत्वेद्योतनार्थं गौतमः पक्षद्वयेचतुर्दश्यामष्टमीद्वित
येतथा पक्षादावपिपक्षांतेब्रह्मनाधीयतेनरैः फलंच अष्टमीहंत्युपाध्यायंशिष्यंहंतिचतुर्दशी अमावास्योभयंहंतिप्रतिपत्पाठनाशिनी मनुः
चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु अष्टकासुचसंक्रांतौशयनेबोधनेहरेः अनध्यायंप्रकुर्वीततथासोपपदासुचेति चातुर्मास्यद्वितीयागर्गे
णोक्ताआषाढफाल्गुनोर्जेषुयाद्वितीयाविधुक्षये चातुर्मास्यद्वितीयास्ताःप्रवदंतिमहर्षयः मन्वादयोयुगादयश्चपूर्वमुक्ताः सिताज्येष्ठेद्वितीयाचआ-
श्विनेदशमीसिता चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताः नैमित्तिकाअनध्यायास्तुस्मृत्यर्थसारे निर्घातभूकंपोल्कानिपतनादिसर्वाद्भुतेष्वका
लिकानध्यायाः अग्न्युत्पातेवाऽकालवृष्टौवा आर्द्रादिज्येष्ठांतात्कालादन्यत्राकालवृष्टिः सायंसंध्यागर्जनेउदयांतोऽनध्यायः अर्धरात्रादूर्ध्वंगर्जने
अर्धरात्रेवा आकालिकोनध्यायः प्रातःसंध्यागर्जनेत्वहोरात्रमितिकालंमर्यादीकृत्येत्याकालम् अकालेभवआकालिकः यस्मिन्कालेनिमित्तमुत्प
न्नंतदारभ्यद्वितीयदिनेतत्कालपर्यंतमित्यर्थः स्मृतिरत्नावल्याम् अनुराधर्क्षमारभ्यषोडशर्क्षेषुभास्करः यावच्चरतिचैकावदकालंमुनयोवि
दुरिति कालवृष्टौतुतत्कालमकालेतुत्रिरात्रकम् अतिमात्राथवावृष्टिर्नाधीयीतदिनत्रयम् आपस्तंबः उल्कायामग्न्युत्पातेचसर्वासांविद्यानामा
कालिकइति मनुः चौरैरुपप्लुतेग्रामेसंग्रामेचाग्निकारिते आकालिकमनध्यायंविद्यात्सर्वाद्भुतेषुचेति अद्भुतेषुरुधिरादिवृष्टिषु वसिष्ठःउपलरुधिरप्रपा-
तेत्र्यहमितिस्मृत्यंतरे विद्युद्गर्जितवृष्टीनांसन्निपातोयदाभवेत् कालवृष्टौतुतत्कालमकालेतुत्रिरात्रकमित्यादिनैमित्तिकाअनध्यायायदामेखलाबंधात्प्रागुत्सन्नास्त

दाव्रतबंधोनकार्यएव यदातुमेखलाबंधादनंतरंब्रह्मौदनपाकात्प्रागुत्पन्नास्तदाजातोपिनप्रवर्तते ५४ अथप्रदोषलक्षणमनुष्टुभाह अर्केति तनदग्निभैरर्कादितिथिषुप्रदोषःस्यात् यथाद्वादश्यामर्धरात्रात्प्राक्त्रयोदशीप्रवृत्तौप्रदोषः षष्ठ्यांचार्धप्रहरमध्येसप्तमीप्रवृत्तिस्तदाप्रदोषः तथातृतीयायांप्रहरमध्येचतुर्थीप्रवेशेप्रदोषः अत्रद्वितीयप्रहरस्यचरमघटिकातृतीयप्रहरस्याद्यावाघटिकेत्येवंघटिकाद्वयमितःकालःस्थूलोरात्र्यर्द्धशब्दोवाच्यः तेनसमांशवाचित्वाभावादर्धनपुंसकमिति एकदेशिसमासाभावः ५५अथव्रतबंधानंतरंसायंकालेबह्वृचांब्रह्मौदनाख्यःसंस्कारोभिहितस्तत्रार्यया

अर्कतर्कत्रितिथिषुप्रदोषःस्यात्तदग्निभैः रात्र्यर्द्धसार्द्धप्रहरयाममध्यस्थितैःक्रमात् ५५ प्राग्ब्रह्मौदनपाकाद्व्रतबंधानंतरंयदिचेत्
उत्पातानध्ययनोत्पत्तावपिशांतिपूर्वकंतत्स्यात् ५६

विशेषमाह प्राक्ब्रह्मौदनेति स्पष्टार्थम् उक्तंचनृसिंहप्रसादे ब्रह्मौदनविधेःपूर्वंप्रदोषेगर्जितंभवेत् तदाविघ्नकरंज्ञेयंबटोरध्ययनस्यतत् तस्यशांतिप्रकारं तुवक्ष्येशास्त्रानुसारतः स्वस्तिवाचनपूर्वंतुहवनंकारयेद्बुधः प्रधानंपायसंसाज्यंद्रव्यंशांतियज्ञोभवेत् सूक्तंबृहस्पतेर्विद्वान्पठेद्विद्यासमृद्धये गायत्रीयुंजतोमंत्रःप्रायश्चित्तंतुसर्पिषा धेनुंसवत्सकांदद्यादाचार्यायपयस्विनीम् शिलांहोमविधेःपश्चात्स्थापयेत्तत्रसंसदि ब्राह्मणान्भोजयेत्पश्चात्ततोब्रह्मौदनंचरेदिति ५६ अथवेदविशेषेणनक्षत्राणिवसंततिलकयाह वेदेति मृगाश्लेषार्द्राहस्तचित्रास्वातीमूलपूर्वात्रयेषुऋग्वेदाध्यायिनां रेवतीहस्तानुराधामृगपुष्यरोहिण्युत्तरात्रयेषुयजुर्वेदाध्यायिनाम् अश्विनीधनिष्ठापुष्य

हस्तोत्तरात्रयार्द्राश्रवणेषुसामवेदाध्यायिनां मृगरेवतीपुष्याश्विनीहस्तानुराधाधनिष्ठापुनर्वसुषु अथर्ववेदाध्यायिनां पूर्वश्लोकानुवृत्ततत्पदपरामृष्ट-
मुपनयनंसत् शुभमित्यर्थः उक्तंच मूलेहस्तत्रयेसार्पशैवेपूर्वात्रयेतथा ऋग्वेदाध्यायिनांकार्यंमेखलाबंधनंबुधैः पुष्येपुनर्वसौपौष्णेहस्तेमैत्रेशशां
कभे ध्रौवेषुचप्रशस्तंस्याद्यजुषांमौंजिबंधनम् पुष्यवासवहस्ताश्विशिवकर्णोत्तरात्रयम् प्रशस्तंमेखलाबंधेबटूनांसामगायिनां मृगमैत्राश्वि-
नीहस्तोरेवत्यदितिवासवम् अथर्वपाठिनांशस्तोभगणोयंव्रतार्पणे ५७ अथान्यंविशेषमनुष्टुभाह नांदीश्राद्धेति नांदीश्राद्धंवृद्धिश्राद्धंतत्कृ

वेदक्रमाच्छशिशिवाहिकरत्रिमूलपूर्वासुपौष्णकरमैत्रमृगादितीज्ये ध्रुवेषुचाश्विवसुपुष्यकरोत्तरेशकर्णेमृगांत्यलघुमैत्रधना
दितौसत् ५७ नांदीश्राद्धोत्तरंमातुःपुष्पेलग्नांतरेनहि शांत्याचौलंव्रतपाणिग्रहःकार्योऽन्यथानसत् ५८

त्यानंतरंयदिसंस्कार्य
मातुःपुष्पेरजोदर्शनोजातेसति लग्नांतरेचासतिसदावश्यकर्तव्यत्वेधर्मशास्त्रोक्तांशांतिंविधायचौलंयज्ञोपवीतंविवाहश्चकार्यः अन्यथास
मीचीनलग्नांतरत्वेसतिचौलादिनसत् दुष्टफलमित्यर्थः मेधातिथिः चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि पत्नीरजस्वलायस्यप्रायस्तस्यनशो
भनम् स्मृत्यंतरे प्राप्तमभ्युदयंश्राद्धंपुत्रसंस्कारकर्मणि पत्नीरजस्वलाजातानकुर्यात्तत्पितातदेति तत्पितेतिनांदीश्राद्धकर्तुरुपलक्षणम् अ
तोज्येष्ठभ्रात्रादिनाकरिष्यमाणनांदीश्राद्धात्प्राक्तत्पत्नीरजस्वलाचेत्तदानांदीश्राद्धनिषेधान्मंगलंनकार्यमेव संस्कार्यमातरिरजस्वलायांतुस

विचैत्रव्रतमासादौविभौमास्तेविभूतिजे छूरिकाबंधनंशस्तंनृपाणांप्राग्विवाहतः ५९ केशांतंषोडशेवर्षेचौलोक्तदिवसेशुभम्

न्निहितलग्नांतरासंभवेशांतिंकृत्वातदानीमेवतन्मंगलंकार्यं आरब्धत्वान्नस्मृत्युक्तदोषः अपशकुननिरासार्थंशांतिःकार्या उक्तंच वधूवरान्यतरस्यजननीचेद्रजस्वला संपूर्णेतुबलेप्राप्तेकुर्यात्तत्पाणिपीडनमिति बलेग्रहबलेच वाक्यसारे अलाभेसुमुहूर्त्तस्यरजोदोषेह्युपस्थिते श्रियंसंपूज्यविधिवत्ततोमंगलमाचरेत् हैमींमाषमितांपद्मांश्रीसूक्तविधिनार्चयेत् प्रत्यृचंपायसंहुत्वाभिषिच्यहितमाचरेत् यदातुकृतेपिमंगलेमंडपोद्वासनात्प्राक्मातरिरजस्वलायांशांत्यादिकंकार्यमेव मंगलस्यासमाप्तत्वात् यदातुज्येष्ठभ्रात्रादिनाकृतान्नांदीश्राद्धात् परंतत्पत्नीरजस्वलाचेत्तदानकोपिदोषः अन्योपि विशेषस्तत्रैव उपवासेनशुध्यंतिनार्यःसद्योरजस्वलाः एकाकिन्योविवाहादौदेशभंगेषुवायदीति ५८ अथछूरिकाबंधनेमुहूर्त्तं अनुष्टुभाह विचैत्रेति चैत्रवर्जितेषूपनयनमासेषुमाघफाल्गुनवैशाखज्येष्ठेष्वित्यर्थः आदिशब्देनव्रतबंधोक्ततिथिनक्षत्रजन्मलग्नादीनांग्रहाणांवाकीदृशेव्रतमासादौविभौमास्तेभौमास्तरहिते गुरुशुक्रास्तादिसामान्यनिषेधादेवसिद्धम् तथाविभूमिजेभौमवाररहितेसूर्यादिवारेनृपाणांक्षत्रियाणांविवाहतः पूर्वंछूरिकायाअल्पशस्त्रविशेषस्यबंधनंकट्यामितिशेषः तच्छस्तंहितम् विवाहात्प्रागित्युक्तेः अवधित्वनिश्चयात्समावर्तनानंतरंकार्यम् अन्यथोपनयनानंतरंकार्यमित्येवब्रूयात् ५९ अथकेशांतसमावर्तनमुहूर्त्तावनुष्टुभाह केशांतमिति षोडशेवर्षेचौलोक्तदिवसेमुहूर्त्तेगोदानापरपर्यायंकेशांतसंज्ञंकर्मशुभंस्यात् गावः

केशादीयंतेखंड्यंतेयस्मिंस्तद्गोदानम् गोदानंषोडशेवर्षेइत्येतद्ब्राह्मणविषयम् क्षत्रियविशोःद्वाविंशेचतुर्विंशेचाविरोधात् तथामनुः केशांतषोडशेनवर्षेब्राह्मणस्यविधीयते राजन्यबंधोर्द्वाविंशेवैश्यस्यद्व्यधिकेततइति आश्वलायनः प्रथमंस्यान्महानाम्नीद्वितीयंचमहाव्रतम् तृतीयंस्यादुपनिषद्गोदानाख्यंततःपरम् अत्रजाताधिकाराद्गोदानंजन्माद्यब्देतुषोडशेइतिवृत्तिकारवचनात् त्रयोदशेमहानाम्न्यादिभवति त्रयोदशेमहानाम्नीचतुर्दशेमहाव्रतं पंचदशेउपनिषद्व्रतंषोडशेगोदानमिति एवंक्षत्रियविशोरपिउक्तगोदानकालात्प्राग्वर्षचतुष्टयक्रमेणमहानाम्न्यादीनिभवंति व्रतोक्तेति

व्रतोक्तदिवसादौहिसमावर्त्तनमिष्यते ६० इतिमुहूर्त्तचिंतामणौपंचमंसंस्कारप्रकरणंसमाप्तम् ५ छ अथविवाहप्रकरणप्रारंभः

हिनिश्चयेनयज्ञोपवीतोक्तदिवसे आदिशब्देनवारनक्षत्रतिथिलग्नांशकेषुसमावर्तनकर्मेष्यते अत्रकश्यपेनचैत्रोवर्जितः चैत्रमासविवर्जेषुमाघादिषुचपंचसु एतच्चगोदानानंतरंविवाहात्प्राक्कार्यम् कुर्यात्समावर्त्तनकर्मपश्चाद्गोदानतः पाणिपीडनात्प्रागितिवसिष्ठोक्तेः क्वचित्द्वितीयवर्षेतन्निषेधउक्तः वधूप्रवेशंव्रतमोक्षणंचपुंसांपुनर्दारपरिग्रहंच नाब्देद्वितीयेविदधीतधीमान्वदंतिगर्गात्रिवसिष्ठमुख्याइतितन्निर्मूलत्वादुपेक्ष्यम् परिकरोऽलंकारउत्सर्गापवादरूपः शेषंस्पष्टम् ६० इतिश्रीदैवज्ञानंतसुत॰प्रमिताक्षरायांपंचमंसंस्कारप्रकरणंसमाप्तम् ५

अथविवाहप्रकरणंव्याख्यायते तत्रानाश्रमीनतिष्ठेतेत्यादिवचनात्समावर्तनानंतरंसर्वाश्रमाणामुपकारकत्वाद्गृहस्थाश्रमएवमुख्यः सचसत्कुशील—

स्त्र्यधीनः शीलंसुलग्नाधीनमित्यतोलग्नशुद्धिकथनंवसंततिलकयाप्रतिजानीते भार्येति शुभंभर्त्रादेरनुकूलंशीलंस्वभावोयस्याः सात्रिवर्गस्यधर्मार्थकामरूपस्यकरणमतिशयेनसाधनम् तस्याःसुलग्नवशेनशीलंशुभंभवति यतःसुतशीलधर्माःतन्निघ्नतांविवाहाधीनताम् अधीनोनिघ्न आयतइत्यमरोक्तेः उपगताः प्राप्ताः अतोहीतिनिश्चयेनविवाहसमयः परिचिंत्यतेविचार्यतइति ननुजन्मकालीनग्रहजनितंसुभासुभंदुरतिक्रममितिविवाहलग्नानवाक्यमितिचेन्न ज्योतिषस्मृत्यावेदितशुभसमयारब्धविधिजन्यापूर्वजनितशुभफलेनजन्मांतरीयदुर्दिष्टध्वंसोभवती

भार्यात्रिवर्गकरणंशुभशीलयुक्ताशीलंसुभंभवतिलग्नवशेनतस्याः तस्माद्विवाहसमयःपरिचिंत्यतेहितन्निघ्नतामुपगताःसुतशीलधर्माः १

आदौसंपूज्यरत्नादिभिरथगणकंवेदयेत्स्वस्थचित्तंकन्योद्वाहंदिगीशानलहयविशिखेप्रश्नलग्नाद्यदींदुः दृष्टोजीवेनसद्यः परिणयनकरोगोतुलाकर्कटाख्यंवास्यात्प्रश्नस्यलग्नंशुभखचरयुतालोकितंतद्विदध्यात् २

त्येवमर्थतयासार्थक्यात् अतएवसत्याचार्यः शुभक्षणक्रियारंभजनिताः पूर्वसंभवाःसंपदःसर्वलोकानांज्योतिस्तत्रप्रयोजनमितिसर्वत्रज्ञेयम् १ अथप्रश्नलग्नाद्विवाहयोगद्वयंस्रग्धरयाह अथशब्दोमंगलार्थः आदौसंपूज्येति आदौगणकंज्योतिर्विदंरत्नादिभिः मणिवस्त्रफलादिभिःसंपूज्य ततःप्रष्टाकन्यायाःउद्वाहंगणकंवेदयेत् गतिबुद्धीत्यादिना कर्तुःकर्मत्वम् कीदृशंगणकं स्वस्थचित्तं अव्याकुलांतःकरणम् स्वस्थेचित्तेबुद्धयःसंभवंतीत्युक्तेः प्रष्टामणिकनकयुतैः फलकुसुमैराशिचक्र

मभ्यर्च्य पृच्छेद्यथाभिलषितंभक्त्याविनयान्वितः प्रश्नम् दिगिति यदिप्रश्नलग्नाद्दशमैकादशतृतीयसप्तमपंचमानामन्यतमेस्थानेस्थितश्चंद्रोजीवे
नगुरुणादृष्टः सद्यः शीघ्रंपरिणयनकरःस्यात् वाअथवागोतुलेति वृषतुलाकर्काणामन्यतमंप्रश्नलग्नंस्यात्तच्चशुभग्रहैर्युतमवलोकितंवाभवेत्त-
त्परिणयनंविदध्यात् २ अथान्ययोगद्वयंद्रुतावलंबितेनाह विषमभांशगताविति स्पष्टार्थम् ३ अथप्रश्नलग्नाद्वैधव्ययोगत्रयंशालिन्याह षष्ठा
ष्टस्थइति चंद्रः प्रश्नलग्नात्षष्ठाष्टमस्थस्तदाकन्याष्टसं वत्सरेणविवाहवर्षाद्रंडाभर्तृनाशिकास्यात् अथवालग्नेयःकश्चित्क्रूरग्रहःस्यात्ततःसप्त-

विषमभांशगतौशशिभार्गवौतनुगृहंबलिनौयदिपश्यतः रचयतोवरलाभमिमौयदायुगलभांशगतौयुवतीप्रदौ ३ षष्ठाष्टस्थःप्रश्न
लग्नाद्यदींदुर्लग्नेक्रूरःसप्तमेवाकुजःस्यात् मूर्तौविंदुःसप्तमेतस्यभौमोरंडासास्यादष्टसंवत्सरेण ४ प्रश्नतनोर्यदिपापनभोगःपंच
मगोरिपुदृष्टशरीरः नीचगतश्चतदाखलुकन्यासाकुलटात्वथवामृतवत्सा ५

मेकुजोभवेत्तदाष्टवर्षमध्येरंडास्यात् केचित्सप्तमेपिपापए
वंप्रश्नेनिषेधंति कश्यपः एकोलग्नगतःपापोह्यन्यः सप्तमराशिगः आसप्तमाब्दान्मरणंपुरुषस्यनसंशयइति तेषांमतेसप्तमेवाखलःस्यादितिपाठः
अथवामूर्तौलग्नेचंद्रः तस्यसप्तमेभौमोभवेत् तदाऽष्टवर्षेणरंडास्यात् ४ अथप्रश्नलग्नात्कुलटामृतवत्सायोगंदोधकवृत्तेनाह प्रश्नतनोरिति स्प
ष्टार्थः कश्यपः स्वनीचगः शत्रुदृष्टःपापःपंचमगोयदा मृतपुत्रांकरोत्येवकुलटांवानसंशयइति ५ अथविवाहभंगयोगंपुष्पिताग्रयाह यदीति सिताति

रिक्तपक्षेकृष्णपक्षेयदिचंद्रः समराशिषुवृषकर्कादिषुगतः सन्तनुगृह तः प्रश्नलग्नादरिरंध्रेषष्ठेष्टमेवास्थानेस्थितः पापग्रहावलोकितोभवति तदायंयोगोविवाहस्यविनाशकारकोभवति ६ एवंप्रश्नलग्नाद्वैधव्यादियोगमभिधायेदानींजन्मलग्नादावपिबालवैधव्ययोगविचारमपिदिशन् तत्परिहारंशार्दूलविक्रीडितेनाह जन्मोत्थमिति प्रश्नलग्नाद्यथाविधवायोगोविचारितस्तथाजन्मोत्थंजन्मलग्नोद्भवंचबालविधवायोगंजातकशास्त्रात् बाल्येविध वा भौमेपतिसंत्यक्तादिवाकरेतत्स्थे सौरेपापैर्दृष्टेकन्यैवजरांसमुपयाति तथा लग्नेव्ययेचपातालेजामित्रेचाष्टमेकुजे कन्याभर्तृविनाशायभर्ताकन्याविनाश

यदिभवतिसितातिरिक्तपक्षेतनुगृहतःसमराशिगःशशांकः अशुभखचरवीक्षितोरिरंध्रे भवतिविवाहविनाशकारकोऽयम् ६
जन्मोत्थंचविलोक्यबालविधवायोगंविधायव्रतंसावित्र्याउतपैप्पलंहिसुतयादद्यादिमांवारहः

दइत्याद्युक्तैर्बालविधवायोगंविचार्य वक्ष्यमाणंव्रतंवैधव्यपरिहारकरंकारयेदित्यन्वयः तन्नवैधव्ययोग परिहराभावः योयोभावःस्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिरितिसप्तमस्थानंस्वस्वामिसौम्येक्षितंचेद्भवतितदाभर्तृसुखंभवतीति अन्येस्त्रीणांमहत्यरिष्टयोगेभर्तुश्चस्वल्पेऽरिष्टयोगेतत्परिहारमाहुः अथवापरिहार्येवैधव्ययोगेप्रतीकारमाह विधायेति रहइतिवक्ष्यमाणमिहापियोज्यम् पित्रादिःसुतयाकन्ययाकृत्वारहएकांतेहिनिश्चयेनसावित्र्याव्रतंविधायपश्चादिमांकन्यांचिरजीविनेवरायदद्यात् तदुक्तंव्रतखंडे सावित्र्यादिव्रतादीनिभक्त्याकुर्वंतियाःस्त्रियः सौभाग्यंचसुहृत्त्वंचभवे

तासांसुसंततिरिति व्रतग्रहणप्रकारस्ततएवावगंतव्यः पिप्पलव्रतंज्ञानभास्करे बलवद्विधवायोगेबाल्येसति मृगीदृशाम् पितारहसिकुर्वीततद्व्रतं शास्त्रसंमतम् सुदिनेशुभनक्षत्रेचंद्रताराबलान्विते अवैधव्यकरैर्योगैर्लग्नेग्रहबलान्विते व्रतारंभंप्रकुर्वीतबालवैधव्यनाशकं सुस्नातांचित्रवसनांकन्यांपितृगृहाद्बहिः॥ नीत्वाश्वत्थंशमीस्थानेयद्वाबदरिकाश्रमे आलवालंप्रकुर्वीतविपुलंमृदुकर्षितं कुमार्याचार्यनिर्दिष्टंकृत्वासंकल्पमादरात् करकांबुप्रपूर्णेनसिंचनंप्रतिवासरं चैत्रेवाश्विनमासेवातृतीयाऽसितपक्षतः यावत्कृष्णातृतीयान्यामासमेकंयथाविधि ब्राह्मणानांतथा स्त्रीणांपूजनंचसमारभेत् तदाशिषाप्नुयात्कन्यासौभाग्यंचसुखान्वितम् प्रतिमांपार्वतीनाम्नींवैणवेभाजनेर्चयेत् चंदनाक्षतदूर्वाद्यैर्बिल्व

सल्लग्नेऽच्युतमूर्तिपिप्पलघटैःकृत्वाविवाहंस्फुटंदद्यात्तांचिरजीविनेऽत्रनभवेद्दोषःपुनर्भूभवः ७

पत्रैर्यथाविधि उपचारैर्यथाशक्त्यानैवेद्यैःप्रतिवासरं एवंव्रतप्रभावेणबालवैधव्यनिष्कृतिः जायतेकन्यकानांचततःपाणिग्रहक्रिया इत्यश्वत्थव्रतम् अन्यमपिवैधव्ययोगपरिहारमाह वारहइत्यादिना अथवारहएकांते अच्युतमूर्तेर्विष्णुप्रतिमापिप्पलघटौप्रसिद्धौ एषांमध्येन्यतरेणसहसल्लग्नेवक्ष्यमाणदोषरहितेसौभाग्यगुणान्वितेचविवाहलग्नेविवाहंकारयित्वापश्चात्तांकन्यांस्फुटंलोकप्रसिद्धंयथाभवतितथाचिरजीविनेवरायदद्यात् पित्रादिकः तदुक्तंमार्कंडेयेन बालवैधव्ययोगेपिकुंभद्रुप्रतिमादिभिःकृत्वालग्नंरहःपश्चात्कन्योद्वाह्येतिचापरेइति कुंभइतिमंथन्याअप्युपलक्षणं द्रुर्वृक्षोश्वत्थ

एव प्रतिमाविष्णोः सौवर्णीकरशिरोवयवादिसहितानशालग्रामादिरूपा तत्रकुंभविवाहः सूर्यारुणसंवादे विवाहात्पूर्वकालेतुचंद्रताराबलेस्तुभे विवा
होक्तेन मंथन्याकुंभेनचसहोद्वहेत् पितासंकल्प्यवाद्यंचविवाहविधिपूर्वकम् सूत्रेणवेष्टयेत्पश्चाद्दशतंतुविधानतः कुंभमालंकृतंदेहंतयोरेकांतमंदिरे तत
तः कुंभंविनिःसार्यप्रभज्यसलिलाशये ततोऽभिषेचनंकुर्यात्पंचपल्लववारिभिः तत्सर्वंवस्त्रपूजाद्यंब्राह्मणायनिवेद्यच कन्यालंकारवस्त्राद्यंब्राह्मणा
यनिवेदयेत् प्रार्थना वरुणांगस्वरूपत्वंजीवनानांसमाश्रय पतिंजीवयकन्यायाश्चिरंपुत्रान्सुखंवरं देहिविष्णुवरानंदंकन्यांपालयदुःखतइति
इतिकुंभविवाहः अश्वत्थविवाहोपितत्रैव द्विजान्गुरून्सुहृन्नारीमंगलोच्चारणैःसमं आहूयोद्वाहकालेचरम्यभूमौचमंडपे गत्वाप्रणम्यगौरींचग
णनाथंचभूरुहं भवानींचैवमंयानींपितामंत्रमुदीरयेत् उद्वाहयिष्येविधिवदश्वत्थेनमनोहरां कन्यांसौभाग्यसौख्यार्थंहेतवेहंद्विजोत्तमाः नम
स्तेविष्णुरूपायजगदानंदहेतवे पितृदेवमनुष्याणामाश्रयायनमोनमः वनानांपतयेतुभ्यंविष्णुरूपायभूरुह नमोनिखिलपापौघनाशना
यनमोनमः पूर्वजन्मकृतंपापंबालवैधव्यकारकम् नाशयाशुसुखंदेहिकन्यायाममभूरुह इत्यश्वत्थविवाहेसंकल्पप्रार्थने विवाहस्तुकुंभवि
वाहवद्विधेयः एवमेवसौवर्ण्याविष्णुप्रतिमयासहविवाहंविधायप्रतिमांब्राह्मणायदद्यात् दानप्रकारस्तत्रैव शुभेमासेसितेपक्षेसानुकूलग्रहे
दिने ब्राह्मणंसाधुमामंत्र्यसंपूज्यविविधार्हणैः तस्मैदद्याद्विधानेनविष्णोर्मूर्त्तिंचतुर्भुजाम् शुद्धवर्णसुवर्णेनवित्तशक्त्याथवापुनः निर्मितांरुचि
रांशंखगदाचक्राब्जसंयुताम् दधानांवाससीपीतेकुमुदोत्पलमालिनीम् सदक्षिणांचतांदद्यान्मंत्रमेतमुदीरयेत् यन्मयापूर्वजनुषिघ्नंत्यापतिसमागमम् वि

षोपविषशस्त्राद्यैर्हतोवाऽतिविरक्तया प्राप्यमाणमहाघोरंयशःसौख्यधनापहम् वैधव्याद्यतिदुःखौघनाशायसुखलब्धये महासौभाग्यलब्ध्यैचम-
हाविष्णोरिमांतनुम् सौवर्णीनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज अनघात्वहमस्मीतित्रिवारंप्रवदेदिति एवमस्त्वितिविप्राशीगृहीत्वास्वगृहं विशेत् त
तोवैवाहिकंतातोविधिंकुर्यान्मृगीदृशाम् इतिप्रतिमादानविधिः एवंघटादिभिः सहविवाहंएकांतेविधायपश्चाद्वादित्रत्रयघोषपुरःसरंपित्रादिः कन्या
मायुष्मतेवरायदद्यात् अत्रपुनर्विवाहात्पुनर्भूत्वदोषोनभवति यतोविधानखंडे स्वर्णांबुपिप्पलानांच प्रतिमाविष्णुरूपिणी तयासहविवाहेचपुन
र्भूत्वंनजायत इत्युक्तत्वात् चकारात् घटस्यापि लक्ष्मीरूपासदाकन्याहरिरूपंसदाजलम् हरेर्दत्तंचयद्दानंदातुःपापहरंसदा लक्ष्मीनारायणप्री
त्यैयादत्ताकन्यकाबुधैः तारयेत्सकलंदातुःकुलंपूर्वापरंसदा चंद्रवन्ह्यंबुगंधर्वशिवसोमस्मराइमे पतयःकन्यकानांचबाल्यात्संतिसदैवते तदु
द्वाहविधिर्यत्नात्कृतोनोजनयेदघम् यथालिभुक्तकमलंदेवानांपूजनायवै अर्हंभवतिसर्वत्रतथाकन्यांनृणांभवेत् श्रुतावपिसोमादिभिःसहवि
वाहोऽभिहितः सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः तृतीयोअग्निष्टेपतिस्तुरीयस्तेमनुष्यज इति अतोदैवतभोग्यानांपुरुषविवाहेनदोषःपुन-
र्भुवः तथात्रापि अतएव मंथन्याभास्करोयत्नात्कृतवान्दुहितुर्विधिं रेणुकोपिस्वकन्यायास्तरूद्वाहंचकारस इतिविधानखंडेऽभिधानात् अत
एवपित्रामात्रातथाभ्रात्रादत्तायातोयधारया विप्राग्निसुहृदासाक्ष्यंकृत्वासोद्वाहिताभवेदितिकात्यायनादिपरिभाषितत्वादेकदाकन्यापुरु- ८२
षविवाहंनिर्वर्त्यपुनर्द्वितीयपुरुषविवाहेजातेसापुनर्भूरेवेत्यलम् ७ अथान्यत्स्त्रग्विण्याह प्रश्नलग्नक्षणेति तत्रज्योतिर्वित्समीपेयादृशा

पत्ययुक्तादृशापत्यमेवविवृणोतिकन्यकासुतादि शेषंस्पष्टम् ८ अथसामान्यतोनिमित्तवशेनशुभाशुभप्रश्नंस्रग्विण्याह शंखभेरीति विपंचीवीणाच्च एतेषांरवैः प्रश्नलग्नेश्रुतैर्मंगलंजायते उपलक्षणात्वान्मनोल्हादितुरगगजछत्रादिसान्निध्येपिशुभम् अथाशुभयोगाः वैपरीत्यमिति वायसःकाकः खरोगर्दभः श्वाश्वानः शृगालःप्रसिद्धः यदिप्रश्नलग्नक्षणेच वायसादिर्नादंशब्दंकरोतितदावैपरीत्यमशुभंलक्षयेत् उपलक्षणादुलूकोष्ट्रमहिषनादोप्यशुभः अन्यशुभयोगाः शौनकादिभ्योज्ञेयाः विवाहवृंदावनेउपश्रुतिरप्युक्ता आरोप्याक्षतपूरितेगणपतिंप्रस्था

प्रश्नलग्नक्षणेयादृशापत्ययुक्स्वेच्छयाकामिनीतत्रचेदाव्रजेत् कन्यकावासुतोवातदापंडितैस्तादृशापत्यमस्याविनिर्दिश्यते ८
शंखभेरीविपंचीरवैर्मंगलंजायतेवैपरीत्यंतदालक्षयेत् वायसोवाखरःश्वाशृगालोपिवाप्रश्नलग्नक्षणेरौतिनादंयदि ९ विश्वस्वातीवैष्णवपूर्वात्रयमत्रैर्वस्वाग्नेयैर्वाकरपीडोचितऋक्षैः वस्त्रालंकारादिसमेतैःफलपुष्पैःसंतोष्यादौस्यादनुकन्यावरणंहि १०

दिपात्रेशनैः संमार्जन्यधिवेष्टितेयुवतयस्तिस्रःसकन्यानिशि निर्यातारजकादिवेश्मसुकरेकृत्वातमभ्यर्चितंयांवाचंशृणुयुस्तदर्थसदृशीलोकेकिलोपश्रुतिः तन्मंत्रश्च उपश्रुतिमहादेविचांडालगृहवासिनी यथार्थंब्रूहिदेवित्वंशक्रराज्यप्रवर्धिनी १ अथकन्यावरणमुहूर्तंमत्तमयूरच्छंदसाह विश्वस्वातीति उत्तराषाढादिनक्षत्रैरुपलक्षितेकालेवस्त्रालंकारादिशब्देनखाद्यादिमधुरवस्तुभिःसहितैःफलपुष्पैःआदौकन्यांसंतोष्यतोषयित्वाऽ

नुपश्चात्कन्यावरणंहि निश्चयेनस्यात् कन्यावरयोर्लक्षणानि सामुद्रिकाध्यायादवगंतव्यानि १० अथवर वरणमुहूर्त्तमाह धरणिदेवइति धरणि
देवोब्राह्मणः पुरोहितादिः चंडेश्वरः पूर्वात्रितय माग्नेयमुत्तरात्रितयंतथा रोहिणीतत्रवरणेभगणाः शस्यतेसदा उपवीतंफलंपुष्पंवासांसिविविधा
नि च देयंवरायवरणेकन्याभ्रात्राद्विजेनवेति ११ अथकन्याविवाहकालग्रहशुद्धिंच वसंतमालिकाच्छंदसाह गुरुशुद्धिवशेनेतिकन्यानांविवाहः
षडब्दकोपरिष्टात् षड्वर्षातिक्रमानंतरंसमवर्षेषुयुग्मवर्षेषुसत्संवत्सर बडुकन्याजन्मराशेरित्याद्युक्तंगुरुशुद्धौसत्यांविवाहःशुभः अर्थात्पुरुषाणांविषम

धरणिदेवोऽथवाकन्यकासोदरः शुभदिनेगीतवाद्यादिभिःसंयुतः वरवृतिंवस्त्रयज्ञोपवीतादिनाध्रुवयुतैर्वन्हिपूर्वात्रयैराचरेत् ११ गुरुशु
द्धिवशेनकन्यकानांसमवर्षेषुषडब्दकोपरिष्टात्

वर्षेषुगोचरप्रकरणोक्तरविशुद्धौसत्यांविवाहःशुभः राजमार्तंडः तृतीयःषष्ठगश्चैवदशमैकादश
स्थितः रविःशुद्धोनिगदितावरस्यैवकरग्रहे जन्मस्थेचद्वितीयस्थेपंचमेसप्तमेपिवा नवमेभास्करेपूजांकुर्यात्पाणिग्रहोत्सवे चतुर्थेवाष्टमेचैवद्वादशेभा
स्करेस्थिते वरःपंचत्वमाप्नोतिकृतेपाणिग्रहोत्सवेइति यतउक्तम् षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंततः सोमोभुंक्तेऽथगंधर्वस्ततःपश्चाद्धुताशन
इतिव्यासः अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी दशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वला वात्स्यः द्वादशेवृषलीस्मृतेति गौरींददद्ब्रह्मलोकंसावित्रंरोहिणींद-
दत् कन्यांददत्स्वर्गलोकमतःपरमसद्गतिम् प्राप्नोतीतिशेषः अत्रयुग्मेब्देजन्मतः स्त्रीणांशुभदंपाणिपीडनमित्युक्तत्वात् पुनर्नववर्षाया

रोहिण्याअयुग्मवर्षत्वाद्विवाहनिषेधः प्राप्नोतीत्यत्रव्यवस्थामाहश्रीपतिः मासत्रयादूर्ध्वमयुग्मवर्षेयुग्मेतुमासत्रयमेवयावत् विवाहशुद्धिंप्रवदंति संतोवात्स्यादयोगर्गवराहमुख्याः इत्यतोनववर्षस्यायुग्मत्वनिषधोऽष्टवर्षानंतरंमासत्रयपर्यंतमेव तदनंतरंतुसुखेनविवाहइत्यविरोधः एवंच षष्ठवर्षानंतरंजन्मतोविषमवर्षायामासत्रयानंतरंनवमासाःशुभाः समवर्षेआद्यमासत्रयंत्रयंन्वेतिगर्भतोयुग्मवर्षइतिनिष्कृष्टोऽर्थः उभयोरिति स्त्रीपुंसयोश्चंद्रविशुद्धितोविवाहः शुभः उभयोश्चंद्रबलमावश्यकमित्यर्थः शुद्धिर्गोचरेणाभिहिता गोचरबलाभावे अष्टकवर्गादिबलंग्राह्यमित्या

रविशुद्धिवशाच्छुभोनराणामुभयोश्चंद्रविशुद्धितोविवाहः १२ मिथुनकुंभमृगालिवृषाजगेमिथुनगेपिरवौत्रिलवेशुचेः

हनारदः गोचरंवेधनंचाष्टवर्गजंरूपजंबलम् तथोत्तरंबलाधिक्यंस्थूलंगोचरमार्गजमिति व्यासः कन्यायाग्रहशुद्धिश्चदशवर्षावधिःस्मृता दशवर्षव्यतिक्रांताकन्याशुद्धिविवर्जिता तस्यास्तारेंदुलग्नानांशुद्धौपाणिग्रहोमतइति १२ अथविहितान्मासान्द्रुतविलंबितेनाहमिथुनेति अलिर्वृश्चिकः एतद्राशिगतेरवौसतितत्रापिमिथुनस्थितेरवौसतिशुचेः आषाढस्यत्रिलवेतृतीयांशे आषाढशुद्धप्रतिपदमारभ्यदशमीपर्यंतंकरपीडनंविवाहोभवति अर्थादितरराशिगेसूर्येआषाढशुद्धदशम्यनंतरंमिथुनराशिगेर्केऽपिहरिशयनेचविवाहोनस्यात् अलीति एतद्राशिगेसूर्येकार्तिकपौषमधुष्वपिकरपीडनंस्यात् वृश्चिकेकार्तिकेमकरेपौषेमेषेचैत्रेपीत्यर्थः इदंतुसौरमासग्रहणंमतम् श्रीधरोपि पौषेपिकुर्यान्मन

करस्थितेर्के चैत्रेभवेन्मेषगतेयदास्यात् प्रशस्तमाषाढकृतंविवाहंवदंति गर्गोमिथुनस्थितेऽर्केइति येतुचंद्रमासानेवाहुर्नारदादयः माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः मध्यमः कार्तिकोमार्गशीर्षोवैनिंदिताःपरेइति तेषांमतेफाल्गुनोविहितइतितत्रमीनसंक्रमणसद्भावेपिशुभः चैत्रोनिषिद्धइतिमेषसंक्रमणसद्भावेप्यशुभः तदुक्तंवृंदावने झषोननिंद्योयदिफाल्गुनेस्यादजस्तुवैशाखगतोननिंद्यः मध्वाश्रितौद्वावपिवर्जनीयाविति अजस्तुवैशाखगतोननिंद्यइतिनिर्मूलमेव वस्तुतस्तुवसिष्ठेनउभयमासविधानात्सौरचांद्रमासैक्ये उत्तमोविवाहः एकतरपक्षाश्रयेणम-

अलिमृगाजगतेकरपीडनंभवतिकार्तिकपौषमधुष्वपि १३

ध्यमः दिनाधिपेमेषवृषालिकुंभनृयुग्मनक्राख्यघटर्क्षसंस्थे माघद्वयेमाधवशुक्रयोश्चमुख्योथवाकार्तिकसौम्ययोश्चेति अथप्रसंगात्सौरचांद्रमासविधायकवचनानितेषांव्यवस्थाचलिख्यते तत्रऋष्यशृंगः विवाहव्रतयज्ञेषुसौरमानंविधीयते गार्ग्योपि विवाहोत्सवयज्ञेषुसौरमानंप्रशस्यते वृद्धगर्गः विवाहादौस्मृतःसौरोयज्ञादौसावनःस्मृतः इत्येवानादीनिसौरमासविधायकवचनानि अथचांद्रमासविधायकानि तथाचवसिष्ठः उद्वाहयज्ञोपनयप्रतिष्ठातिथिव्रतक्षौरमहोत्सवाद्यम् पर्वक्रियावास्तुगृहप्रवेशाःसर्वेहिचांद्रेणविगृह्यतेतत् नारदः यात्रोद्वाहव्रतक्षौरतिथिवर्षेशनिर्णयम् पर्ववास्तूपवासादिकृच्छ्रंचांद्रेणगृह्यतेइत्यादीनि तत्रैकतरमासावलंबनेऽपरवैयर्थ्यंस्यादित्यत्रसमाधीयते यत्रसौरचांद्रमानाभ्यांमास

ऋद्धिरुपलभ्यते सउत्तमोविवाहः एकतरपक्षाबलंबनेमध्यमइत्युक्तम् प्राक् मध्यमपक्षावलंबनंच अवश्यदेय कन्याविषयंवेदितव्यं अपरेपुनर्दैशविवाहयोः तथातापिनीकृष्णायोर्मध्येचांद्रोमासः प्रशस्यते अन्येषुसर्वदेशेषु सौरोव्रतविवाहयोः तथा विंध्याद्रेर्दक्षिणे भागेचांद्रोमासः प्रशस्यते उदग्भागेतुविंध्यस्यसौरंमानंविधीयते अन्येषुसर्वदेशेषुमिश्रमानंप्रकल्पयेदिति १३ अथमासप्रसंगाज्जन्ममासादिप्रयुक्तनिषेधविधीन् रथोद्धतयाह आद्येति यस्मिन् चांद्रेमासेजन्मसजन्ममासः जन्मतिथिमारभ्यत्रिंशत्तिथ्यात्मकोमासोजन्ममासः यत्रमासेजन्मसजन्ममासइत्युच्यते पक्षद्वयमध्येप्रथमप्रकारेणप्रतिपादितम् जन्मनक्षत्रंजन्मतिथिः समाहारद्वंद्वः जन्ममुहूर्त्तोपि तत्राद्यगर्भयोः सुतकन्य

आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौकरग्रहः नोचितोथविबुधैः प्रशस्यतेचेद्द्वितीयजनुषः सुतप्रदः १४ ज्येष्ठद्वंद्वंमध्यमं
संप्रदिष्टंत्रिज्येष्ठंचेन्नैवयुक्तंकदापि

योर्द्वयोः करग्रहोविवाहोनोचितः निषिद्धः वसिष्ठः स्वजन्ममासर्क्षतिथिक्षणेषुवैनासिकाद्यृक्षगणेषु चैवम् नोद्वाहमात्माभ्युदयाभिकांक्षीनैवाद्यगर्भद्वितयंकदाचित् एतदपवादोपि जातंदिनंदूषयते वसिष्ठइत्यादिपूर्वमुक्तम् अथेति द्वितीयजनुषोरनाद्यगर्भयोश्चेद्विवाहस्तर्हिसुतप्रदोविबुधैः पंडितैः शस्यते अत्राद्यगर्भराहित्यंसर्वथाविवक्षितं अथवाचेदनाद्यजनुषोरितिपठितव्यं तथाचच्यवनः जन्मर्क्षे जन्ममासेवातारायामथजन्मनि जन्मलग्नेभवेद्वोढापुत्राढ्यापतिवल्लभेति एतच्चानाद्यगर्भविषयम् आद्यगर्भेसाक्षान्निषेधात् १४ ज्येष्ठमासेविशेषंशालि

न्याह ज्येष्ठद्वंद्वमिति पुत्रोज्येष्ठः कन्याज्येष्ठामासोपिज्येष्ठः इत्येतत्त्रिज्येष्ठंयत् कदापिनैवयुक्तंनप्रशस्तम् ज्येष्ठमासेज्येष्ठयोर्वधूवरयोर्विवाहोनैवकार्यं इत्यर्थः यदात्वेकतरज्येष्ठत्वेज्येष्ठमासोभवतितदामध्यमंसंप्रदिष्टम् अगतिविषयकमित्यर्थः एकंज्येष्ठं अन्यद्वयमज्येष्ठंतदाशुभमेव वराहः द्वौ ज्येष्ठौमध्यमौप्रोक्तावेकज्येष्ठःशुभावहः ज्येष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतम् अस्यापवादमाह केचिदिति सत्यावश्यकत्वेसूर्यंवन्हिगंकृत्तिकास्थं त्यक्त्वाज्येष्ठमासेपिज्येष्ठवरस्यकन्यायाः विवाहः शुभइतिकेचिदूचुः एतच्चज्येष्ठापत्यस्यनज्येष्ठेइति सामान्यतोमंगलकृत्यनिषेधेपिद्रष्टव्यम् भरद्वाजः ज्येष्ठेज्येष्ठस्यकुर्वीतभास्करेचानलस्थिते सोत्सवादीनिकार्याणिदिनानिदशवर्जयेदिति अत्रज्येष्ठपुत्रदुहित्रोर्ज्येष्ठमासवत् मार्गशीर्षेपिमंगलकृत्यनिषेधमाह भरद्वाजः मार्गशीर्षेतथाज्येष्ठेक्षौरंपरिणयव्रतम् आद्यगर्भदुहित्रोस्तुयत्नेनपरिवर्जयेदिति स्वयमपिज्येष्ठापत्यस्यनज्येष्ठेकैश्चिन्मार्गेपिनेष्यतइत्युक्तंप्राक् केचिद्ग्रहणंशिष्टाचाराभावादितिसूचयितुं नैवान्योन्यमिति ज्येष्ठायाःकन्यायाःज्येष्ठपुत्रेणसहविवाहोनैवस्यात् गर्गः ज्येष्ठायाः कन्यकायाश्चज्येष्ठपुत्रस्यवैमिथः विवाहोनैवकर्तव्योयदिस्यान्निधनंतयोरिति १५ अथान्यंविशेषंहरिणीछंदसाह कृतपरिणयादिति निजकुलेइतिदेहलीदीपन्यायेनात्रापिसंबध्यते निजकुलेस्ववंशेसु तस्यपुत्रस्यपरिणयात् षण्मासांतः षण्मासमध्येसुताकरपीडनंकन्याविवाहोन

केचित्सूर्यंवन्हिगंप्रोज्झ्यचाहुर्नैवान्योन्यंज्येष्ठयोःस्याद्विवाहः १५

स्यात् नारदः पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रये नतयोर्व्रतमुद्वाहान्मंडनादपिमुंडनमिति तद्वदिति निजकुलेत्रिपुरुषमध्येपुत्रस्यकन्यायावामंडनाद्विवाहान्मुंडनंचौलोपनयनसमावर्तनादिवातद्वत् षण्मासमध्येनकार्यम् अत्रिः कुलेऋतुत्रयादर्वाग्मंडनान्नतुमुंडनम् प्रवेशान्निर्गमंचैवनकुर्यान्मंडनत्रयमिति अत्रविशेषः शार्ङ्गीये व्रतंसमावर्तनकंसचौलंकेशांतमेतानि वदंतितज्ज्ञाः क्षौरंपुरस्कृत्यभवंतियस्माच्चत्वारितस्मादिह मुंडनानि चूडासीमंतकेशांतविवाहोपनयान्बुधाः गुरुमंगलमित्याहुस्तदन्यल्लघुमंगलम् ज्येष्ठंकृत्वातुषण्मासंनकुर्याल्लघुमंगलम् कुर्वंतिमुनयःकेचिदन्यस्मिन्नपिवत्सरे लघुवामंगलंकार्यंकार्यंनैमित्तिकंहितु पुत्रोद्वाहः प्रवेशाख्यःकन्योद्वाहस्तुनिर्गमः मुंडनंचौलमित्युक्तंव्रतोद्वाहौतुमंगलम् चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परम् मौंजीतूभयतःकार्यायतोमौंजीनमुंडनम् अभिन्नेवत्सरेपिस्यात्तदहस्तत्रभेदयेत् अभेदेदिवसस्यापिनकुर्यादेकमंडपेइति एषांसमूलत्वेदेशकालसंकटेसतिबोद्धव्यम् उक्तंच एकोदरयोर्द्वयोरेकदिनोद्वाहनेभवेन्नाशः नद्यंतरएवैकेदिनेप्याहुः संकटेनचशुभम् नप्रतिषिद्धंलग्नंसंप्राप्तेसंकटेमहति एकोदरसंभवयोरेकाहेभिन्नमंडपेकालेइति नचेतिसहजयोः सोदरयोर्भ्रात्रोः सहोदरकन्यकेनदेयेनोद्वाह्ये नारदः नचैकजन्मनोःपुंसोरेकजन्येतुकन्यके नूनंकदाचिदुद्वाह्येनैकदामुंडनद्वयमिति अत्र

सुतपरिणयात्षण्मासांतः कृताकरपीडनंनचनिजकुलेतद्वद्वामंडनादपिमुंडनम् नचसहजयोर्देयेभ्रात्रोः सहोदरकन्यकेनसह
जसुतोद्वाहोब्दार्धेशुभेनपितृक्रिया १६

चकोरोऽनुक्तसमुच्चयार्थस्तेनैकस्मैवरायसहोदरकन्याद्वयमपिनदेयम् नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेतिवसिष्ठोक्तेः नसहजसुतोद्वाहोऽब्दार्धे इति सुतश्चसुतौचसुताचसुतेसरूपाणामेकशेषइत्येकशेषः सुतासुतौचपुमान्स्त्रियेत्येकशेषः सुतौचसुताचसुतेचसुतौवेतिसुताः इतिकृतेकशेषेणद्वद्वेपुमान्स्त्रियेत्येकशेषः सहजाश्चतेसुताश्चतेसुताश्चेतिकर्मधारयः तेषांसोदरभ्रातॄणांविवाहः अब्दार्धेषणमासमध्येनकार्यः उद्वाहइत्युपलक्षणम् ततश्चैकमातृजयोःपुत्रयोःकन्ययोर्वासमानसंस्कारोनकार्यइत्यर्थः वृद्धमनुः एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः नसमानांक्रियां कुर्यान्मातृभेदेविधीयते समानक्रियामुंडनादिकाभिन्नमातृजयोः समानक्रियायांनदोषः नारदः समानापिक्रियाःकार्यामातृभेदेतथैवच विवाहोदुहितुःकार्योनविवाहश्चतुर्दिनमितिभिन्नमातुर्दुहितुर्विवाहः समानक्रियायांयदिदिनचतुष्टयमध्येनकार्यइत्यर्थः वसिष्ठेनविशेषउक्तः एकोदरप्रसूतानांनात्रकार्यत्रयंभवेत् भिन्नोदरप्रसूतानांनेतिशातातपोब्रवीदिति चौलोपनयनविवाहरूपंकार्यत्रयम् आदौचौलंततोमौंजीविवाहश्चशुभप्रदः मातृभेदेबुधैरुक्तोमातुरैक्येनकर्हिचित् एवंसतिभिन्नोदरमंगलमावश्यकत्वेगृहभेदात् एकगृहेआचार्यभेदाद्वाकार्यम् वसिष्ठः द्विशोभनंत्वेकगृहेनचेष्टंशुभंतुपश्चान्नवभिर्दिनैस्तु आवश्यकंशोभनमुत्सवोवाद्वारेणवाचार्यविभेदतोवेति यमलजातयोस्त्वयमपिरनिषेधोनास्ति एकस्मिन्वत्सरेचैववासरेमंडपेतथा कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोः तत्रापिज्येष्ठानुक्रमेणकार्यम् ज्येष्ठानुक्रमस्तुगर्भोत्पत्तिकक्रमेण तथाचभागवतेतृतीयस्कंधेहिरण्याक्षहिरण्यकशिपूत्पत्तौ प्रजापतिर्नामतयोरकार्षीद्यःप्राक्स्वदेहा

द्यमयोरजायत तंवैहिरण्यकशिपुंविदुः प्रजायं तंहिरण्याक्षमसूतसाग्रतइति तथावैद्यके आत्रेयसंहितायाम् यदाविशोद्विधाभूतंबीजंपुष्पेपरिक्षरत् तदाभवेद्विधागर्भः सूतिर्वेशविपर्ययात् तेनप्रथमंजातः कनिष्ठः अनंतरंजातोज्येष्ठः अतएव यमयोश्चैवगर्भेतुजन्मतोज्येष्ठतामतेति मनुनागर्भेजन्मतइत्युक्तं जन्मज्येष्ठेनचाह्वानंसुब्रह्मण्यास्वपिस्मृतमितितुमनुवचनम् एककोशजातयमलविषयम् तथाचदेवलः यस्यजातस्ययमयोःपश्यंतिप्रथमंमुखम् संतानःपितरश्चैवतस्मिन्ज्यैष्ठ्यंप्रतिष्ठितमिति संतानोवंशः यदातुपुंसोबलातिशयाद्रेतसोद्विधापातः तदाकोशद्वयेयमलोत्पत्तिः यदातुगर्भवायुनाएकस्मिन्नेवकोशेरेतसोद्वैधीभावस्तदाएककोशेएवयुगपद्यमलंजन्यते ननुस्त्रीणांविवाहउपनयनस्थानइतिस्मृतेः कन्याविवाहस्यपुत्रोपनयनस्यचसमानत्वमितिचेन्न अष्टवर्षंब्राह्मणमुपनयेदितिवचनेब्राह्मणग्रहणात्स्त्रीशूद्राणांव्रतबंधनिषेधाच्च यतुस्त्रीणांविवाहउपनयनस्थानइत्युक्ततत्तासांद्विजत्वसिद्ध्यर्थं अतःस्त्रीविवाहोविवाहएवनतूपनयनम् तस्मात्सोदरकन्यापुत्रयोर्विवाहोपनयनयोःसमानसंस्काराभावात् षण्मासमध्येपितेकार्ये शुभेइति शुभेविवाहादिमंगलकृत्येपितृक्रियाश्राद्धक्रियानकार्या मंगलेनाप्यमंगलमितिनारदोक्तेः अमंगलंश्राद्धम् समासेएवमंगलंकार्यंनमध्येइत्यर्थः १६ अथप्रतिकूलनिर्णयमिंद्रवज्रयाह वध्ववरस्येति निश्चयोत्तरंवाग्दानानंतरंवध्वाः कन्यायाः वरस्यवाकुलेवंशेत्रिपुरुषेपुरुषत्रयमध्येकश्चनसपिंडोनाशंप्राप्नुयात् तत्रमासोत्तरंमरणदिनादारभ्यत्रिंशद्दिनंप्रतिकूलं ततःशांत्यास्वनुष्ठितयाविवाहःसुखेनइष्यते इदंपित्रादिभिन्नविषयम् मांडव्यः अन्येषांतुसपिंडानामाशौचंमाससंमितम् तदंतेशांतिकंकृत्वा

ततोलग्नंविधीयते पित्रादिमरणेतुविशेषः वरवध्वोः पितामातापितृव्यश्चसहोदरः एतेषांप्रतिकूलंचेन्महाविघ्नकरंभवेत् पितामातामहश्चैव मातावापिपितामही पितृव्यःस्त्रीसुतोभ्राताभगिनीवाविवाहिता एभिरेवविपन्नैश्चप्रतिकूलंबुधैःस्मृतम् वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः तदासंवत्सरादूर्ध्वंविवाहःशुभदोभवेत् पितुराशौचमब्दंस्यात्तदर्धंमातुरेवहि मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः अन्यच्च प्रतिकूलंसपिंडस्यमासमेकंविवर्जयेत् विवाहस्तुतयोःपश्चात्तयोरेवविधीयते दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये प्रौढायामपिकन्यायांप्रतिकू

वध्वावरस्यापिकुलेत्रिपूरुषेनाशंव्रजेत्कश्चननिश्चयोत्तरम् मासोत्तरंतत्रविवाहइष्यतेशांत्याथवासूतकनिर्गमेपरैः १७
चूडाव्रतंचापिविवाहतोव्रताच्चूडानचेष्टापुरुषत्रयांतरे वधूप्रवेशाच्चसुताविनिर्गमःषण्मासतोवाब्दविभेदतःशुभः १८

लंनदुष्यति दीर्घरोगाभिभूतस्यदूरदेशस्थितस्यच उदासवर्तिनश्चैवप्रतिकूलंनविद्यते संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेत् अथावश्यकत्वेऽपवादमाह अथवेति आशौचनिर्गमेशांत्यास्वनुष्ठितयाविवाहः परैराचार्यैः इष्यते ज्योतिःप्रकाशे प्रतिकूलेपिकर्तव्योविवाहोमासमंतरा शांतिंविधायगांदत्वावाग्दानादिचरेद्बुधः १७ अथान्यदपिविशेषांतरमुपजात्याह चूडाव्रतमिति अपिशब्दात्समावर्तनादिचौलमुपनयनंसमावर्त्तनंचविवाहानंतरंपुरुषत्रयमध्यएवनेष्टम् तथाव्रतादुपनयनात्चूडाचपुरुषत्रयपर्यंतंनेष्टा तथावध्वाः स्नुषायाः प्रवेशात्सु

तयाविनिर्गमोऽपिपुरुषत्रयपर्यंतमेवनेष्टः मेधातिथिः पुरुषत्रयपर्यंतंप्रतिकूलंस्वगोत्रिणाम् प्रवेशान्निर्गमस्तद्व त्तथामुंडनमुंडनेइति तस्मान्मूलपुरुषस्य चतुर्थत्वेनायंदोषः सचायंदोषः पुरुषत्रयोपिषण्मासपर्यंतमेव अतएवषण्मासतइतिमासषट्कानंतरंपरतोऽपिविवाहादिः शुभः एतन्मूलवाक्यं कुलेऽऋतुत्रयादर्वागित्यादिनाप्रागुक्तं अत्रापवादउच्यतेवेति अथवा अब्दभेदात् वर्षभेदात् षण्मासमध्येपिशुभः यथामाघेविवाहोवैशाखेचौलंयज्ञोपवीतंवा भवतीत्यर्थः संहितासारावल्यां फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने भेदादब्दस्यकुर्वीतनर्तुत्रयविलंघनमिति १८ अथमूलाद्यनिष्टनक्षत्रोत्पन्नयोर्वधूवरयोः श्वशुरादिपीडकत्वं वसंततिलकयाह

श्वश्रूविनाशमहिजौसुतरांविधत्तःकन्यासुतौनिर्ऋतिजौश्वशुरंहतश्च ज्येष्ठाभजाततनयास्वधवाग्रजंच शक्राग्निजाभवतिदेवरनाशकर्त्री १९

श्वश्रूविनाशमिति अहिजौआश्लेषानक्षत्रोत्पन्नौकन्यापुत्रौश्वश्र्वाः साक्षाद्वरस्यमातुः कन्यायावासाक्षान्मातुः विनाशंविधत्तःकुरुतः तथानिर्ऋतिजौमूलोत्पन्नौश्वशुरंहतः नाशयतः जनकंजननींहंतिभर्तुर्मूलाहिधिष्ण्यजेति वसिष्ठोक्तेः कुलन्यायत्वात्कन्यायामपिसाक्षान्मातरम् ज्येष्ठेति ज्येष्ठानक्षत्रोत्पन्नाकन्यास्वधवाग्रजं भर्तुर्ज्येष्ठभ्रातरंहंति शक्राग्निजाविशाखोत्पन्नादेवरस्य भर्तृकनिष्ठभ्रातुर्नाशकर्त्री उक्तंच ऐंद्रीपत्यग्रजंहंतिदेवरंतुद्विदैवजेति १९ एतदपवादमनुष्टुभाह द्वीशाद्येति स्पष्टार्थम् नहंतिदेवरंकन्यातुलामिश्राद्विदैवजा तदंतपादजात्याज्याद्दुष्टावृश्चिकपुच्छवदितिद्वंद्वनारदोक्तेः मूलेति मूलचतुर्थचरणोत्प

नौकन्यासुतौश्वशुरसौख्यदौ आश्लेषाप्रथमचरणोत्पन्नौच श्वश्वाः नारदः सुतःसुतावानियतंश्वशुरंहंतिमूलजौ तदंत्यपादजौनैवतथाश्लेषाद्यपादजाविति पुंस्त्वमविवक्षितंज्योतिर्निबंधेमौंजीबंधनानंतरंमूलाश्लेषादोषोनास्तीत्युक्तं मूलव्यालोद्भवोदोषः पुंसांमौंज्यांविनश्यतीति भूपालवल्लभवचनादिति तन्नमूलाश्लेषादोषः शूद्रविषयःपर्यवस्यति तथाज्येष्ठोत्पन्नःपुमान्पत्न्यग्रजमग्रजांवाहंति विशाखोत्पन्नश्चपत्न्यनुजमनुजांवाहंति उक्तंच कलत्रपटले पत्न्यग्रजामग्रजंवाहंतिज्येष्ठर्क्षजःपुमान् तथाभार्यानुजांचैवानुजंहंतिद्विदैवजइत्युक्तम् तत्परिहारश्चतत्रैव मूलांत्यपादजौ

द्वीशाद्यपादत्रयजाकन्यादेवरसौख्यदा मूलांत्यपादसर्पाद्यपादजातेतयोःशुभे २० वर्णोवश्यंतथातारायोनिश्चग्रहमैत्रकं गणमैत्रं
भकूटंचनाडीचैतेगुणाधिकाः २१ द्विजाझषालिकर्कटास्ततोनृपाविशोंऽघ्रिजाः वरस्यवर्णतोधिकावधूर्नशस्यतेबुधैः २२

श्रेष्ठौतथाश्लेषाद्यपादजौ द्वीशांत्यपादजौदुष्टौतद्वज्ज्येष्ठांत्यपादजाविति ज्येष्ठाविशाखोत्पन्नपुंसःदोषतत्परिहारनिरूपणंग्रंथेष्वदृष्टत्वादुपेक्ष्यम् २०
अथाष्टकूटानांनामान्यनुष्टुभाह वर्णइति एतेवर्णादिमैत्र्यांसत्यांगुणाधिकाएकादिगुणाधिकाःस्युः यथावर्णमैत्र्यामेकोगुणः वश्येद्वावित्यादि २१
तत्रादौवर्णकूटंप्रमाणिकयाह द्विजाइति मीनकर्कटवृश्चिकाद्विजाः ब्राह्मणाः ततोनंतरमन्येमेषसिंहधनूराशयोनृपाः क्षत्रियाः वृषकन्यामकराविशो
वैश्याःमिथुनतुलाकुंभाः अंघ्रिजाः शूद्राः तत्रवरवधूराश्योर्वर्णौज्ञात्वावरस्यवर्णतोब्राह्मणादिकावधूरधिकाज्येष्टवर्णाबुधैर्नशस्यते किंतुसमाही

नावाशस्यतइत्यर्थः एकोगुणः सदृग्वर्णेतथावर्णोत्तमेवरे हीनवर्णेवरेभून्येकेप्याहुः सदृशेदलमिति २२ अथवश्यकूटमिंद्रवज्रयाह हित्वेति नरराशयोमिथुनकन्यातुलाएषांमेषादयः सर्वेपिसिंहंत्यक्त्वावश्याः ननुजलचराणांसहानवस्थात् कथंवश्यत्वंतत्राह जलजास्तुभक्ष्याइति एषांनरराशीनां जलजाः मकरकुंभमीनकर्कास्तुभक्ष्याः किंपुनर्वश्याइति सूचयितंतु शब्दः सिंहस्यालिंवृश्चिकंविनासर्वेवश्याः अन्यदनुक्तंचतुष्पदानांजलचराणां वश्यावश्यंनराणांमनुष्याणांव्यवहारतोज्ञेयम् वश्यकूटंवश्यभक्ष्यवैरभेदेनत्रिधा तत्रवरराशेः स्त्रीराशौवश्येसतिगुणद्वयम् भक्ष्येएकोगुणः

हित्वामृगेंद्रंनरराशिवश्याःसर्वेतथैषांजलजाश्चभक्ष्याः सर्वेपिसिंहस्यवशेविनालिंज्ञेयंनराणांव्यवहारतोऽन्यत् २३
कन्यर्क्षाद्वरभंयावत्कन्याभंवरभादपि गणयेन्नवहृच्छेषेत्रीष्वद्रिभमसत्स्मृतं २४

वैरेगुणाभावः २३ अथताराकूटमनुष्टुभाह कन्यर्क्षादिति कन्यानक्षत्राद्वरनक्षत्रंयावद्गणयेत् तथावरनक्षत्रादपिकन्यानक्षत्रंगणयेत् ततोवशिष्टेकेनवभिर्भक्तेयदवशिष्टं तच्चेत्त्रिपंचसप्तमितंभवेत्तदाऽसदशुभंस्मृतम् अन्यथाएकद्विचतुःषडष्टनवमितंचेत्तदाशुभम् उभयत्रापित्रिपंचाद्रिमितेशेषेतत्ररामैत्रीनास्त्येवगुणाभावः एकत्रचेत्तदार्द्धमैत्रीतदासार्द्धैकोगुणः उभयत्रापिचेत्त्र्यादिशेषाभावः तदापूर्णमैत्रीगुणत्रयम् २४ अथयोनिकूटंशार्दूलविक्रीडितद्वयेनाह अश्विन्यंबुपयोरिति अश्विनीशततारकयोर्हयोऽश्वोयोनिरुक्तः एवंस्वातीहस्तयोः कासरोमहिषः लुलायोमहिषोवाहद्विषत्कासर

सैरिभाइत्यमरोक्तेः कर्णः श्रवणः अंबुपूर्वाषाढातयोर्वानरोमर्कटः चांद्रमृगः अब्जयोनिर्ब्रह्मातद्भं रोहिणीतयोरहिः सर्पः कुरंगोहरिणः अनुराधा ज्येष्ठयोः ह्रीशभंविशाखाचित्रयोर्व्याघ्रः बुध्न्यर्क्षउत्तराभाद्रपदा अर्यमोत्तराफाल्गुनीतयोर्गौर्योनिः अन्यत्स्पष्टम् फलमाह पादगयोरिति एकस्मिन्पादेचरणेगतयोरुक्तनक्षत्रयोन्योः परस्परमहावैरं भवेत् यथा अश्विन्यंबुपयोर्ह योनिगदितः स्वात्यर्कयोः कासरइतिपादः तत्रोक्तयोर्भयोन्योरश्वमहिषयोर्महावैरम् एवंसिंहहस्तिनोरित्यादि एतत्फलमाह अत्रिः एकयोनिषुसंपन्नैर्दंपत्योः संगमः सदा भिन्नयोनिषुमध्यः स्यादरिभावोनचेत्तयोः यो

अश्विन्यंबुपयोर्हयोनिगदितः स्वात्यर्कयोः कासरः सिंहोवस्वजपाद्भयोः समुदितोयाम्यांतयोः कुंजरः मेषोदेवपुरोहितानलभयोः क
र्णांबुनोर्वानरः स्याद्वैश्वाभिजितोस्तथैवनकुलश्चांद्राब्जयोन्योरहिः २५ ज्येष्ठामैत्रभयोः कुरंगउदितोमूलार्द्रयोः श्वातथामार्जारो
दितिसार्पयोरथमघायोन्योस्तथैवोंदुरुः व्याघ्रोद्वीशभचित्रयोरपिचगौरार्यम्णबुध्न्यर्क्षयोर्योनिः पादगयोः परस्परमहावैरं
भयोन्योस्त्यजेत् २६

नैरथोवैरभावः सतुकार्येवियोगदः राशिवश्यंचयद्यस्तिकारयेन्नतुदोषभाक् अत्रातिवैरवैरोदासीनमैत्रातिमैत्रक्रमेणगुणविभागः गोव्याघ्रादीनांअतिवैरंतत्रगुणाभावः शुनकमार्जारादीनांवैरं तत्रैकोगुणः अश्वमेषादीनामौदास्यम् तत्रगुणद्वयम् गोमेषादीनांमैत्रंतत्रगुणत्रयम् एकयोनौ अतिमैत्रंतत्रगुणचतुष्टयम् २५ २६ अथग्रहमैत्रीं शार्दूलविक्रीडिताभ्यामाह मित्राणीति मित्रेचेति द्युमणेः सूर्यस्यभौ

म गुरुचंद्राः मित्राणि शुक्रशनी अस्य वैरिणौ अस्य सौम्यो बुधः समः विधोः चंद्रस्य बुधरवी मित्रे पुनरस्य विधोर्द्विषत् शत्रुर्नास्ति मंगलगुरुशुक्रशनयः समाएव अथ भौमस्य गुरुचंद्रसूर्याः मित्राणि बुधः शत्रुः शुक्रशनी समौ अथ शशभृत्सूनोः बुधस्य सिताहस्करौ शुक्ररवी मित्रे अस्य बुधस्य शशी शत्रुः गुरुशनिभौमाः समाः अथ गीष्पतेर्गुरो सूर्यभौमचंद्राः मित्राणि बुधशुक्रौ शत्रू सूर्यजः शनिः समः अथ कवेः शुक्रस्य बुधशनी मित्रे चंद्रसूर्यौ शत्रू कुजगुरू

मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ सौम्यश्चाधिवसमो विधोर्बुधरवी मित्रे न चास्य द्विषत् शेषाश्चास्य समाः कुजस्य सु
हृदश्चंद्रेज्यसूर्या बुधः शत्रुः शुक्रशनी समौ च शशभृत्सूनोः सिताहस्करौ २७ मित्रे चास्य रिपुः शशी गुरुशनिक्ष्माजाः समा गीष्पतेर्मित्राण्य
र्ककुजेंदवो बुधसितौ शत्रू समः सूर्यजः मित्रे सौम्यशनी कवेः शशिरवी शत्रू कुजेज्यौ समौ मित्रे शुक्रबुधौ शनेः शशिरविक्ष्माजा द्विषोऽन्यः
समः २८ रक्षोनरामरगणाः क्रमतो मघाहिवस्विंद्रमूलवरुणानलतक्षराधाः

समौ अथ शनेः शुक्रबुधौ मित्रे रविचंद्रभौमा द्विषो वैरिणः अन्यो गुरुः समः अत्र गुणविचारः तत्रैकाधिपतित्वे परस्परमित्रत्वे पंच गुणाः सममित्रत्वे चत्वारः उभयसमत्वे त्रयो गुणाः मित्रवैरे गुणद्वयं समवैरे एक गुणः परस्परं वैरे गुणाभावः २७ २८ अथ गणकूटं वसंततिलकया शालिन्या चाह रक्षोनरेति निजनिजेति क्रमतो रक्षोनरामरगणाः पादत्रयेणोच्यंते तक्षः चित्रा राधा विशाखा मघादि एतत्पर्यंतं नक्षत्राणि रक्षोगणः पूर्वात्रयमुत्तरात्रयं विधाता रोहिणी यमो भरणी ईश आर्द्रा एतानि भानि नरग

णोमनुष्यगणः मैत्रमनुराधाअदितिः पुनर्वसुः इंदुर्मृगः हरिः श्रवणः पौष्णंरेवती मरुत्स्वातीलघूनि अश्विनीपुष्यहस्ताः एतानिनवभान्यमरगणोदेवगणइति २९ निजेति स्वस्वगणेविद्यमानयोः स्त्रीपुरुषनक्षत्रगणयोरत्युत्तमाप्रीतिः स्यात् अमरमनुजयोर्देवमनुष्ययोः स्त्रीपुरुषयोः परस्परंप्रीतिर्मध्यमास्यात् असुरमनुजयोराक्षसमनुष्ययोः स्त्रीपुरुषयोर्मृत्युरेवप्रदिष्टः प्रबलदुर्बलन्यायेनमनुष्यगणस्यैवनाशः शार्ङ्गीये रक्षोगणः पुमान्चेत्स्यात्कन्याभवति मानवी केपीच्छंतितदुद्वाहं व्यस्तं कोपीहनेच्छति एतत्तुल्यन्यायाद्देवराक्षसयोरपिद्रष्टव्यम् अस्यापवादमाहगर्गः रक्षोगणो

पूर्वोत्तरात्रयविधातृयमेशभानिमैत्रादितींदुहरिपौष्णमरुल्लघूनि २९ निजनिजगणमध्येप्रीतिरत्युत्तमास्यादमरमनुजयोःसा
मध्यमासंप्रदिष्टा असुरमनुजयोश्चेन्मृत्युरेवप्रदिष्टोदनुजविबुधयोःस्याद्वैरमेकांततोऽत्र ३० मृत्युःषडष्टकेज्ञेयोऽपत्यहानिर्नवात्मजे द्विर्द्वादशेनिर्धनत्वंद्वयोरन्यत्रसौख्यकृत् ३१

यदापुंसांकुमारीनृगणाभवेत् सद्भकूटंखगप्रीतिर्योनिशुद्धं शुभंतदेति अत्रेयंगुणकल्पना नररक्षसोर्महद्वैरं तत्रगुणाभावः देवरक्षसोर्वैरं तत्रगुणाभावः देवमनुष्यत्वेचत्वारः गणैकत्वेषड्गुणाः ३० अथराशिकूटमनुष्टुभाह मृत्युरिति स्त्रीपुरुषयोः परस्परंषष्ठाष्टमराशित्वेसति मृत्युर्ज्ञेयः एवंनवात्मजेनवपंचमेऽपत्यानांहानिः एवंद्विर्द्वादशेनिर्धनत्वंदारिद्र्यंस्यात् अन्यत्रतृतीयैकादशेचतुर्थदशमेसमसप्तमेवासति सौख्यकृत्पाणिपीडनंस्यात् ३१ अथास्यदुष्टभकूटस्यपरिहारंशार्दूलविक्रीडितेनाह प्रोक्तेइति स्त्रीपुरुषरा

श्योर्द्वयोरेकाधिपत्येसति एकस्वामिकत्वेसति प्रोक्तेदुष्टभकूटे षडष्टकादावपि विवाहः शुभो गदितः तथा मेषवृश्चिकयोः तुलावृषभयोर्वा नवपंचमे त्वेकाधिपत्याभावः द्विर्द्वादशे मकरकुंभयोः अथवा राशीश्वरयोः राशिस्वामिनोः सौहृदे मैत्रेपि यदि नाडीनक्षत्रयोः शुद्धिर्वेधो न भवेत्तदापि दुष्टकूटके विवाहः शुभः यथा षडष्टके मीनसिंहराश्योर्नवपंचमे मेषधनुषोर्द्विर्द्वादशे मीनमेषयोरित्यादि तथाच वसिष्ठः द्विर्द्वादशे वा नवपञ्चमे वा षडष्टके राक्षसयोषितावा एकाधिपत्ये भवनेशमैत्रे शुभाय पाणिग्रहणं विधेयमिति अन्यच्च विषमात्कन्यकाराशेः षष्ठं षष्ठाष्टकं न सत् समात्षष्ठं शुभं ज्ञेयं विपरीतं न शोभनम् अन्यर्क्षे-

प्रोक्तेदुष्टभकूटके परिणयस्त्वेकाधिपत्ये शुभोथोराशीश्वरसौहृदेपि गदितो नाड्यर्क्षशुद्धिर्यदि अन्यर्क्षेशपयोर्बलित्वसखिते ना
ड्यर्क्षशुद्धौ तथा ताराशुद्धिवशेन राशिवशताभावे निरुक्तो बुधैः ३२

शपयोरिति अन्यर्क्षे प्रीतिषट्काष्टकादिभ्यो ऽन्यराशौ राशिस्वामिनोः परस्परशत्रुत्वे वा सति अंशपयोस्तद्राशिनवांशस्वामिनोर्बलित्वसखिते स्याताम् बलित्वं च सखिता च प्रथमाद्विवचनांतं पदं बलित्वे उच्चादिस्थानस्थितत्वेन सबलत्वं सखिता परस्परमैत्री ते उभे चेद्भवतः तथा नाड्यर्क्षशुद्धौ नाडीनक्षत्रयोर्वेधाभावे सति तथा ताराशुद्धिवशे च सति राशिवशताभावेन राशिवश्यत्वे न च सति दुष्टभकूटकेपि विवाहः शुभो निरुक्तः उक्तं च जगन्मोहने वसिष्ठेन राशिनाथे विरुद्धेपि सबलावंशकाधिपौ तन्मैत्रे पि च कर्तव्यं दंपत्योः सुखमिच्छतेति अन्यच्च तस्मिन्नेव प्रकरणे वसिष्ठवाक्यम् राशिनाथे विरुद्धेपि मित्रत्वे चांशनाथयोः विवाहं कारयेद्धीमान्दं-

पत्योः सौख्यवर्द्धनमिति अन्यच्चतस्मिन्नेवप्रकरणेवसिष्ठवाक्येषु अन्यतरवाक्यानर्थक्यापत्तेरुपसंहारन्यायेनप्रवर्त्तते तेनावश्यंवाक्यद्वयस्य भिन्नार्थत्वंवाच्यम् तत्रकस्यकोर्थइतिसंदेहेन्यूनार्थेद्वितीयंवचनंकेवलग्रहवैरापवादकंतुल्यबलत्वात् अंशनाथसबलत्वाभिधायकंप्रथमवचनम् उभयविरोधस्यग्रहवैरराशिवैररूपस्यापवादकम् तेनराशिनाथेविरुद्धेत्यत्रराशीचनाथौच एतेषांसमाहारोराशिनाथंतस्मिन् राशिनाथे तथाचायमर्थः राशीविरुद्धौषड्डाष्टकादिना नाथौविरुद्धौकयोरित्याकांक्षायाम् ययोःषड्डाष्टकादिविचारस्तयोरेवसन्निहितत्वात् ग्रहणंतयोः

मैत्र्यांराशिस्वामिनोरंशनाथद्वंद्वस्यापिस्याद्गुणानांनदोषः खेटारित्वंनाशयेत्सद्भकूटंखेटाप्रीतिश्चापिदुष्टंभकूटं ३३

समुचितेसतिविवाहःशुभः नन्वस्मिन्वाक्येक्लिष्टव्याख्यानेकिंमानम् उच्यते अंशनाथसबलत्वस्याधिककरणमेव तच्चयुगपदुत्पन्नस्यदोषद्वैविध्यस्यराशिविरोधग्रहविरोधरूपस्यपरिहारकरूपमित्यवगम्यते अन्यस्मिन्नपिपक्षेनाडीशुद्धिस्ताराशुद्धिः राशिवशताचापेक्षिताइति ३२ अथ दुष्टानांगणकूटभकूटानांपरिहारंशालिन्याह मैत्र्यामिति स्त्रीपुरुषयोः राशिस्वामिनोर्मैत्र्यांसत्यांतथाराशिनवांशनाथयोः द्वंद्वस्यापिमैत्र्यांसत्यां दुष्टगुणानांदोषोनस्यात् अत्रिः राशीशयोःसुहृद्भावेमित्रत्वेचांशनाथयोः गणादिदोषेप्युद्वाहः पुत्रपौत्रप्रवर्द्धनः अथसद्भकूटंतृतीयैकादशादिकंखेटारित्वंगृहवैरकृतंनदोषंनाशयेत् एवमेवखेटप्रीतिः ग्रहमैत्रीचापिदुष्टंभकूटंषडष्टादिकंनाशयेत् असद्भकूटेगुणाभावःभकूटदोषापवादेचत्वारोगुणा इति ३३

अथनाडीकूटंस्रग्धरयाह ज्येष्ठारौद्रे ति ज्येष्ठारौद्रमार्द्रा अर्यमोत्तराफाल्गुनी अंभःपतिर्वरुणःशततारका एभ्योनक्षत्रेभ्योयुगयुगंद्वयम् ज्येष्ठामू उत्तराहस्तः आर्द्रापुनर्वसुः शततारापूर्वाभाद्रपदा दास्रभमश्विनीच एतन्नक्षत्रनवकंपरस्परमेकनाडीत्युच्यते पुष्यमृगचित्रानुराधाभरणीधनिष्ठापूर्वाषाढापूर्वाफाल्गुनीउत्तराभाद्रपदा एतन्नक्षत्रनवकंमध्यानाडीत्युच्यते अथवाय्वग्निव्यालविश्वोडुयुगयुगंवायुःस्वातीतद्युगंद्वयंस्वातीविशाखा अग्निःकृत्तिकारोहिणी व्यालःआश्लेषामघा विश्वोडुयुगं विश्वेउत्तराषाढाश्रवणश्च पौष्णभंरेवती एतन्नक्षत्रनवकं अपरातृतीयैकनाडीत्युच्यते एतत्फलमाह

ज्येष्ठारौद्रार्यमांभःपतिभयुगयुगंदास्रभंचैकनाडी पुष्येंदुत्वाष्ट्रमित्रांतकवसुजलभंयोनिबुध्न्येचमध्या वाय्वग्निव्यालविश्वोडुयुगयुगमथोपौष्णभंचापरास्याद्दंपत्योरेकनाड्यांपरिणयनमसन्मध्यनाड्यांहिमृत्युः ३४

दंपत्योः स्त्रीपुंसयोः एकनाड्यांपरिणयनमसत् दुष्टफलंस्यात् मध्यनाड्यांहिनिश्चयेनमृत्युर्द्वयोरपिस्यात् नारदेनतुविशेषउक्तः चतुस्त्रिद्व्यंघ्रिभोत्थायाः कन्यायाः क्रमशोश्विभात् वन्हिभादिंदुभान्नाडीत्रिचतुःपंचपर्वसु गणयेत्संख्ययाचैकनाड्यांमृत्युर्नसंशयः एकनाडीविवाहश्चगुणैःसर्वैःसमन्वितः वर्जनीयःप्रयत्नेनदंपत्योर्निधनंयतइति अमुमर्थंस्पष्टमाह गर्गः चतुष्पात्कन्यकाऋक्षंगणयेदाश्विनादिकम् त्रिभंसव्यापसव्येनभिन्नपर्वशुभावहम् कन्यकाभंत्रिपाच्चेत्स्याद्गणयेत्कृत्तिकादिकम् चतुर्भिःपर्वभिस्तद्वदभिजित्तारकान्वितम् कन्यकर्क्षंद्विपाच्चेत्स्याद्गणयेत्सौम्यभादिकम् पंचभिस्त्ववरोहेतुपंचमांगुलि

वर्जितम् आसन्नात्वेकनाडीस्यादासन्नमृतिदायिनी दूरस्थाच्चैकनाडीस्याद्दूरस्थानिष्टकारिणीति नाडीविचारेच्चंडेश्वरः पृष्ठमध्येशुभसमन्वितभोगः क्रो
डेवनितावित्तवियोगः मध्येरेखेभवतिविवाहंउभयोर्मरणंवदतिवराहः अश्व्यादिनाडीवेधर्क्षक्रमात्षष्ठद्वितीयकम् याम्यादितुर्यंतुर्यंच कृत्तिकादिद्विषष्ठक
म् अन्यच्च अर्केंदुजक्षोणितनूजजीवः केतुःसितोराहुशशांकसौराः जन्मादिनाडीत्रितयेशुभाःस्युः शुभेऽशुभंस्यादशुभेशुभंच तद्यथा अर्कः१ १० १९
बुधः२ ११ २० मंगलः ३ १२ २१ बृहस्पतिः४ १३ २२ केतुः५ १४ २३ शुक्रः६ १५ २४ राहुः७ १६ २५ चंद्रः८ १७ २६ शनिः ९ १८ २७ शुभ
ग्रहनाडीनक्षत्रेशुभकार्यंकुर्यान्नाशुभग्रहनाडीनक्षत्रेइत्यर्थः चतुर्नाडीत्वहल्यायांपांचालेपंचनाडिका त्रिनाडीसर्वदेशेषुवर्जनीयाप्रयत्नतइति मनुस्तु
अहल्येतुचतुर्नाडीसंयोगःकालमृत्युदः एषयोगोऽन्यदेशेषुअपमृत्युफलप्रदः पंचनाडीसमायोगःपांचालेकालदंडजः इतरत्रसमायोगोदुःखदारिद्र्य
दोषकृत् त्रिनाड्यांतुसमायोगःसर्वत्रानिष्टकारकइति आवश्यकत्वेगुरुः दोषापनुत्तयेनाड्यांमृत्युंजयजपादिकम् विधायब्राह्मणांश्चैवतर्पयेत्कांचना
दिना हिरणमयींदक्षिणांचदद्याद्वर्णादिकूटके गावोन्नवसनंहेमसर्वदोषापहारकमिति अन्यच्च षट्काष्टकेगोमिथुनंप्रदद्यात्कांस्यंसरूप्यंनवपंचमेपि
वस्त्रंप्रदेयंकनकंचशक्त्याद्विर्द्वादशेब्राह्मणतर्पणंचेति ३४ अथेंद्रवज्रयापूर्वमध्यापरभागयोगिनीभान्याह पौष्णेति पौष्णाद्रेवत्याःषट्भम् भानि
जात्यभिप्रायमेकवचनम् पूर्वार्द्धयोगीनिज्ञेयानि आर्द्रादिद्वादशमध्येभागयोगीनिज्ञेयानि ज्येष्ठादीनिनव अपरभागयोगीनिज्ञेयानि फलमाह भ
र्त्ताप्रियइति अयंभावः राज्ञामंतःपुरस्थस्त्रीसमागमेगणिकादिसमागमेवापूर्वार्द्धयुजिनक्षत्रेसतिस्त्रीणांभर्त्ताप्रियः मध्यभागयुजिभेपरस्परंप्री

तिर्भवेत् परेपरभागयुजिभेस्त्रीनृणांप्रियाभवेदिति एवंवधूवरयोर्नवसमागमेपिज्ञेयमितिरत्नमालाटीकायांमहादेवेनोक्तंभागमपि ३५ अथप्राच्यसंमतंवर्गकूटमार्ययाह अकचटेति अवर्गोवर्गसंज्ञकः कुचुटुतुपुइतिपंचवर्गाः एकोयवर्गोन्य शवर्गः एवमष्टौवर्गाः तत्रअवर्गः खगेशस्यगरुडस्य कवर्गोमार्जारस्यचवर्गःसिंहस्य टवर्गःशुनः तवर्गःसर्पस्य पवर्गआख्वोर्मूषकस्य यवर्गोमृगस्य शवर्गोऽवेर्मेषस्य अत्रनिजात्स्वस्मात्पंचमावैरिणोयेषांते तथोक्ताः गरुडसर्पयोःमार्जारमूषकयोः सिंहमृगयोः श्वमेषयोः परस्परंमहावैरमित्यर्थः स्त्रीपुंसयोः नक्षत्रंभस्यवर्गोच्चेत्तदा अशुभंयदात्वेकवर्गेतदाशुभम् एतच्चस्वामिसेवकयोरपिविचार्यम् ३६ इदानींनक्षत्रराश्यैक्येविशेषंशालिन्याह राश्यैक्येचेदिति द्वयोर्वधूवरयोः एकराशित्वेसति यदिभिन्नमृक्षंस्यात् तदा नाडीदोषोगणानांचदोषोनस्यात् यथा शततारापूर्वाभाद्रपदापादत्रयंच तथैवनक्षत्रैक्येराशियुग्मंराशिद्वयंचेत्स्यात्तदापिप्रागुक्तोदोषोन स्यात् यथा पूर्वाभाद्रपदापादत्रयंचतुर्थचरणश्च अत्रापिविशेषमाह गर्गः एकराशौपृथग्धिष्ण्येपुंताराप्रथमाभवेत् अतीवशोभनाप्रोक्तास्त्री

पौष्णोशशाक्राद्रससूर्यनंदापूर्वार्द्रमध्यापरभागयुग्मम् भर्ताप्रियःप्राग्युजिभेस्त्रियास्यान्मध्येद्वयोःप्रेमपरेप्रियास्त्री ३५ अ
कचटतपयशवर्गाःखगेशमार्जारसिंहश्वनाम् सर्पाखुमृगावीनांनिजपंचमवैरिणामष्टौ ३६ राश्यैक्येचेद्भिन्नमृक्षंद्वयोःस्यान्न
क्षत्रैक्येराशियुग्मंतथैव नाडीदोषोनोगणानांचदोषोनक्षत्रैक्येपादभेदेशुभंस्यात् ३७

ताराचेत्त्वशोभना अथैकराशिनक्षत्रैक्येऽपवादमाह नक्षत्रैक्येइति वधूवरयोः राश्यैक्येनक्षत्रैक्येनचयदिचरणभेदस्तदापिशुभंस्यात् जन्मनक्ष
त्राज्ञानेउपायमाह वसिष्ठः अज्ञातजन्मनांनृणांनामभेपरिकल्पना तेनैवचिंतयेत्सर्वंराशिकूटंद्विजन्मवत् जन्मभंजन्मधिष्ण्येननामभंनामधि
ष्ण्यतः व्यत्ययेनयदायोज्यंदंपत्योर्निधनप्रदमिति ३७ सेवकादिभस्यस्वाम्यादिभात्पूर्वत्वेविशेषंवसंततिलकयाह सेव्याधमर्णेतिस्पष्टार्थम् तथाचो
क्तंडामरसंग्रहे भामिनीजन्मनक्षत्राद्द्वितीयंपतिजन्मभम् नशुभंभर्तृनाशायकथितंब्रह्मयामले प्रथमंसेव्यजन्मर्क्षंद्वितीयंसेवकस्यच नसेवासुस्थिरातस्य

सेव्याधमर्णयुवतीनगरादिभंचेत्पूर्वंहिभृत्यधनिभर्तृपुरादिसद्मात् सेवाविनाशधननाशनभर्त्तृनाशग्रामादिसौख्यहृदिदंक्र
मशःप्रदिष्टम् ३८ कुजशुक्रसौम्यशशिसूर्यचंद्रजाःकविभौमजीवशनिसौरयोगुरुः इहराशिपाःक्रियमृगास्यतौलिकेंदुभतोनवांशवि
धिरुच्यतेबुधैः ३९

जलबुद्बुदवत्प्रियेति ऋणग्राहकजन्मर्क्षंप्रथमंऋणदस्यभात् द्वितीयंऋणसंबंधोनकर्तव्यःकदाचन कदाचिद्द्रव्यलोभेन
क्रियतेनैवलभ्यते पार्वतीप्राणनाथेनप्रोक्तंडामरसंग्रहे ग्रामभंप्रथमंयस्यद्वितीयंजन्मभंभवेत् नग्राह्यःसर्वथाग्रामोयतःप्राप्यार्थनाशदइति
३८ अथराशिस्वामिनोमंजुभाषिण्याह कुजशुक्रेति स्पष्टार्थम् क्रियमृगास्येति क्रियोमेषः मृगास्यंमकरः तौलिकस्तूलः इंदुभंकर्कः एभ्योराशिभ्योबु
धैर्नवांशविधिरुच्यते मेषेमेषादेव वृषेमकरात् मिथुनेतुलातः कर्केकर्कादेव एवंसिंहेमेषात् एवंकन्यादिषुमकरादिभ्यःएवमेवधनुरादिष्वपिमेषादिभ्यएव ३९

अथहोरां गायत्रीच्छंदोभेदेन शशिवदनावृत्तेनाह समगृहेति पंचदशभागमितैकैकाहोरा ततः समराशिमध्ये प्रथमाचंद्रस्य द्वितीयासूर्यस्य विषमराशिमध्ये प्रथमारवेरपराचंद्रस्येत्यर्थः ४० अथत्रिंशांशकेदृक्काणांश्च वसंततिलकयाह शुक्रेति समराशिमध्ये क्रमेण प्रथमतः पंचांशानां शुक्रः स्वामी ततः शैलांशानां सप्तानां बुधः ततोऽष्टानां गुरुः ततः पंचानां शनिः ततः पंचानां भौमः विषमभे तु अस्मात्समराशेर्विपरीतं ज्ञेयम् प्रथमतः पंचानां भौमः ततः पंचानां शनिः ततोऽष्टानां जीवः ततः सप्तांशानां बुधः ततः पंचांशानां शुक्रः अयं त्रिंशांशकसंज्ञः द्रेष्काणका इति अस्य प्रमाणं दशांशाः तत्र प्रथम

समगृहमध्ये शशिरविहोरा विषमभमध्ये रविशशिनोः सा ४०
शुक्रज्ञजीवशनिभूतनयस्य बाणाः शैलाष्टपंचविशिखाः समराशिमध्ये त्रिंशांशको विषमभे विपरीतमस्माद्दृक्काणकाः प्रथमपंचनवाधिपानाम् ४१
स्याद्द्वादशांश इह राशित एव गेहं होराथदृक्कनवमांशकसूर्यभागाः

दशांशाः प्रथमो द्रेष्काणः स प्रथमस्य स्वाधीशस्य ततो दशांशाः विंशतिभागपर्यंतं द्वितीयो द्रेष्काणः सः स्वराशितः पंचमराशीश्वरस्य ततो विंशतिविभागानंतरं दशांशास्तृतीयो द्रेष्काणः सः स्वराशेर्नवमाधीश्वरस्य यथा मेषे प्रथमद्रेष्काणो भौमस्य द्वितीयः सूर्यस्य तृतीयो गुरोरिति ४१ अथ द्वादशांशं षड्वर्गोपसंहारं च सफलं वसंततिलकयाह स्याद्द्वादशांश इति इह षड्वर्गे द्वादशांशः राशितः स्वराशेरेव सार्द्धभागद्वयात्मको ज्ञेयः मेषस्य मेषादिः वृषस्य वृषादिरित्यर्थः गेहं होरा दृक्कः नवमांशः द्वादशांशः त्रिंशांशः इमे षड्वर्गाः कथिताः एते वर्गाः सौम्यग्रहाणां चेद्भवंति तदा शुभम्

पापानांचेदशुभम् मिश्राश्चेदधिकवर्गसदृशंफलम् अत्रनारदादिभिरेकविंशतिर्महादोषाउक्ताः यथापंचांगशुद्धिरहितोमेषस्त्वाद्यःप्रकीर्तितः उदयास्तशुद्धिरहितोद्वितीयः सूर्यसंक्रमः तृतीयःपापषड्वर्गोभृगुःषष्ठः कुजोष्टमः गंडांतंकर्तरिरिःफषडष्टेंदुश्चसग्रहः दंपत्योरष्टमंलग्नंराशीर्विषघटीतथा दुर्मुहूर्तोवारदोषःखार्जूरिकसमांघ्रिभम् ग्रहणोत्पातभंक्रूरविद्धर्क्षंक्रूरसंयुतम् कुनवांशोमहापातोवैधृतावेकविंशतिरिति अन्यैस्तुदशदोषाउक्ताः वेधश्चलत्ताच तथाचपातःखार्जूरयोगंदशयोगचक्रम् पुनश्चजामित्रमुपग्रहाश्चबाणाख्यवज्रौदशचैवदोषाइति अथग्रंथकृतालक्षणस्यपृथग्वक्तव्यत्वाद्दोष

त्रिशांशकश्चषडिमेकथितास्तुवर्गाःसौम्यैःशुभंभवतिचाशुभमेवपापैः ४२ ज्येष्ठापौष्णभसार्पभांत्यघटिकायुग्मंचमूलाश्विनीपित्र्या
दौघटिकाद्वयंनिगदितंतद्भस्यगंडांतकम्

नामानिनोक्तानि तत्रपंचांगशुद्धिदुर्मुहूर्त्तवारदोषग्रहणोत्पातनक्षत्रदोषाआद्येशुभाशुभप्रकरणेनिरूपिताएवेतिपुनर्नोच्यंते दुर्मुहूर्त्तवारदोषयोः पुनरभिधानप्रयोजनंतत्रैववक्ष्यामः तत्रपापषड्वर्गाख्योदोषः कुजशुक्रेत्यादिभिश्चतुर्भिः श्लोकैर्निरूपितः ४२ अथगंडांतदोषंशार्दूलविक्रीडितेनाह ज्येष्ठापौष्णेति गंडांतंनामसंधिविशेषः सचानेकविधः नक्षत्रतिथिलग्नसंधिः तथायोगकरणवर्षायनर्तुमासपक्षदिनरात्रिमध्यान्हप्रातःसायंतिथीशसंधिश्चेति तत्रनक्षत्रतिथिलग्नसंधिर्गंडांतसंज्ञाउच्यते ज्येष्ठापौष्णभंरेवतीसार्पभमाश्लेषाएतेषामंत्यघटिकाद्वयंतथामूलाश्विनीमघानामादौघटिकाद्वयंतद्भस्यनक्षत्रस्यगंडांतंज्ञेयम् यथा रेवत्यश्विन्योराश्लेषामघयोर्ज्येष्ठामूलयोरंत

रालवर्तिघटीचतुष्टयंनक्षत्रगंडांतमशुभदमित्यर्थः अथलग्नगंडांतंकर्केतिकर्कः अलिर्वृश्चिकः अंडजोमीनः मीनोवैसारिणोऽडजइत्यभिधानात् एषांलग्नानामंततोर्धघटिका सप्तम्यर्थेतसिः अंतेर्धघटिका तथासिंहमेषौप्रसिद्धौ अश्वोधनुः एषांलग्नानांआदिगतार्धघटिकालग्नगंडांतम् यथाकर्कसिंहयोर्मीनमेषयोर्वृश्चिकधनुषोश्चांतरालवर्तिन्येकाघटिकालग्नगंडांतमशुभदमित्यर्थः पूर्णांतादिति पूर्णाःपंचमीदशमीपंचदश्यस्तासामंतेघटिकैका तथानंदाःप्रतिपत् षष्ठ्येकादश्यः तासामादिगतैकाघटिका तिथिगंडांतंनाम यथा पंचमीषष्ठ्योः दशम्येकादश्योः पंचदशीप्रतिपदोः तिथ्योरंतरालवर्तिघटीद्वयंति

कर्काल्यंडजभांततोऽर्धघटिकासिंहाश्वमेषादिगापूर्णांताद्घटिकात्मकंत्वशुभदंनंदातिथेश्चादिमं ४३

थिगंडांतमशुभमित्यर्थः एवंगंडांतसंज्ञः संधिस्तु अथान्येपिसंधयोवसिष्ठेनोक्ताः पक्षोऽब्दसंधिस्त्रिदिनंचमाससंधिस्त्रिनाड्यः खलुसंध्ययोश्च नाड्यश्चतस्रस्तिथिऋक्षयोगसंधिस्तदर्धंकरणस्यसंधिः पक्षांतेपुत्रनाशःस्यान्मासांतेतुधनक्षयः वर्षांतेवर्गनाशःस्याद्ग्रहणात्सर्वनाशनमिति आवश्यकत्वेतु नक्षत्रयोगतिथिसंधिषुनाडिकैकातिथ्यष्टविंशतिपलैः सहितोभयत्र कर्कालिमीनतनुसंधिषुदिक्पलानिवर्ज्यानिशेषविवरेषुचपंचपंचेति वासनासिद्धकेशवार्कवाक्यमनुसर्तव्यम् गंडांतपरिहारमाह वसिष्ठः गंडांतदोषमखिलंमुहूर्ताभिजिदाह्वयः हंतियद्वन्मृगंव्याधःपक्षिसंघमिवाखिलमिति ४३ अथकर्तरिदोषमनुष्टुभाह लग्नात्पापाविति यदापापग्रहौऋज्वनृजूलग्नाद्व्ययार्थस्थौद्वादशस्थः पापग्रहोऋजु

मार्गीद्वितीयस्थः पापोऽनृजुर्वक्रीस्यात्तदाकर्त्तरिनामदोषःस्यात् मृत्युदारिद्र्यशोकदाभवेत् कर्त्तरीकारकौग्रहौउभावपिवक्रिणौशीघ्रगौवातदाकर्त्तरीनेत्याह वसिष्ठः लग्नस्यपृष्ठाग्रगयोरसाध्वोःसाकर्त्तरीस्यादृजुवक्रगत्योः तौवेवशीघ्रौयदिवक्रचारौनकर्त्तरीचेतिपितामहोक्तिरिति इयंकर्तरीचंद्रस्यापिद्रष्टव्या कश्यपः चंद्रस्यकर्त्तरीतद्वच्छुभदृष्टानदोषदेति परंतुलग्नस्यचंद्रस्यवाक्रूरमध्यगतत्वदोषोस्त्येव कर्तरीतः स्वल्पफलः कन्यानाशकरत्वात् क्रूरग्रहमध्यगतेलग्नेचंद्रेथवाकरग्रहणं तेयमसदनाभिमुखंगमनंनेच्छंति कन्यायाइतिवसिष्ठोक्तेःकर्त्तरीदोषापवादमग्रेपिस्वयंवक्ष्यति

लग्नात्पापावृज्वनृजू व्ययार्थस्थौयदातदा कर्तरीनामसाज्ञेयामृत्युदारिद्र्यशोकदा ४४ चंद्रेसूर्यादिसंयुक्तेदारिद्र्यंमरणं
शुभम् सौख्यंसापत्न्यवैराग्यंपापद्वययुतेमृतिः ४५

४४ अथसग्रहदोषमनुष्टुभाह चंद्रेति सूर्ययुक्तेचंद्रेदारिद्र्यंस्यात् एवंभौमादिषुमरणादिफलंक्रमेणस्यादित्यर्थः पापद्वययोगेचंद्रस्यमृतिःस्यात् नारदादिभिबुधगुरुराहित्यफलमशुभमुक्तम् अत्रतुश्रीपतिवाक्यानुरोधात् वसिष्ठेनचकेचिन्मतेशुभत्वोक्तेश्चशुभमुक्तम् श्रीपतिः शुभंचदंभोलिभृदीज्यविद्भ्यामिति वसिष्ठः दारिद्र्यंरविणाकुजेनमरणंसौम्येननस्युःप्रजादौर्भाग्यंगुरुणासितेनसहितेचंद्रेससापत्नकम् प्रव्रज्यार्कसुतेनसद्ग्रहयुजौवांछंतिकेचिच्छुभंद्व्याद्यैर्मृत्युरसद्ग्रहैःशशियुतेदीर्घःप्रवासःशुभैरिति एतत्परिहारोनारदेनोक्तः स्वक्षेत्रगेस्वोच्चगेवामित्रक्षेत्रगतेयदि युतिदोषायनभवेद्दंपत्योःश्रेयसेतदेति४५अथाष्टमलग्नदोषंसापवाद

मनुष्टुभाह जन्मलग्नभयोरिति जन्मलग्न जन्मराशिसंबंधिनी मृत्युराशौ अष्टमराशौ विवाहः लग्ने करग्रहो नेष्ट अत्रजन्मलग्नेजन्मराशौ विवाहः नारदः जन्मराश्युद्गमेनैव जन्मलग्नोदयःशुभः तयोरुपचयस्थानं यदिलग्नगतंशुभम् अष्टमलग्नापवादमाह एकेति जन्मराशिजन्मलग्नयोरन्यतरस्यविवाहलग्नस्यस्वाम्यैक्येसति यथामेषवृश्चिकयोः तथातयोराशीश्वरयोर्मैत्रेसति यथा सिंहमीनयोः एतादृशोविषयेअष्टमलग्नदोषोनस्यात् ४६ अथोत्तरार्धोक्तमेवार्थंस्पष्टमुपजातिकयाह मीनोक्षेति उक्षोवृषःस्त्रीकन्या एतेराशयोयद्यष्टमलग्नेस्युस्तदाष्टमलग्नंदोषकृन्नभवेत् यथासिंहान्मीन

जन्मलग्नभयोर्मृत्युराशौनेष्टःकरग्रहः एकाधिपत्येराशीशमैत्रेवानैवदोषकृत् ४६ मीनोक्षकर्कालिमृगास्त्रियोष्टमंलग्नंयदानाष्टमगेहदोषकृत् अन्योन्यमित्रत्ववशेनसावधूर्भवेत्सुतायुर्गृहसौख्यभागिनी ४७ मृतिभवनांशोयदिचविलग्नेतदधिपतिर्वानशुभकरःस्यात् व्ययभवनंवाभवतितदंशस्तदधिपतिर्वाकलहकरःस्यात् ४८

इत्यादि कुतइत्यतआह अन्योन्येति परिहारांतरमाह गुरुः लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः यद्यथाष्टमलग्नोत्थदोषमाशुव्यपोहति रंध्रेशश्च शुभांशस्थस्तुंगस्वक्षेत्रमित्रगः अष्टमस्थानदोषोहि विनश्यतिनसंशय इति ४७ अथान्यदपिविचित्राच्छंदसाह मृतीति अष्टमभवननवांशोयदिलग्नेस्यादथवाष्टमलग्नेस्यात्तदाशुभकरोनस्यात् अथव्ययभवनंजन्मलग्नजन्मराशिभ्यांद्वादशभवनम् अथवाव्ययभवनांशः अथवास्वामीयदिलग्नेस्यात्तदाकलहकृत्स्यात् कश्यपः दंपत्योरष्टमेलग्नेराशौवापितदंशके तदीशेवालग्नगते

तयोर्मृत्युर्नसंशयइति तथैवद्वादशेलग्नेतदंशेवातदीश्वरे विवाहलग्नगेनैक्यंनित्यः स्यात्कलहोद्वयोरिति ४८ अथविषघटीदोषंवंशस्थाभ्यामिंद्रवज्रयाचाह खरामेति मनोरिति मूलेइति रेवती पुनर्वसूकृत्तिकामघानक्षत्रेषुखरामतः त्रिंशद्घटिकोत्तरं कृताश्चतस्रोघटिकाः विषनाडिकाशुभकार्येवर्ज्याः स्युरिति तृतीयश्लोकेनान्वयः एवंसर्वत्रव्याख्येयम् केरोहिण्याम् अजभेपूर्वाभाद्रपदायाम् तदेवषष्टिघटिकात्मकेनक्षत्रभोगेध्रुवकाउक्ताः न्यूनाधिकत्वेस्पष्टीकरणमाह अथोइति विषनाडिकाध्रुवाः खरामतइत्येवमादयः इष्टनक्षत्रभोगेननिघ्नाः खतर्कैः षष्टिभाजिताः संतः विषनाडिकाः अपिभोगेननिघ्नाः षष्ट्या-

खरामतो ३० ऽस्यादितिवान्हिपित्र्यभेखवेदतः ४० केरदत ३२ श्चसार्पभे खबाणातो ५० ऽश्वेधृतितो १८ र्यमांबुपेकृते २० ऽभगत्वाष्ट्रभविश्व
जीवभे ४९ मनो १४ ऽहिर्दैवानिलसौम्यशाक्रभेकुपक्षतः २१ शैवकरेष्टि १६ तोजभे युगाश्विनो २४ बुध्न्यभतोययाम्यभखचंद्रतो १० मित्र
भवासवः श्रुतौ ५० मूलेंगबाणा ५६ द्विषनाडिकाः कृतावर्ज्याः शुभेथोविषनाडिकाध्रुवाः निघ्नाभभोगेनखतर्कै ६० भाजिताः स्फुटा-
भवेयुर्विषनाडिकास्तथा ५१

भाज्यालब्धाः स्पष्टाभवेयुरित्यर्थः परिहारमाह गुरुः चंद्रोविषघटीदोषंहंतिकेंद्रत्रिकोणगः लग्नंविनाशुभैर्दृष्टः केंद्रेवालग्नपस्तथेति विषनाड्युत्थितंदोषंहंतिसौम्यर्क्षगः शशी मित्रदृष्टोथवास्वीयवर्गस्थोलग्नपोऽपिवेति दैवज्ञमनोहरे तिथिवारविषघटिकाउक्ताः तिथीषुनागाद्रिगिरीषुवारिधिर्गजाद्रिदिक्पावकदिग्विभास्कराः मुनीभसंख्यः प्रथमातिथेः क्रमात्परंविषंस्याद्घटिकाचतुष्टयम् १५ ५ ८ ७ ७ ५ ४ ८

७ १० ३ १० १२ ७ ८ नखाद्रयंद्वादशदिक्चशैलाबाणाश्चतत्त्वानियथाक्रमेण सूर्यादिवारेषुपरंचतस्त्रोनाड्योविषंस्यात्खलुवर्जनीयम् २० २ १२ १० ७ ५ २५ ॥ ४९ ५० ५१ अथदुर्मुहूर्त्तदोषंविवक्षुरादौदिवामुहूर्त्तान्मालिनीछंदसाह गिरिशेति अथबाणचंद्राइत्युक्तेदुर्मुहूर्तस्यापार्थक्येनलक्षणंनोक्तम् इंद्रानलौइंद्राग्नीएतेवासरेपंचदशमुहूर्त्ताःस्युः ५२ रात्रिमुहूर्त्ताननुष्टुभाह शिवइति प्रथममुहूर्तस्वामीशिवएवअजोजपादादष्टौभेशाःनक्षत्र

गिरिशभुजगमित्राःपित्र्यवस्वंबुविश्वेभिजिदथचविधातापींद्रइंद्रानलौच निर्ऋतिरुदकनाथोप्यर्यमाथोभगःस्युःक्रमशइहमुहूर्तावासरे बाणचंद्राः ५२ शिवोजपादादष्टौस्युर्भेशाअदितिजीवकौ विष्ण्वर्कत्वाष्ट्रमरुतोमुहूर्त्तानिशिकीर्तिताः ५३ रवार्यमाब्रह्मरक्षश्चसोमेकुजेवन्हिपित्र्येबुधेचाभिजित्स्यात् गुरौतोयरक्षोभृगौब्राह्मपित्र्येशनावीशसार्पौमुहूर्त्तानिषिद्धाः ५४ निर्वेधैःशशिकरमूलमैत्र्यपित्र्यब्राह्म्यांत्योत्तरपवनैःशुभोविवाहः रिक्तामारहिततिथौशुभोन्हिवैश्वप्रांत्यांघ्रिःश्रुतितिथिभागतोभिजित्स्यात् ५५

स्वामिनोमुहूर्त्तेशाःस्युः यथा अजपादः अहिर्बुध्न्यः पूषाअश्विनौयमः अग्निः ब्रह्मासोमइत्यष्टौ ततोदशममुहूर्त्तोदितिः जीवोगुरुः विष्ण्वर्कत्वाष्ट्रमरुतः प्रसिद्धाः एतेसर्वेनिशिमुहूर्त्ताःप्रकीर्तिताः अन्हःपंचदशोभागोमुहूर्त्तोथतथानिशीतिकश्यपोक्तेः ५३ अथदुर्मुहूर्त्तानशुभंगप्रयातेनाह रवावर्यमेतिरवौअर्यमामुहूर्त्तोनिषिद्धः एवंसोमेब्रह्मरक्षः द्वंद्वैकत्वम् ब्रह्मरक्षःस्वामिकौमुहूर्त्तौनिषिद्धौ अन्यत्स्पष्टम् ५४ अथवेधंविवक्षुर्विहितनक्षत्रादिकमभिजिन्मानंचप्रहर्षिण्याह निर्वेधैरिति

वेधरहितैर्मृगादिनक्षत्रैः विवाहः शुभः रिक्तेति रिक्तामा ४ ९ १४ ३० आभिर्वर्जिततिथिषु शुभेन्हि शुभग्रहवारेविवाहः शुभः अभिजिल्लक्षणमाह अथवैश्वेति वैश्वमुत्तराषाढातस्यप्रांत्यांशश्चतुर्थचरणः श्रुतेः श्रवणस्यतिथिभागः पंचदशांशोमिलित्वाभिजिद्भागःस्यात् ५५ अथवेधदोषंपंचदशलाकाचक्रोद्धारनैरपेक्ष्यंस्पष्टं शार्दूलविक्रीडितेनाह वेधोन्योन्यमिति विरिंच्यभिजितोः रोहिण्यभिजितोर्ग्रहकृतोवेधोऽन्योन्यंपरस्परंभवेत् रोहिणीस्थेग्रहेऽभिजितिरोहिणीविद्धा एवंसर्वत्रव्याख्येयम् चरणवेधमाह खेटइति तत्रतस्मिन्नक्षत्रेविद्यमानेग्रहेसति यदिचतुर्थपादेस्तितदापरनक्षत्रस्यप्रथमपादस्यवेधः

वेधोन्योन्यमसौविरिंच्यभिजितोर्याम्यानुराधर्क्षयोर्विश्वेंद्वोर्हरिपित्र्ययोर्ग्रहकृतोहस्तोत्तराभाद्रयोः स्वातीवारुणयोर्भवेन्निर्ऋतिभादित्योस्तथोपांत्ययोः खेटेतत्रगतेतुरीयचरणाद्योर्वातृतीयोद्वयोः ५६ शाक्रेज्येशतभानिलेजलशिवेपौष्णार्यमर्क्षेवसुद्वीशेवैश्वसुधांशुभेहयभगेसार्पानुराधेमिथः

यदितृतीयपादे तदाद्वितीयचरणस्यवेधः यवंयदाद्वितीयपादे तदातृतीयपादस्यवेधः यदिप्रथमपादे तदाचतुर्थपादस्यवेधइत्यर्थः अयंचरणवेधः सौम्यग्रहपरएव नारदः पादमेवंशुभैर्विद्धमशुभैर्नैवकृत्स्नतइति क्रूरविद्धंयुतंधिष्ण्यंक्रूराक्रांतंचकृत्स्नमशुभम् मणिहेममयंहर्म्यंभूताक्रांतमिवत्यजेदिति श्रीपतिः वधूप्रवेशनेदानेवरणेपाणिपीडने वेधःपंचशलाकाख्योऽन्यत्रसप्तशलाककइति ज्योतिर्निबंधे गर्गः मघायाः प्रथमेपादे मूलस्यप्रथमेतथा रेवत्याश्चचतुर्थांशेविवाहःप्राणनाशनइतितद्गंडांतरंज्ञेयम् ५६ अथविवाहादन्यत्रयज्ञोपवीतादौकेचि-

विवाहेपिसप्तशलाकाचक्रवेधोवर्ज्यैउक्तस्तदर्थंवक्रन्यासंविनैवसप्तशलाकावेधंशार्दूलविक्रीडितेनाह शाकेज्येइति कुभृद्रेविकेसप्तशलाकाचक्रेशाकेज्यज्येष्ठापुष्यनक्षत्रेमिथः परस्परंक्रूराधिष्ठितत्वेविद्धेज्ञेयम् एवंजलशिवेपूर्वाषाढार्द्राइत्यादिव्याख्येयम् दीपिकायाम् यस्याःशशीसप्तशलाकचक्रेपापैरपापैरथवाविवाहे उद्वाहवस्त्रेणसुसंवृतागीश्मशानभूमिंरुदतीप्रयातीति ५७ अथक्रूराक्रांतादिदोषंसापवादमनुष्टुभाह ऋक्षाणीति क्रूरग्रहैर्विद्धानितथाक्रूरैर्मुक्तानित्यक्तानि आदिशब्दात्क्रूरयुतानिक्रूरगंतव्यानिचकारात्त्रिवेधोत्पातदूषितानिचनक्षत्राणितानियदिचंद्रेणभुक्त्वा मुक्ता-

हस्तोपांतिमभेविधातृविधिभेमूलादितोस्त्राष्टुभाजांध्रीयाम्यमघेकृशानुहरिभेविद्धेकुभृद्रंरविले ५७ ऋक्षाणिक्रूरविद्धानिक्रूर
मुक्तादिकानिच भुक्त्वाचंद्रेणमुक्तानिशुभार्हाणिप्रचक्षते ५८ ज्ञराहुपूर्णेंदुसिताःखपृष्ठेभंसप्तगोजातिशरैर्मितंहि संलक्षयंतेऽर्क
शनीज्यभौमाःसूर्याष्टतर्काग्निमितंपुरस्तात् ५९

नितदाशुभार्हाणिशुभकर्मार्हाणिविवाहादौयोग्यानिबुधाःप्रचक्षतेकथयंति ५८ अथलत्तादोषमुपजातिकयाह ज्ञराद्विति गोनवजातयोद्वाविंशतिःशराःपंच एतैर्मितंभंस्वाक्रांतनक्षत्रात् ज्ञराहुपूर्णेंदुसिताः स्वपृष्ठेसंलक्षयंते यथाबुधः सप्तमंराहुर्नवमं राहोः सदावक्रगतत्वान्नवमगणनाक्रमेणैवकार्या यथाश्विन्यांराहुराश्लेषांलक्षयतीति पूर्णेंदुः पूर्णिमांतचंद्रोद्वाविंशम् तच्चकृष्णपक्षेपंचम्यादितिथौनभवति शुक्रः पंचमंस्वपृष्ठेलक्षयतीत्यर्थः अर्कशनीज्यभौमाः क्रमेणपुरस्तादग्रेसूर्याष्टतर्काग्निमितंसंलक्षयंते यथा सूर्यःस्वाक्रांतनक्ष

त्राद्वादशम् शनिरष्टमम् गुरुः षष्ठम् भौमस्तृतीयमृनक्षत्रं अग्रतोलत्तयंतीत्यर्थः वराहः रविलत्तावित्तहारीनित्यंकौजीविनिर्दिशेन्मरणम् चांद्रीनाशंकुर्याद्बौधीनाशंवदत्येव सौरीमरणंकथयतिबंधुविनाशंबृहस्पतेर्लत्ता मरणंलत्ताराहोः कार्यविनाशंभृगोर्वदंतीति ५९ अथपातदोषंपथ्यार्ययाह हर्षणेति व्यतीपातकइतिस्वार्थेकः हर्षणेत्यादि षड् योगानांमंतेयन्नक्षत्रंभवेत् तत्पातेनचंडीशचंडायुधाख्येननिपातितंस्यात् ६० अथक्रांतिसाम्यापरपर्यायंमहापातदोषंशालिन्याह पंचास्येति पंचास्याजौसिंहमेषौअन्येप्रसिद्धाः एषुराशिषुपाठक्रमेणव्युत्क्रमेणावस्थितयोश्चंद्रभान्वोः क्रांतिसाम्यंनिरुक्तंतन्मंगलेषुनोशुभंस्यात्

हर्षणवैधृतिसाध्यव्यतीपातकगंडशूलयोगानाम् अंतेयन्नक्षत्रंपातेननिपातितंतत्स्यात् ६० पंचास्याजौगोमृगौतौलिकुंभौकन्या
मीनौकर्क्यलीचापयुग्मे तत्रान्योन्यंचंद्रभान्वोर्निरुक्तंक्रांतेःसाम्यंनोशुभंमंगलेषु ६१ व्याघातगंडव्यतिपातपूर्वशूलांत्यवज्रेपरिघा
तिगंडे योगेविरुद्धेत्वभिजित्समेतःखार्जूरमर्काद्विषमेशशीचेत् ६२

अनेनक्रांतिसाम्यसंभवमात्रंसूचितम् तदानयनसूर्यसिद्धांताद्रामविनोदाद्वास्पष्टंज्ञेयम् ६१ अथखार्जूरदोषंसुबोधमिंद्रवज्रयाह व्याघातेति अंत्योवैधृतिः यस्मिन्दिनेव्याघातादिकेविरुद्धेदुष्टेयोगेसति अर्कादर्कनक्षत्रात् शशीचंद्रोऽभिजित्समेतोविषमेविषमसंख्याकेननक्षत्रेस्यात् तदाखार्जूराख्योदोषःस्यात् यदासमेस्यात्तदानदोषइत्यर्थः एकार्गलोदृष्टिपातश्चाभिजिद्रहितानिवैइतिकश्यपेनात्राभिजिद्गणनानिषिद्धा केशवार्कत्रिविक्रमादिभिरंगीकृतेतिउभयवचनप्रामाण्याद्विकल्पः ६२ छ छ

अथोपग्रहदोषमुपेंद्रवज्रयाह शराष्टेति सूर्यभतः सूर्याक्रांतनक्षत्रादब्जताराः चंद्रनक्षत्राणि पंचाष्टदशचतुर्दशसप्तैकोनविंशतिः पंचदशाष्टादशैकविंशतिद्वाविंशतित्रयोविंशतिचतुर्विंशतिपंचविंशतिसंख्याकाश्चेत् स्युस्तदाउपग्रहोपनामकादोषाः स्युः प्रकृतिरेकविंशतिः एषांदेशभेदेनपरिहारमाह शुभानेति कुरुदेशेबाल्हिकदेशेशक्रभान ६३ अथप्रसंगात्पातोपग्रहलत्तास्वपवादमर्धयामंचानुष्टुभाह पातेति पातश्चंडीशचंडायुधाख्योदोषः उपग्रहाः प्रागुक्ताः लत्ताज्ञराहुपूर्णेंदुसितेत्यादिनालत्ता तत्रखेटपत्समः ग्रहचरणतुल्यः नक्षत्रचरणोनेष्टः अयमर्थः उपग्रहेपातेरविर्यस्मिन्चरणेस्यात्तत्संख्य एवतस्यचरणोवर्ज्योनान्यः लत्तायांतुलत्ताकारीग्रहोयत्रचरणेस्यात्तत्समसंख्य एवचरणंलक्षितनक्षत्रस्यवर्ज्योनान्यः उक्तंच उपग्रहेषुलत्तायांतथाचंडायुधाह्वये ग्रहोस्तियत्प्रमाणांशेविद्धांशस्तत्प्रमाणकइति अयंपरिहारः खार्जूरिकेपिद्रष्टव्यः सूर्योयस्मिन्पादेभवेत् तत्समसंख्य एवचरणएकरेखावस्थितचंद्रनक्षत्रस्यवर्ज्यइतिखार्जूरिकसमांघ्रिभमित्युक्तत्वात् वारइति इष्टोवारस्त्रिघ्नः अष्टभिस्तष्टः शेषितोयोंकः सैकः सोर्धयामोदोषःस्यात् कश्यपः शैलास्सश्रुतयः ७ ५ ४ सूर्येचंद्रेषड्वेदपर्वताः ६ ४ ७ भौमेबाणाग्निनेत्राणि ५ ३ २ सौम्येवेदाक्षिवायवः ४ २ ५ गुरुवारेग्निचंद्रेभाः ३ १ ८ शुक्रेनेत्राद्रिवन्हयः २ ७ ३ शनौचंद्रेभतर्काः १ ८ ६

शराष्टदिक्शक्रनगातिधृत्यस्तिथिर्धृतिश्चप्रकृतेश्चपंच उपग्रहाः सूर्यभतोऽब्जताराःशक्रभानदेशेकुरुबाल्हिकानाम् ६३ पातोपग्रहलत्तासुनेष्टोंऽघ्रिः खेटपत्समः वारस्तिघ्नोऽष्टभिस्तष्टः सैकः स्यादर्धयामकः ६४

स्युः कुलिकोयमघंटकः अर्द्धप्रहरसंज्ञांस्तान्मंगलेषुविवर्जयेत् निधनंप्रहरार्द्धेतुनिःसत्वंयमघंटके कुलिकेसर्वनाशःस्याद्रात्रावेतेनदोषदाइति ६४ अथकुलिकमनुष्टुभाह शक्रेति रविमारभ्यसर्ववारेषुक्रमादुक्तसंख्यास्तिथ्यंशामुहूर्त्ताः कुलिकाः स्युः यथादिनेरवौ १४ चंद्रे १२ भौमे १० बुधे ८ गुरौ ६ शुक्रे ४ शनौ २ रात्रावेतेनिरेकाः कार्याः यथा रवौ १३ चं॰ ११ भौ॰ ९ बु॰ ७ गु॰ ५ शु॰ ३ श॰ १ शनौतु अंत्योपिरात्रेः पंचदशोपिमुहूर्त्तः कुलिकः एतेनिंदिताः एतेषामर्धयामादिदोषाणांपुनर्निरूपिणांविवाहे अवश्यवर्ज्यत्वार्थंशीघ्रोपस्थित्यर्थंचेतिकुलिकापवादेगुरुः वारेशेसबलेवापिबलाढ्येलग्नगेशुभे कुलिकोदयदोषस्तु

शक्रार्कदिग्वसुरसाब्ध्यश्विनः कुलिकारवेः रात्रौनिरेकास्तिथ्यंशाः शनौचांऽत्योपिनिंदिताः ६५ चापात्यगेगोघटगेपतंगेकर्काजगेस्त्रीमिथुनेस्थितेच सिंहालिगेनक्रधटेसमाःस्युस्तिथ्योद्वितीयाप्रमुखाश्चदग्धाः ६६

विनश्यतिनसंशयः वाराधीशेबलोपेते विधौवाबलसंयुते अर्धप्रहरसंभूतोदोषोनवात्रविद्यते शुभेकेंद्रगतेचंद्रेशुभांशेवाशुभेक्षिते लग्नगेसबलेवापिकुलिकस्तुविलीयते अर्धप्रहरपूर्वार्द्धंमध्यंतुयमघंटजम् कुलिकांत्यांशेशुभमाचरेदिति ६५ अथदग्धतिथ्याख्यदोषमिंद्रवज्रयाह चापांत्येति तत्तद्राशिद्वयस्थितेपतंगेसूर्येद्वितीयाप्रमुखाउभयपक्षसाधारणासमाः संख्याकास्तिथ्योदग्धाः स्युः यथा धनुर्मीनगतेसूर्येद्वितीयादग्धा वृषकुंभगेकेंचतुर्थीकर्कमेषगेषष्ठीकन्यामिथुनगेऽष्टमी सिंहवृश्चिकगेदशमी तुलामकरगेर्केद्वादशेदग्धाइत्यर्थः मासदग्धाश्चतिथोमध्यदेशेविवर्जिताइतिपरिहारः ६६ अथजामित्रदोषंत्र

मरविलसितेनाह लग्नादिति विवाहलग्नाच्चंद्राद्वासप्तमभवनगते ग्रहे परिणयनंनस्यात् अस्यापवादः किंवेति ग्रहाधिष्ठितनवांशमारभ्य बाणांशुग ५५ मितलवगे पंचपंचाशन्मितनवांशगे चंद्रे लग्ने वा जामित्रं सूक्ष्मं स्यात् यथा मेषे पंचमनवांशे भौमोस्ति तस्मात्तुलायां पंचमनवांशस्थचंद्रो निषिद्धोऽन्येष्टौ नवांशाः शुभाः एवंविधं सूक्ष्मजामित्रमिदमशुभकरं स्यात् अस्यापवादो व्यवहारोच्चये स्वोच्चे यद्वा स्वभवने स्फुरदंशुजालः सौम्यालये हितगृहे शुभवर्गगो वा जामित्रकादिपरिसंचितदोषराशिं हत्वा ददाति बहुशः सुखमेव चंद्र इति ६७ अथैकार्गलादिदोषाणामपवादं साक्षाद्वसिष्ठवचनमेवेंद्रवज्रयाह

लग्नाच्चंद्रान्मदनभवनगे खेटे न स्यादिह परिणयनम् किंवा बाणांशुगमितलवगे जामित्रं स्यादशुभकरमिदम् ६७ एकार्गलोपग्रहपातलत्ता जामित्रकर्त्तुर्युदयास्तदोषाः नश्यंतिच्चंद्रार्कबलोपपन्नो लग्ने यथार्काभ्युदये तु दोषाः ६८ उपग्रहर्क्षे कुरुबाल्हिकेषु कलिंगवंगेषु च पातितंभम् सौराष्ट्रशाल्वेषु च लत्तितं भं त्यजेत्तु विद्धं किल सर्वदेशे ६९

एकार्गलेति चंद्रार्कबलोपपन्ने स्वोच्चे मित्रादिराशिस्थितत्वरूपे च सति एकार्गलादयो दोषा नश्यंति यथार्काभ्युदये दोषा रात्रिर्नश्यति ६८ अथ केषांचिद्दोषाणां देशविशेषेण परिहारमुपजात्याह उपग्रहर्क्षमिति स्पष्टार्थम् अन्यच्च लत्तामालवके देशे पातः कौसलके तथा एकार्गलं तु काश्मीरे वेधं सर्वत्र वर्जयेत् युतदोषो भवेद्गौडे जामित्रस्य च यामुने वेधदोषस्तु विंध्याख्ये देशे नान्येषु केचनेति ६९ अथ दशयोगदोषमुपजात्याह शशांकेति वेद्यादिचंद्रसूर्यनक्षत्रयोर्युते योगात् भैः सप्तविंशतिभिर्भक्ताद्यः शेषस्तस्मिन् शून्यैकचतुः

षट्दशैकादश पंचदशाष्टादशैकोनविंशतिविंशतिसंख्याकेसति एतेंऽकाः दशादशयोगसंभवाभवंति शिष्टानांदशानामंकानामभिहितत्वाद्दशयोगइ
त्यन्यथासंज्ञा ७० अथदशयोगफलंतदपवादंचशार्दूलविक्रीडितेनाह वाताभ्रेति शून्येशेषेवातदोषःस्यात् एकशेषेऽभ्रात् चतुःशेषेऽग्नेः षट्शे
षेमहीपात् दशशेषेचोरात् एकादशसुमरणम् पंचदशसुरुक् अष्टादशसुवज्रम् एकोनविंशेषुवादःकलिःसंकटकइत्यर्थः विंशतिशेषेक्षतिःद्रव्य
नाशः अथापवादः योगांकइति खंभूयुगादिरूपेयोगांकेसमेयुग्मसंख्याकेसति दलिते अर्धीकृतेमनुभिश्चतुर्दशभिर्युक्तेयोंकःस्यात् तद्दास्राश्विनी

शशांकसूर्यर्क्षयुतेभशेषेखंभूयुगांगानिदशेशतिथ्यः नागेंदवोंकेंदुमितानखाश्चेद्भवंतिचैतेदशयोगसंज्ञाः ७० वाताभ्राग्निमही
पचोरमरणंरुग्वज्रवादक्षतियोगांकेदलितेसमेमनुयुतेऽथोजेतुसैकेऽर्धिते

तोभंनक्षत्रंस्यात् अथौजेतुसैकेऽर्धिते योगांकेओजेविषमे
सैके अर्धिते अश्विनीतः भंनक्षत्रंस्यात् यथा समांकाः दशअर्धिताः ५ मनु १४ युतः १९ मूलंनक्षत्रंजातम् ओजांकेयथा विषमांके १५ योगः सैकः १६
अर्धितम् ८ पुष्यनक्षत्रंजातं अथानंतरंमुनिभिः संमिताश्चतुर्दशरेखास्तिर्यक्क्रमात्संलिखेत्ततः अनेनप्रकारेणयन्नक्षत्रमागतंततआरभ्यसा-
भिजिन्नक्षत्रवृंदं अस्मिंश्चक्रेलेख्यंतन्नक्षत्रेग्रहाः स्थाप्याः दिननक्षत्रेचंद्रः स्थाप्यः ततएकरेखास्थयोः ग्रहचंद्रयोः परस्परावलोकनरूपोवेधोनशु
भदः उक्तंचज्योतिःसारसागरे तिथ्यंगवेदैकदिगूनविंशन्यूनंभवाष्टादशविंशसंख्याः इष्टोडुनासूर्ययुतोडुनाचयोगादमीचेद्दशयोगदोषाः मरुन्मेघाग्नि

भूपालचौरमृत्युरुजोशनिः कलिर्हीनिर्दशदोषास्त्याज्याःस्युः सर्वथाबुधैः योगांकेविषमेसैकेसमेसवसुलोचने दलीकृताश्विनीपूर्वंदशयोगमुदाहृ तम् दशयोगेमहाचक्रेप्रमादाद्यदिविध्यते क्रूरैःसौम्यग्रहैर्वापिदंपत्योरेकनाशनमिति दशयोगापवादांतरमाह भरद्वाजः गुरौलग्नाधिपेशुक्रेसवीर्येलग्नकेंद्रगे दशदोषाविनश्यंतियथाग्नौतूलराशयः व्यासः गुरुणाभृगुणावापिसंयुतेदृष्टमेवच दशयोगसमायुक्तमपिलग्नंशुभावहम् ७१ अथपंचकाख्यंबाणदोषंशालिन्याह लग्नेनेति शुक्लपक्षादिकास्तिथयोवर्तमानलग्नेनाढ्याःयुक्ताः अंकैर्नवभिस्तष्टाः शेषेनागसंख्ये अष्टसंख्येरोगाख्योबाणः एवंद्विसंख्येशेषेवन्ह्याख्यः चतुःसंख्येराजाख्यः षट्संख्येचौराख्यः एकसंख्येमृत्युसंज्ञोबाणश्चएतेबाणाः दाक्षिणात्येषुमहाराष्ट्रेषुप्रसिद्धाः ७२ अथव्यासमतेनबाणंसापवादंमालिन्याह रसगुणेति रसगुणशशिनागाब्धिभिराढ्याचासौसंक्रांतिर्यातांशकमितिश्चेतिकर्मधारयः सूर्यभुक्तांशानांमितिः संख्यापंचधास्थाप्याकलादिकमुपेक्ष्यंक्रमेणषट्त्र्येकाष्टचतुर्भिराढ्यासंयोज्यांकैर्नवभिस्तष्टासति यदापंचशेषायस्मिन्स्थ

भंदास्त्राद्थसंमितास्तुमनुभीरेखाःक्रमात्संलिखेद्धोस्मिन्ग्रहचंद्रयोर्नशुभदःस्यादेकरेखास्थयोः ७१ लग्नेनाढ्यायाततिथ्योंकतष्टाःशेषेनागद्व्यब्धितर्केंदुसंख्ये रोगोवन्हीराजचौरौचमृत्युर्बाणश्चायंदाक्षिणात्यप्रसिद्धः ७२ रसगुणशशिनागाब्ध्याढ्यसंक्रांतियातांशकमितिरथतष्टांकैर्यदापंचशेषाः रुगनलनृपचोरामृत्युसंज्ञाश्चबाणोनवहृतशरशेषेशेषकैक्येचशल्यः ७३

लेपंचशिष्यंतेतत्क्रमेणरुगादिबाणोज्ञेयः यथा आदौपंचशेषेरोगबाणः द्वितीयेपंचशेषेऽग्निबाणः तृतीयेराजबाणः चतुर्थेचोरबाणः पंचमेमृत्युबाणः तस्माद्द्वयं भवतीत्यर्थः अयंबाणः शल्यसहितः तेनस्वल्पदोषः तदपवादभूतः सशल्योबाणउच्यते नवेति यानिप्रागागतानिशेषाणि तेषामैक्येनवहृतेपश्चाच्छरशेषेसतिसशल्य सहितोबाणःस्यात् पंचव्यतिरिक्तशेषेशल्यरहितोदुष्टइत्यर्थः अन्यैस्तु तिथिवारभलग्नांकोरसाग्न्यब्ध्याष्टवेदयुक्नंदाप्तपंचशेषेरुग्वन्हिराट्चोरमृत्युकृदिति ७३ अथसमयभेदेनवारभेदेनकर्मभेदेनचत्रिविधंबाणपरिहारंशार्दूलविक्रीडितेनाह रात्रौचोरेति चौ

रात्रौचोररुजौदिवानरपतिर्वन्हिः सदासंध्ययोर्मृत्युश्चाथशनौनृपोविदिमृतिर्भौमेऽग्निचौरौरवौ रोगोथव्रतगेहगोपनृपसेवाया
नपाणिग्रहेवर्ज्याश्चक्रमतोबुधैरुगनलक्ष्मापालचौरामृतिः ७४

ररुजौबाणौरात्रौत्याज्यौ दिवानरपतिः राजबाणस्त्याज्यः वन्हिबाणः सदादिवारात्रौत्याज्यः संध्ययोःसायंप्रातः संध्ययोः मृत्युबाणस्त्याज्यः ज्योतिःप्रकाशे रोगंचौरं त्यजेद्रात्रौदिवाराजन्यपंचकम् संध्ययोर्मृत्युदंत्याज्यंसर्वदावन्हिपंचकमिति अथवारभेदेनपरिहारः अथेति शनिवारेनृपबाणः विदिबुधवारेमृतिबाणः भौमेऽग्निचौरौबाणौ रवौरोगबाणस्त्याज्यः उक्तंच रवौरोगंकुजेवन्हिंशनौचनृपपंचकम् वर्ज्यंपुनःकुजेचोरंबुधवारेचमृत्युदम् अथकार्यभेदेनपरिहारः अथेति क्रमत एषुशुभकर्मसुएते बाणाःवर्ज्याः यथाव्रतेयज्ञोपवीतेरुक् गृहस्याच्छादनेऽग्निःनृपसेवायांराजबाणःयानेचोरःपाणिग्रहेमृतिर्बाणोवर्ज्यःउक्तंच नृपाख्यंनृपसेवायांगृहगोपेऽग्निपं

चकम् यानेचौरंव्रतेरोगंत्यजेन्मृत्युंकरग्रहइति ७४ अथग्रहदृष्टिमुपजातिकयाह त्र्याशमिति येखेटाः यस्मिन्स्थानेस्थिताः तस्मात् कथ्यमानानि स्थानानिचरणाभिवृद्ध्यापश्यंति तद्यथा त्र्याशंतृतीयदशमंच एकचरणदृष्ट्यापश्यंति अनेनतत्तद्ग्रहोद्भवफलंचरणाभिवृद्ध्यैव भवतीतिसूचितम् मंदइति मंदः शनैश्चरः स्वस्थानात् त्र्याशंसंपूर्णदृक्चतुश्चरणदृष्टिः एवंगुरुस्त्रिकोणेपूर्णदृक् भूमिसुतश्चतुरस्रेपूर्णदृक्परेऽर्कचंद्रबुधशुक्राः सप्तमेपूर्णदृशः ७५ अथोदयांशशुद्धिः शिखरिणीभुजंगप्रयाताभ्यामाह यदालग्नांशेशइति लग्नांशे लवमिति लग्नेशः लग्नांशस्तस्येशः स्वामीलग्ननवांशस्वामीलवंनवांशंपश्यति वाऽथवानवांशेनसहयुतोभवेत्तदावोढुर्वरस्यानल्पंशुभफलंरचयति यथा मेषलग्नेमिथुनांशस्तदीशोबुधस्तुलायांमिथुनंपश्यति तत्रातिष्ठतिवा अयमुदयांशशुद्धेः प्रथमप्रकारः तदभावेतुलग्नांशेशस्तनुंलग्नंपश्यति लग्नेनसहयुतोभवेत्तदापिवोढुः शुभफलमनल्पंस्यात् यथामेषलग्नेएवमिथुननवांशस्वामीबुधोमकरेनवांशंनपश्यति किंतुलग्नंपश्यति अथवा मेषएवतिष्ठति अयमुदयशुद्धेर्द्वितीयः प्रकारः लवद्यूनस्वामीलवान्नवांशात् द्यूनंसप्तमनवांशः तत्स्वामी लवमदनभंलवान्मदनभंसप्तमनवांशंपश्यतितेनसहयुतोवाभवेत् त

त्र्याशंत्रिकोणंचतुरस्रमस्तंपश्यंतिखेटाश्चरणाभिवृद्ध्या मंदोगुरुर्भूमिसुतःपरेचक्रमेणसंपूर्णदृशोभवंति ७५ यदालग्नांशेशो
लवमथतनुंपश्यतियुतोभवेद्वायंवोढुःशुभफलमनल्पंरचयति लवद्यूनस्वामीलवमदनभंलग्नमदनंप्रपश्येद्वावध्वाःशुभमितरथाज्ञेयमशुभम् ७६

दावध्वाः अनल्पंबहुशुभंरचयति यथामिथुननवांशात् सप्तमोधनुरंशः तदीशोगुरुर्मेषेधनुः पश्यति तत्रतिष्ठतिवा अयमस्तशुद्धेः प्रथमप्रकारः तद
लाभेतुलवघूनस्वामीलग्नान्मदनंसप्तमंभवनंपश्यति युतोवासप्तमभवनेतदावध्वाःशुभम् यथागुरुः कर्केस्वनवांशंनपश्यति किंतुसप्तमभवनंतु
लांपश्यति अथवा तुलायामेवास्ति तदावध्वाःशुभम् अयमस्तशुद्धेर्द्वितीयःप्रकारः इतरथेति यदालग्नांशेशोलवंतनुंवानपश्यति तत्रयुतोवानस्यात्
तदावरस्याशुभम् एवंलवघूनस्वामीनवांशंसप्तमंवानपश्यति तत्रयुतोवानस्यात् तदाकन्यायाअशुभम् काश्यपः स्वस्वेशेनोदयास्तांशौवीक्षितौ
वाथसंयुतौ लग्नंवास्तगृहंतत्तदंशेशेनेक्षितंयुतमिति ७६ लवेशइति नवांशस्वामीनवांशंप्रपश्येत् लग्नस्वामीलग्नंप्रपश्येत्तदावरस्यशुभम् एवंल

लवेशोलवंलग्नपोलग्नगेहंप्रपश्येन्मिथोवाशुभंस्याद्वरस्य लवघूनपोंशंद्युनंलग्नपोस्तंमिथोवेक्षतेस्याच्छुभंकन्यकायाः ७७

वघूनपोनवांशात्सप्तमनवांशस्वामी अंशंघूनं अंशसप्तमराशिंपश्येत् लग्नपोलग्नस्वामी अस्तंलग्नात्सप्तमभवनंपश्येत् तदाकन्यायाःशुभंस्यात्
वामिथः अंशसप्तमाधीशोलग्नंसप्तममीक्षेते लग्नात्सप्तमाधीशश्चांशसप्तममीक्षते तदापिकन्यायाःशुभंस्यात् अत्राप्यन्यथात्वेदंपत्योरशुभमित्यर्थः
नारदः लग्ननवांशकौस्वस्वपतिनावीक्षितौयुतौ नचेद्वान्योन्यपतिनाशुभमित्रेणवातथा वरस्यमृत्युःस्यात्ताभ्यांसप्तसप्तोदयांशकौ एवंतौवीक्षितयुतौ–
मृत्युर्वध्वःकरग्रहइति ७७ अथपूर्वोक्तप्रकारेणोदयास्तशुद्धेरभावेतृतीयःप्रकारउच्यतेमालिनीछंदसा लवपतीति शुभंचतस्मिन्मित्रंचेतिकर्मधार

यः लवपतेर्लग्ननवांशेशस्यशुभग्रहः चंद्रबुधगुरुशुक्राणामन्यतमश्चेन्मित्रंस्यात्सचेदंशंनवांशंतनुंचवीक्षतेतदापरिणयनकरस्यवरस्यशास्त्रदृष्टं पुत्रादिप्राप्तिरूपंशुभंफलंस्यात् एवंमदनलवपस्यास्तांशेशस्यमित्रंसौम्यं तच्चांशम् द्युनंअंशाल्लग्ननवांशाद्यूनंसप्तमनवांशंचेद्वीक्षते अथवातनुमदनगृहंलग्नात्सप्तमभवनंचेद्वीक्षते तदावध्वाः शर्मकल्याणंस्यात् यद्युभयत्रापिनवांशस्वामिनोमित्रंपापग्रहश्चेत्तस्यदृष्टिरशुभैवेतिफलितोर्थः वराहः शुद्धिस्त्विहस्यान्नयदोदयांशेलग्नेनवास्तांशउपैतिशुद्धिम् तदासुहृत्सौम्यनिरीक्षितोयः शुभायसस्यात्प्रवदंतिसंतइति केचिद्दिवा

लवपतिशुभमित्रंवीक्षितेंशंतनुंवापरिणयनकरस्यस्याच्छुभंशास्त्रदृष्टम् मदनलवपमित्रंसौम्यमंशंद्युनंवातनुमदनगृहंचेद्वीक्षतेशर्मवध्वाः ७८
विषुवायनेषुपरपूर्वमध्यमान्दिवसांस्त्यजेदितरसंक्रमेषुहि घटिकास्तुषोडशशुभक्रियाविधौपरतोपिपूर्वमपिसंत्यजेद्बुधः ७९

हेवज्रयोगंनिषिद्धमाहुः तल्लक्षणम् तिथिवारंचनक्षत्रंनवभिश्चसमन्वितम् सप्तभिस्तुहरेद्भागंशेषांकेफलमादिशेत् त्रिशेषेतुजलंविंद्यात्पंचशेषेप्रभंजनः सप्तशेषेवज्रपातोज्ञेयंवज्रस्यलक्षणामिति ७८ अथार्कसंक्रमणंदोषंमंजुभाषिण्याह विषुवायनेष्विति विषुवंतुलामेषसंक्रांती चतसृषुसंक्रांतिषुपरपूर्वमध्यमान् गतागामिवर्तमानान् दिवसान् बुधः शुभक्रियाविधौविवाहादौत्यजेत् इतरसंक्रांतिषुसंक्रमणकालात् परतोऽग्रेपूर्वंप्रागपिषोडशघटिकामिलित्वाद्वात्रिंशद्घटिकास्त्यजेत् गुरुः अयनेविषुवेपूर्वंपरंमध्यंदिनंत्यजेत् अन्यसंक्रमणेपूर्वाः पराःषोडशनाडिका

इति २९ अथप्रसंगात्सकलग्रहाणांसंक्रांतिघटीरनुष्टुभाह देवेति यथाक्रमेणसूर्यादेः संक्रमणेएताघटिकावर्ज्याः यथारवेः प्राक्पश्चात्त्रयस्त्रिंशद्घ-
टिकास्त्याज्याः चंद्रस्यद्वे भौमस्यनवबुधस्यषट् गुरोरष्टाष्टौ अष्टाशीतिः शुक्रस्यांकानवशनेः खनृपाः षष्ठ्यधिकंशतमिति ८० अथपंग्वंधबधिराख्या
न् लग्नदोषानुपजातिकयाह घस्त्रइति घस्त्रेदिवसेतुलावृश्चिकौबधिरसंज्ञकौ रात्रौमकरधनुषीबधिरसंज्ञौशेषंस्पष्टम् वसिष्ठः तुलाचवृश्चिकश्चैवदि

देवद्व्यंकर्तवोष्टाष्टौनाड्योंकाःखनृपाःक्रमात् वर्ज्याःसंक्रमणेऽर्कादेःप्रायोर्कस्यातिनिंदिताः ८० घस्त्रेतुलालीबधिरौमृगाश्वौरा
त्रौचसिंहाजवृषादिवांधाः कन्यानृयुक्कर्कटकानिशांधादिनेघटोंत्योनिशिपंगुसंज्ञः ८१ बधिराधन्वितुलालयोऽपरान्हेमिथुनंकर्कटकों
गनानिशांधाः दिवसांधाहरिगोक्रियास्तुकुब्जामृगकुंभांतिमभानिसंध्ययोर्हि ८२ दारिद्र्यंबधिरतनौदिवांधलग्नेवैधव्यंशिशुमरणं
निशांधलग्ने पंग्वंगेनिखिलधनानिनाशमापुःसर्वत्राधिपगुरुदृष्टिभिर्नदोषः ८३ कार्मुकतौलिककन्यायुग्मलवेझषगेवा

वसेबधि-
रौतथा धनुश्चमकरश्चैवबाधिरौनिशिकीर्तितौ मेषोवृषोमृगेंद्रश्चदिवसांधाःप्रकीर्तिताः नृयुक्कर्कटकन्याश्चरात्रावंधाःप्रकीर्तिताः कुंभमीनौच
पंगूह्रौदिवारात्रौयथाक्रममिति अनेनतस्मिन्कालेंऽधादिलग्नानिवर्ज्यानीत्यर्थः ८१ अथकेचिन्मतमाह बधिराधन्वीति स्पष्टार्थम् ८२ अथैषांप्रयो
जनंसापवादंप्रहर्षिण्याह दारिद्र्यमिति पग्वंगेपंगुलग्ने अन्यत्स्पष्टम् ८३ अथविहितनवांशाश्चित्रदाच्छंदसाह कार्मुकेति युग्मंमिथुनं एषांनवांशाःझषगेवा मीन

नवांशेविकल्पेन वा शब्दएकीयमतसूचनार्थः एष्वंशेषुयर्हि उपयामोविवाहोभवेत्तर्हि कन्यासतीपतिव्रताभवेत् ८४ अथनिहितनवांशेकश्चिन्निषेधंश्रीछंदसाह अंत्यनवांशेति विहितनवांशेष्वपियथामेषलग्नेधनुर्नवमांशांतिमाइत्येवंविधेविषयेकाचनकन्यानपरिणेयानविवाह्या परंतुवर्गोत्तममंतिमनवांशंहित्वातत्रविवाहउचितएव यथामिथुनलग्ने मिथुननवांशे अंत्यांशका अपिश्रेष्ठायदिवर्गोत्तमाव्हयाइतिकश्यपोक्तेः नोचरलग्नइति तौलिमृ-

यर्हिभवेदुपयामस्तर्हिसतीखलुकन्या ८४ अंत्यनवांशेनचपरिणेयाकाचनवर्गोत्तममिह हित्वा नोचरलग्नेचरलवयोगंतौलिमृगस्थे
शशिभृतिकुर्यात् ८५ व्ययेशनिःखेऽवनिजस्तृतीयेभृगुस्तनौचंद्रखलानशस्ताः लग्नेट्कविग्लौश्चरिपौमृतौग्लौलग्नेट्शुभाराश्च
मदेचसर्वे ८६ त्र्यायाष्टषट्सुरविकेतुतमोर्कपुत्रास्त्र्यायारिगःक्षितिसुतोद्विगुणायगोज्ञः सप्तव्ययाष्टरहितौज्ञगुरूसितोष्टत्रि
द्यूनषड्व्ययगृहान्परिहृत्यशस्तः ८७

गस्थेतुलामकरस्थेचंद्रेचरलग्नेविहितचरलवयोगंनोकुर्यात् यथामेषलग्नेतुलांशइति ८५ अथलग्नभंगमुपजात्याह व्ययेशनिरिति द्वादशेशनिर्नोशस्तः खेदशमेऽवनिजोभौमोनशस्तः तृतीयेशुक्रोनशस्तः लग्नेचंद्रखलाः चंद्रः पापग्रहाश्चनशस्ताः लग्नेट् लग्नस्वामीकविः शुक्रोग्लौश्चंद्रश्चारिपौषष्ठेनशस्तौ ग्लौश्चंद्रः लग्नेट् लग्नस्वामीशुभाबुधगुरुशुक्राआरोभौमश्चएतेमृतावष्टमेनशस्ताः मदेसप्तमेसर्वेग्रहानशस्ताः ८६ अथरेखाप्रदावसंततिलकयाह त्र्यायेति स्पष्टार्थम् ८७ कर्तर्यादिमहादोषाणामपवादंशार्दूलविक्रीडितेनाह

पापौकर्त्तरिकारकाविति कर्त्तरिकारकौग्रहौरिपुगृहे शत्रुगृहेस्थितौ नीचेनीचराशिगौ अस्तगौ अस्तंगतौतदाकर्तरिदोषोनैवस्यात् कश्यपः पापयोःकर्त्तरीकर्त्रोः शत्रुनीचगृहस्थयोः यदाचास्तगयोर्वापिकर्तरीनैवदोषदेति अथसिते शुक्रे अरिनीचगेशत्रुगृहगेवासति तत्षष्ठदोषोपिनस्यात् कश्यपः नीचराशिगते शुक्रे शत्रुक्षेत्रगतेपिवा भृगुषट्कस्थितोदोषोनास्तितत्रनसंशयइति भौमेस्ते अस्तंगतेरिपुनीचगेशत्रुगृहे नीचगृहेवाऽष्टमभौमो दोषकृन्नस्यात् कश्यपः अस्तगेनीचगेभौमेशत्रुक्षेत्रगतेपिवा कुजाष्टमोद्भवोदोषोनकिंचिदपिविद्यते अथशशिनि चंद्रेनीचेनीचनवांशकेवासति

पापौकर्तरिकारकौरिपुगृहेनीचास्तगौकर्तरीदोषोनैवसितेऽरिनीचगृहगेतत्षष्ठदोषोपिन भौमेस्तेरिपुनीचगेनहिभवेद्भौमोष्टमोदोषकृन्नीचेनीचनवांशकेशशिनिरिःफाष्टारिदोषोपिन ८८ अब्दायनर्तुतिथिमासभपक्षदग्धतिथ्यंधकाणबधिरांगमुखाश्चदोषाः नश्यंतिविद्गुरुसितेष्विहकेंद्रकोणेतद्वच्चपापविधुयुक्तनवांशदोषाः ८९

द्वादशाष्टमषष्ठस्थानस्थितचंद्रेदोषोपिनस्यात् नीचराशिगतेचंद्रे नीचांशकगतेपिवा चंद्रेषष्ठाष्टरिःफस्थेदोषोनास्तिनसंशयइतिकश्यपोक्तेः ८८ अथाब्ददोषाद्यनेकदोषापवादंवसंततिलकयाह अब्दायनेति विद्गुरुसितेषु केंद्रकोणेसप्तमस्थानरहितेषुसत्सुएतेदोषाः नश्यंति कश्यपः अब्दायनर्तुमासोत्थाः पक्षतिथ्यर्क्षसंभवाः काणांधबधिरोद्भूता दग्धलग्नतिथेर्भवाः अकालजाश्चनीहारविद्युत्पांसुच्छत्रसंभवाः परिवेषप्रतीसूर्यशक्रचापध्वजादयः दोषप्रदामंगलेषुकालजाश्चेन्नदोषदाः गुरुरेकोपिकेंद्रस्थःशु

क्रोवायादिवाबुधः हरेःस्मृतिर्यथाहंतितद्वद्दोषांस्त्रिकोणगः लग्नोपग्रहचंडीशचंद्रजामित्रसंभवान् तत्केंद्रगोगुरुर्हंतिसुपर्णःपन्नगानिव तद्धन्त्वेति तथायदिपापाः क्रूराः विधुश्चंद्रस्तैर्युक्तोयोनवांशस्तद्दोषोपिनश्यति उक्तंच सक्रूरराशेरशुभोनवांशः प्रोक्तःसपापोपिविलग्नसंस्थः त्रिकोणकेंद्रेषुगुरुःसितोवायदातदासा वशुभोऽभिशस्तइति ८९ अथान्यान्परिहारान् शालिन्याह केंद्रेकोणेइति केंद्रेसप्तमरहिते १ ४ १० कोणेनवपंचमेवातत्रगुरौसतिसर्वेदोषानाशमायांतिकश्यपः काव्येगुरौवासौम्येवायदाकेंद्रत्रिकाणगे नाशयंत्यखिलान्दोषान्पापानीवहरिस्मृतिःअथवा

केंद्रेकोणेजीवआयेरवौवालग्नेचंद्रेवापिवर्गोत्तमेवा सर्वेदोषानाशमायांतिचंद्रेलाभेतद्वद्दुर्मुहूर्तांशदोषाः ९०

आयेएकादशेरवौसतिसर्वेदोषानाशमायांतिवालग्नेचंद्रेवावर्गोत्तमेराशिनवांशयुक्तेसति यथामिथुनेमिथुनोनवांशस्तदापिदोषनाशः द्वितीयवाशब्दस्यानुक्तसमुच्चयार्थत्वात् चंद्रोलग्नादुपचयेसर्वदोषविनाशकः उक्तंच यत्रैकादशगः सूर्योदोषानाशंययुस्तदा स्मरणादेवरुद्रस्यपापंजन्मशतोद्भवम् वर्गोत्तमगतेलग्नेसर्वेदोषालयंययुः चंद्रोवाप्यथवायेपिग्रीष्मेकुसरितोयथा चंद्रेति एकादशेचंद्रेसतिदुर्मुहूर्त्तांशदोषाः दुर्मुहूर्तारवावर्यमेत्यादयः अंशदोषाः पापग्रहनवांशाख्याः तेसर्वेतद्वन्नाशमायांति कश्यपः मुहूर्तलग्नषड्वर्गकुनवांशग्रहोद्भवाः येदोषास्तान्निहंत्येवयत्रैकादशगः शशी ज्योतिर्निबंधे नक्षत्रदोषंकुनवांशदोषंगंडांतदोषंचमुहूर्त्तदोषम् विरुद्धपंचांगविरुद्धदोषंनिशाकरोलाभगतोनिहंति ९०

अथसामान्यतोदोषसमूहपरिहारंशिखरिण्याह त्रिकोणेइति त्रिकाणेसप्तमरहितेकेंद्रेयदिसौम्योबुधस्तिष्ठेत् तदादोषशतकंहरेत् उक्तस्थानस्थितो
गुरुरपिलक्षदोषान्हरेत् भवेदिति अंगपोलग्नस्वामीउतवार्थेलवेशोलग्नगतनवांशनाथोवाआयेकेंद्रेयदिभवेत्तदासर्वदोषान्हरेत् दोषाणांसमूहं
नाशयति यथा दहनोग्निस्तूलंकार्पासमिवलग्नेट्लग्नांशनाथोवा आयगः केंद्रगोपिवाराशिंनिहंति दोषाणामिंधनानीवपावकइति ९१ अथल-
ग्नविंशोपकाननुष्टुभाह द्वाविति ज्ञभग्वोरेरवाप्रदयोः सतोर्द्वौद्वौविंशोपकौ एवंविधेचंद्रेपंच सूर्येसार्द्धास्त्रयः ३ ३० गुरौरामास्त्रयःमंदःशनिःअ

त्रिकोणेकेंद्रेवामदनरहितेदोषशतकंहरेत्सौम्यःशुक्रोद्विगुणमपिलक्षंसुरगुरुः भवेदायेकेंद्रेंगपउतलवेशोयदितदासमूहंदोषा
णांदहनइवतूलंशमयति ९१ द्वौद्वौज्ञभृग्वोःपंचेंदौरवौसार्द्धत्रयोगुरौ रामानंदागुकेत्वारेसार्द्धैकैकंविशोपकाः ९२ श्वश्रूःसितो
र्कःश्वशुरस्तनुस्तनुर्जामित्रपःस्याद्दयितोमनःशशी एतद्बलंसंप्रतिभाव्यतांत्रिकस्तेषांसुखंसंप्रवदेद्विवाहतः ९३

गूराहुः केतुः आरोभौमः एषुप्रत्येकंसार्द्धमेकैकम् १ ३० विंशोपकाःज्ञेयाः ९२ ग्रहवशेनश्वशुरादिविभागंसप्रयोजनमुपजात्याह श्वश्रूरिति
सितःकन्यायाःश्वश्रूःसूर्यःश्वशुरः तनुर्लग्नंतनुःशरीरंस्यात् जामित्रपःसप्तमाधीशोदयितोभर्तामनःचंद्रः एतेषांशुक्रादीनांबलंविचार्यतांत्रिकःसिद्धां
तवेत्ताविवाहतोविवाहानंतरंश्वशुरादीनांसुखंस्यादितिप्रवदेत् केश्चिद्विशेषतरमप्युक्तं सूर्यात्पातिः स्त्रीचविधोस्तथाराद्भिन्नंसुतोज्ञाच्चसुखंगुरोश्च धर्मःसि

सितादर्कस्ताच्चवेश्मब्रूयात्समुद्वाहविधौस्वयुक्त्येति १३ अथसंकीर्णजातीनांविशेषंमत्तमयूरछंदसाह कृष्णपक्षइति कृष्णोपक्षेशनिभौमार्कवारेविवाहोक्तनक्षत्रभिन्ननक्षत्रेषुचकाराद्दुष्टयोगेष्वपिसंकीर्णानामनुलोमप्रतिलोमजानामपि यदिकरपीडाविवाहःस्यात् तर्हिसाकरपीडासुतायुर्धनलाभप्रीतिप्रास्त्यै भवति एषास्थितिः वाग्रहणात् तदभावेप्रागुक्तदिनेपिविवाहः कार्यइति १४ अथगांधर्वविवाहेविशेषमनुष्टुभाह गांधर्वानीति प्राजापत्यब्राह्मदैवार्षसंज्ञाः विवाहाउक्तकालेएवकार्याः गांधर्वासुरराक्षसपैशाचकाख्याः सर्वकालेकार्याः श्रीपतिः प्राजापत्यब्रह्मदैवार्षसंज्ञाः

कृष्णोपक्षेसौरिकुजार्केपिचवारे वर्ज्येनक्षत्रेयदिवास्यात्करपीडा संकीर्णानांतर्हिसुतायुर्धनलाभप्रीतिप्रास्त्यैसाभवतीहस्थितिरेषा १४ गांधर्वादिविवाहेर्काद्वेद४नेत्र२गुणें३दवः१ कु१युगां४गा६ग्नि३भू१रामा३स्त्रिपद्यामशुभाःशुभाः १५

कालेषूक्तेष्वेवकार्याविवाहाः गांधर्वाख्यश्चासुरोराक्षसश्चपैशाचोवासर्वकालंविधेयइति तत्रकेचिदर्कात्सूर्यनक्षत्रात्वेदनेत्रात्रिषुक्रमेणसस्स्यात् अयमर्थः सूर्याक्रांतनक्षत्रमारभ्यचत्वार्यशुभानि ततोद्वेशुभे ततस्त्रीण्यशुभानीतिक्रमेणत्रिपद्यात्रयाणांपदानांसमाहारस्त्रिपदी तस्यांब्रह्मविष्णुरुद्रपदाभिधचक्रत्रयेइत्यर्थः एकस्मिन्नपिपदेयदशुभंतदशुभमेव पदत्रयेयच्छुभंतच्छुभम् इतिकृत्वा अशुभशुभानि क्रमेणपठितानि एवंपदत्रयाणांमुख्यार्थकथनात्पृथक्कथनानुपयोगः तथाचपदत्रयमुक्तंभूपालवल्लभे एवंपदत्रयेशुद्धंनक्षत्रंदापयेत्सुधीः

गांधर्वासुरपैशाचराक्षसेषुविचिंतयेदिति ९५ अथविवाहात्प्राक्कर्तव्यानामावश्यककृत्यानांदिनशुद्धिंपृथ्वीच्छंदसाह विधोर्बलेति अत्रचंद्रबलमावश्यकत्वेनविचार्यम् वारकोमंगलकलशः गृहभूषणंचित्रलेखनादि अंगणविभूषणंसंमार्जनगोमयाद्यालेपः अथचवेदिकाचत्वरंवधूवरोपवेशनार्थंखलविशेषः मंडपोगृहाच्छादनंकटादिनावितानादिनावा बहुवचनात्कटाद्यारोपणहरिद्राचंदनकांजकाधारणादिसकलशुभारंभान् उद्वाहतःपूर्वविवाहोक्तैरुडुभिर्नक्षत्रैः पंचांगशुद्धिसहितेदिनेरचयेत् उपलक्षणत्वात्तत्तन्नक्षत्रैरुपनयनादावपिपूर्वशुभकर्मप्रारंभान्विरचयेत् तथाइदंका

विधोर्बलमवेक्ष्यवादलनकंडनंवारकंगृहांगणविभूषणान्यथचवेदिकामंडपान् विवाहविहितोडुभिर्विरचयेत्तथोद्वाहतोनपूर्व
मिदमाचरेत्त्रिनवषण्मितेवासरे ९६ हस्तोच्छ्रायावेदहस्तैःसमंतात्तुल्यावेदीसद्मतोवामभागे युग्मेघस्रेषष्ठहीनेचपंचसप्ता
हेस्यान्मंडपोद्वासनंसत् ९७

र्यंजातंत्रिनवषण्मितेदिनेपूर्वंनआचरेत् चित्राविशाखाशततारकाश्विनीज्येष्ठाभरण्योशिवभाच्चतुष्टयंहित्वाप्रशस्तंफलतैलवेदिकाप्रदानकंकंडनमंडनादिकमितिदैवज्ञमनोहरोक्तेः तत्रैव मूलेंदुरुद्रश्रवणार्कपौष्णविश्वेशचित्रानलरेवतीषु संस्थापनंकांजिककुंडिकायावारेरवेर्भूमिसुतस्यशस्तमिति ९६ अथवेदीलक्षणंमंडपोद्वासनेदिननियमंचशालिन्याह हस्तोच्छ्रायेति स्पष्टार्थः नारदः हस्तोच्छ्रितांचतुर्हस्तैश्चतुरस्रांसमंततः स्तंभैश्चतुर्भिःसुश्लक्ष्णैर्वामभागेस्वसद्मतः मंडपोद्वासनंकार्यंसमेतुदिवसेबुधैः षष्ठं

तुविषमंनेष्टंमुत्त्काऽपंचमसप्तमाविति ९७ कैश्चित्तैलादिलापनेसंख्यानियमउक्तस्तमाह मेषादिराशिजेति स्पष्टम् देशविशेषेऔडीछादौप्रसिद्धम् ९८ अथप्रासशिष्टसंमतंमंडपादौस्तंभनिवेशनमिंद्रवज्रयाह सूर्येति कन्यातुलासिंहगतेऽर्केशैवेईशानकोणेविवाहादौस्तंभःस्थाप्यः वृश्चिकधनुर्मकरस्थितेवायुकोणे मीनमेषकुंभस्थितेनिर्ऋतिकोणे वृषमिथुनकर्कस्थितेअग्निकोणेस्तंभःस्थाप्यइत्यर्थः ९९ अथगोधूलीप्रशंसांमंदाक्रां

मेषादिराशिजवधूवरयोर्बटोश्चतैलादिलापनविधौकथितात्रसंख्या शैलादिशःशरदिगक्षनगाद्रिबाणाबाणाक्षबाणगिरयो ७
१० ५ १० ५ ७ ७ ५ ५ ५ ५ ७ विबुधैस्तुकैश्चित् ९८ सूर्येंगनासिंहघटेषुशैवेस्तंभोलिकोदंडमृगेषुवायौ मीनाजकुंभेनि
र्ऋतौविवाहेस्थाप्योग्निकोणेवृषयुग्मकर्के ९९ नास्यामृक्षंनतिथिकरणंनैवलग्नस्यचिंतानोवावारोनचलवविधिर्नोमुहूर्त्तस्य
चर्चा नैवायोगोनचमृतिभवनंनैवजामित्रदोषोगोधूलिःसामुनिभिरुदितासर्वकार्येषुशस्ता १००

तयाह नास्यामिति स्पष्टार्थम्

गोधूल्याधिकारिण आहनारदः प्राच्यानांचकलिंगानांमुख्यंगोधूलिकंस्मृतम् गांधर्वादिविवाहेषुवैश्योद्वाहेचयोजयेत् भूपालवल्लभे विप्रेषुघटिकालाभेदातव्यंगोरजंबुधैः सकीर्णेगोरजं शस्तंपरेषुहितयंशुभम् घटिकालग्नाभावेकार्यंविप्रैस्तुगोरजोलग्नमिति महादोषान्परित्यज्यप्रोक्तान्धिष्ण्यादिकेषु च कारयेद्गोरजोयावतावल्लग्नंशुभावहमिति दैवज्ञमनोहरे कुलिकंक्रांतिसाम्यंचमूर्तौषष्ठाष्टगःशशी पंचगोधूलिकेत्याज्या अन्येदोषाः शुभावहा

इति तत्रगोधूलिकालः केशवार्केणोक्तः अत्रोभयत्रघटिकादलमिष्टमाहुरिति केचित्तु यावद्दिनांतेनिशिपश्चिमायांपश्येत्तृतीयंरविबिंबभागम् तस्मात्परंनाडिकयुग्ममेके गोधूलिकालंमुनयोवदंति १०० अथगोधूलिभेदंजलधरमालाछंदसाह पिंडीभूतइति हेमंतर्तौशीतकालेमार्गादिमासचतुष्टये दिनकृतिसूर्येपिंडीभूतेगोलकसदृशे संध्यायांनीहारावृतत्वेन निष्प्रभेइत्यर्थः तस्मिन्समयेगोधूलिर्ज्ञेया तथातपसमये उष्णकालेचैत्रादिमासचतुष्टये अर्धास्ते अर्धबिंबस्यदृश्यत्वेगोधूलिः जलधरामेघास्तेषांमालासमूहस्तस्योत्पादके वर्षाकालेश्रावणादिमासचतुष्टयेसूर्येसंपूर्णास्तेऽद

पिंडीभूतेदिनकृतिहेमंतर्तौस्यादर्द्धास्तेतपसमयेगोधूलिः संपूर्णास्तेजलधरमालाकालेत्रेधायोज्योसकलशुभेकार्यादौ १०१ अस्तंया
तेगुरुदिवसेसौरेसार्केलग्नान्मृत्यौरिपुभवनेलग्नेचेंदौ कन्यानाशस्तनुमदमृत्युस्थेभौमेवोढुर्लभेधनसहचंद्रेसौख्यम् १०२

र्शनंयस्यतादृशेसतिगोधूलिः जलधरमालाछन्नजाभापिसूचितम् नकेवलमियंविवाहे किंतु सकलशुभेकार्यादौज्ञेया १०१ अथगोधूलिसमयेअवश्यवर्ज्यानि वैश्वेदेवीछंदसाह अस्तंयातेइति गोधूलिरित्यनुवर्तते बृहस्पतिवारेसूर्ये अस्तंयातेगोधूलिः शुभास्यात् नतुपूर्वम् अर्द्धयामासद्भावात् तथासौरेशनौसार्केसत्येवगोधूलिः शुभा नत्वस्तानंतरं कुलिकसद्भावात् क्रांतिसाम्यमपित्याज्यम् तथालग्नात् सायंकालीनलग्नात् मृत्यावष्टमेरिपुभवनेषष्ठेवालग्ने एववाचंद्रेसति कन्यानाशःस्यात् लग्नेइति लग्नस्थेमदनस्थेमृत्युस्थेवाभौमेसति वोढुर्वरस्यनाशःस्यात् शेषंस्पष्टम् १०२

अथसूर्यस्पष्टगतिमिंद्रवज्रयाह मेषादिगेति मेषादिद्वादशराशिषुस्थूलाकलात्मिकास्पष्टागतिरित्यर्थः १०३ सूर्यस्यतात्कालिकीकरणमनुष्टुभाह संक्रांतियातेति पंचांगेयद्दिनेयावतीषुघटीषुचसंक्रांतिस्तत आरभ्यस्वाभीष्टदिनपर्यंतंयावंतिदिनानिघटीपलानिभवंतितैर्मेषादीष्टराशिस्थेऽर्कैस्यस्पष्टगतिर्गुणनीया षष्ट्याभाज्या यल्लब्धंतेंशाः अवशिष्टंकलादि अंशाअवयवास्ते आदिशब्दवाच्याः तैर्यातदर्कैर्यातराशिः सूर्यभुक्तमेषादिराशिर्युक्तः सन् तात्कालिकः स्पष्टभास्करः स्यात् १०४ अथलग्नानयनमाह तनोरिति लग्नस्यक्रियमृगास्येत्यादिनायोनवांशोविचारितः सयावत्संख्याआगच्छेत्तत्पूर्वनवांशायावंतः स्युस्तेदशगुणाः रामैस्त्रिभिरासायल्लब्धं अंशाद्यं अंशकलाविकलात्मकं तत्तनोरिष्टकालिकंभुक्तंस्यात्तेनकृत्वाप्रागुक्तकुजशुक्रसौम्येत्यादिप्रकारेणषड्वर्गसाधनंस्यात् १०५ अथैवंसाधिताभ्यांरविलग्नाभ्यांघटिकानयनंशालिन्याह अर्कादिति अयनांशसहितसूर्यात् राशिभोग्यांशैः सायनसूर्याक्रांतराशेः स्वदेशीयउदयाः मेषादिरा

मेषादिगेर्केऽष्टशरा ५८ नगाक्षाः ५७ सप्तेषवः ५७ सप्तशरा ५७ गजाक्षाः ५८ ॥ गोक्षाः खतर्काः ६० कुरसाः ६१ कृतर्काः ६१ धृंगानि ६१
षष्टि ६० र्नवपंच ५९ भुक्तिः ॥ १०३ ॥ संक्रांतियात्तघस्त्राद्यैर्गतिर्निघ्नाखषट् ६० हृता लब्धेनांशादिनायोज्यंयातर्के स्पष्टभास्करः १०४
तनोरिष्टांशकात्पूर्वनवांशाद्दशसंगुणाः रामासालब्धमंशाद्यंतनोर्वर्गादिसाधने १०५ अर्काल्लग्नात्सायनाद्भोग्यभुक्तैर्भागैर्निघ्नाः
खवेदयात्स्वानिभक्तात् भोग्यंभुक्तंचांतरालोदयाढ्यंषष्ट्याभक्तंस्वेष्टनाड्योभवेयुः १०६

शीनांकलात्मकं प्रमाणंगुण्यंखाग्निभिस्त्रिंशताभक्तंलब्धानिभोग्यानिचपलानिस्युः एवंलग्नात्सायनांशात् भुक्तांशैः स्वोदयोगुण्यः खाग्निभक्तोलब्धानिभुक्तानिपलानि एवंजातानांभोग्यभुक्तपलानामैक्यंकार्यंतत्सायनांशलग्नार्कयोरंतरालोदयपलैर्युक्तंकार्यंषष्ट्याभक्तंसूर्योदयादिष्टघटिकाभवेयुः१०६ विशेषंशालिन्याह चेल्लग्नार्काविति सायनांशौलग्नार्कौएकराशौभवतस्तयोर्विश्लेषोंऽतरांशास्तैर्गुणितः स्वदेशीयउदयः ततःखाग्निभक्तोलब्धनिष्टकालः सूर्योदयात्स्यात् तत्रयदाऽर्कात् सायनादेकराशिस्थितंलग्नमूनंस्यात् तदायइष्टकालआगतः ससूर्योदयात्प्राक्राशिशेषोभवेत् अयमर्थः आगतइष्टकालःषष्ट्यांप्रपात्यप्राग्दिनीयसूर्योदयानंतरमेतावानिष्टकालः अथवारात्रिमानात् प्रपात्यप्राग्दिनीयसूर्यास्तानंतरमेतावानिष्टकालः

चेल्लग्नार्कौसायनावेकराशौतद्विश्लेषघ्नोदयःखाग्निभक्तः स्वेष्टःकालोलग्नमूनंयदार्काद्रात्रौशेषेऽर्कात्सषड्भंनिशायां १०७

अथरात्रौविशेषमानीतेइष्टकालेअंशप्रवृत्तेः पंचपलानियोज्यानि इतिसंप्रदायः तत्समयेपरस्परदर्शनंकार्यमित्याह कश्यपः अन्योन्यवीक्षणंसम्यक् सुलग्नेकारयेत्सदेति सुलग्नसाधनंघटिकायंत्रेणसाधनं तत्रघटीस्थापनेनारदः ताम्रपात्रेजलैःपूर्णेर्गंधपुष्पैरलंकृते तंडुलस्थेरत्नयुतेस्थुचिभूमावहःपतेःमंडलार्द्धोदयंवीक्ष्यजलपात्रेविनिक्षिपेत् तत्रमंत्रः यंत्राणांमुख्ययंत्रंत्वमितिधात्रापुराकृतं सौभाग्यमायुरारोग्यसुपुत्रधनहेतवे जलयंत्रकमेतस्मादिष्टसिद्धिप्रदंभवेत् अथवासाधयेत्कालंद्वादशांगुलशंकुनेति शंकुघटीज्ञानंरामविनोदेमयोक्तंततएवज्ञेयम् १०७ अथविवाहादौशुभ

कार्येऽवश्यवर्ज्यानविस्मरणार्थंशार्दूलविक्रीडितत्रयेणाह उत्पातानिति सेंदुक्रूरेति क्रूराक्रांतमितिच उत्पातादीन् उद्वाहे विवाहे यज्ञोपवीतादौ शुभकर्मसु च त्यजेदितितृतीयश्लोकेनान्वयः उत्पातान् दिव्यभौमांतरिक्षान् लक्षणयातत्संबंधिसप्तवर्ज्यान् दिवसान् पातो महापातः क्रांतिसाम्यमिति यावत् दग्धतिथयश्चापात्यगेगोघटगेइत्यादिनोक्ताः एतैःसह उत्पातंत्यजेदित्यर्थः तथा दुष्टान् व्यतीपातादियोगान् चंद्रगुरुशुक्राणामस्तमयनमस्तम् तिथ्याः क्षयर्द्धितिथिक्षयंतिथिवृद्धिंच गंडांतंतिथिनक्षत्रलग्नानांत्रिविधम् विष्टिर्भद्रा संक्रमदिनंसंक्रमकालादुभयतोवर्ज्यघटिका अयने विषुवे च पूर्वा

उत्पातान्सहपातदग्धतिथिभिर्दुष्टांश्चयोगांस्तथाचंद्रेज्योशनसामथास्तमयनंतिथ्याःक्षयर्द्धीतथा गंडांतंचसविष्टिसंक्रमदिनं
तन्वंशपास्तंतथातन्वंशेशविधूनथाष्टरिपुगान्पापस्यवर्गांस्तथा १०८ सेंदुक्रूरखगोदयांशमुदयास्ताशुद्धिंचंडायुधान्खार्जूरंद
शयोगयोगसहितंजामित्रलत्ताव्यधम्

परदिनसहितसंक्रांतिदिनंज्ञेयम् तन्वंशपास्तंतनुर्लग्नंअंशः लग्नगतोविहितनवांशः तौपातःतौतन्वंशपौतयोरस्तम् लग्नेशास्तंलग्ननवांशस्वाम्यस्तंच तथातन्वंशेशविधून् लग्नेशनवांशेशचंद्रान् अष्टमषष्ठस्थानगान् तथापापग्रहवर्गान् १०८ सेंदुक्रूरखगोदयांशमिंदुसहितंलग्नंलग्नांशंचक्रूरग्रहसहितलग्नंलग्नांशंचेत्यर्थः उदयास्तशुद्धिंउदयाच्छुद्धिमस्ताच्छुद्धिंचइतरथाज्ञेयमशुभमित्याद्युक्तम् चंडायुधंहर्षणवैधृतिसाध्येत्यादिनोक्तम् खार्जूरंव्याघातगंडइत्यादिनोक्तम् दशयोगः सूर्यर्क्षचंद्रर्क्षयुतेर्भशेषइत्यादिनोक्तम्

योगोग्रहयुतिः तत्सहितंजामित्रलत्ताव्यधंजामित्रंलग्नजामित्रंचंद्रजामित्रंच लग्नाच्चंद्रान्मदनभवनगेइत्यादिनोक्तम् लत्ताज्ञराहुपूर्णेंदुसिताइत्या
दिनोक्ता व्यधंपंचशलाकासप्तशलाकोक्तंच बाणाःपंचकम् उपग्रहःप्रसिद्धः शराष्टदिकूशक्रनगेत्यादि पापकर्तरीसमाहरद्वंद्वेकवचनम् तिथ्यर्क्ष
वारोत्थितंदुष्टयोगंतिथिनक्षत्रवारैः कृत्वोत्थितमुत्पन्नंदुष्टयोगं यथा तिथिनक्षत्रोत्थंसार्पेद्वादश्यांवैश्वमादिम इत्यादितिथिवारोद्भवंसूर्येशपंचे
त्यादिनक्षत्रवारोद्भवंयाम्यंत्वाष्ट्रमित्यादि तिथिनक्षत्रंवारोद्भवंहस्तार्कपंचमीतिथावित्यादिदुष्टयोगम् अर्धयामकुलिकाद्यान्वारदोषानपि आ

बाणोपग्रहपापकर्तरितथातिथ्यर्क्षयोगोत्थितंदुष्टंयोगमथार्द्धयामकुलिकाद्यान्वारदोषानपि १०९ क्रूराक्रांतविमुक्तभंग्रहणभं
यत्क्रूरगंतव्यभंत्रेधोत्पातहतंचकेतुहतभंसंध्योदितंभंतथा तद्वच्चग्रहभिन्नयुद्धगतभंसर्वानिमान्संत्यजेदुद्वाहेशुभकर्मसुग्र
हकृतान्लग्नस्यदोषानपि ११० इतिमु॰चिंता॰ षष्ठंविवाहप्रकरणंसमाप्तम् ६ छ

दिशब्देनदुर्मुहूर्तादिकंच १०९ क्रूराक्रांत
विमुक्तभंक्रूरग्रहेणयुक्तभंक्रूरविमुक्तभंच ग्रहणभंयस्मिन्नक्षत्रेचंद्रसूर्योपरागोजातस्तद्भंक्रूरस्यगंतव्यभं त्रेधोत्पाताः त्रिविधोत्पाताःदिव्यभौमा
तरिक्षाःतैर्हतंभम् तन्मासषट्कंत्याज्यम् एवंग्रहणनक्षत्रमपिकेतुहतभम् केतुनाधूमनैःस्पर्शनैश्चयन्नक्षत्रंहतं अनेननक्षत्रांतरेपिदोषः संध्योदितंभंसू
र्यास्तकालेयन्नक्षत्रस्यक्षितिजेउदयः तत्सूर्यनक्षत्राच्चतुर्दशंनक्षत्रमित्यर्थः तद्वच्चग्रहभिन्नयुद्धगतंभंग्रहेणभेदितग्रहयुद्धगतंचषण्मासंनिषिद्धम् तथा–

ग्रहकृतान् लग्नस्यदोषान् व्ययेशनिः रवेऽवनिजे इत्यादिकान्लग्नसंबंधिदोषान् संत्यजेत् मूलवाक्यानिपूर्वमेवलिखितानि ११० इतिमुहूर्त्तचिंतामणौ प्रमिताक्षरायांषष्ठंविवाहप्रकरणंसमाप्तं ६ ७ अथवधूप्रवेशप्रकरणंव्याख्यायते अथवधूनूतनपरिणीतायावध्वाः प्रथमतः क्रियमाणोभर्तृगृहेप्रवेशोवधूप्रवेशस्तन्मुहूर्त्तमुपेंद्रवज्रयाह समाद्रीति विवाहाद्विवाहदिवसादारभ्याष्टिदिनांतरालेषोडशदिनमध्येसमाद्रिपंचांकदिने समदिनानि द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोडशानि विषमदिनमध्येसप्तमपंचमनवमदिनानि तेषुवधूप्रवेशः शुभः नारदः आरभ्योद्वाहदिवसात्ष

अथवधूप्रवेशप्रकरणप्रारंभः समाद्रिपंचांकदिनेविवाहाद्वधूप्रवेशोऽष्टिदिनांतराले शुभःपरस्ताद्विषमाब्दमासदिनेक्ष
वर्षात्परतोयथेष्टम् १ ध्रुवक्षिप्रमृदुश्रोत्रवसूमूलमघानिले वधूप्रवेशःसन्नेष्टोरिक्तारार्केबुधेपरैः २

ष्ठेवाप्यष्टमेदिने वधूप्रवेशः संपत्यैदशमेथसमेदिने षष्ठादीनांसमत्वादेवग्रहणेसिद्धेपुनस्तदुक्तिरतिप्राशस्त्यार्था वधूप्रवेशनंकार्यंपंचमेसप्तमेदिने नवमेचशुभेवारेशुभलग्नेशशिनोबले इतिज्योतिर्निबंधे षोडशदिवसानंतरं वधूप्रवेशस्तदाविषमाब्दमासदिनेविषमवर्षेविषममासेविषमदिनेचकार्यः अक्षवर्षादिति पंचवर्षादनंतरंविषमवर्षादिनियमोनास्ति किंतुदोषरहितकालेवधूप्रवेशोविधेयः उक्तंच विवाहमारभ्यवधूप्रवेशोयुग्मेदिनेषोडशवासरांतः ऊर्ध्वंततोऽब्देऽयुजिपंचमांतःपुनःपुरस्तान्नियमोनचास्तीति १ अथनक्षत्रशुद्धिमनुष्टुभाह ध्रुवेति ध्रुवादिनक्षत्रेषुवधूप्रवेशःसन्शुभफलःरिक्तारार्केरिक्ता४ ९ १४

आरेभौमे अर्केरवौनइष्टः अर्थादन्यतिथिषुरविभौमव्यतिरिक्तवारेषुशस्तइत्यर्थः अपरैर्बुधवारेपिनेष्टः २ अथविशेषंमहेंद्रवज्रयाह ज्येष्ठेपतिज्येष्ठमि
तिविवाहतो विवाहानंतरं आदिमेज्येष्ठेभर्तृगृहेस्थितावधूः पतिज्येष्ठंहंति आदिमे अधिकेपतिंभर्त्तारंहंति आदिमेशुचावाषाढेश्वश्रूंभर्तृजननींहंति
आदिमेसहस्येपौषेश्वशुरंभर्तुःपितरंहंति आदिमेक्षयेक्षयमासेभर्तृगृहेतिष्ठंतीतनुंनिजंशरीरंहंति म्रियतइत्यर्थः तथाआदिमेमधौचैत्रेतातगृहेपितृ-
गृहेतिष्ठंतीतातंपितरंहंतीत्यर्थः यदिपित्राद्यभावः तर्हितन्मासितत्रगृहावस्थितौसत्यामपिनकोपिदोषइत्यर्थः ३ नभयंतेषामभावेइत्युक्तेः ज्योतिर्नि

ज्येष्ठेपतिज्येष्ठमथाधिकेपतिंहंत्यादिमेभर्तृगृहेवधूःशुचौ श्वश्रूंसहस्येश्वशुरंक्षयेतनुंतातंमधौतातगृहेविवाहतः ३ इतिमु॰चिं॰
सप्तमंवधूप्रवेशप्रकरणंसमाप्तम् ७ ६ अथद्विरागमनप्रकरणप्रारंभः चरेदथौजहायनेघटालिमेषगेरवौरवीज्यशुद्धियोगतः
शुभग्रहस्यवासरे नृयुग्ममीनकन्यकातुलावृषेविलग्नकेद्विरागमंलघुध्रुवेचरेस्त्रपेमृदूडुभिः १

बंधेविवाहात्प्रथमेपौषेआषाढेचाधि-
मासके नसाभर्तृगृहेतिष्ठेच्चैत्रेतातगृहेपित्र आषाढोज्येष्ठोपलक्षकः ३ इतिमुहूर्त्तचिंतामणौप्रमिताक्षरायांसप्तमंवधूप्रवेशप्रकरणंसमाप्तम्
७ ६ अथद्विरागमनप्रकरणंव्याख्यायते तत्रवधूप्रवेशानंतरंपरावृत्त्यपितृगृहंप्राप्तायावध्वाः पुनर्भर्तृगृहेप्रवेशोद्विरागमनशब्दवा-
च्यः तन्मुहूर्त्तंप्रपंचचामरच्छंदसाह चरेदिति अथानंतरेषुलघुध्रुवादिनक्षत्रेषुओजहायनेविषमवर्षेप्रथमतृतीयादिवर्षेतथा घटालिमेषगेरवौकुंभे

वृश्चिकेमेषेरवौसति तथावरस्यरवीज्यशुद्धियोगतः शुभग्रहस्यवारे मिथुनमीनकन्यातुलावृषाणामन्यतमेलग्नेशुभयुतदृष्टेसतिलघुध्रुवचराणिप्रसिद्धानि अस्त्रपोमूलम् मृदूनिप्रसिद्धानि एतेषुद्विरागमंचरेत्कुर्यात् अत्रसामान्यतः गुरुशुक्रास्तादिविचारः पूर्वोक्तएवज्ञेयः १ अथसंमुखशुक्रदोषंप्रहर्षिण्याह दैत्येज्यइति दैत्येज्यः शुक्रः गंतव्यदिगभिमुखेगंतुर्दक्षिणभागेवास्थितः स्यात्तदाशिशुर्बालकः गर्भिणीगर्भवतीनवोढानूतनपरिणीता एतानगच्छेयुः यदिप्रतिशुक्रेगच्छेयुस्तदेत्याह बालइति चेद्बालोगच्छतितदाविपद्यतेम्रियते नवोढाचेद्व्रजतितदावंध्याअपत्य-

दैत्येज्योह्यभिमुखदक्षिणेयदिस्याद्गच्छेयुर्नहिशिशुगर्भिणीनवोढाः बालश्चेद्व्रजतिविपद्यतेनवोढाचेद्वंध्याभवतिचगर्भिणीत्व
गर्भा २ नगरप्रवेशविषयाद्युपद्रवेकरपीडनेविबुधतीर्थयात्रयोः नृपपीडनेनववधूप्रवेशनेप्रतिभार्गवोभवतिदोषकृन्नहि ३

संभावनारहितास्यात् गर्भिणीचेद्व्रजतितदाअगर्भागर्भस्राववतीस्यात् यदिशुक्रः पूर्वस्यामुदितः पूर्वांगंतुः संमुखः उत्तरांगंतुर्दक्षिणः पश्चिमांगंतुः पृष्ठेदक्षिणांगंतुर्वामेस्यात् तदापूर्वोत्तरेदिशौनगच्छेत् यदिपश्चिमायामुदितः शुक्रः तदापश्चिमांगंतुः संमुखः दक्षिणांगंतुर्दक्षिणः पूर्वांगंतुः पृष्ठे उत्तरांगंतुर्वामे तदापश्चिमदक्षिणदिशौनगच्छेत् केचिद्दीपोत्सवप्रतिपदिनक्षत्रादिनियमंविनैववधूप्रवेशंवांछति उक्तंच अस्तंगतेगुरौशुक्रेसिंहस्थेवाबृहस्पतौ दीपोत्सवदिनेचैवकन्याभर्तृगृहंविशेदिति २ अथप्रतिशुक्रापवादंमंजुभाषिण्याह नगरप्रवेशेति विषयोदेशः आदिशब्देन-

ग्रामा तत्स्थोपद्रवे अन्यराजकृतोपद्रवेदुर्भिक्षाद्युपद्रवेवासतिगंतव्यदिशिप्रतिशुक्रदोषोनास्ति करपीडनेविवाहेदेवतीर्थोद्देशेनयात्रायांसत्यांवि
बुधादेवास्तेषांयात्रा यथानगरकोटयात्रा तीर्थयात्राप्रयागादिकातयोः नृपपीडनेराज्ञः सकाशात् पीडायांदंडादिकृतायांसत्याम् नववधूर्नूतनपरिणी
तानववधूः तस्याःप्रवेशेप्रतिभार्गवः संमुखसुक्रः दोषकृन्नहिभवति भार्गवः स्वभवनपुरप्रवेशेदेशानांविभ्रमेतथोद्वाहेनूतनवध्वागमनेप्रतिशुक्र-
विचारणंनास्ति एकग्रामेपुरेवापिदुर्भिक्षेराजविप्लवे विवाहेतीर्थयात्रायांप्रतिशुक्रंनदुष्यतीति बादरायणोक्तेः ३ अथप्रौढस्त्रीणांद्विरागमनेतथा

पित्रेगृहेचेत्कुचपुष्पसंभवःस्त्रीणांनदोषःप्रतिशुक्रसंभवः भृग्वंगिरोवत्सवसिष्ठकश्यपात्रीणांभरद्वाजमुनेःकुलेतथा ४ इति
मु॰ अष्टमंद्विराद्विरागमनप्रकरणंसमाप्तम् ८ ७

गोत्रपरत्वेनचप्रतिशुक्रापवादांतरमिंद्रवंशयाह पित्रेगृहइति पितुरिदंपित्रंचतस्मि
न् पित्रेगृहेकुचौस्तनौ पुष्पमृतुस्तत्संभवः स्यात्तदास्त्रीणांप्रतिशुक्रसंभवोदोषोनास्तीत्यपिज्ञेयम् चंडेश्वरः पित्रागारेकुचकुसुमयोःसंभवोवायदिस्यात्स
त्युः शुद्धिर्नभवतिरवेः संमुखोवाथशुक्रः शुक्रेलग्नेगुणवतितिथौचंद्रताराविशुद्धौस्त्रीणांयात्राभवतिसफलासेवितुंस्वामिसद्म अथभृगुः अंगिरावत्स
वसिष्ठकश्यपात्रीणांभरद्वाजमुनेः कुलेकोर्थः एतद्वंशोत्पन्नानांप्रतिशुक्रसंभवोदोषोनास्ति बादरायणः कश्यपेषुवसिष्ठेषुभृग्वत्र्यंगिरसेषु-
च भारद्वाजेषुवत्सेषुप्रतिशुक्रंनदुष्यतीति अयंचापवादोयात्रामात्रसाधारणः केचिदमुमपवादंबुधसंमुखेप्यूचुः महेश्वरः तीर्थानांगमनेतथैं

कनगरेग्रामंचसौम्यंतयेति ४ इतिदै० प्रमिताक्षरायांद्विरागमनप्रकरणंसमासम् ८ ७ अथाग्न्याधानप्रकरणंव्याख्यायते यत्रतुकालनियमे-
नाधानादिविहितंतत्रनमुहूर्त्तविचारः यदातुकालनियमाभावस्तदामुहूर्त्तविचारस्तद्वसंततिलकयाह स्यादग्निहोत्रविधिरिति उत्तरगेदिनेशेउत्तरायण
गतेसूर्येसति मिश्रेकृत्तिकाविशाखे ध्रुवाणिरोहिण्युत्तरात्रयं अंत्यंरेवती शशीमृगः शक्रोज्येष्ठा सुरेज्यधिष्ण्यंपुष्यः एषुनक्षत्रेषुअग्निहोत्रविधिः
स्यात् रिक्तासुनोकार्यम् चंद्रमंगलगुरुशुक्रेषुनीचगतेअस्तंगतेविजितेग्रहांतरेषुतथाशत्रुगृहस्थितेषुअग्न्याधानंनोकार्यम् १ अथलग्नशुद्धिंवसं

अथाग्न्याधानप्रकरणप्रारंभः स्यादग्निहोत्रविधिरुत्तरगोदिनेशेमिश्रध्रुवांत्यशशिशुक्रसुरेज्यधिष्ण्ये रिक्तासुनोशशिकु
जेज्यभृगौननीचेनास्तंगतेनविजितेनचशत्रुगेहे १ नोकर्कनक्रझषकुंभनवांशलग्नेनोऽब्जेतनौरविशशीज्यकुजैत्रिकोणे

ततिलकयाह नोकर्केति कर्कमकरमीनकुंभानांनवांशेलग्नेचाग्न्याधानंनोकार्यम् लग्नेचंद्रेसतिनोकार्यम् चंद्रोपलक्षणत्वाच्छुक्रेपिनोकार्यम्
यस्यचाधानलग्नस्थेचंद्रेचभृगुनंदने उपैतितस्यजातोऽग्निर्निर्वाणंसततंकुले इतिकश्यपोक्तेः रविशशीज्येति सूर्यचंद्रगुरुभौमेषुत्रिकोणेकेंद्र
क्षेअष्टत्रिभवगेषु भवगेएकादशस्थे एतत्स्थानस्थितेषु सत्सु परैर्बुधशुक्रशनिराहुकेतुभिः त्रिलाभषट्खस्थितैः तृतीयैकादशषष्ठदशमस्थान
स्थितैः सद्भिः आधानदिनंस्यात् निधनेति अष्टमस्थानशुद्धेलग्ने अष्टमस्थानेशुभग्रहोपिनशुभः अथवानिधनशुद्धइति निधनमष्टमलग्नंकस्मा

दित्याधानकर्तुर्जन्मराशिलग्नाभ्यामष्टमंलग्नमित्यर्थः तस्यशुद्धत्वंतदभावइतियावत् तेनयुक्तेलग्नेइत्यर्थः अत्रव्याख्यानद्वयेपिप्रमाणसद्भावान्द्वयमपियुक्तम् अत्रनिधनशुद्धिश्चताभ्यांयुतेलग्नइत्यर्थः २ अथाग्न्याधानकर्तुराधानलग्नवशाद्यागकर्तृत्वयोगाननुष्टुभाह चापइति जीवेगुरौचापेधनुःस्थेलग्नगेसति आधानलग्नेधनुराख्येगुर्वधिष्ठितेसतीत्यर्थः अयमेकोयोगः अथवा भौमेमेषलग्नस्थितेसति अयंद्वितीयोयोगः अथवा आधानलग्नाद्दशमेसप्तमेवा भौमेसतियोगद्वयमेतत् अथवा अब्जेचंद्रेषष्ठतृतीयैकादशस्थानस्थेसतियोगत्रयमेतत् अथवाषट्त्र्यायेरवौसूर्येसति योगत्रयमेतत् एवंविधेलग्नेयोजाताग्निरग्निहोत्रकर्ताध्रुवंनिश्चयेनयजति ज्योतिष्टोमादियागंकरोतीत्यर्थः ३ इतिश्रीदैवज्ञानंतसुतदै॰रामवि॰प्रमिताक्षरायांनवममग्न्याधानप्रकरणंसमाप्तम् ९ ७ अथराजाभिषेकप्रकरणंव्याख्यायते तत्रकालशुद्धिमिंद्रवज्रयाह राजाभिषेकइति उत्तरायणगतेसूर्येसतितथागुर्विंदुशुक्रैः बृहस्पतिचंद्रशुक्रैरुदितैःसद्भिः तथाभौमार्कौप्रसिद्धौ लग्नेशोजन्मलग्नेशः दशेशोवर्तमानजातकीयमहादशांतर्दशयोःस्वामिनोः जन्मपोजन्म

केंद्रर्क्षेषट्त्रिभवगेचपरैस्त्रिलाभेषट्खस्थितैर्निधनशुद्धियुतेविलग्ने २ चापेजीवेतनुस्थेवामेषेभौमेंऽबरेद्युने षट्त्र्यायेब्जे
रवौवास्याज्जाताग्निर्यजतिध्रुवम् ३ इतिश्रीमुहूर्तचिंतामणौनवममग्न्याधानप्रकरणंसमाप्तम् ९ ७ अथराजाभि
षेकप्रकरणप्रारंभः राजाभिषेकःशुभउत्तरायणेगुर्विंदुशुक्रैरुदितैर्बलान्वितैः

राशिस्वामी एतैर्बलान्वितैः उच्चस्वगृहादिगृहस्थैः सद्भिः राजाभिषेकः शुभः उक्तः नोचैत्रेति चैत्रमासः रिक्ताः ४ ९ १४ आरोभौमः निशारात्रिः मलिम्लुचो
धिमासः एषुराजाभिषेकोनोकार्यः कुत्रचित् भौमवारउक्तः ससेनापत्याभिषेकपरोज्ञेयः भौमस्यसेनापतित्वात् गोविप्रराज्यपितृकर्मचतुष्पदेपीति
चतुष्पदे राज्याभिषेकउक्तः सोमावास्यायांभवत्येवेति १ अथाभिषेकेनक्षत्राणिलग्नशुद्धिंचेंद्रवंशयाह शाक्रः श्रवेति शाक्रोज्येष्ठाश्रवः श्रवणः
क्षिप्राण्यश्विनीपुष्यहस्ताः मृदूनिचित्रामृगरेवत्यनुराधाः ध्रुवाणिरोहिण्युत्तरात्रयम् एतैर्नक्षत्रैराजाभिषेकः शुभः अत्रचित्राग्रहणम् ज्येष्ठाश्रवः

भौमार्कलग्नेशदशेशजन्मपैर्नोचैत्ररिक्तारनिशामलिम्लुचे १ शाक्रश्रवःक्षिप्रमृदुध्रुवोडुभिः शीर्षोदयेवोपचयेशुभेतनौ पापैस्त्रि
षष्ठायगतैःशुभग्रहैः केंद्रत्रिकोणायधनत्रिसंस्थितैः २ पापैस्तनौरुङ्निधनेमृतिःसुतेपुत्रार्तिरर्थव्ययगैर्दरिद्रता

क्षिप्रमृदुध्रुवेषुसौ
म्यग्रहस्यान्हितिथीचरिक्ताइतिमहेश्वरवचनात् अन्यग्रंथेतदभावात् शीर्षोदयइति शीर्षोदयाःमिथुनकन्यातुलावृश्चिककुंभाख्याः एषुअभिषेकंलग्ने
षु अथवाउपचयेस्वजन्मलग्नात्स्वजन्मराशेर्वाउपचयेत्रिषडेकादशदशमानामन्यतमेलग्नेसति शुभेशुभग्रहेतनौलग्नेगतेसतिदृष्टेवासति अभिषे
कः शुभः कश्यपः जन्मराशेरुपचयेलग्नेशीर्षोदयेस्थिरे शुभग्रहेक्षितयुतेनयुतेवीक्षितेपरैरिति पापैरिति पापग्रहैः तृतीयषष्ठैकादशस्थानस्थितैः
शुभग्रहैः प्रथमचतुर्थसप्तमदशमनवमपंचमैकादशद्वितीयतृतीयस्थानस्थितैराजाभिषेकः शुभः २ अथविशेषेसापवादमिंद्रवज्रयाह पापैरि

ति तनौलग्नस्थितैः पापग्रहैः रुक् रोगः स्यात् राज्ञइतिशेषः निधनेऽष्टमे पापग्रहैः मृतिः स्यात् सुते पंचमे पापग्रहैः पुत्रार्तिः पुत्रपीडास्यात् अर्थव्ययगैः द्विती
यद्वादशगैः पापैर्दरिद्रतास्यात् खेदशमेपापैरलसोनिरुद्योगः स्यात् द्युनांबुगैः सप्तमचतुर्थस्थानस्थैः पापग्रहैः भ्रष्टपदो भ्रष्टैश्वर्यः स्यात् अथापवादमा
ह सर्वंशुभमिति केंद्रगतैः शुभग्रहैः सर्वं प्रागुक्तं दुष्टफलंशुभंशुभोदर्कंस्यात् २ अथविशेषंभुजंगप्रयातेनाह गुरुर्लग्नकोणइति लग्नेगुरुश्चेत्स्यादथवा
कोणेनवपंचमेगुरुः स्यात् कुजोभौमोऽरौशत्रुगृहे षष्ठः स्यात् खेदशमेसितः शुक्रः स्यात् एतादृशेऽभिषेकयोगेयोराजाऽभिषिच्यते ससदासर्वका-

स्यात्खेलसो भ्रष्टपदोद्युनांबुगैः सर्वंशुभंकेंद्रगतैः शुभग्रहैः ३ गुरुर्लग्नकोणेकुजोरौसितः खेसराजासदामोदतेराजलक्ष्म्या तृती
यायगौसौरिसूर्यौखबंध्वोर्गुरुश्चेद्धरित्रीस्थिरास्यान्नृपस्य ४ इतिमुहूर्त्तचिंतामणौदशमंराजाभिषेकप्रकरणंसमाप्तम् १० छ

लंराजलक्ष्म्यामोदते अयमेकोयोगः सौरिसूर्यौ तृतीयायगौस्याताम् यथासंख्यशनिस्तृतीयेरविरेकादशेगुरुः खबंध्वोः खेदशमेबंधौचतुर्थे
वाचेद्गुरुः स्यादेवंविधयोगेऽभिषिक्तस्यनृपस्यधरित्रीपृथ्वीस्थिरासदाहस्तगतास्यात् ४ इतिश्रीदैवज्ञानंतसुत॰ प्रमिताक्षरायांदशमंराजा
भिषेकप्रकरणंसमाप्तम् १० छ अथयात्राप्रकरणंव्याख्यायते तत्रकिंचित्कार्यमुद्दिश्यदेशांतरगमनंयात्रेति साद्विधा परविष
येविजयार्थंगंतुंयात्रासमरविजयाख्या निखिलापरयात्रायासामान्यासाभवेद्द्विविधा कथितातिथिवासरर्क्षैःस्वभिमतफलदाभवेच्चसामान्यासमरा-

ह्ययाच यात्रायोगविलग्नक्षितीशयोगेष्विति तत्रयात्राधिकारिणः प्रहर्षिण्याह यात्रायामिति प्रविदितंच्छायाघटिकादिनाज्ञातंजन्मलक्षणयातत्कालीनलग्नकुंडलिकास्थशुभाशुभग्रहसूचितशुभाशुभफलोदर्कज्ञानंयेषांतेषांनृपाणांयात्रायांदिवसंदातव्यंयात्रादिनंदेयमित्यर्थः यदाह वराहः विदितेहोराराशौस्थानादिबलंग्रहाणांच आयुषिचपरिज्ञातेशुभमशुभंयातुरिह भाव्यमिति ननुयस्यजन्मकालोनज्ञातस्तस्यकथंयात्रास्यादित्यत आह अबुद्धमज्ञातंजन्मकालोयेषांतेषामपिप्रश्नाद्यैः पृष्टोयः श्रुत्यादिभिरशुभमशुभेविज्ञातेसतिबुधोयात्रादिवसंप्रदद्यात् कीदृशैःप्रश्ना

अथयात्राप्रकरणप्रारंभः यात्रायांप्रविदितजन्मनांनृपाणांदातव्यंदिवसमबुद्धजन्मनांच प्रश्नाद्यैरुदयनिमित्तमूलभूतैर्विज्ञातेह्यशुभमशुभेबुधःप्रदद्यात् १ जननराशितनूयदिलग्नगेतदधिपौयदिवाततएववा त्रिरिपुखायगृहंयदिवोजयेविजयएवभवेद्वसुधापतेः २

द्यैः उदयोलग्नंनिमित्तंशकुनादि एतदादीनिमूलभूतानिनिश्चयादानकारणानियेषांतैः प्रश्नोदयनिमित्ताद्यैस्तेषामपिफलोदयइतिनारदोक्तेः १ अथप्रश्नादेवफलंद्रुतविलंबितेनाह जननेति अत्रयद्यपिजन्मलग्नजन्मराशिज्ञानंवर्ततेतथापिजातकोक्तशुभफलदग्रहदशानवगमादज्ञातजन्मत्वंज्ञेयम् अतएवराशिलग्नानामभावेयदिपृच्छतिप्रश्नंवक्ष्यतिजननंजन्मतत्संबंधिनीराशिलग्नेयदिप्रश्नलग्नगतेस्याताम् जन्मराशिजन्मलग्नंवायदिप्रश्नलग्नेस्यात्तदावसुधापतेराज्ञोविजयएववा अथवातदधिपौलग्नगेस्याताम् जन्मराशि

पतिर्जन्मलग्नपतिर्वायदिप्रश्नलग्नेस्यात्तथापिराज्ञोविजयएव अथवा ततएवताभ्यामेवजन्मलग्नजन्मराशिभ्यामेवत्रिरिपुखायगृहंतृतीयषष्ठद-
शमैकादशानामन्यतमंगृहं यद्युदयेलग्नंस्यात्तदापिविजयएवस्यादित्यर्थः २ अथान्यंप्रश्नंमंजुभाषिण्याह रिपुजन्मलग्नभमिति रिपोःशत्रोःजन्मलग्नभं
जन्मलग्नंजन्मराशिश्चतत्पश्चाद्धिबुकेचतुर्थेद्यूनेसप्तमेवास्यात्तदाराज्ञोजयोभवेत् अथवातयोःशत्रुजन्मलग्नराश्योरधिपौस्वामिनौप्रश्नलग्नाद्धिबुकेद्यूने-
वास्यातांतदापिविजयएव अथवा ततएवताभ्यांशत्रोर्जन्मलग्नजन्मराशिभ्यामेवोपचयगृहं ३ ६ १० ११ प्रश्नलग्नाद्धिबुकेद्यूनेवास्यात्तदापिजयएव

रिपुजन्मलग्नभमथाधिपौतयोस्ततएववोपचयसद्मचेद्भवेत् हिबुकेद्युनेथशुभवर्गकस्तनौयदिमस्तकोदयगृहंतदाजयः ३ यदिपृ-
च्छतनौवसुधारुचिराशुभवस्तुयदिश्रुतिदर्शनगम् यदिपृच्छतिचादरतश्चशुभग्रहदृष्टयुतंचरलग्नमपि ४

अथवातनौप्रश्नलग्नेशु-
भवर्गकः शुभग्रहाणांषड्वर्गकश्चेत्स्यात्तदापिजयएव अथवायदिमस्तकोदयाः शीर्षोदयराशयः प्रश्नलग्नगताश्चेत्स्युस्तदापिजयएव वराहः उदयमु-
दयपंवाजन्मभंजन्मपंवातदुपचयगृहंवावीक्ष्यलग्नेयियासोः विनिहतमरिपक्षंविद्धिशत्रोरिदंवाहिबुकगृहसमेतंपृच्छतोऽस्तस्थितंचेति ३ अथा-
न्यंप्रश्नंत्रोटकेनाह यदीति अत्रवसुधापतेर्जयइत्यनुवर्तते यदिपृच्छतनौप्रश्नलग्नेवसुधाभूमीरुचिरास्यात् अथवा यदिशुभवस्तुमंगलवस्तु
मंगलवस्त्राभरणादिश्रुतिदर्शनगंश्रवणगोचरम् दर्शनमत्रचाक्षुषम् अथवाप्रष्टाआदरतोदैवज्ञंपृच्छतितदापिवसुधापतेर्जयःस्यादितिस

र्वत्रव्याख्येयम् अथवाचरलग्नंमेषकर्कतुलामकराख्यंयदिप्रश्नलग्नंशुभग्रहैर्दृष्टंयुतंवातदापिजयएव ४ अथाशुभफलदंप्रश्नंमालिन्याह विधुकुजेति चंद्रमंगलयुक्तेलग्नेसौरिणाशनिनादृष्टेतदाप्रश्नकर्तुर्भंगः पराजयोनाशोवास्यात् अथचंद्रेमृतिभमदनसंस्थेचंद्रेअष्टमेसप्तमेवालग्नेसूर्येसति एवंविधेयोगेप्रष्टुः सपदिभंगःस्यात् अव्ययानामनेकार्थत्वात् अपिशब्दोविपर्ययार्थः तथाहिभास्करेमृतिभमदनसंस्थेचंद्रेलग्नगेचसति एवंविधेयोगेपिप्रष्टुर्भंगःस्यात् उक्तंचवराहेण चंद्रेसरुधिरेलग्नेभंगः सूर्यात्मजेक्षिते द्यूनेनैधनगेचंद्रेलग्नेयातेदिवाकरे विपर्ययेवायातस्ययात्रा

विधुकुजयुतलग्नेसौरिदृष्टेथचंद्रेमृतिभमदनसंस्थेलग्नगेभास्करेपि हिबुकनिधनहोराद्यूनगेवापिपापेसपदिभवतिभंगःप्रश्नकर्तुस्तदानीम् ५ त्रिकोणेकुजात्सौरिशुक्रज्ञजीवायदैकोपिवानोगमोर्काच्छशीवा बलीयांस्तुमध्येतयोर्योग्रहःस्यात्स्वकीयांदिशंप्रत्युतासौनयेच्च ६

भंगवधागमाद्इति वाऽथवापापग्रहेचतुर्थाष्टमलग्नसप्तमानामन्यतमस्थेसतिप्रष्टुर्भंगःस्यात् ५ अथप्रश्नलग्नेविशेषंभुजंगप्रयातेनाह त्रिकोणेकुजादिति कुजान्मंगलात्त्रिकोणेनवपंचमेसौरिशुक्रज्ञजीवाश्चेत्स्युः अथवा एकोपिवासौरिशुक्रज्ञजीवानामन्यतमश्चेत्त्रिकोणेस्यात्तदाप्युद्दिष्टगमनंनस्यादेव वाऽथवाऽर्काच्छशीत्रिकोणेचेत्स्यात्तदाप्युद्दिष्टदिग्गमनंनस्यादेवतर्हिकस्यांदिशिगमनंस्यादित्यतआह बलीयानिति तयोरधुनोक्तोद्दिष्टदिक्प्रतिबंधकारकयोर्ग्रहयोर्मध्येयोग्रहोबलवान् स्यात्सःस्वकीयांदिशंप्रत्युतसांप्रतंनयेत् ६

अथयोगांतरंमदलेरवयाह प्रश्नेति गम्यदिगीशात् गंतुंइष्टायादिकुतस्याईशः स्वामीप्रश्नलग्नेयत्रस्थानेस्यात्ततः पंचमस्थानेयोग्रहोयोभूयात् तदाऽसौग्रहः स्वामाशांदिशंनयतेप्रापयति ७ अथयात्राकालंभुजंगप्रयातेनाह धनुर्मेषेति धनुर्मेषसिंहस्थेरवौयात्राप्रशस्ताशुभफलदा शनिज्ञोशनोराशिमध्यगे मकरकुंभमिथुनकन्यावृषतुलागतेरवौयात्रामध्यास्यात् कर्कमीनालिसंस्थेरवौदीर्घाबहुकालसाध्यायात्रानसफलेत्यर्थः वराहः यात्राजसिंहतुरगोपगतेवरिष्ठामध्याशनैश्वरबुधोशनसांगृहेषु भानौकुलीरवृषवृश्चिकगेतिदीर्घाशस्तश्चदेवलमतेऽ

प्रश्नेगम्यदिगीशात्खेटः पंचमगोयः बोभूयाद्बलयुक्तः स्वामाशांनयतेसौ ७ धनुर्मेषसिंहेषुयात्राप्रशस्ताशनि
ज्ञोशनोराशिगेचैवमध्या

ध्वनिपृष्ठगोर्कइति देवलमतेऽ ध्वनिमार्गेसूर्यः पृष्ठगतःशस्तः पृष्ठगतत्वंतुवसंतराजोक्तभ्रमणवशेनेति केचित् यथा दग्धादिगैशीज्वलितादिगैंद्रीधूमान्वितावानलदिकूप्रभाते इत्येवमेवप्रहराष्टकेनभुंक्तेदिशांताइति अनेनभ्रमणप्रकारेणयस्मिन्प्रहरेभ्रमणसमयः सादिक्सूर्यसंमुखोच्यते तत्पंचमीदिक्सूर्यपृष्ठगतेत्युच्यतेइत्याहुः वस्तुतस्तुद्वादशराशिभ्रमवशेनयस्यांदिश्यर्कः स्थितः तांपृष्ठतः कृत्वायायादित्यर्थः यथालग्नस्थेर्केपश्चिमांदिशंगच्छेत् चतुर्थेदक्षिणां सप्तमेपूर्वाम् दशमउत्तरामित्यर्थः यदाहदेवलः लग्नस्थेवरुणाशांहिबुकस्थेदक्षिणांरवौयायात् सप्तगमेपूर्वाशामेषूरणसंस्थितेसौम्यामिति एवंविदिक्ष्वपिज्ञेयम् यथाद्वितीयतृतीयस्थितेऽर्के

नैर्ऋतीम् पञ्चमेषष्ठेआग्नेयीम् अष्टमेनवमेऐशानीम् एकादशेद्वादशकेवायव्यांगच्छेदिति अथतारानिषेधमाह जनुरिति स्वजन्मनक्षत्राद्दिननक्षत्रंयत्सं
ख्यंस्यात् तस्मिन्नवभक्तेअवशिष्टाः प्रथमसप्तमपंचमतृतीयाख्यास्ताराश्चेत्स्युस्तदानेष्टानिषिद्धाः ८ अथतिथ्यादिशुद्धिंभुजंगप्रयातेनाह नषष्ठीति
सिताद्यातिथिः शुक्लपक्षप्रतिपत् आसुतिथिषुयात्रानप्रशस्तेत्यर्थः नारदः षष्ठ्यष्टमीद्वादशीचरिक्तामावर्जितासुच यात्राशुक्लप्रतिपदिनिधनाया
धनायचेति हयोश्विनी आदित्यंपुनर्वसुः मित्रोऽनुराधा इंदुर्मृगःजीवः पुष्यः अंत्यंरेवती हस्तश्रवणधनिष्ठाः एतैर्नवभिर्नक्षत्रैः यात्राप्रशस्तोत्तमा

रवौकर्कमीनालिसंस्थेतिदीर्घांजनुःपंचसप्तत्रितारांचनेष्टाः ८ नषष्ठीनचद्वादशीनाष्टमीनोसिताद्यातिथिःपूर्णिमाऽमानरिक्ता
हयादित्यमैत्रेंदुजीवांत्यहस्तश्रवोवासवैरेवयात्राप्रशस्ता ९

मध्यमानिनिषिद्धानिचभानिवसिष्ठआह तिस्रोत्तरावारुणनैर्ऋतेंद्रपूर्वात्रयं
ब्राह्मभयुग्दशैवम् मध्यान्यनिष्टान्यनलानिलेशाहिर्देवचित्राहिमघांतकानीति तिस्रोत्तराइत्यार्षः संधिः ननुवसिष्ठेनवाराउक्ताः सुरेज्यदैत्येज्यश
शींदुजानांवाराश्चवर्गाः शुभदाः प्रयाते आदित्यभूसूनुशनैश्चराणांवाराश्चवर्गानशुभप्रदाःस्युरिति अत्रकुतोनोक्ताइतिचेत् नारदादिभिरनु-
क्तत्वात् वसिष्ठादिभिरुक्तपापग्रहवारस्थूलनिषेधवैयर्थ्याच्च दोषाधिक्येसूचनार्थंतदितिचेन्नभिन्नकर्तृकेषुमुनिग्रंथेषुमुनिवचनानांवैयर्थ्यानर्हत्वा
देवंविधागतिरुचिता नत्वेककर्तृकेग्रंथे तत्रहिपूर्वापरविरोधे अर्थांतरंवाकार्यम् ग्रंथांतरेणसहैकवाक्यतावाकार्यातत्रायवसिष्ठवाक्यस्वरसः तुहिनक

रमंदवारे इतिवाक्यात् पापग्रहवारनिषेधोगौणइत्यनुमीयते तस्यगतिस्त्वेवंयदास्वजन्मराशेरुपचयेयोग्रहः शुभोवाऽशुभोवाभवतुससर्वादिक्षुहितः परंतुशूलदिशोविहाययदात्वनुपचयस्थः सतुकुत्रापिनहितः यदाहराजमार्तंडः उपचयकरग्रहदिनेशुद्धिः क्रूरेपिपापिनांभवति सौम्येष्वनुपचयस्थेनभवतियात्राशुभायातुरिति तस्मान्नार्थोवारोक्तइत्युक्तम् ९ अथवारशूलंनक्षत्रशूलंच पृथ्वीच्छंदसाह नपूर्वदिशीति शुक्रभेज्येष्ठायांपूर्वदिशि नव्रजेत् तथाविधुसौरिवारे सोमशनिवारेपिपूर्वदिशिनव्रजेत् अजपदभेपूर्वाभाद्रपदायांतथागुरुवारेपियमदिशिनव्रजेत् रविशुक्रयोर्वारेतथाधातृभे

नपूर्वदिशिशक्रभेनविधुसौरिवारेतथानचाजपदभेगुरौयमदिशीनशुक्रार्कयोः नपाशिदिशिधातृभेकुजबुधेर्यमर्क्षेतथानसौ
म्यककुभिव्रजेत्स्वजयजीवितार्थीबुधः १०

रोहिण्यांपाशिदिशिपाशीवरुणः तद्दिशिपश्चिमदिशिनव्रजेत् कुजबुधवारेतथार्यमर्क्षेउत्तराफाल्गुन्यांसौम्यककुभिउत्तरदिशिनव्रजेत् कःस्वजयजीवितार्थीबुधः स्वंधनंजयः शत्रुपराजयपूर्वकःस्वोत्कर्षः जीवितमायुष्यं एतानिअर्थयते असौनव्रजेत् वारशूलपरिहारमाह गुरुः सूर्यवारेघृतंप्राश्यसोमवारेपयस्तथा गुडमंगारकेवारेबुधवारेतिलानपि गुरुवारेदधिप्राश्य शुक्रवारेयवानपि माषान्भुक्त्वाशनेर्वारे गच्छन्शूलेनदोषभाक् तांबूलंचंदनंमृच्च पुष्पंदधिघृतंतिलाः वारशूलहराण्यर्कात्स्मरणादपिवानिशि १० अथकालशूलंशार्दूलविक्रीडितेनाह पूर्वाण्हेइति ध्रुवाख्यैर्मिश्राख्यैश्चभैः पूर्वाह्णेयात्रानशुभास्यात् तीक्ष्णाख्यैर्भैर्मध्यान्हेनस्यात् अपराण्हेलघुन

क्षत्रैः पूर्वरात्रे मैत्राख्यैः मध्यरात्रिसमयेउग्रनक्षत्रैः तथारात्र्यंतेरात्रितृतीयभागेचरनक्षत्रैर्यात्रानस्यात् तत्रविशेषः हरिहस्तपुष्यशशिभिः श्रवणहस्तपुष्यमृगैः सर्वस्मिन्नपिकालेयात्राशुभास्यात् ११ अथतत्रापिकालविशेषमध्यमानांनिषिद्धानांचकियतांभानांवर्ज्यघटिकाइंद्रवज्रयाह पूर्वेति पूर्वात्रयेप्रथमाः षोडशनाड्योनिषिद्धाः कृत्तिकायामेकविंशतिः मघायामेकादशभरण्यांसप्तघटिकाःत्याज्याइत्यर्थः स्वातीविशाखाश्लेषाज्येष्ठानां

पूर्वाह्णेध्रुवमिश्रभैर्नन्नृपतेर्यात्रानमध्यान्हकेतीक्ष्णाख्यैरपराण्हकेनलघुभैर्नोपूर्वरात्रेतथा मित्राख्यैर्नचमध्यरात्रिसमयेचोग्रैस्तथा
नोचरैरात्र्यंतेहरिहस्तपुष्यशशिभिःस्यात्सर्वकालेशुभा ११ पूर्वाग्निपित्र्यांतकतारकाणांभूपप्रकृत्युग्रतुरंगमाःस्युः स्वातीविशाखें
द्रभुजंगमानांनाड्योनिषिद्धामनुसंमिताश्च १२ पूर्वार्द्धमाग्नेयमघानिलानांत्यजेद्विचित्राहियमोत्तरार्द्धम् नृपःसमस्तांगमनेजयार्थी
स्वातींमघांचोशनसामतेन १३ तमोभुक्तताराःस्मृताविश्वसंख्याःशुभोजीवपक्षोमृतश्चापिभोग्याः

आद्याश्चतुर्दशघटिकास्त्याज्याः

चतुर्भुजः भरण्यांसप्तघटिकावन्हिभेचैकविंशतिः एकादशघटीपित्र्येत्रिपूर्वासुचषोडश स्वातीसार्पविशाखार्द्राज्येष्ठासुचचतुर्दश वर्जयेच्छेषघटिकायात्रायांशुभदामताइति १२ अथमतांतरेणवर्ज्यत्वमिंद्रवज्रयाह पूर्वार्द्धमितिस्पष्टार्थं १३ अथभानांजीवपक्षादिकाःसंज्ञाभुजंगप्रयातेनाह तमोभुक्तेति तमोराहुर्वक्रीग्रहः तेनभुक्ताभुक्ताएवंविधाविश्वसंख्यास्त्रयोदशसंख्यास्तारानक्षत्राणिजीवःपक्षःसजीवपक्षसंज्ञानिशुभकराणि भो-

ग्याः राहुणाक्रांतनक्षत्रात् भोग्यानिगम्यानित्रयोदशभानिमृतोमृतपक्षसंज्ञानि तदाक्रांतभंतेनराहुणाक्रांतभंतेन राहुकर्तरीत्येवनामकंस्यात् यथा राहुर्हस्तनक्षत्रे तेन भुक्तानिचित्रास्वातीप्रमुखानिपूर्वाभाद्रपदांतानित्रयोदशजीवपक्षः तदाक्रांतभाद्धस्तात्पंचदशमुत्तराभाद्रपदाख्यंग्रस्तसंज्ञम् तेनराहुणाभोग्यानि उत्तराफाफाल्गुनीमघाश्लेषापुष्यपुनर्वसुआर्द्रामृगरोहिणीकृत्तिकाभरणीअश्विनीरेवत्याख्यानिमृतपक्षः हस्तस्तु कर्तरीग्रस्तमितिच १४ अथजीवपक्षादीनांफलंशार्दूलविक्रीडितेनाह मार्तंडइति मृतपक्षेमार्तंडेसूर्येसतिचंद्रश्चेज्जीवपक्षेस्यात्तदायात्राशुभास्यात् विपरीतगेमार्तंडे

तदाक्रांतभंकर्तरीसंज्ञमुक्तंततोक्षेंदुसख्यंभवेद्ग्रस्तनाम १४ मार्तंडेमृतपक्षगेहिमकरश्चेज्जीवपक्षेशुभायात्रास्याद्विपरीत
गेक्षयकरीद्वौजीवपक्षेशुभा ग्रस्तर्क्षेमृतपक्षतःशुभकरंग्रस्तात्तथाकर्त्तरीयायींदुस्थितिमान्रविर्जयकरौतौद्वौतयोर्जीवगौ १५

जीवपक्षगेसतिचंद्रश्चेन्मृतपक्षगः तदायात्राक्रियमाणायातुःक्षयकरीस्यात् द्वौसूर्यचंद्रमसौचेज्जीवपक्षेस्यातांतदाशुभाशुभकरेत्यर्थः अर्थादुभौमृतपक्षेस्यातांतदायात्राऽतिक्षयकरीस्यात् अथास्यापवादमाह ग्रस्तर्क्षमिति मृतपक्षतः मृतपक्षनक्षत्रात्ग्रस्तर्क्षेराहुणाक्रांतभात् पंचदशसंख्यंशुभंशुभकरंस्यात् यथाशवान्मरिष्यमाणोदेहीप्रबलः ग्रस्ताद्राहुभतः पंचदशसंख्याकात् कर्त्तरीराह्वाक्रांतंशुभंशुभकरंस्यात् यायीति योराजावैरिणमुद्दिश्यजिगमिषुःसयायी तत्स्वामीचंद्रः यश्चस्वदेशेदुर्गंकृत्वातिष्ठतिसस्थायी रविःस्थितिमान् स्थायीराज्ञःस्वामी तौद्वौसूर्या-

चंद्रमसौजीवगौजीवपक्षगतौ तयोःराज्ञोःस्थायीयायिराज्ञोःजयकरौरविश्चेज्जीवपक्षगः तदास्थायिनोजयः चंद्रश्चेज्जीवगस्तदायायिनोजयः उभौचेत् जीवगौतदासंधिकरौ अर्थाद्द्वावपिचेन्मृतपक्षगौउभयोःपराजयकरौ अत्रबहुविचारः स्वरोदयादवगंतव्यः १५ अथाकुलकुलाकुलकुलगुणंवसंततिलकाशार्दूलविक्रीडिताभ्यामाह स्वात्यंतकाहीति पूर्वाश्वीचस्वातीअंतकंभरणीआश्लेषाधनिष्ठारेवतीहस्तअनुराधापुनर्वसुध्रुवाणिउत्तरात्रयरोहिण्यः एतानिद्वादशभानिविषमास्तिथयः प्रतिपत्तृतीयापंचमीसप्तमीनवम्येकादशीत्रयोदशीपंचदश्यइत्यष्टौतिथयः शनिचंद्रसूर्यबृहस्पतिवाराःचत्वारः एतेप्रत्येकमकुलसंज्ञाः अथज्ञोबुधवारः मूलंअंबुपंशततारका ईशआर्द्राः विधिभमभिजित् चत्वारिभानिदशषड्द्वितिथ्यः दशमीषष्ठीद्वितीयातिस्रस्तिथयः एतेप्रत्येकंकुलाकुलसंज्ञाःस्युः अथपूर्वास्तिस्रः अश्विनीपुष्यमघाइंदुर्मृगः कर्णःश्रवणः दहनःकृत्तिकाःद्वीशंविशाखाज्येष्ठाचित्राएतानिद्वादशभानिशुक्रभौमवारौ अर्काष्टेंद्रवेदैर्मिताः द्वादश्यष्टमीचतुर्दशीचतुर्थीसंज्ञाश्चतस्रस्तिथयः प्रत्येकंकुलसंज्ञकाःस्युः फलमाहयायीति अकुलसंज्ञकेतिथि नक्षत्रवारगणेसमरेयुद्धप्रारंभेसतियायीराजाजयीस्यात् यदिकुलसंज्ञकेतिथिनक्षत्रेवारेगणेसति स्थायीराजातद्वज्जयीस्यात् कुलाकुलेसंज्ञकेतिथिवारनक्षत्रगणेयुध्यतोर्युद्धंकुर्वतोः भूमीशयोराज्ञोःपरस्प

स्वात्यंतकाहिवसुपौष्णाकरानुराधादित्यध्रुवाणिविषमास्तिथयोऽकुलाःस्युः सूर्येंदुमंदगुरवश्चकलाकुलज्ञामूलांबुपेशविधि
भंदशषड्द्वितिथ्यः १६

रंसधिःस्यात् १६ १७ अथपथिराहुचक्रंस्रग्धरयाह स्युर्धर्मइति अश्विनीपुष्याश्लेषाधनिष्ठाशततारकाविशाखानुराधाख्यानिभानिधर्मेधर्मस्थानेलेख्यानि अथभरणीपूर्वाभाद्रपदाज्येष्ठाश्रवणपुनर्वसूमघास्वात्याख्यानिभानि अर्थेस्युः अथकृत्तिकार्द्रोत्तरापूर्वाभाद्रपदाचित्रामूलाभिजित्पूर्वाफाल्गुनीनक्षत्राणिकामेस्युः अथरोहिणीआप्यंपूर्वाषाढामृगोंत्यंरेवतीविश्वमुत्तराषाढा अर्यमभंउत्तराफाल्गुनीहस्ताख्यानिभानिमोक्षेस्युः पथि-

पूर्वाम्बीज्यमघेंदुकर्णदहनद्वीशेंद्रचित्रास्तथाशक्रारौकुलसंज्ञकाश्चतिथयोर्काष्टेंद्रवेदैर्मिताः यायीस्यादकुलेजयीच्चसमरेस्थायीच
तद्वत्कुलेसंधिःस्यादुभयोःकुलाकुलगणेभूमीशयोर्युध्यतोः १७ स्युर्धर्मेदस्त्रपुष्योरगवसुजलपद्वीशमैत्राण्यथार्थेयाम्याजीर्धींद्र
कर्णादितिपितृपवनोडून्यथोभानिकामे वन्ह्यार्द्राबुध्न्यचित्रानिर्ऋतिविधिभगाख्यानिमोक्षेथरोहिण्याप्येंद्वंत्यदस्रविश्वार्यमभादि
नक्रर्क्षाणिपंथादिराहौ १८ धर्मगेभास्करेवित्तमोक्षेशशीवित्तगेधर्ममोक्षस्थितिःशस्यते कामगेधर्ममोक्षार्थगःशोभनोमो
क्षगेकेवलंधर्मगःप्रोच्यते १९

शब्दआदिर्यस्यतादृशोराहौपथिराहावित्यर्थः चक्रेइतिविशेषणमध्याहार्यम् १८ अथस्रग्विण्यातत्फलमाह धर्मगेभास्करइति धर्ममार्गस्थितेभास्करेसतिचेद्वित्तमोक्षेशशी अर्थमार्गेमोक्षमार्गेवाशशीस्यात्तदाशोभनः अथवित्तगेअर्थगेभास्करेसतिधर्ममार्गगः मोक्षमार्गेवाशशीशोभनः अथकामगेभास्करेसतिधर्मार्थमोक्षमार्गगः शशीशोभनः अथमोक्षमार्गेभास्करेसतिधर्मगःशशीशोभ

नः अर्थाद्विपरीतावस्थितयोर्द्वयोः सूर्यचंद्रमसोरशुभत्वंस्यात् १९ अथतिथिचक्रंशालिन्याह पौषेइति अत्रपौषादितः प्रतिमासेद्वादशकोष्टकालेख्याः एवंकृतेचतुश्चत्वारिंशदधिकंशतंकोष्टकाजायंते तत्रचक्राकृतिः यथान्यासः प्राग्लिखितः तत्रपक्षस्य शुक्लपक्षस्य कृष्णपक्षस्यवापक्षतिः पक्षमूलंप्रतिपत्तदादिकालः प्रथमंपौषेमासेप्रतिपदादिकाः द्वादशतिथयोऽधोधोलेख्याः माघादौमाघादिमासेषुद्वितीयादिकास्तिथयोलेख्याः यथामाघेद्वितीयादिकाः फाल्गुनेतृतीयादिकाः चैत्रेचतुर्थ्यादिकाः वैशाखेपंचम्यादिकाः ज्येष्ठेषष्ठ्यादिकाः आषाढेसप्तम्यादिकाः श्रावणेऽष्टम्यादिकाः भाद्रपदेनवम्यादिकाः आश्विनेदशम्यादिकाः कार्तिकेएकादश्यादिकाः मार्गशीर्षेद्वादश्यादिकाः सर्वास्तिथयोद्वादश्यंतालेख्याः अवशिष्टस्थानानिप्रतिपदादिभिः पूरणीयानि कामात्तिस्रइति कामात्त्रयोदशीचतुर्दशीपंचदश्यस्तृतीयादिवत्स्युः त्रयोदशीतृतीयावत् चतुर्दशीचतुर्थीवत् पचदशीपंचमीवत्स्युरित्यर्थः फलार्थमतिदेशोयम् तत्रप्रतिपदादौपूर्वदक्षिणपश्चिमोत्तरासुदिक्षुयानेचिकीर्षितेसति फलंशुभाशुभंसौख्यंक्लेशइत्यादिनावृत्तत्रयेणावक्ष्येकथयिष्यामि २० फलानिशालिनीत्रयेणाह सौख्यमिति लाभइति सौख्यमितिच श्लोकत्रयंस्पष्टार्थमेव तत्रपौषप्रतिपदिदिक्चतुष्टयेसौ

पौषेपक्षत्यादिकाद्वादशैवतिथ्योमाघादौद्वितीयादिकास्ताः कामात्तिस्रः स्युस्तृतीयादिवच्चयानेप्राच्यादौफलंतत्रवक्ष्ये २० सौख्यं
क्लेशोभीतिरर्थागमश्चशून्यंनैःस्वंनिस्वतामिश्रिताच द्रव्यक्लेशोदुःखमिष्टाप्तिरर्थोलाभःसौख्यंमंगलंवित्तलाभः २१

पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ	का	मा	पूर्व	दक्षिण	पश्चिम	उत्तर
१	२	३	४	५	६	७	८	९	१०	११	१२	सौख्यम्	क्लेशः	भीतिः	अर्थागमः
२	३	४	५	६	७	८	९	१०	११	१२	१	शून्यम्	नैस्वम्	निस्वम्	मिश्रता
३	४	५	६	७	८	९	१०	११	१२	१	२	द्रव्यक्लेशः	दुःखम्	इष्टाप्तिः	अर्थः
४	५	६	७	८	९	१०	११	१२	१	२	३	लाभः	सौख्यम्	मंगलम्	वित्तलाभः
५	६	७	८	९	१०	११	१२	१	२	३	४	लाभः	द्रव्याप्तिः	धनम्	सौख्यम्
६	७	८	९	१०	११	१२	१	२	३	४	५	भीतिः	लाभः	मृत्युः	अर्थागमः
७	८	९	१०	११	१२	१	२	३	४	५	६	लाभः	कष्टम्	द्रव्यला·	सुखम्
८	९	१०	११	१२	१	२	३	४	५	६	७	कष्टम्	सौख्यम्	क्लेशला·	सुखम्
९	१०	११	१२	१	२	३	४	५	६	७	८	सौख्यम्	लाभः	कार्यसि·	कष्टम्
१०	११	१२	१	२	३	४	५	६	७	८	९	क्लेशः	कष्टात्सिद्धिः	अर्थः	धनम्
११	१२	१	२	३	४	५	६	७	८	९	१०	मृत्युः	लाभः	द्रव्यलाभः	शून्यम्
१२	१	२	३	४	५	६	७	८	९	१०	११	शून्यम्	सौख्यम्	मृत्युः	अत्यंतकष्टम्
पौ	मा	फा	चै	वै	ज्ये	आ	श्रा	भा	आ	का	मा	पूर्व	दक्षिण	पश्चिम	उत्तर

रव्यंक्लेशोभीतिरर्थागमश्चेति फलचतुष्टयंक्रमेणज्ञेयम् एवंद्वितीयादिष्वपिश्लोकचतुर्थांशोक्तंफलंस्यात् २१ २२ २३ अथसर्वांकज्ञानंवसंततिलकयाह तिथ्यर्क्षेति तिथयोत्रशुक्लप्रतिपदादितोग्राह्याः तत्रतिथिनक्षत्रवाराणांयुतिः स्थानत्रयेस्थाप्याक्रमेणसप्तभिरष्टभिस्त्रिभिश्चतष्टाभक्तावशिष्टा सति प्रथमस्थानेवियतिशून्येसति अतिदुःखीयात्राकर्त्तास्यात् मध्येद्वितीयस्थानेधननाशः चरमेतृतीयस्थानेशून्यंमृत्युःस्यात् स्थानत्रयेंकयुजि

लाभोद्रव्याप्तिर्धनंसौख्यमुक्तंभीतिर्लाभोमृत्युरर्थागमश्च लाभःकष्टंद्रव्यलाभौसुखंच कष्टंसौख्यंक्लेशलाभौसुखंच २२ सौख्यं
लाभःकार्यसिद्धिश्चकष्टंक्लेशःकष्टात्सिद्धिरर्थोधनंच मृत्युर्लाभोद्रव्यलाभश्चशून्यंशून्यंसौख्यंमृत्युरत्यंतकष्टं २३ तिथ्यर्क्षवारयु
तिरद्रिगजाग्नितष्टास्थानत्रयेत्रवियतिप्रथमेतिदुःखी मध्येधनक्षतिरथोचरमेमृतिःस्यात्स्थानत्रयेंकयुजिसौख्यजयौनिरुक्तौ
२४ रवेर्भतोब्जभोन्मितिर्नगावशेषिताद्यगाः महाडलोनशस्यतेत्रिषण्मितोभ्रमोभवेत् २५
अंकयुतौसौख्यजयौभवेताम्

२४ अथाडलेभ्रमणेप्रमाणिकयाह रवेर्भतइति सूर्यनक्षत्रात् अब्जभस्यचंद्रभस्योन्मितिर्गणनाकार्या सानगैःसप्तभिरवशेषितासतीद्यगाःद्विशेनषमितासप्तशेषमितावाभवेत् तदामहाडलोदोषःस्यात् सनशस्यते प्रागुक्तप्रकारेणयदित्रिषण्मितात्रिशेषमितापड्शेषमितावास्यात्तदाभ्रमोभ्रमनणाख्योदोषःस्यात् सोपिनशस्यते एतन्निर्मूलम् तत्रभ्रमणेयात्रामेवत्यजंति आडलेबहूनिकार्याणित्यजंति उक्तंच यात्रायांच हलप्रवाह समरेचौर्येच

संधौतथाकूपारामतडागबंधनविधौपापर्द्धिदुर्गग्रहे अश्वेभोष्ट्रुरथाधिरोहणविधौत्याज्यंसदैवाडलंयत्नान्नात्रशुभेषुमंगलविधौदोषोनतस्यक्वचिदि-
ति २५ अथहैवराख्यंयोगमुपजातिकयाह शशांकभमिति स्पष्टार्थम् प्रसंगात् घबाडमपि सूर्यभाद्गणयेच्चांद्रंत्रिगुणंतिथिसंयुतम् सप्तभिस्तु
हरेद्भागंत्रिशेषंस्याद्घबाडकम् एतच्चहैवराच्छुभंज्ञेयम् एतत्सर्वंदाक्षिणात्याविचारयंतीति अत्रप्रसंगात् ग्रंथांतरस्थसंग्रहः सूर्यभाद्गणयेच्चांद्रं
तिथिवारंचमिश्रितम् सप्तभिस्तुहरेद्भागंपंचशेषंतुटेलकम् सूर्यभाद्गणयेच्चांद्रंतिथिवारंचमिश्रितम् अर्कसंख्यैर्हरेद्भागंनवशेषंतुगोरवम्

शशांकभंसूर्यभतोत्रगण्यंपक्षादितिथ्यादिनवासरेण युतंनवाप्तंनगशेषकंचेत्स्याद्धैवरंतद्गमनेतिशस्तम् २६ भूपंचांकद्व्यं
गदिग्वह्निसप्तवेदाष्टेशार्काश्चघाताख्यचंद्रः मेषादीनांराजसेवाविवादेवर्ज्यौयुद्धाद्येचनान्यत्रवर्ज्यः २७

प्रवेशेगोरवम् दद्या
न्निर्गमेहैवरंतथा तस्करेटेलकंदद्याद्घबाडंसर्वकर्मसु इतिज्योतिर्निबंधे २६ अथघातचंद्रंशालिन्यातत्परिहारंचानुष्टुब्द्वयेनाह भूपंचेति
आग्नेयेति रूपद्व्यग्नीतिच मेषादिराशीनांभूपंचांकेत्यादिकोघातचंद्रोज्ञेयः यथा मेषस्यप्रथमोमेषएव वृषस्यपंचमः कन्यास्थः मिथुनस्यनव
मः कर्केद्वितीयः सिंहेषष्ठः कन्यायादशमः तुलायास्तृतीयः वृश्चिकस्यसप्तमः धनुषश्चतुर्थः मकरस्याष्टमः कुंभस्यैकादशः मीनस्यद्वादशः घा-
तचंद्रोराजसेवायांविवादेप्रतिवादिनांसहकलहे युद्धाद्ये आदिशब्दान्मृगयादिषुवर्ज्यः अन्यत्रविवाहान्नप्राशनादिमंगलकृत्येनवर्ज्यः उक्तंच

युद्धेचैवविवादेचकुमारीपूजनेतथा राजसेवावाहनादौघातचंद्रं विवर्जयेत् तीर्थयात्राविवाहान्नप्राशनोपनयादिषु मांगल्यसर्वकार्येषुघातचंद्रंनचिंतयेत् अत्रलाधवार्थंभ्रातृपुत्रेणगोविंद्य पद्याम् मेषकन्याघटहीरिनक्रयुग्मधनुर्वृषाः मीनसिंहधनुःकुंभाघातचंद्राअजादितइति घातचंद्रेमेषादिराशिषुकृत्तिकादिभानांचरणाएतेवर्ज्याइतिकेचिद्वदंति २७ २८ २९ घाततिथिमुपजातिकयाह गोस्त्रीति गोवृषः स्त्रीकन्या झषोमीनः

आग्नेयत्वाष्ट्रजलपपित्र्यवासवरौद्रभे मूलब्राह्माजपादर्क्षेपित्र्यमूलाजभेक्रमात् २८ रूपद्व्यग्न्यग्निभूरामद्व्यब्ध्यग्न्यब्धियुगाग्नयः घातचंद्रेधिष्ण्यपादामेषाद्वर्ज्यामनीषिभिः २९ गोस्त्रीझषेघाततिथिस्तुपूर्णाभद्रानृयुक्कर्कटकेथनंदा कौर्प्यजयोर्नक्रघटेचरिक्ताजयाधनुःकुंभहरौनशस्ताः ३० नक्रेभौमोगोहरिस्त्रीषुमंदश्चंद्रोद्वंद्वेऽर्कोजभेज्ञश्चकर्के शुक्रःकोदंडालिमीनेषुकुंभजूकेजीवोघातवारानशस्ताः ३१

एतद्राशिमतिनरेपूर्णाः पंचमीदशमीपंचदशीच घातातिथिः नृयुक्मिथुनं कर्कटकेनरेनंदातिथिःघातः कौर्पीवृश्चिकः अजोमेषः एतयोर्नंदाप्रतिपत्षष्ठ्येकादशीचतिथिः नक्रघटेमकरतुलयोः रिक्ताचतुर्थीनवमीचतुर्दशीचघातातिथिः धनुःकुंभसिंहानांजयातृतीयाष्टमीत्रयोदशीच घाततिथयः भद्राद्वितीयासप्तमीद्वादशीमिथुनेकर्केच घाततिथयोयात्रादौनशस्ताः ३० घातवारान्शालिन्याह नक्रेभौमइति मकरराशिमतिपुरुषेभौमोघातवारः वृषसिंहकन्यासुमंदः शनिर्घातवारः द्वंद्वेमिथुनेचंद्रः अजेमेषेऽर्कः कर्केबुधः धनुर्मीनवृश्चिकेषुशुक्रवारः जूकस्तुलाकुंभतुलयोर्जीवोगुरुर्घातवारइ-

त्यर्थः घातवारा अपियात्रादौनशस्ताः ३१ अथघातनक्षत्राण्यनुष्टुभाह मघेति स्पष्टार्थम् एतदपियात्रादौनशस्तम् ३२ अथघातलग्नान्याह भूद्व्यब्धीति
स्पष्टार्थम् तदपियात्रायांवर्ज्यम् ३३ अथयोगिनीजीर्णास्तास्तिथीनांदोषमाह नवभूम्यइति एतास्तिथयः पूर्वतः पूर्वदिशमारभ्यअष्टदिक्षुज्ञेयाः यथा
पूर्वस्यांनवभूम्यः नवमीप्रतिपच्च आग्नेय्यांशिववन्हयः एकादशीतृतीयाच एवमग्रेपि एतास्तिथयोयोगिन्यइतिजीर्णास्तास्तिथयः संमुखवामगा

मघाकरस्वातिमैत्रमूलश्रुत्यंबुपांत्यभम् याम्यब्राह्मेशसार्पंच मेषादेर्घातभंनसत् ३२ भूमि१ द्व्य२ब्ध्य४द्रि७दि१०क्सूर्या१२
गा६ष्टां८के९शा११ग्नि३सायकाः५ मेषादिघातलग्नानियात्रायांवर्जयेत्सुधीः ३३ नव९ भूम्यः१शिव ११ वन्हयो३क्ष५विश्वे१३र्का१२कृताः४
शक्र१४रसा६स्तुरंग७तिथ्यः१५द्वि२दिशो१०मा३०वसव८श्च पूर्वतः स्युस्तिथयः संमुखवामगानशस्ताः ३४ कौबेरीतोवैपरीत्येनकालोवा
रेऽर्काद्येसंमुखेतस्यपाशः रात्रावेतौवैपरीत्येनगण्यौयात्रायुद्धेसंमुखेवर्जनीयौ ३५

नशस्ताः यथा प्राच्यांगंतुः प्रतिपत्संमुखीदक्षिणां
गंतुर्वामगा प्रतीच्यांगंतुः पृष्ठगा उदीच्यांगंतुर्दक्षिणा एवंसर्वासुदिक्षुसर्वास्तिथयोविचार्यास्तत्रसंमुखवामगाश्चतिथयोनशुभाः अर्थाद्दक्षिणापृष्ठगाश्च
शुभाः उक्तंच पृष्ठतोदक्षिणेवापियोगिनीगमनेहिता वामसंमुखयोर्नेष्टावायुमेवंविचिंतयेदिति ३४ अथकालपाशयोगंशालिन्याह कौबेरीतइति कौबेरीउत्तरा दिक् तस्या
विपरीतदिक्षुअर्काद्येवारेकालः स्यात् तद्यथा रवावुत्तरदिशिकालः दक्षिणोपाशइत्यर्थः चंद्रेवायव्यांकालः आग्नेय्यांपाशः एवंभौमादिष्वपि रात्रौकालदिशिपा

शइतिवैपरीत्यंज्ञेयम् एतौयात्रायुद्धादिषुसंमुखेवर्ज्यौ उक्तंचस्वरोदये वारोत्थः पूर्वदिग्भागेततः सव्येनमंदगः यत्रस्थतत्रकालःस्यात्पाशस्तस्यतुसंमुखःदक्षिणस्थः शुभःकालःपाशोवामदिगाश्रयः यात्रायांसमरेश्रेष्ठस्ततोऽन्यत्रनशोभनइति प्रसंगादर्द्धयामोराहुरपिस्वरोदयस्थोलिख्यते इंद्रवायुयमेरुद्रेतोयाग्निशशिमारुते यामार्द्धमुदितोराहुर्भ्रमत्येवंदिगष्टकेइति ३५ अथपरिघदंडाख्यंदोषमनुष्टुभाह पूर्वादिष्विति अनलर्क्षतः कृत्तिकातः सप्तभानिपूर्वस्याम् मघातः सप्तयाम्यायाम् अनुराधातः सप्तपश्चिमायाम् धनिष्ठातः सप्तभान्युत्तरस्यांलेख्यानि इति सर्वत्रवाक्यशेषः त

पूर्वादिषुचतुर्दिक्षुसप्तसप्तानलर्क्षतः वायव्याग्नेयदिक्संस्थंपारिघंनैवलंघयेत् ३६ अग्नेर्दिशंनृपइयात्पुरुहूतदिग्भैरेवं
प्रादक्षिणगताविदिशोथकृत्ये आवश्यकेपिपरिघंप्रविलंघ्यगच्छेच्छूलंविहाययदिदिक्तनुशुद्धिरस्ति ३७

त्रवायव्याग्नेयदिगुपनिबद्धरेखापरिघोदंडःस्यात् सर्वथानोल्लंघयेत् तत्रयवनेश्वरः प्राचीमुदग्द्वारिभिरत्रयायात्प्राग्द्वारिकैश्चोडुभिरप्युदीचीम् तथैवयाम्यामपराश्रितैर्भैर्याम्याश्रयैश्चाप्यपरांप्रयायादिति ३६ अथविदिक्षुगमनेनक्षत्रातिदेशंआवश्यकृत्येनिंद्यदंडापवादंचवसंततिलकयाह अग्नेर्दिशमिति नृपःपुरुहूतदिक्प्राचीतत्स्थैःकृत्तिकादिसप्तनक्षत्रैः अग्नेर्दिशमाग्नेयीमियात् गच्छेत् एवमनेनप्रकारेणप्रदक्षिणगताःसृष्टिमार्गेणस्थिताविदिशोनैर्ऋत्यादीर्गच्छेत् यथा मघादिसप्तभिःनैर्ऋत्याम् अनुराधादिसप्तभैर्वायव्याम् धनिष्ठादिसप्तभिरैशानींगच्छेत्दित्यर्थः अथेति आव

श्यकेकृत्येकर्तव्येपरिघदंडमपिलंघयित्वानृपोगच्छेत् परंतुशूलंवारशूलंनक्षत्रशूलंविहायत्वत्कार्यादिदिकृतनुशुद्धिरस्ति पूर्वादिदिक्षुमेषादयस्त्रिराहत्यदिग्राश-
यस्त्रयःस्युःक्रमशोमेषाद्यएवतस्यांदिशिदिग्लग्नशब्देनव्यवह्रियंते तेषांशुद्धिः शुभफलदातृगृहानुकूलसाहित्यंस्यात् दिग्राशीनाह नारदः दिग्राश
यःस्युःक्रमशोमेषाद्याश्चपुनःपुनरिति ३७ अन्यदपींद्रवज्रयाह मैत्रार्केति अनुराधाहस्तपुष्याश्विनीनक्षत्रैः सर्वासुदिशासुचतुर्दिक्षुतज्ज्ञैःज्यो
तिषिकैर्यात्राशुभानिगदिता यत्तुबालिकाविवेकादौप्रागादिषुश्रवणाश्विपुष्यहस्तानांत्यागउक्तः सनिर्मूलत्वादुपेक्ष्यः क्वचिद्दृष्टोसर्वदिग्द्वारका

मैत्रार्कपुष्याश्विनिभैर्निरुक्तायात्राशुभासर्वदिशासुतज्ज्ञैः वक्रीग्रहःकेंद्रगतोस्यवर्गोलग्नेदिनंचास्यगमेनिषिद्धं ३८ सौ
म्यायनेसूर्यविधूतदोत्तरांप्राचींव्रजेत्तौयदिदक्षिणायने

ण्युक्तानि गुरुःपुष्याश्विहस्तमैत्राणिपौष्णवैष्णवसौम्यभम् वासवंसर्व
दिक्ष्वाशुयात्रायांशोभनानिहीति वराहः सर्वद्वारिकसंज्ञितानिगुरुभंहस्ताश्विमैत्राणिचश्रेष्ठान्यैंदवपौष्णविष्णुवसुभान्याद्यैःसहाष्टौसदेति वक्री
ग्रहइति वक्रीग्रहोयदिकेंद्रगःस्यात्सगमेयात्रायांनिषिद्धः अथवाऽस्यवक्रीग्रहस्यलग्नेवर्गः षड्वर्गश्चेत्सोपिगमनेनिषिद्धःवास्यवक्रीग्रहस्यदि
नंवारोपिगमनेनिषिद्धम् ३८ अथायनशूलमिंद्रवज्रयाह सौम्यायनेति यदिसूर्यचंद्रौसौम्यायनेउत्तरायणेगतौस्यातांतदाउत्तरांप्राचींवाव्रजेत् त
द्दिङ्मुखवायात्राशुभेत्यर्थः यदितुरविचंद्रौदक्षिणायनगतौस्यातांतदाप्रतीचींदक्षिणांवाव्रजेत् अथतयोर्भिन्नायनत्वेअयनभेदेसतिदिवानिशंव्रजेत्

यथा सूर्योयस्मिन्नयनेतांदिशंदिवाव्रजेत् चंद्रोयस्मिन्नयनेतांदिशंरात्रौयायात् अत्रोत्तरस्यांपूर्वस्याअंतर्भावः दक्षिणस्यांपश्चिमायाइति रत्नकोशे दिनकरकरतसांमकरादावुत्तरांचपूर्वांच यायाच्चकर्कटादौयाम्यामाशांप्रतीचींचेति अथोन्यथाचेत्कुर्यात्तदावधोमरणंभवेत् भिन्नायनत्वेसतिसूर्योयस्मिन्नयनेतांदिशंयदिरात्रौगच्छेत् चंद्रोयस्मिन्नयनेतांदिवागच्छेत्तदायातुर्वधोभवेदित्यर्थः ३९ अथसंमुखशुक्रदोषमुपजात्याह उदेतीति शुक्रोयस्यांदिशिप्राच्यांप्रतीच्यांवाकालवशेनोदयंकरोतितत्रगंतुःपुंसः शुक्रः संमुखः अयमेकः प्रकारः अथवा गोलभ्रमवशेनयत्रयस्यांदिशिउत्तरस्यांदक्षिण

प्रत्यग्यमाशांचतयोर्दिवानिशंभिन्नायनत्वेथवधोन्यथाभवेत् ३९ उदेतियस्यांदिशियत्रयातिगोलभ्रमाद्वाथककुब्भसंघे

स्यांवायदिगच्छेत् तत्रगंतुःपुंसःसंमुखः शुक्रःस्यात् अयंद्वितीयः प्रकारः अथयत्रककुप्जसंघेप्राच्यादिदिशिकृत्तिकादिन्यासवशेनयद्दिङ्नक्षत्रेचरतितत्रदिशिगंतुःसंमुखःशुक्रः स्यादित्ययंतृतीयःप्रकारःस्यात् अत्रिः यद्दिग्गतः समुदयेद्विचरेद्यत्रगोलके यद्वारंभेषुविचरेत्त्रिविधंप्रतिभार्गवमिति यत्रोदितइति यस्यांदिश्युदितः शुक्रोदृश्यतेतांदिशमेवनगच्छेत् अन्यदिश्यपियथासंभवंनोयायात् मूढेशुक्रेकार्यहानिःप्रतिशुक्रेपराजयइतिनारदोक्तेः अवश्यकर्तव्येगमनेशांतिमाह वसिष्ठः भृगुलग्ने भृगोर्वारे भृगुवर्गे भृगूदये उपोष्यभृगुवारेपियावच्छुक्रोदयंप्रति रजतेनैवशुद्धेनकारयेत्प्रतिमांभृगोः लिखेदष्टदलंपद्मंकांस्यपात्रेचतंडुलैः शुक्लसूक्ष्मांबरैर्वेष्ट्यप्रतिमांतत्रपूजयेत् शुक्लपुष्पाक्षतैर्गंधैर्मुक्ता

हारैर्विचित्रितैः उपचाराणिकार्याणिशुक्रंतेअन्यदितृचा तन्मंत्रेणजपंकुर्यात्सम्यगष्टोत्तरंशतम् कर्मांतेतेनमंत्रेणभक्त्याचार्घ्यंप्रदापयेत् श्वेतगंधाक्षतैःपु
ष्पैः क्षीरमिश्रेणवारिणा दैत्यमंत्रीदिवादर्शीचोशनाभार्गवःकविः श्वेतोथमंडलीकाव्योविधिस्थोभृगवेनमः दत्वेत्यर्घ्यंप्रयत्नेन प्रार्थयेदेवभक्तितः
अनेनैवतुमंत्रेणप्रांजलिःप्रणतःस्थितः त्वत्पूजयानयाशुक्रसंमुखत्वसमुद्भवं दोषंविनाशयक्षिप्रंरक्षमांतेजसांनिधे इतिप्रार्थ्यप्रयत्नेनप्र
तिमाभूषणान्विता दैवज्ञायैवदातव्याश्वेताश्वसहितैवसा शिष्टेभ्योदक्षिणांदद्याद्यथावित्तानुसारतः ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुं

त्रिधोच्यतेसंमुखएवशुक्रोयत्रोदितस्तांतुदिशंनयायात् ४० वक्रास्तनीचोपगतेभृगोःसुतेराजाव्रजन्यातिवशंहिविद्विषाम्
बुधोनुकूलोयदितत्रसंचलन्रिपून्डायेन्नैवजयःप्रतीदुजे ४१

जीतबंधुभिः इतरेषांग्रहाणांचपूजांकुर्यात्प्रयत्नतः तत्तत्संमुखजोदो
षस्तत्क्षणादेवनश्यति दीपिकायांतुदानमेवोक्तम् सितमश्वंसितच्छत्रंहेममौक्तिकसंयुतम् ततोद्विजातयेदद्यात्प्रतिशुक्रप्रशांतयइति ४० अथवक्रास्तादि
दोषंसापवादमुपजात्याह वक्रास्तेति भृगोःसुतेशुक्रेवक्रोपगतेअस्तोपगतेनीचोपगतेचउपलक्षणत्वात् ग्रहयुद्धपराजितेवर्णरहितेवासति राजापरराष्ट्रंव्र
जन्सन्हिनिश्चयेनविद्विषांशत्रूणांवशंयाति बद्धोभवतीत्यर्थः भरद्वाजः विवर्णेविजितेनीचेवक्रितेवासितेस्तगे शत्रुक्षेत्रगतेवापितदंशेतन्निरीक्षिते भौमां
शेभौमसंयुक्तेमंदांशेमंदसंयुते यात्रांनैवप्रकुर्वीतलक्ष्म्यायुर्बलहानिदेति बुधइति तत्रशुक्रास्तेयदिबुधोनुकूलःपृष्ठदिक्संस्थोभवेत्तदासंचलन्सन्–

यावच्चंद्रः पूषभात्कृत्तिकाद्येपादेशुक्रोंधोनदुष्टोऽग्रदक्षे मध्येमार्गंभार्गवास्तेपिराजातावत्तिष्ठेत्संमुखत्वेपितस्य ४२
कुंभकुंभांशकौत्याज्यौसर्वथायत्नतोबुधैः तत्रप्रयातुर्नृपतेरर्थनाशःपदेपदे ४३

राजारिपून्शत्रून्जयेत् नैवेति प्रतींदुजेबुधेसंमुखेसतिगंतूराज्ञोनैवजयः किंतुपराजयः अयंतुप्रतिशुक्रविचारोनृणांप्रथमगमनेराज्ञांतुसमरयात्रायामाहुः रैभ्यः प्रतिशुक्रादिदोषोयंनूतनेगमनेनृणाम् राज्ञांविजययात्रायांनान्यथादोषमर्हतीति ४१ अथविशेषंशालिन्याह यावच्चंद्रइति चंद्रोयदापूषभाद्रेवतीनक्षत्रादारभ्यकृत्तिकाद्येपादेरेवत्यश्विनीभरणीकृत्तिकाप्रथमचरणेयावत्तिष्ठतितावच्छुक्रोंधोज्ञेयः दृष्टोपिशुक्रोदर्शनकार्यंनकरोतीत्यर्थः यः तदेवाहनदुष्टइति अंधोयदा अग्रेसंमुखेदक्षेदक्षिणभागेचदुष्टोनस्यात् मध्येमार्गमिति सुमुहूर्त्तेप्रस्थितोपिराजामध्यमार्गेमार्गमध्येयदिशुक्रास्तोभवेत्तावत्कालंतस्मिन्नेवप्रयाणेतिष्ठेत् यावच्छुक्रोदयोभवेत् यदिगच्छतोराज्ञोदैवात्संमुखः शुक्रश्चेत्तावदस्यशुक्रस्यसंमुखत्वेपितस्मिन्नेवप्रयाणेतिष्ठेत् उपलक्षणत्वाद्गुरावप्येवंविधेद्रष्टव्यम् पराशरः जीवःशशांकःशुक्रोवामार्गमध्येऽस्तगोयदि तत्रैवनिवसेद्राजायावदभ्युदितोभवेदिति मार्गमध्येबुधास्तेनदोषः यदातुमार्गमध्येबुधोदयोभवेत्सचपुनःसंमुखोभवेत्तदातुपुनर्दोषएव वसिष्ठः संमुखश्चंद्रजोयत्रमार्गमध्योदितोयदि यावदस्तंगतेतस्मिंस्तावत्तत्रैवसंवसेदिति ४२ अथनिषिद्धलग्नमनुष्टुभाह कुंभकुंभांशकेति स्पष्टार्थः ४३ अथान्यन्मंजुभाषिण्याह अथमीनलग्नइति मीनलग्नेलग्नांतरेवामीनांशकेचलितराज्ञोवर्त्म

वक्रंस्यात् जनीति जनिर्जन्मकालीनंलग्नंजन्मभंजन्मराशिः तयोर्जन्मलग्नराश्योः पतीस्वामिनौशुभग्रहौसौम्यग्रहौचेदुदयलग्नेभवतः तदागमोगमनंशु
भंस्यात् जन्मलग्नंजन्मराशिश्चयात्रालग्नगंशुभमितिप्रागेवाभिहितम् जननराशितनूयदिलग्नगाइति अर्थाज्जन्मलग्नजन्मराशिस्वामिनौपापग्र
हौयात्रालग्नेस्यातांतदाताद्दशेलग्नेगमनंशुभफलमित्यर्थः वसिष्ठः जन्मराशौलग्नगतेतदीशेवाविलग्नगे अभीष्टफलदायात्राराशीशश्चेच्छुभ
ग्रहः वृद्धनारदेन जन्मराश्युद्गमेनैवजन्मलग्नोदयःशुभः तयोरुपचयस्थानंयदिलग्नगतंशुभमिति जन्मराशिर्यात्रालग्नेनिषिद्धउक्तः सज

अथमीनलग्नउतवातदंशकेचलितस्यवक्रमिहवर्त्मजायते जनिलग्नजन्मभपतीशुभग्रहौभवतस्तदातदुदयेशुभोगमः
४४जन्मराशितनुतोऽष्टमेऽथवास्वारिभाच्चरिपुभेतनुस्थिते लग्नगास्तदधिपायदाथवास्युर्गतंहिनृपतेर्मृतिप्रदम् ४५

न्मराशेः पापग्रहस्वामित्वेज्ञेयः शुभस्वामित्वेप्रागुक्तवसिष्ठवाक्यंस्वरसंस्यात् एवंजन्मलग्नोदयःशुभइत्यत्रापिजन्मलग्नस्यशुभस्वामित्वेशुभफ
लतानपापस्वामित्वेइतिव्याख्येयम् ४४ अथान्यद्ग्रथोद्धतयाह जन्मराशितनुतइति स्वजन्मराशेर्जन्मलग्नाच्चवाष्टमेराशौलग्नस्थितेसति तथारि
भात्जिगमिषतः शत्रोर्भात् राशेर्लग्नात्रिपुभेषष्ठराशौलग्नस्थितेसति अथवातेषांस्वराशिलग्नाभ्यांअष्टमभवनेस्वशत्रुराशेर्जन्मराशिलग्नाभ्यां
षष्ठभवनेएषांस्वामिनोयात्रालग्नगताःस्युर्यदातदाराज्ञोमृतिप्रदाः ४५ छ छ छ छ छ

अथान्यच्छुभलग्नंशालिन्याह लग्नेचंद्रइति मीनकुंभविवर्जितेकस्मिंश्चिल्लग्नेवर्गोत्तमनवांशस्थे अथवाचंद्रेवर्गोत्तमस्थेसतियात्रावांछितार्थ
स्यमनोभीष्टार्थस्यैका अद्वितीयादात्री अंभोराशाविति जलराशौलग्नगतेसति अथवालग्नांतरे तदंशेजलराश्यंशेसतिनौकायानंसर्वसिद्धिप्र
दायिस्यात् ४६ अथान्यदिंद्रवज्रयाह दिग्द्वारभेइति पूर्वादिदिक्षुमेषाद्याः क्रमाद्दिग्द्वारराशयइति दिग्राशिषुगंतव्यदिगवस्थितेषुसमुत्था
यात्राप्रशस्ता प्रशस्तत्वमाह अर्थदात्रीजयकारिणीचेति यथामेषःपूर्वस्याम् वृषोदक्षिणस्याम् मिथुनःपश्चिमायाम् कर्कउत्तरस्याम् एवंसिं

लग्नेचंद्रेवापिवर्गोत्तमस्थेयात्राप्रोक्तावांछितार्थैकदात्री अंभोराशौवातदंशेप्रशस्तंनौकायानंसर्वसिद्धिप्रदायि ४६ दिग्द्वारभे
लग्नगतेप्रशस्तायात्रार्थदात्रीजयकारिणीच हानिंविनाशंरिपुतोभयंचकुर्यात्तथादिक्प्रतिलोमलग्ने ४७ राशिस्वजन्मसमयेशु
भसंयुतोयोयःस्वारिभान्निधनगोपिचवेशिसंज्ञः

हादयोधनुरादयश्चपूर्वादिषुज्ञेयाः हानिमिति दिक्प्रतिलोमलग्नेविपरीतदिगवस्थिते
लग्नेयथा पश्चिमायांमेषः उत्तरस्यांवृषः पूर्वस्यांमिथुनः दक्षिणस्यांकर्कः एवंपुनःपश्चिमादिषु सिंहादयोधनुरादयश्चज्ञेयाः तादृशेलग्नेगंतुःयात्राहानिं
द्रव्यनाशंशत्रुतोभयंचकुर्यात् दिग्द्वारभेलग्नगतेयात्रार्थविजयप्रदा लग्नेदिक्प्रतिलोमेसाहानिदाशत्रुभीतिदेतिवराहोक्तेः ४७ अथशुभलग्नानि
वसंततिलकयाह राशिरिति गंतुःपुंसः स्वजन्मसमयेयोराशिः शुभग्रहैश्चंद्रबुधगुरुशुक्रैःसंयुतोस्तिसराशिर्यत्रालग्नोपगःशुभः अथवास्वारिभात्

तेप्रस्थितः सन् यद्येकरात्रोषितः स्यात्तदाऽवनीशोराजाक्ष्मांभूमिंशत्रोरितिशेषः लभतेजयेनप्राप्नोतीत्यर्थः अयंचतुर्थोयोगः ५३ अथसमयबलमनु
ष्टुभाह उषःकालइति सन् शब्दश्चरणचतुष्टयेपिसंबध्यते उषःकालः पूर्वांविनायानेयात्रायांसन् एवंसर्वत्र वराहेणतुदिग्विशेषः समयविशेषेप्रशस्तो
भिहितः यथापूर्वाह्णेतूत्तरांगच्छेन्मध्यान्हेपूर्वतोव्रजेत् अपराह्णेव्रजेद्याम्यामर्धरात्रेतुपश्चिमामिति ५४ अथलग्नादिभावानांसंज्ञाअनुष्टुभा
ह लग्नाद्भावादिति हृन्मनः स्वातंहृन्मानसंमनइत्यभिधानात् आगमःप्राप्तिः अन्यत्स्पष्टम् एवंविधसंज्ञाकथनप्रयोजनंतु क्रूरसाहित्येतत्तद्भावाना-

उषःकालोविनापूर्वांगोधूलिःपश्चिमांविना विनोत्तरांनिशीथःसन् याने याम्यांविनाभिजित् ५४ लग्नाद्भावाः क्रमाद्देह१कोश२
धानुष्क३वाहनम्४॥ मंत्रो५रि६र्मार्ग७आयुश्च८हृ९द्व्यापारा१०गम११व्ययाः१२॥ ५५॥ केंद्रेकोणेसौम्यखेटाः शुभाःस्युर्याने
पापास्त्र्यायषट्खेषुचंद्रः नेष्टोलग्नांत्यारिरंध्रेशनिःखेऽस्तेशुक्रोलग्नेट्नगांत्यारिरंध्रे ५६ पीडा शुभग्रहसाहित्येतत्तद्भावानांशुभमित्य

र्थः ५५ अथशालिन्याविशेषफलमाह केंद्रेकोणइति शुभग्रहाः यदिकेंद्रेकोणे १,४,७,१० कोणे ९ ५ स्युस्तदायानेशुभफलदाःस्युःपापास्त्र्यायषट्खेषु ३ ११
६ १० शुभफलदाःस्युः चंद्रोलग्नांत्यारिरंध्रे १ १२ ६ ८ नेष्टः अशुभफलदः शनिःखेदशमेनेष्टः शुक्रोऽस्तेसप्तमेनेष्टः लग्नेडिति लग्नेट्यात्रालग्नस्वामीनगांत्यारिरं
ध्रे सप्तमद्वादशषष्ठाष्टमेषुचेत्तदानेष्टः अशुभफलदइत्यर्थः गुरुः लग्नपोमृत्युदोयानेरंध्रास्तारिव्ययोपगः केप्याहुर्भयदोधर्मेशेषस्थानेशुभावहइति ५६

अथयोगयात्राव्याख्यायतेतदारंभप्रयोजनंपादाकुलकेनाह योगादिति धरणिपतीनां राज्ञांयोगाद्वक्ष्यमाणयोगयात्रालग्नवशाद्दुष्टेपितिथ्यादौसिद्धि
र्वांछितकार्यनिष्पत्तिःस्यात् भूदेवानांब्राह्मणानांऋक्षगुणैर्नक्षत्रगुणैश्चंद्रबलताराबलविहितनक्षत्रादिभिःसिद्धिर्भवति अपिशब्दात्पंचांगशुद्ध्यादि
ष्वनावश्यकता चौराणांवक्ष्यमाणैः शुभसूचकशकुनैःसिद्धिर्भवति एतद्भिन्नानांमनुजानांमुहूर्तात् गिरिशभुजगमित्राद्इतिविहितनक्षत्रस्वामिक-
मुहूर्त्तात्सिद्धिर्भवति ५७ अथयोगयात्रालग्नंमंजुभाषिण्याह सहजेरविरिति रविःसहजेतृतीयेस्यात् शशीचंद्रोदशमभेदशमस्थानेशनिमंग

योगात्सिद्धिर्धरणिपतीनामृक्षगुणैरपिभूदेवानाम् चौराणामपिशुभशकुनैरुक्ताभवतिमुहूर्तादपिमनुजानाम् ५७ सहजेरविर्द
शमभेशशीतथाशनिमंगलौरिपुगृहेसितःसुते हिबुकेबुधोगुरुरपीहलग्नगःसजयत्यरीन्प्रचलितोऽचिरान्नृपः ५८ भ्रातरिसौ
रिर्भूमिसुतोवैरिणिलग्नेदेवगुरुः आयगतेर्केशत्रुजयश्चेदनुकूलोदैत्यगुरुः ५९ तनौजीवइंदुर्मृतौवैरिगोऽर्कःप्रयातोमहींद्रोज
यत्येवशत्रून् ६० लौरिपुगृहेषष्ठस्थानेस्यातांसितःसुतेपंचमे बुधोहिबुकेचतुर्थेगुरुरपिलग्नगश्चेत्स्यात् एवंविधेयोगेराजाप्रचलितः अचिरात्स्व
ल्पकालेनैवारीन्जयतिवशीकरोतीत्यर्थः ५८ अथयोगांतरंगाथयाह भ्रातरिसौरिरिति भ्रातरितृतीयेशनिः वैरिणिषष्ठे भूमिसुतोमंगलः
अर्केआयगेएकादशेएवंविधेयोगेराजाशत्रुजयोभवेत् चेद्दैत्यगुरुःशुक्रोऽनुकूलः यातव्यदिक्पृष्ठवर्तीभवति ५९ अन्ययोगांतरंगाथयाह तनौजी

वद्दति स्पष्टार्थः तथाच नारदः जीवार्कचंद्रालग्नारिरंध्रगायदिगच्छतः तस्याग्रेखलमैत्रीचनस्थिरारिपुवाहिनीति ६० अथान्यंयोगंपंक्त्याह लग्न
गतइति लग्नेगुरुःस्यात् अन्येग्रहालाभधनस्थाः एकादशद्वितीयस्थाश्चेदेवंविधेयोगेराज्ञोविजयः ६१ अन्यंयोगंमत्तयाह द्यूनेइति चंद्रेसस
मस्थेसति अर्केसमुदयगेलग्नगेसति जीवेशुक्रेविदिबुधे एतेषुत्रिषुधना संस्थेषुसत्सुएवंविधेयोगे नरेशश्चेत् चलतितदाशत्रून्जेताजेष्यति
कः कानिवगरुडोहीन् सर्पान्यथाजयति ६२ अथान्यंयोगंचित्रपदयाह वित्तगतइति बुधोद्वितीये वासरनाथः सूर्यस्तृतीयेशुक्रेलग्नगेएवंविधे

लग्नगतःस्याद्देवपुरोधाः लाभधनस्थैःशेषनभोगैः ६१ द्यूनेचंद्रेसमुदयगेर्केजीवेशुक्रेविदिधनसंस्थे ईदृग्योगेचलतिनरेशो
जेताशत्रून्गरुडइवाहीन् ६२ वित्तगतःशशिपुत्रोभ्रातरिवासुरनाथः लग्नगतेभृगुपुत्रेस्युःशलभाइवसर्वे ६३ उदयेरविर्यदिसौरि
रिरिगःशशीदशमेपि वसुधापतिर्यदियातिरिपुवाहिनीवशमेति ६४ तनौशनिकुजौरविर्दशमभेबुधोभृगुसुतोऽपिलाभदशमे

योगेचेद्राजाचलतितदाशत्रवोराजानः शलभाइवस्युः यथाशलभाअग्नौस्वयमेवगत्वापतंति तथाशत्रवोपिगंतृराजप्रतापानलेपतिष्यंतीत्यर्थः ६३ अन
थान्यंयोगंगाथयाह उदयेरविरिति उदयेरविः शनिःषष्ठः चंद्रोदशमःस्यात् एवंविधेयोगेवसुधापतीराजायदियातितदारिपुवाहिनीशत्रुसेनावशमे
ति ६४ अथान्ययोगद्वयंजलोद्धतगत्याह तनौशनिकुजाविति इतआरभ्यवसुधापतिर्यदियाति रिपुवाहिनीवशमेतीत्युत्तरार्द्धं सहजेकुजेइत्येतत्पर्यंतमनु

वर्तते तेनयत्रनिर्देशोनास्ति तत्रजिगमिषोराज्ञोविजयः स्यादितिवाक्यार्थोज्ञेयः तनौलग्नस्थौशनिमंगलौस्याताम् रविर्दशमे बुधोलाभेदशमेस्यात् भृगुसुतोवालाभेदशमेस्यात् एवंविधेयोगेप्रचलितस्यराज्ञोऽयमेकोयोगः अथद्वितीयः त्रिलाभरिपुभेषु ३ ११ ६ एष्वन्यतमेस्थानस्थितौ भूसुतशनीस्याताम् यस्मिन्कस्मिंश्चित्स्थानेगुरुज्ञभृगुजाबलयुताः स्युस्तदा एवंविधेयोगेतथाराज्ञोविजयइत्यर्थः ६५ अथान्यंयोगंत्वरितगतिश्चनजनगैरित्यनेनछंदसाह समुदयगेति समुदयगेलग्नस्थेबृहस्पतौसतिहिमकिरणेचंद्रेमदनगतेसप्तमस्थेसति चतुर्थस्थौबुधशुक्रौस्याताम् खलखचराः पापग्रहाः सहजगताः तृतीयगाः स्युः एवंविधेयोगेवसुधापतिर्यदियातितदारिपुवाहिनीवशमेति ६६ अथान्यंयोगंसंमुखानजलजगैर्गदिता सुखातिलक्षणलक्षितयाह त्रिदशगुरुरिति बृहस्पतिर्लग्ने चंद्रःसप्तमे शुक्रबुधौदशमे सूर्यएकादशेशनिमंगलौसहजगतौतृतीये एवंविधेयोगेगंतूराज्ञोविजयएव ६७ अथान्यंयोगंस्यादनुकूलाभतनगगश्चेतिलक्षणलक्षितयानुकूलयाह देवगुराविति गुरौचंद्रेवालग्नेसति सूर्येषष्ठेबुधःपंचमस्थाने

त्रिलाभरिपुभेषुभूसुतशनीगुरुज्ञभृगुजास्तथाबलयुताः ६५ समुदयगेविबुधगुरौमदनगतेहिमकिरणे हिबुकगतौबुधभृगु
जौसहजगताःखलखचराः ६६ त्रिदशगुरुस्तनुगोमदनेहिमकिरणोरविरायगतः सितशशिजावपिकर्मगतौरविसुतभूमिसु
तौसहजे ६७ देवगुरौवाशशिनितनुस्थेवासरनाथेरिपुभवनस्थे पंचमगेहेहिमकरपुत्रःकर्मणिसौरिःसुहृदिसितश्च ६८

शनिर्दशमे शुक्रश्चतुर्थे स्यात् एवंविधे योगे जिगमिषो राज्ञो विजय एव ६८ अथान्यं योगं ननररघटितानु मंदाकिनीति लक्षणलक्षितया मंदाकिन्याह
हिमकिरणइति बुधो बली चेत्तनौ लग्ने स्यात् हीति निश्चयेन बृहस्पतिश्चेत्केंद्रगतः यदि निर्बलो नीचाद्यशुभाधिकारप्राप्तो बलरहितः सन् द्वादशतृतीयष
ष्ठनवमानामन्यतमस्थानस्थश्चंद्रस्तथैवंविधे योगे गंतू राज्ञो विजय एव ६९ अथान्यं योगं अभिनवतामरसनजजाय इति लक्षणलक्षितेनाभिनवता
मरसच्छंदसाह अशुभखगैरिति अशुभग्रहैः अनवाष्टमदनस्थैः नवमाष्टमसप्तमस्थानव्यतिरिक्तस्थानस्थैः कविः शुक्रः चतुर्थतृतीयैकादशस्थान

हिमकिरणसुतो बली चेत्तनौ त्रिदशपतिर्गुरुर्हि केंद्रस्थितः व्ययगृहसहजारिधर्मस्थितो यदि भवति निर्बलश्चंद्रमाः ६९ अशुभख
गैरनवाष्टमदनस्थैर्हिबुकसहोदरलाभगृहस्थः कविरिह केंद्रगगीष्पतिदृष्टो वसुचयलाभकरः खलु योगः ७० रिपुलग्नकर्महिबुके शशि
जे परिवीक्षिते शुभनभोगमनैः व्ययलग्नमन्मथगृहेषु जयः परिवर्जितेष्वशुभनामधरैः ७१

स्थः केंद्रगतो गीष्पतिर्गुरुस्तेन दृष्टः एवंवि
धे योगे वसूच्चयो द्रव्यसमूहस्तस्य लाभकरः स्यात् ७० अथान्यं योगं यात्रालग्नं प्रमिताक्षरा सजससैरुदितेति लक्षणलक्षितया प्रमिताक्षराच्छंद
साह रिपुलग्नेति षष्ठलग्नदशमचतुर्थानामन्यतमस्थानस्थे बुधे शुभनभोगमनैः शुभग्रहैः परिवीक्षिते दृष्टे सति द्वादशलग्नसप्तमस्थानव्य
तिरिक्तस्थानस्थितैरशुभनामधरैः पापग्रहैरुपलक्षिते सति एवंविधे योगे जिगमिषो राज्ञो विजय एव ७१ अथान्य योगद्वयं त्यौत्यौ मणिमाला

छिन्नागुहवक्त्रैरितिलक्षणलक्षितयाह लग्नेइति लग्नेगुरुः पापग्रहायदिलाभेएकादशेकर्मण्यपिदशमेपिचेत्स्युः एवंविधयोगेप्रचलितस्यराज्ञो राज्याधिगमः राज्यप्राप्तिःस्यात् अथवाद्यूनेसप्तमेबुधशुक्रौस्यातांचंद्रोहिबुकेचतुर्थेस्यादेवंविधयोगेसर्वैर्मुनिवर्यैस्तद्वत्फलमुक्तंराज्याधिगमःस्यात् ७२ अथान्ययोगत्रयंननततगुरुभिश्चंद्रिकाश्चतुर्भिरितिलक्षणलक्षितेनचंद्रिकाछंदसाह रिपुरिति अत्रस्थानांग्रहाणांचसाम्या

लग्नेयदिजीवःपापायर्दिलाभेकर्मण्यपिचेद्राज्याधिगमःस्यात् द्यूनेबुधशुक्रौचंद्रोहिबुकेवातत्फलमुक्तंसर्वैर्मुनिवर्यैः ७२ रिपु
तनुनिधनेशुक्रजीवेंदवोह्यथबुधभृगुजौतुर्यगेहस्थितौ मदनभवनगश्चंद्रमावांबुगःशशिसुतभृगुजांतर्गतश्चंद्रमाः ७३ सि
तजीवभौमबुधभानुतनूजास्तनुमन्मथारिहिबुकत्रिगृहेचेत् क्रमतोरिसोदरखशात्रवहोराहिबुकायगैर्गुरुदिनेखिलखेटैः ७४

यथासंख्यमन्वयः यथारिपौषष्ठेशुक्रलग्नेजीवः अष्टमेचंद्रः एवंविधेयोगेगंतूराज्ञोविजयएव अयमेकोयोगः अथद्वितीयः बुधभृगुजौतुर्यगेहस्थितौचतुर्थस्थानस्थौस्याताम् चंद्रमामदनभवनगःसप्तमस्थानस्थश्चेदेवंविधेयोगेगंतूराज्ञोविजयएव अथतृतीययोगःवाचंद्रमाअंबुगःचतुर्थगःशशिसुतभृगुजयोरंतर्गतत्वंएकराशावेवज्ञेयम् अन्यथाचतुर्थस्थानस्थ चंद्रस्यबुधशुक्रकृतदुरधरायोगमेवावक्षत् ७३ अथान्ययोगद्वयंसजससगौचकथितः कलहंसइतिलक्षणलक्षितेनकलहंसच्छंदसाह सितेति लग्नेशुक्रःसप्तमेजीवःषष्ठेभौमःचतुर्थेबुधःतृती

येशनिः एवंविधेयोगेगंतूराज्ञोविजयएव एकोयोगः अथान्यः गुरुदिनेबृहस्पतिवारे अखिलखेटैः समस्तग्रहैः सूर्यादिभिः क्रमतोरिसोदरेत्यादिस्थानस्थितैर्यथाषष्ठेऽर्कः तृतीयेचंद्रः दशमेभौमः षष्ठेबुधः लग्नेगुरुः चतुर्थेशुक्रः एकादशेशनिः एवंविधेयोगेपिगंतूराज्ञोविजयएव ७४ अथान्ययोगद्वयंसजजसगौचकथिताप्रबाधिकेतिलक्षणलक्षितप्रबोधिकाछंदसाह सहजेइति तृतीयेभौमः अष्टमेशुक्रः सप्तमेबुधः षष्ठेसूर्यः लग्नेगुरुः एवंविधेयोगेगंतूराज्ञोविजयएव अयमेकोयोगः अथान्यः अथेति इज्यसितभानवोगुरुशुक्रसूर्याः जलत्रिगताः चतुर्थतृतीयस्था

सहजेकुजोनिधनगश्चभार्गवोमदनेबुधोरविररौतनौगुरुः अथचेत्स्युरीज्यसितभानवोजलत्रिगताहिसौरि
रुधिरौरिपुस्थितौ ७५ एकोज्ञेज्यसितेषुपंचमतपःकेंद्रेषुयोगस्तथाद्वौचेत्तेष्वधियोगएषुसकलायोगाधियोगःस्मृतः

नस्थाः सौरिरुधिरौशनिमंगलौषष्ठस्थितौ एवंविधेयोगेहिनिश्चितंराज्ञोजयःस्यात् ७५ अथनामविशेषपुरस्कारेणयोगत्रयंसफलंशार्दूलविक्रीडितेनाह एकइति ज्ञेज्यसितेषुबुधगुरुशुक्रेषुएकोपिबुधोवागुरुर्वाशुक्रोवाचेत्पंचमतपः केंद्रेषुतदायोगाख्योयोगः तथातेषुज्ञेज्यसितेषु द्वौचेत् बुधगुरूबुधशुक्रौगुरुशुक्रौवाचेत्पंचमतपः केंद्राणामन्यतमस्थानेस्थानभेदेनस्थानैक्येनवास्थितौस्यातांतदाधियोगाख्योयोगः सकलाः ज्ञेज्यसिताः एषुपंचमतपः केंद्राणामन्यतमस्थानेषुस्थानभेदेनस्थानैक्येनवास्थितास्तदायोगाधियोगाख्योयोगःफलमाहयो

गइति योगेव्रजन् राजक्षेमंकुशलंलभतेकुशलेनगतागतंकरोतीत्यर्थः अथाधियोगेव्रजन्राजाक्षेमंतथारिपूणांवधंचलभते अथयोगाधियोगेव्रज
न् राजाक्षेमयशोवनीश्चकारात् शत्रुवधंचलभते अत्रवसिष्ठादिभिर्बहूनियात्रालग्नानि अभिहितानितानितद्ग्रंथेभ्यएवावधार्याणि ७६ अथा
न्येपियात्रायोगालिख्यंते कश्यपः पंचमेज्ञोरविःषष्ठेवर्त्ततेनवमेगुरुः भाग्ययोगाभिधेयोगेनिहंतावैरिणांसदा १ गुरुःकेंद्रेत्रिकोणेवा
रविर्लाभेचकर्मणि कल्याणयोगोभूपस्ययातुःकल्याणकृद्भवेत् २ दिगीशोदिग्बलीचेत्स्याल्लग्नेशस्यसुहृद्यदि विजयोनामयोयोगंया
ताराजाजयीभवेत् ३ अत्रिः सहजस्थानगोभौमोभाग्यस्थश्चबृहस्पतिः चिंतामणिसमाख्योयंयातुःसंकल्पपूरकः ४ लग्नेशुक्रःशशीबं

योगेक्षेममथाधियोगगमनेक्षेमेरिपूणांवधंचाथोक्षेमयशोवनीश्चलभतेयोगाधियोगेव्रजन् ७६

धौकर्मस्थानेगुरुर्यदा
मृगेंद्रयोगोविख्यातोयातुःसर्वार्थसाधकः ५ लग्नेभौमोगुरुश्छिद्रेषष्ठस्थानेचभास्करः मृत्युंजयसमाख्योयंसर्वशत्रुनिबर्हणः ६ आ
पोक्लिमगतेचंद्रेकेंद्रस्थेसुरपूजिते योगःकेंद्रइतिख्यातोयातुरिष्टार्थसिद्धिदः ७ चंद्रोदयेगुरुश्चास्तेलग्नेवासुरपूजिते योगःपारावतोया
तुःशुक्रोवालग्नकेंद्रगे प्रबलोयदियोगोसौगमनेसर्वसिद्धिदः ८ ९ रविःषष्ठेसितश्छिद्रेतृतीयेभूमिनंदनः पिनाकियोगोविख्यातोयातुर्विज
यकारकः १० अन्योन्यक्षेत्रगावेकक्षेत्रेवार्कविभास्करौ मृत्युयोगोयमाख्यातोयातुर्मृत्युप्रदायकः ११ उच्चक्षेत्रगतश्चंद्रोह्यक्षीणश्चरविर्गुरुः संजी

वनसमाख्योयंमृत्युयोगापहारकः १२ एकर्क्षगौजीवशुक्रौस्यातामन्योन्यसप्तगौ भयंकराख्योयोगोयंयातुर्भीतिप्रदःस्मृतः १३ उच्चमूलत्रिकोणेषु
वर्ततेगुरुभार्गवौ अभयाभिधयोगोयंभयंकरविनाशनः १४ भार्येशोव्ययगोनीचःपुत्रस्थानेशनैश्चरः विदारिकसमाख्योयंयातुःपत्नीनिहंत्यसौ
१५ मार्गेशःशनिसंयुक्तःसप्तमेऽस्तंगतोग्रहः विदारिकमिमंमन्येयातुःपत्नीविनाशकम् १६ सप्तमेचंद्रमास्तस्मात्सप्तमे
नीचखेचरः कुटुंबहारकोयोगोयातुःप्रियतमांहरेत् १७ दुर्बलोयदिमार्गेशोनिवसेत्पापमध्यगः पापकुंजरयोगोयंयातुःपत्नींनिहंत्यसौ
१८ मार्गेशात्सप्तमेभानुःपंचमेक्रूरखेचरः विदारिकाख्यएवासौभार्यामरिवशंनयेत् १९ स्वोच्चमूलत्रिकोणस्थःसौम्यःपापविवर्जितःआनंदार्णवयोगोयंधर्मेणैवजयावहः २० रत्नावल्याम् उदयारिनभस्तलगेदिनकृत्यमशीतकरैः नभवत्यरयोभिमुखाहरिणाइवकेसरिणः
२१ दैवज्ञवल्लभे ज्ञेसितेनसहितेस्तगेविधौबंधुगेप्रवसतामहीभुजा संगरेरिपुगणोविकीर्यतेतूलराशिरिवमातरिश्वना २२ मूर्त्तिवित्तसहजेषुसंस्थिताःशुक्रचंद्रसिततिग्मरश्मयः यस्ययानसमयेरणांगणेतस्ययांतिशलभाइवारयः २३ यात्राशिरोमणौ योयातिजीवेतनुगेमहीशःक्रूरस्थितैर्व्योम्न्यथवायसंस्थैःतस्याग्रतःसंयतिवैरिसेनाप्रीतिर्नृपाणामिवनास्थिरास्यात् २४ राजमार्तंडः लाभारिदुश्चिक्यगतोयमारौबलान्विताभार्गवजीवसौम्याः यस्यप्रयाणेविलयंप्रयांतितस्यद्विषःसर्वरसंयथाप्सु २५ फलप्रदीपे लाभविक्रमसुखस्थितेकवौकंटकस्थगुरुणानिरीक्षिते द्यूनरंध्रभववर्जितैःखलैःस्याद्गतोभिमतसिद्धिभाङ्नृपः २६ सौम्यग्रहैःकेंद्रतपःसुतस्थैःक्रूरैस्त्रिलाभारिगतैर्गताये कोपानलःशांतिमु

पैतितेषांविरोधिनारीनयनांबुपातैः २७ वराहः एकोपिजीवार्ककुजार्कजानांस्वोच्चेविलग्नेस्वगृहेयदींदुः यातस्ययांत्यत्रपराःप्रणाशंमहाकुला
नीवकुंटुंबभेदे २८ चंद्रेस्तगेदेवगुरौविलग्नेज्ञशुक्रयोःकर्मणिलाभगेर्के सौरारयोभ्रातृगयोश्चयातोनृपःस्वभृत्यानिवशास्तिशत्रून् २९
नारदः स्वोच्चस्थेलग्नगेजीवेचंद्रेचायगतेयदि गतोराजारिपून्हंतिपिनाकीत्रिपुरंयथा ३० शुक्रेत्रिकोणेकेंद्रस्थेलग्नेचंद्रेथवारवौ शत्रून्हंति
गतोराजाब्रह्मद्वेषःकुलंयथा ३१ पापास्तृतीयेहिबुकेसितज्ञौजीवोविलग्नेमृतलांच्छनोस्ते यस्योद्गतस्यापिबलंरिपूणांकृतंकृतघ्नेष्विवयाति
नाशं ३२ यस्योदयास्तारिचतुस्त्रिसंस्थाः शुक्रोंऽगिरांगारकसौम्यसौराः द्विषद्बलंस्त्रीवदनानितस्यकुंतानिकांतानविलोकयंति ३३ पूर्वोक्त
योगेधनगोबुधश्चेच्छशांकसूर्यौचदशायसंस्थौ अस्मिन्गतस्यालिकुलोपमीतानानावनस्याद्विरदाभवंति ३४ वराहः त्रिषण्णवांत्येष्व
बलः शशांकोबुधोबलीयश्चगुरुश्चकेंद्रे तस्यारियोषाभरणैःप्रियाणिप्रियाप्रियाणांजनयंतिसैन्ये ३५ चंद्रोऽबलः बुधोबलीउभौच-
त्रिषण्णवांत्येष्वेवभवतस्तदायोगः केंद्रोपगतेनवीक्षितेगुरुणाख्यायंचतुर्थगेसितेपापैरनवाष्टसप्तगैर्वसुकिंतन्नयदाप्नुयान्नृपः ३६ षष्ठा
ष्टगौशुक्रबुधौप्रयाणेसुरेशपूज्योगगनेयदिस्यात् रिपुप्रणाशंविषयेषुसौख्यंप्राप्नोतिकीर्तिंविपुलांचभोगम् ३७ दुश्चिक्यलाभा-
रिगतेर्कपुत्रेचतुर्थगेदैत्यगुरौप्रयाति यदापुमान्सद्विरदेंद्रयानंकीर्त्तियशःसिद्धिसहस्रमेति ३८ केंद्रस्थानेसुरपतिगुरौकंटकस्थेसुरे
ज्येछिद्रेसौम्येप्रवसति यदात्वष्टमेंदुर्यदिस्यात् येषांक्रूरारिपुसहजगाराहुकेतूचमूर्तावायुःकीर्तिद्रविणमतुलंतेलभंतेयशश्च ३९

मूर्तौशुक्रौस्करपतिगुरौछित्रगेवात्रिकोणेकेंद्रस्थानेशनिरविकुजालाभगावायदिस्युः येभूपायांतिशत्रुंविपुलधनमथोसैन्यनाशंरिपूणांकीर्तिस्फु
र्द्धिंयशश्चप्रमथितरिपवस्तेस्करवादाव्रजंति ४० होरासंस्थेस्करपतिगुरौभार्गवेकंटकस्थेषष्ठेचंद्रेव्रजतियदिवाकार्ययोगात्क्षितीशः प्राप्नोत्यन्नं
कनकतुरगंरूप्यरत्नादिकोशमायुःकीर्तिंजयतिंचतदामत्तमातंगयूथम् ४१ लग्नारिकर्महिबुकेषुशुभेक्षितेषुद्यूनांत्यलग्नरहितेष्वशुभग्रहेषु
यातुर्भयंनभवतिप्रतरेत्समुद्रंयद्यश्मनापिकिमुतारिसमागमेषु ४२ एकांतरर्क्षेभृगुजात्कुजाद्वासौम्येस्थितेसूर्यसुताद्गुरोर्वा प्रध्वस्यतेऽरि-
र्नचिराद्धतस्यवेषाधिकोभृत्यइवेश्वरस्य ४३ शुक्राद्भौमाद्वासौराज्जीवाद्वाबुधः एकांतरेतृतीयस्थानेयत्रकुत्रस्यात्तदायोगः निरंतरंयदिभ
वनेषुपंचसुग्रहाःस्थितादिवसकरेणवर्जिताः यियासतोयदिचभवंतिपृष्ठतस्तदापरान्बलभिदिवाशुकृंतति ४४ प्राक्कपालस्थैर्ग्रहैःपश्चि
मदिशिपृष्ठगतत्वम् अपरकपालस्थैः प्राच्यांखमध्यस्थैरुत्तरदिशि अर्धरात्रस्थैर्दक्षिणादिशिबुधभार्गवमध्यगतेहिमगौहिबुकोपगते-
चनृपः प्रवसेत्पुरुहूतदिशंयदिवांतकृतः पुरुहूतयमंप्रति ४५ सितेंदुजौचतुर्थगौनिशाकरश्चसप्तमे यदातदागतोनृपःप्रशास्त्यरीन्विनारणा
त् ४६ शुक्रवाक्पतिबुधैर्धनसंस्थैःसप्तमशशिनिलग्नगतेऽर्के निर्गतोनृपतिरेतिकृतार्थोवैनतेयवदरीन्विनिहत्य ४७ सूर्येंदुबलवर्जितौबलयुतौलग्ने
शजन्मेश्वरौपातालेदशमेपिवाशशिसुतोलग्नस्थितोवाक्पतिः षट्सप्ताष्टमवर्जितेषुभृगुजःस्थानेषुयस्यस्थितोयातुस्तस्यनविद्विषोरणमुखेति-
ष्ठंतियोगाइव ४८ सौरेभौमेलग्नगेर्केखमध्येकर्मण्यायेभार्गवेचंद्रजेवा यायान्नृपःशत्रुगेहंनिहंतुंतूर्णंशत्रुंकालवत्क्रूरचेष्टः ४९ गुरौविलग्ने

यदिवाशशांकेषष्ठेरवौकर्मगतेर्कपुत्रे सितज्ञयोर्बंधुस्कृतस्थयोश्चयात्राजनित्रीवहितानिधन्ने ५० त्रिनिधनेतनुसप्तमारिसंस्थाः कुजसितजी
वबुधारविश्चयस्य खलजनजनितेवलोकयात्रानभवतितस्याचरायशत्रुसेना ५१ कुजरविजयुतेऽरिभेगतानांजलसहजायगतैः सितार्कजीवैः
परबलमुपयातिनाशमाशुश्रुतमधनस्यकुटुंबचिंतयेव ५२ भृगुपुत्रमहेंद्रगुरूगमनेसहितौयदिभंयुगपत्यजतः ज्ञगुरुर्यदिवांशकमेकगतौसम
रेऽमरराडिवभातितदा क्षितितनययुतान्निवांशकाद्यादिशितमेभृगुजोथवागुरुः शतगुणमपिहंत्यरेर्बलंविषमिवकायमसृक्पथोपगम् ५४
स्वोच्चोपगैर्जीवकुजार्कजार्कैरेभिस्त्रिभिर्वाकथितैकलग्ने राज्ञःप्रणाशंसमुपैतिशत्रुः सौख्यंहिभार्यस्ययथाधनस्य ५५ शतांशकादूर्ध्वमवस्थि
तेबुधेयमारयोस्तत्रगतस्यभूभृतः प्रयातिनाशंसमरेद्विषद्बलंयथार्थिभावोपगतस्यगौरवम् ५६ भौमाधिष्ठितनवांशाद्यदिबुधोनवांश
कशतादूर्ध्वंतिष्ठति एवंशनेरपि सिंहाजतौलिमिथुनामृगकर्कटौच स्वेशान्विताभवतियस्यशनिश्चलग्ने तत्सैनिकाः परबलंक्षपयंतियातु
र्मूर्खस्यवित्तमिवचारणचट्टमंक्षः ५७ चट्टाधूर्ताः मंक्षाअलीकवादिनः अथसमरयात्रा गुरौवीर्येकेंद्रयुतेबुधेवाभृगुनंदने विजयोनामयोगो
यंयातुर्विजयदःसदा ५८ स्वराशिगेबुधेलग्नेसितेवास्करवंदिते नंद्यावर्ताह्वयोयोगोयातुरिष्टार्थसिद्धिदः ५९ स्वांशसंस्थेबुधेलग्नेशुक्रेवा-
स्करपूजिते शंखसंज्ञाह्वयोयोगोयातुःकीर्तिप्रदःसदा ६० स्वराशौस्वांशगेसौम्येलग्नस्थेवाभृगोःसुते जीवेवाजययोगोयंयातुःशत्रुविनाशकृ
त् ६१ अधिमित्रांशगेसौम्येसितेवाथसुरार्चिते लग्नगेमातृयोगोयंशत्रूणांसंधिकृत्सदा ६२ यत्रैकादशगश्चंद्रोभानुर्वाप्रबलःशुभः अभयोना

मयोगोयमरिभूतिविनाशकृत् ६३ त्रिकोणगेशुभेखेटेसबलेवाद्वितीयगे कल्याणसंज्ञोयोगोयंयायिनांमंगलप्रदः ६४ यत्रस्वोच्चगतश्चंद्रोलग्नादे
कादशेस्थितः जयंतोनामयोगोयंशत्रुपक्षविनाशकृत् ६५ वर्गोत्तमगतेलग्नेशुभेवाथबलान्विते शुभग्रहयुतैःकेंद्रैर्योगोयंसिद्धिदायकः ६६ षष्ठे
वायगतेसूर्येतामगेहरसंज्ञकः योगोमहारणेशत्रुपक्षक्षयकरःसदा ६७ उच्चस्थेलाभगेशुक्रेत्रिषष्ठेदेवपूजिते सुदर्शनोमहायोगःशत्रुध्वंसकरो
रणे ६८ लग्नान्यकेंद्रगेचंद्रेलग्नस्थेदेवपूजिते महाशंखाह्वयोयोगःप्रतिपक्षापमानदः ६९ भूसुतेस्वोच्चगेलाभेमृगकुंभगतेयमे नद्यावर्ताह्वयोयोगोरणे
शत्रुतृणानलः ७० मेषगेभास्करेषष्ठेलाभगेस्वोच्चगेयमे नक्षत्रपादयोगोयंशत्रुमेघानिलोरणे ७१ भौमेस्वराशिगेलग्नेसौम्येकेंद्रत्रिकोणगे पुष्ययोगो
रिविपिनकुठारःसंगरांगणे ७२ एकांतरगतेलग्नाच्छुभखेटेथवाऽशुभे वापीयोगस्त्वरिव्राततिमिरौघदिवाकरः ७३ आवश्यकेतथायानेसौम्योस्ते-
निधनेपिवा व्रजेदर्कोदयेस्तेवामध्यान्हेवाप्यशंकितः ७४ प्रभ्रष्टद्युतितारकास्फुटितटीप्राचीभवेन्निर्मलात्वीषद्रक्तविलोहितानधवलादेवैःसदावां
छिता नोवारंनतिथिंनचापिकरणंलग्नंचनापेक्षतेहत्वादोषसहस्रकंचयमुखान्नूनंकरोत्युन्नतिम् ७५ मध्यंव्योमप्रयातेस्फुरदनलनिभेकेसरैरार्क
बिंबेछायासाध्वीचकांताप्रचलतिपुरुषेयत्रतत्पादलग्ना तावत्सौरिर्नविष्टिःकुजकृतमशुभंनैववक्रक्षंनयोगःसंमानारोग्यसंपत्क्षितिमथयुव
तिंतत्रगंतालभेत ७६ यावत्सिंदूरवर्णंगगनतलगतंभानुबिंबंचनास्तंयावन्नोदिक्षुशांतिंव्रजतिखुरपुटैरुद्धतोरेणुसंघः तावन्नैवास्ति
दोषःप्रभवतिनचसाक्रूरदृष्टिर्ग्रहाणांयात्रायांवाविवाहेसकलशुभकरीसर्वकार्येषुसिद्धिः ७७ इत्यलंग्रंथविस्तरेण इतियात्रालग्नेराजयोगाः

अथविजयादशमीसंज्ञकंसिद्धिमुहूर्त्तंतोटकेनसगणचतुष्टयेनाह इषमासीतिस्पष्टार्थः कश्यपः मासीषेशुक्लदशमीसर्वदाविजयाभिधा विजयस्तत्रयातृणांसंधिर्वानपराजराइति ७७ अथान्यद्वसंततिलकयाह चेतोनिमित्तेति चेतोंतःकरणम् निमित्तमंगस्फुरणादिशकुनानिवक्ष्यमाणानि एतै सुप्रशस्तैः सद्भिःखलुनिश्चयेनलग्नबलंज्ञात्वा उर्व्यधिपोराजाप्रयाति तदासर्वसिद्धिर्वांछितसिद्धिर्भवति यदातुलग्नादिबलेसत्यपिनिंद्यानिशकुनानिस्युः तदायात्रानिषिद्धैव वसिष्ठ अशुभानिनिमित्तानिउत्पातशकुनानिच यात्राकालेनृणांतेषांनिधनायाधनायचेति

इषमासिसितादशमीविजयाशुभकर्मसुसिद्धिकरीकथिता श्रवणार्क्षयुतासुतरांशुभदानृपतेस्तुगमेजयसंधिकरी ७७ चेतोनिमि
त्तशकुनैरतिसुप्रशस्तैर्ज्ञात्वाविलग्नबलमुर्व्यधिपः प्रयाति सिद्धिर्भवेदथपुनः शकुनादितोपिचेतोविशुद्धिरधिकानचतांविनेयात् ७८

यदातुदैवात् शकुनलग्नादीन्यनिंद्यानिचेतोविशुद्धिश्चनास्त्येवात्रकस्यप्राबल्यमित्याह अथेतिशकुनादितोपिसकाशाच्चेतोविशुद्धिरधिकातांचेतोविशुद्धिंविनानेयात् नगच्छेत् कश्यपः निमित्तशकुनादिभ्यः प्रधानंहिमनोयतः तस्माद्धियासतांनृणांप्रधानंहिमनोजयइति ७८ अथयात्रामवश्यनिषिद्धनिमित्तानिवसंतमालिकाछंदसाह तल्लक्षणंविषमेससजगौसमेचेत् सभरयश्चवसंतमालिकासाविषमसमचरणेव्रतबंधनेति व्रतबंधनंयज्ञोपवीतम् देवप्रतिष्ठाप्रसिद्धा करपीडाविवाहः उत्सवोहोलिकादिसूतकंजननंमरणसूतकंच एषांशास्त्रोक्तयावद्दिनसमा

त्सानामसमासौसमाप्तिंविनाकदापिनैवचलेत् गच्छेत् नारदः उत्सवोपनयोद्वाहप्रतिष्ठाशौचसूतके असमासेनकुर्वीतयात्रांतत्रजिजीविषुरि
ति अकालेतिविद्युत्प्रसिद्धाघनोमेघगर्जितम् वर्षावृष्टिः तुहिनंनीहारः एषुपदार्थेष्वकालेषुसत्सुसप्तरात्रंदिनसप्तकंनचलेत् नारदः अका
लजेषुनृपतिर्विद्युद्गर्जितवृष्टिषु उत्पातेषुत्रिविधेषुसप्तरात्रंनतुव्रजेदिति ७९ अथैकदिनसाध्येगमनप्रवेशेविशेषंवंशस्थविरेणाह महीपतेरिति

व्रतबंधनदेवताप्रतिष्ठाकरपीडोत्सवसूतकासमासौ नकदापिचलेदकालविद्युद्घनवर्षातुहिनेपिसप्तरात्रम् ७९ महीपतेरेकदि
नेपुरात्पुरेयदाभवेतांगमनप्रवेशकौ भवारशूलप्रतिशुक्रयोगिनीर्विचारयेन्नैवकदापिपंडितः ८० यद्येकस्मिन्दिवसेमहीपते
निर्गमप्रवेशौस्तः तर्हिविचार्यःसुधियाप्रवेशकालोनयात्रिकस्तत्र ८१ प्रवेशान्निर्गमंतस्मात्प्रवेशंनवमेतिथौ नक्षत्रेचतथावा
रेनैवकुर्यात्कदाचन ८२

स्पष्टार्थः यथावाराणसीस्थानाच्चरणादिनगरेप्रवेशः तत्रैतान्दोषान्पंडितोनैवविचारयेत् ८० अथैक
दिनमध्येनिर्गमप्रवेशाख्यरूपेकार्येचिकीर्षिते किंविचार्यमित्यार्ययाह यद्येकस्मिन्निति स्पष्टार्थम् ८१ अथप्रयाणेनवमीदोषमनुष्टुभाह
प्रवेशादिति गृहप्रवेशतिथितोनवमेतिथौनिर्गमंनकुर्यात् पुनश्चगमनदिवसात्नवमेतिथौगृहप्रवेशंनकुर्यात् एवंनक्षत्रेचगमननक्षत्रान्नव
मेनक्षत्रेगृहप्रवेशम् तथागृहप्रवेशनक्षत्रान्नवमनक्षत्रेगमनंचनकुर्यात् वारेचगमनवारान्नवमवारेगृहप्रवेशम् गृहप्रवेशवासरान्नवमवारेगमनं

नचकुर्यात् गर्गः प्रवेशान्निर्गमश्चैवनिर्गमाच्चप्रवेशनम् नवमेयातुनोकुर्याद्धिष्ण्येवारेतियाव पीति ८२ अथयात्रादिनीयंविधिंशालिन्याह अग्निं हुत्वेतिस्पष्टार्थम् ८३ अथनक्षत्रदोहदान्शार्दूलविक्रीडितेनाह कुल्माषानिति अत्रचतुर्थेचरणेप्रियंग्वपूपेत्यत्रछंदोभंगोस्ति सगणप्रक्षेपाकरणात् सत्यंप्रेन्हेवेति पिंगलसूत्रेण पकाररेफसंयोगेचप्राग्वर्णस्यलघुत्वाभिधानात् सगणप्रक्षेपएव तथाचकालिदासः गृहीतप्रत्युद्गमनीयवस्त्रेति हयाद्दक्षे अश्विन्यादिसप्तविंशतिभेषुकुल्माषादिकंनक्षत्रदोहदम् इदंभक्ष्याभक्ष्यंवर्णभेदेनदेशभेदेनविचार्यम् भक्ष्यसंभवेभक्षयेत् अभक्ष्यसंभवेआलोकयेत् पश्येत्स्पृशेद्वेतिध्येयम् यथा

अग्निंहुत्वादेवतांपूजयित्वानत्वाविप्रानर्चयित्वादिगीशान् दत्वादानंब्राह्मणेभ्योदिगीशंध्यात्वाचित्तेभूमिपालोधिगच्छेत् ८३
कुल्माषांस्तिलतंडुलानपितथामाषांश्चगव्यंदधित्वाज्यंदुग्धमथैणमांसमपरंतस्यैवरक्तंतथा तद्वत्पायसमेवचाषपललंमा
र्गंचशाशंतथाषाष्टिक्यंचप्रियंगवपूपमथवाचित्रांडजान्सत्फलम् ८४

श्विन्यांकुल्माषानक्षतस्विन्नमाषान् भरण्यांतिलमिश्रतंडुलान् कृत्तिकायांमाषान् रोहिण्यांगव्यम् गोरसंचदधिमृगेगव्यमाज्यंघृतम् आर्द्रायांदुग्धं गव्यमेव पुनर्वसावैणमांसंहारिणमांसम् पुष्येमृगस्यरक्तम् आश्लेषायांपायसम् मघायांचाषस्यपलंमांसम् पूर्वाफल्गुन्यांमृगस्येदंमार्गमांसं उत्तराफाल्गुन्यांशशस्येदंशाशंमांसं हस्तेषाष्टिक्यंषाष्टिकान्नं चित्रायांप्रियंगुःफलिनीएकेस्वात्यामपूपं

॥ ॥

विशाखायांचित्रान्नानावर्णानंडजानांमांसं अनुराधायांसत्फलंउत्तमफलमाम्रादिकम् ८४ ज्येष्ठादिदोहदंशार्दूलविक्रीडितेनाह कौर्ममिति ज्येष्ठायांकूर्मस्यकच्छपस्येदंकौर्मंमांसं मूलेसारिकायाः पक्षिण्याः इदंसारिकंमांसं पूर्वाषाढायांगोधायाः इदंगौधिकंमांसं उत्तराषाढायांशल्यस्यपक्षिणइदंशाल्यंमांसं श्वावित्तुशल्यामित्यमरः अभिजितिहविष्यंमुद्गादिश्रवणेकृसरान्नंखिचडिका धनिष्ठायांमुद्गान्नंमुद्गौदनं शतभेयवानांयवपिष्टं पूर्वाभाद्रपदायांमत्स्यान्नं मत्स्यमिश्रितमोदनम् उत्तराभाद्रपदायांचित्रान्नवर्णमोदनम् रेवत्यांदध्यन्नंदधिभक्तमिति नारदः कुल्माषांश्च-

कौर्मंसारिकगौधिकंचपललंशाल्यंहविष्यंद्वयाद्दक्षेस्यात्कृसरान्नमुद्गमपिवापिष्टंयवानांतथा मत्स्यान्नंखलुचित्रितान्नम
थवादध्यन्नमेवंक्रमाद्भक्ष्याभक्ष्यमिदंविचार्यमतिमान्भक्षेत्तथालोकयेत् ८५ आज्यंतिलोदनंमत्स्यंपयश्चापियथाक्रमम्
भक्षयेद्दोहदंदिश्यमाशांपूर्वादिकांव्रजेत् ८६

तिलान्माषान्दधिगव्यंघृतंपयः मृगमांसंचयत्सारंपायसंचाषकंमृगम् शशमांसंचषाष्टिक्यंप्रियंगुकमपूपकम् चित्रांडजान्फलंकूर्मसारींगोधांचशल्यकम् हविष्यंकृसरान्नंचमुद्गान्नंयवपिष्टकम् मत्स्यान्नंचित्रितान्नंचदध्यन्नंदस्त्रभात्क्रमादिति गुरुः अलभ्यालभ्यभक्ष्यावास्पृष्ट्वास्पृष्ट्वाथतान्व्रजेत् गत्वासिद्धिमवाप्नोतिदुष्टभादिषुभूपतिः दोहदेषुग्रंथांतरेभेदस्तत्रविकल्पोनज्ञेयः ८५ अथदिग्दोहनमनुष्टुभाह आज्यमिति आज्यंघृतंपूर्वस्याम् तिलमिश्रमोदनंदक्षिणस्याम् मत्स्यंपश्चिमायाम् पयोदुग्धमुत्तरस्याम् दिशि

भवंदिश्यंएतद्दोहदंभक्षयेत् ततःपूर्वाद्यामाशांव्रजेत् ८६ वारदोहदमनुष्टुभाह रसालामिति रसालाशर्करादधिमरीचकर्पूरैलासंस्पृष्टा लोकेशिखरिणीतिप्रसिद्धातांरविवारे पायसंसोमवारे कांजीप्रसिद्धांतांभौमवारेश्रितंपक्कंदुग्धंबुधे दधिगुरौ अश्रितंअपक्कंदुग्धंशुक्रे तिलमिश्रमोदनंशनिवारे एतद्वारदोहदं रविवारादौक्रमेणभक्षयेत् स्याद्रसालातुमार्जितेत्यमरः ८७ अथतिथिदोहदंवसंततिलकयाह पक्षादितइति पक्षादितः प्रतिपदमारभ्यपंचदशतिथिषुक्रमेणतिथिदोहदंभुक्त्वाव्रजेत् यथा प्रतिपदि अर्कस्य प्रसिद्धस्यदलानिपर्णानि द्वितीयायांतंडुलवारि प्रक्षालिततंडुलजलम् द्वितीयायांसर्पिर्घृतम् चतुर्थ्यांश्राणायवागू पंचम्यांहविष्यान्नंमुद्गादि षष्ठ्यांहेमजलंप्रक्षालितसुवर्णजलम् सप्तम्यांअपूपम् अष्टम्यांरुचकंबीजपूरफलम् रुचकोबीजपूरकइत्यमरः नवम्यांअंबुजम् दशम्यांधेनुमूत्रम् एकादश्यांयवान्नंयवविकारम् द्वादश्यांपायसम् त्रयोदश्यांगुडमिक्षुविकारम् चतुर्दश्यामसृक्रुधिरम् पंचदश्यामन्नमुद्गान् अन्नमिश्रितमुद्गान् गुरुः अर्कपत्रंभवेद्यातुःप्रथमायांतुभक्षणम् द्वितीयायां भवेद्यातुर्भक्ष्यंसत्तंडुलोदकम् तृतीयायांतथासर्पिर्यवागूस्यात्ततःपरम् पंचम्यांतद्धविष्यंस्यात्षष्ठ्यांवाकांचनोदकम् अपूपभुक्तिःसप्त

रसालांपायसंकांजींशृतंदुग्धंतथादधि पयोश्रितंतिलान्नंच भक्षयेद्वारदोहनम् ८७ पक्षादितोर्कदलतडुलवारिसर्पिःश्राणा
हविष्यमपिहेमजलंत्वपूपं भुक्त्वाव्रजेद्रुचकमंबुचधेनुमूत्रंयावान्नपायसगुडान्नसृगन्नमुद्गान् ८८

म्यामष्टम्यांबीजपूरकम् नवम्यांतोयपानंस्याद्गोमूत्रंतुततःपरम् एकादश्यांयवानद्याद्वादश्यांपायसंभवेत् त्रयोदश्यांगुडंलेह्यंरुधिरंस्याच्चतुर्दशे मुद्गौदनंभवेद्भोज्यंपंचदश्यांयियासतुः पक्षयोरुभयोरेवंयात्रायोगेविधिःस्मृतइति अत्रदुष्टभादिषुदोहदभक्षणेनदोषापाकरणंयुक्तं विधिकरणंतुव्यर्थमितिचेन्न आवश्यकगमनेमहादोषाणामपिपारिघदंडविरुद्धताराक्रूरसाहित्यादीनांदोषवारणायदोहदोक्तेः सार्थक्यात् एवंविहितमितिदोहदाभिधानंयोगिन्यादिदोषनाशार्थम् वारदोहदोक्तिरपिवक्रिग्रहवासरवारशूलादिदोषहान्यासार्थका ८८ अथगमन

उत्धृत्यप्रथमतएवदक्षिणांघ्रिंद्वात्रिंशत्पदमभिगत्यदिश्ययानम् आरोहेत्तिलघृतहेमताम्रपात्रंदत्वादौगणकवरायचप्रगच्छेत् ८९ प्राच्यांगच्छेद्गजेनैवदक्षिणस्यांरथेनहि दिशिप्रतीच्यामश्वेनतथोदीच्यांनरैर्नृपः ९०

समयेविधिंप्रहर्षिण्याह उत्धृत्येति राजागमनसमयएवप्रथमतोदक्षिणांघ्रिंदक्षिणचरणमुत्धृत्यपश्चाद्वात्रिंशत्पदपरिमितांभूमिंगत्वादिश्ययानंवक्ष्यमाणंहस्त्यादियानमारोहेत् तिलेति आरोहणसमयेएवचतिलघृतहेमसहितंताम्रपात्रमादौगणकवरायज्योतिर्विच्छ्रेष्ठाय चकारादन्येभ्योपिब्राह्मणेभ्योयथाशक्ति दानंदत्वाप्रगच्छेत् ८९ अथदिश्ययानमनुष्टुभाह प्राच्यामिति नरैर्नरावाह्यैः सुखासनादिभिः अन्यत्स्पष्टार्थम् ९० अथनिर्गमस्थानानि पादाकुलकच्छंदसाह देवगृहादिति देवगृहाद्देवपूजागृहात् गुरोरध्यापकस्यगृहात्कुलगुरोर्वा स्वगृहात् स्वशयनगृहात् बहुस्त्रीत्वसंभवेमुख्य

कलत्रगृहंपट्टराज्ञीतद्गृहाद्वाहविष्यंप्राश्यभक्षयित्वाविप्रैर्ब्राह्मणैरनुमतः मंगलद्रव्यंमनोभीष्टंपश्यन् शृण्वन् सन् ईयात् गच्छेत् ९१ अथप्रस्थानवस्तूनिवर्णक्रमात् स्त्रग्विणयाह कार्याद्यैरिति किंचिदावश्यकंकार्येनाभूदितिचेद्गमनस्यविलंबः स्यात्तदाविधारितयात्रालग्नेब्राह्मणादिभिरेतानिवस्तूनि आशुचालनीयानि यथा ब्राह्मणेनोपवीतं क्षत्रियेणायुधं वैश्येनमधु शूद्रेणामलफलंनारिकेलादि राजमार्तंडः प्रस्थानेब्राह्मणादीनायज्ञसूत्रमथायुधं मध्वामलफलंचैवप्रशस्तंवृद्धिकारणमिति वाऽथवासर्वेषांवर्णानांयदेवहृत्प्रियंमनोभीष्टंतदेवप्रस्थापनीयम् वसिष्ठः

देवगृहाद्वागुरुसदनाद्वास्वगृहान्मुख्यकलत्रगृहाद्वा प्राश्यहविष्यंविप्रानुमतःपश्यन्शृण्वन्मंगलमीयात् ९१ कार्याद्यैरिहगमनस्यचेद्विलंबोभूद्देवादिभिरुपवीतमायुधंच क्षौद्रंचामलफलमाशुचालनीयंसर्वेषांभवतियदेवहृत्प्रियंवा ९२ गेहाद्गेहांतरमपिगमस्तर्हियात्रेतिगर्गः सीम्नःसीमांतरमपिभृगुर्बाणविक्षेपमात्रम् प्रस्थानंस्यादितिकथयतेसौभरद्वाजएवंयात्राकार्यबहिरिहपुरात्स्याद्वसिष्ठोब्रवीति ९३

श्वेतातपत्रध्वजचामरांश्चविभूषणोष्णीषगजांबराणि आंदोलिकारत्नरथाश्ववारान्शय्यासनाद्यंमनसस्त्वनभीष्टमिति ९२ अथप्राच्यमतेनप्रस्थानपरिमाणंमंदाक्रांतयाह गेहादिति स्वगृहात्परगृहमतिसमीपवर्त्यपितत्रानिचेद्गमंस्यात्तर्हियात्राजातेति गर्गः कथयते अथवा ग्राममामुल्लंघ्यसीमांतरंप्राप्यवसेदितिभृगुः कथयते अथवा महतायोद्धास्वबलेनक्षिप्यमाणः शरोयावद्दूरंगच्छतितावन्मा

त्रं प्रस्थानंस्यादिति भरद्वाजः कथयते अथवापुरात् बहिः यात्राकार्येति वसिष्ठः कथयते ९३ अथमुनिमतेनप्रस्थानपरिमाणंवसंततिलकया-
ह प्रस्थानमत्रेति धनुःप्रमाणंचतुःकराः तादृशानांधनुषांपंचशतानिहस्तसहस्त्रद्वयमितियावत् स्वगृहात्तावद्धस्तेषुप्रस्थानंस्यादितिकेचि
दूचुः अन्येतुतादृशानांधनुषांशतद्वयं अष्टौशतानिहस्तास्तावत्प्रस्थानमित्याहुः अपरेतुइहयात्राकालेमंदिरतःस्वगृहाद्दशैवधनूंषिचत्वारिं-
शद्धस्तास्तावद्दूरेप्रस्थितःप्रयातःएवंज्ञेयमित्याहुः प्रस्थानंधनुषांपंचशतान्यत्रशतद्वयम् स्वदेवसदनाद्वापिदशभिःप्रस्थितोमतइतिवसि

प्रस्थानमत्रधनुषांहिशतानिपंचकेचिच्छतद्वयमुशंतिदशैवचान्ये संप्रस्थितोयइहमंदिरतःप्रयातोगंतव्यदिक्षुतदपिप्रयते
नकार्यम् ९४ प्रस्थानेभूमिपालोदशदिवसमभिव्याप्यनैकत्रतिष्ठेत्सामंतःसप्तरात्रंतदितरमनुजःपंचरात्रंतथैव ष्ठोक्तेःगं

तव्यदिक्ष्विति तदपिप्रस्थानंप्रयतेनसावधानेनराज्ञागंतव्यदिक्षुयस्यांदिशिगमनंचिकीर्षितंतद्दिगभिमुखंकार्यं गंतव्यदेशाभिमुखेप्रदेशेप्रस्थानमा
हुः शुभदंनराणामितिराजमार्तंडोक्तेः ९४ अथान्यदपिस्त्रग्धरयाह प्रस्थानेभूमिपालइति भूमिपालोराजाप्रस्थानेदशदिवसमभिव्याप्यदशाहोरात्रा
णिनवसेत् सामंतोमांडलिकश्चतुर्द्वारिकः एकस्थप्रस्थानेसप्तरात्रंनवसेत् तदितरमनुजोब्राह्मणादिस्तथैवएकत्रप्रस्थानेपंचरात्रंनवसेत् यदिदैवा
द्वसेत्तदाकिंकुर्यादित्यतआह उर्ध्वमिति अवधिदिवसातिक्रमानंतरंपुनर्गेहमागत्यशुभाहेपूर्वोक्तप्रकारेणविचारितेशुभदिवसेगच्छेत् क्वचिद्दिग्वि

शेषेणप्रस्थानेदिवसनियमोभिहितः राजमार्तंडः प्राच्यामहानिमुनयः प्रवदंतिसप्तयाम्यामतीवशुभदानिदिनानिपंच त्रीण्येवपश्चिमदिशिक्षितिनायकानांप्रस्थानकेषुदिवसद्वयमुत्तरस्यामिति अथप्रस्थानकर्तुर्नियममाह अथेति असौराजादिः रिपुविजयमनाः शत्रुजयकृतांतः करणोयात्रादिनात्पूर्वंसप्तरात्राणिमैथुनंसंभोगंनैवकुर्यात् च्यवनः त्रिरात्रंवर्जयेत्क्षीरंपंचाहंक्षुरकर्मच तदहश्चावशेषाणिसप्ताहंमैथुनंत्यजेत् वाअथवा अशक्तौसप्ताहमतिकामितयास्थातुमशक्तौतद्दिनेयात्रादिवसेमैथुनंनैवकुर्यात् गर्गः यात्राकालेतुसंप्राप्तेमैथुनंयोनिषेवते रोगार्तःक्षीणको

उर्ध्वंगच्छेच्छुभाहेप्यथगमनदिनात्सप्तरात्राणिपूर्वंचाशक्तौतद्दिनेसौऽरिपुविजयमनामैथुनंनैवकुर्यात् ९५ दुग्धंत्या
ज्यंपूर्वमेवत्रिरात्रंक्षौरंत्याज्यंपंचरात्रंचपूर्वम् क्षौद्रंतैलंवासरेऽस्मिन्वमिश्चत्याज्यंयत्नाद्भूमिपालेननूनं ९६

शश्वसनिवर्तेतवानवेति यदातुप्रथमदिनेस्त्रीऋतुस्नाताभवतिगमनेचावश्यकतातत्रनिर्णयमाह च्यवनः आत्ययिककार्यपातेपुष्पस्नातासमागमंकृत्वामुदितोगच्छेल्लभतेमनोरथानचिरकालेनेति यदापुनर्गमनार्थंकालांतरमस्तितद्दिनेमैथुनंकृत्वाकालांतरेसुलग्नेयायादित्यर्थः सिद्धम् ९५ अन्यदपिशालिन्याह दुग्धमिति अस्मिन्वासरेयात्रादिनेक्षौद्रंमधुभक्षत्वेनतैलंतैललापनंत्याज्यम् वमिश्चर्दैवोद्भूताशरीरशोधनार्थंबलात्कारकृतावायात्रादिनेनिषिद्धा ९६ अन्यदपिगीत्याह भुक्तेति यदितैलपक्वानिवटकादीनि गुडमिक्षुविकारम् क्षारंसलवणम् पक्वमांसानियोभु-

क्त्वागच्छति सराजातिरुग्णोरोगसहितोविनिवर्तते गर्गः कटुतैलगुडक्षारंपक्कमांसाशनंतथा भुक्त्वायोयात्यसौमोहाद्व्याधितःसन्निवर्ततइति मांसदुग्धादिनिषेधोदोहदव्यतिरिक्तविषयः स्त्रीद्विजमिति स्त्रीचद्विजश्चतयोःसमाहारः स्त्रीद्विजं अवमान्यधिकूशब्दताडनादिनामानभंगं कृत्वागच्छतःपुंसोमरणंस्यात् गर्गः यस्तुसंप्रस्थितोयात्रांभार्यांनैवाभिनंदति भार्यावानाभिनंदेतनसप्रतिनिवर्तते परकीयांस्वकीयांवा स्त्रियंपुरुषमेवच ताडयित्वातुयोमोहात्तदंतंतस्यजीवितम् यात्रायांप्रस्थितोयस्तुब्राह्मणानवमानयेत् नासौप्रतिनिवर्त्तेततदंतंतस्यजीवितम् केचिच्छुभाशुभशब्दान्यात्राकालेशुभाशुभसूचकानाहुः लल्लः प्रापयगच्छविसय निर्गच्छव्रजसंसर्पेतिसिद्धिकराः खल्वेतेष्वप्यधिकाप्रमोदजयजीवशब्दाश्च मागास्तिष्ठनिवर्त्तयक्कगम्यतेमूढदुर्मतेमोहात् यात्रांनेच्छंति बुधाःक्षुतकासितभीतशब्दैश्चेति कासितंरोगार्तध्वनिर्हिक्कादिः ९७ अथाकालवृष्ट्याख्यदोषंवसंततिलकयाह यदीति पौषमाघफाल्गुनचैत्रेषुचतुर्षुमासेषुयदिवृष्टिर्भवेत् साऽकालवृष्टिः पौषादिचतुरोमासान्प्रासावृष्टिरकालजेतिवचनात् तत्राकालवृष्ट्यांजातायांयदिवसुधापृथ्वीयावत्पशवोगवादयःमर्त्यामनुष्यादयःतेषांपदैश्चरणैरंकिताचिन्हितानभवतितावदकालवृष्टेर्दोषोनास्ति यदिपशुचरणांकितास्यात्तदादो

भुक्त्वागच्छतियदिचेत्तैलगुडक्षारपक्कमांसानि विनिवर्ततेसरुग्णःस्त्रीद्विजमवमान्यगच्छतोमरणम् ९७ यदिमाःसचतुर्षु
पौषमासादिषुवृष्टिर्हिभवेदकालवृष्टिः

षोऽस्त्येव अत्रप्राच्या अल्पवृष्टौकर्दमादिबाहुल्यात् अत्यल्पावृष्टिर्दोषायनमहतीतिवदंति तत्रबहुवृष्ट्याकर्दमापाकरणात् तत्रसितादौमार्गशीर्षस्यप्रतिपद्दिवसेतथा पूर्वाषाढागतेचंद्रे गर्भाणांधारणंभवेदितिकश्यपोक्तेर्मार्गादिमासागर्भग्रहणकालस्तत्रवृष्टिरावश्यकी यदाहवराहः पवनसलिलविद्युद्गर्जिताभ्रान्वितोयः सभवतिबहुतोयः पंचरूपस्तुमेघइति ततश्चगर्भग्रहणयोग्या अल्पावृष्टिर्नदोषदा महतीवृष्टिस्तुगर्भगलनम् यतोवाराहेणोक्तम् गर्भसमयेतिवृष्टिर्गर्भाभावायनिर्निमित्तकृतेति निमित्तंशक्रकास्त्रादिकम् साविकृतिः विद्युतिउपधीयमानादोषमुपनिनुयात् ए

पशुमर्त्यपदांकितानयावद्वसुधास्यान्नहितावदेवदोषः ९८ अल्पायांवृष्टौदोषोल्पोभूयस्यांदोषोभूयात् जीमूतानांनिर्घोषे
वृष्टौवाजातायांभूपः

तावतामहावृष्टेरेवदोषवत्त्वम् अतएवभृशंदसरंतोजलदानशस्ताइति बृहद्यात्रायामुक्तम् तस्मादत्यल्पायामकालवृष्टौदोषाभावः अल्पायांत्वल्पदोषः महत्यांतुमहादोषइतिसच सप्तरात्रिकइत्युक्तम् प्राक् एकेनैकमहः प्रोक्तं द्वितीयेनत्रिरात्रकम् तृतीयेनतुपंचाहं दशरात्रमतःपरम् पौषेतुत्रिदिनंवर्ज्यंमाघमासेदिनद्वयम् फाल्गुनेदिनमेकंतुचैत्रेतुघटिकाद्वयमितितु आवश्यककार्यविषयम् ९८ पूर्वोक्तमेवार्थंस्पष्टीकुर्वन्नावश्यकयात्रायांतच्छांतिकंदुष्टशकुनशांतिकंचातिशक्र्यांगाथाछंदसाह अल्पायामिति स्पष्टार्थः प्रथमचरणम् आतोयत्प्राच्याःपठंति तावत्प्रयाणादिषुभूपतीनामकालवृष्टिः प्रकरोतिदोषम् यावद्भवेत्संचरतांजनानांतथापशूनांचरणांकिताभूरितितन्निर्मूलत्वादु-

पेक्ष्यम् स्वयंप्रस्थानेसतिमार्गमध्येनास्त्ययंदोषः आवश्यकयात्रायांदानमाह जीमूतानामिति जीमूतानांमेघानांनिर्घोषेशब्दे अकालवृष्टौ
वाजातायांसूर्येंद्वोर्यथाशक्त्यासौवर्णांनिर्मितेबिंबेकृत्वाब्राह्मणेभ्योदद्यात्ततः स्वेच्छयागच्छेत् प्रसंगाद्दुष्टशकुनानांदानमाह दुःशाकुन्येइति
शकुनस्यभावः शाकुन्यं दुष्टंचतच्छाकुन्यंचदुःशाकुन्यंतस्मिन्दुष्टेशकुनेप्रस्थानकालेसंभूतेसतिसाज्यंसघृतंस्वर्णंविप्रेभ्योदत्वास्वेच्छाभिर्गच्छे
त् ९९ अथशुभसूचकशकुनान्शार्दूलविक्रीडितेनाह विप्राश्वेति विप्राबह्वोद्वौवानत्वेकः अश्वःप्रसिद्धः इभोहस्ती अनुन्मत्तःफलान्नदुग्धदधी

सूर्येंद्वोर्बिंबेसौवर्णेकृत्वाविप्रेभ्योदद्यात् दुःशाकुन्येसाज्यंस्वर्णंदत्वागच्छेत्स्वेच्छाभिः ९९ विप्राश्वेभफलान्नदुग्धदधिगो
सिद्धार्थपद्मांबरंवेश्यावाद्यमयूरचाषनकुलाबद्धैकपश्वामिषम् सद्वाक्यंकुसुमेक्षुपूर्णकलशच्छत्राणिमृत्कन्यकारत्नोष्णी
षसितोक्षमद्यससुतस्त्रीदीप्तवैश्वानराः १००

निप्रसिद्धानि गौः धेनुः सिद्धार्थः सर्षपः पद्मं कमलं अंबरं वस्त्रं स्वच्छं वेश्यागणिका वाद्यंम
र्दलादिमयूरश्चाषौपक्षिणौ नकुलः प्रसिद्धः बद्धैकपशुः रज्ज्वादिबद्धोवृषादिः आमिषंमांसम् सद्वाक्यंकार्यसिद्धिरस्त्वित्यादिकं कुसुमादीनि
चंपकादीनि इक्षुःप्रसिद्धःसकलःनतुखंडितःजलपूर्णकलशःसंमुखः छत्रंप्रसिद्धम् मृत्तिकाकन्याकुमारी रत्नंमाणिक्यादि उष्णीषंशिरोवेष्टनम्
सितोक्षः श्वेतवृषः अयमबद्धोपि मद्यंप्रसिद्धम् ससुतस्त्रीसपुत्रास्त्री दीप्तोजाज्वल्यमानोऽग्निरिति १०० अन्यच्छार्दूलविक्रीडितेनाह आदर्शेजनेति

आदर्शांजनधौतवस्त्ररजकोमीनाज्यसिंहासनंशावंरोदनवर्जितंध्वजमधुच्छागासुगोरोचनम् भारद्वाजनृयानवेदनिनदामां
गल्यगीतांकुशादृष्टाःसत्फलदाःप्रयाणसमयेरिक्तोघटःस्वानुगः १०१

आदर्शोदर्पणं अंजनंकज्जलम् धौतवस्त्रउज्ज्वलीकृतवस्त्रोरजकः वस्त्रनिर्णेक्तामीनोमत्स्यः आज्यंघृतंसिंहासनंदेवादेः शवमेवशावंमृतकंपृष्ठगामिलोकरोदनरहितम् ध्वजःपताका मधुक्षौद्रम् छागोमेषः अस्त्रंधनुरादि गोरोचनंप्रसिद्धम् भारद्वाजः पक्षी नृयानंसुखासनादि वेदन्निदोवेदध्वनिः मांगल्यंप्रसिद्धम् गीतंगानम् अंकुशोहस्तिनिवारणार्थमस्त्रम् एतेपदार्थाः गंतुर्भूपतेः प्रयाणसमयेसंमुखंदृश्यमानाः सत्फलदाः शुभफलदाः तथारिक्तोजलरहितोघटःकुंभः स्वानुगः स्वस्यपश्चाद्भागगामीसोपिशुभफलदः कश्यपः कार्यसिद्धिर्भवेदृष्टेशवेरोदनवर्जिते प्रवेशेरोदनयुतःशवःस्यात्तुशिवप्रदः वसंतराजः आदायरिक्तंकलशंजयार्थीयदिव्रजेत्कोऽपिसहाध्वगेतम् पूर्णंसमादायनिवर्ततेसौयथाकृतार्थःपथिकस्तथैवेति अथकैश्चिल्लग्नवशेन शकुना उक्ताः लग्नेवाचस्पतिशुक्राणांब्राह्मणः संमुखाःस्त्रियः बुधशुक्रौचकेंद्रस्थौसवत्सागौः प्रदृश्यते चंद्रःसूर्यश्चभवतिदशमस्थोयदाथवा दीपादर्शौसुमनसौरजकोधौतवाससा सुतस्थानेयदासौम्येवृषोबद्धस्तुसंमुखः चंद्रोगुरुश्चसहजेश्वानोवामांगभागतः सर्वेकर्मार्थनवमे भारद्वाजोथनाकुलः चाषस्यदर्शनंवास्याद्वामांगेत्यंतदुर्लभम् आदित्योराहुसौरीचसहजस्थौकुमारिका प्रौढानांसुभगानांवादर्शनंसर्व-

कामदम् षष्ठेतृतीयेकर्मायेभौमश्चेत्तत्फलंभवेत् दास्यौवैश्याः सुरामांसंलाभश्चैवसुनिश्चितः सप्तास्पंचमेयस्यजीवोज्ञोवात्रवर्तते आदर्शश्च लाभदः राहुर्भौमश्चमंदश्चलग्नाद्यादितृतीयगाः उद्धृतंगोमयंपश्येच्छीघ्रंलाभंधनंदिशेत् इत्यादयःशकुनाः शकुनग्रंथेभ्योज्ञेयाविस्तारभयादिहनोक्ताः १०१ अथापशकुनान्शार्दूलविक्रीडितेनाह वंध्येति वंध्याप्रसिद्धा चर्मप्रसिद्धम् तुषंधान्यादितुषम् अस्थिसर्पलवणानिप्रसिद्धानि अंगारोनिर्धूमोग्निपिडः इंधनंपाकयोज्यम् क्लीबः षंढःविट् उद्धृताविष्ठा अस्त्रीविष्ठाविमौसमावित्यमरः तैलंप्रसिद्धम् उन्मत्तोमद्यभ्रता

वंध्याचर्मतुषास्थिसर्पलवणांगारेंधनक्लीबविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः नग्नाभ्यक्तविमुक्तकेशपति
ताव्यंगक्षुधार्तअसृक्स्त्रीपुष्पंसरठःस्वगेहदहनंमार्जारयुद्धंक्षुतम् १०२

द्यावेशवान् वसाशरीरांतर्धातुविशेषः औषधंप्रसिद्धम् अरिःशत्रुःजटिलोजटावान् प्रव्राट्संन्यासी तृणंप्रसिद्धम् व्याधितोऽचिकित्स्यव्याधिमान् नग्नः अपरिहितवस्त्रः कुमारव्यतिरिक्तः अव्यक्तः कृततैलाभ्यंगोस्नातः विमुक्तकेशः असंयतकेशः पतितोमद्यपानाद्यभिशापवान् व्यंगश्छिन्ननासिकादिः क्षुधार्तः क्षुत्पीडितः असृक्रुधिरम् स्त्रीपुष्पंस्त्रीणामृतुः सरठः कृकलासः स्वगेहदहनम् स्वगेहेऽग्निदाहः मार्जारयुद्धंप्रसिद्धम् क्षुतंशिक्का १०२ अन्यदपिशार्दूलविक्रीडितेनाह काषायीति काषायोरागविशेषः तेनरक्तंवस्त्रंकाषायम् तद्वान् गुडतक्रेप्रसिद्धे पंकःकर्दमः विधवाकुब्जौप्रसिद्धौ कुटुंबेक

लिः पुत्रादिभिः कलहः वस्त्रादेः आदिशब्देन कमंडलुछत्रादेः स्खलनंनिर्निमित्तंस्वहस्तात्पतनम् कुलायामहिषास्तेषांसमरंयुक्तं कृष्णवर्णानिधान्यानि माषादीनि कार्पासंतूलम् वमनंवांतम् दक्षेदक्षिणभागेगर्दभशब्दः अतिरुट् क्रोधाधिक्यम् गर्भिणीगर्भवती मुंडोमुंडितशिरस्कः आर्द्रांबरः आर्द्रवस्त्रः दुर्वचः स्वमुखोत्थंपरमुखोत्थंवादुष्टवाक्यम् अंधबधिरौप्रसिद्धौ उदक्यारजस्वलास्त्री एतेपदार्थाः गंतुः पुंसः यानसमयेदृष्टाः संतो नशुभाः किंतु अशुभफलदाः नारदः सर्वदिक्षुक्षुतंनेष्टं गोक्षुतंमरणप्रदम् अफलंतच्छुतंवाक्यंवृद्धपीनसकैतवैरिति औषधेयानमारोहेविवादेशयनेऽशने विद्यारंभेबीजवापेक्षुतंसत्सुशोभनमिति १०३ अथान्यच्छकुनंशार्दूलविक्रीडितेनाह गोधाजाहकेति गोधाप्राणिविशेषः गोह इति भाषयाजाहकोगात्रसंकोचीप्राणिविशेषः सूकरःप्रसिद्धः अहिःसर्पः शशकः प्रसिद्धः यानसमयेएषांगोधादीनांकीर्तनंस्वमुखेनान्यमुखेनवोच्चरणंशुभंनपुनरेतेषांगोधादीनांशब्दोरुतम् अथवाविलोकनंदर्शनंनिषिद्धम् कपिऋक्षाणांकपीनांवानरादीनांऋक्षाणांभल्लूकादीनां अतोगोधादिभ्योव्यत्ययोज्ञेयः यथावानराणांभल्लूकानांकीर्तनंनिषिद्धम् तेषामे

काषायीगुडतक्रपंकविधवाकुब्जाःकुटुंबेकलिर्वस्त्रादेःस्खलनंकुलायसमरंकृष्णानिधान्यानिच कार्पासंवमनंचगर्दभरवो
दक्षेतिरुड्गर्भिणीमुंडार्द्रांबरदुर्वचोंऽधबधिरोदक्यानदृष्टाःशुभाः १०३ गोधाजाहकसूकराहिशशकानांकीर्तनंशोभनंनोशब्दो
नविलोकनंचकपिऋक्षाणामतोव्यत्ययः

वदर्शनंशब्दितंवानानिषिद्धम् शुभमित्यर्थः नद्युत्तारइति नद्यागंगादेरुत्तारणेभये भयसंबंधिनिकार्येपलायनादिके प्रवेशेगृहप्रवेशेसमरे संग्रामेनष्टार्थस्यनष्टद्रव्यस्यसंवीक्षणेगवेषणेप्रागुक्ताः शकुनाः व्यत्यस्ताविपरीताज्ञेयाः शुभशकुनाविप्राश्वेत्यादयोऽशुभाज्ञेयाः वंध्याचर्मेत्याद्यशुभशकुनाः शुभफलदाज्ञेयाः नृपेति नृपदर्शनार्थंगमनेयात्रायामुदिताविप्राश्चेत्यादयः शुभाज्ञेयाः नृपावलोकनेशकुनः प्रयाणवदित्युक्तोराजदर्शनस्यभयस्थानत्वादपवादोयम् १०४ अथान्यदप्यनुष्टुभाह वामांगेइति कोकिलापल्ल्यौप्रसिद्धौ पोतकीदुर्गेति सूकरीजात्यवटिका रलापक्षिविशेषः पिंगलाभैरवी छुछुकाछुछुंदरी शिवासृगाली पुरुषसंज्ञितापुंनाम्नः कपोतखंजनातित्तिरिहंसादयः एतेगच्छताराजादीनांवामांगेवामभागेशस्ताःस्युः १०५ अन्यदप्यनुष्टुभाह छिक्करइति छिक्करोमृगजातिः पिप्पकः पक्षिविशेषः भासःश्रीकंठः वानराः एतेप्रसिद्धाः रुरुर्मृगविशेषः स्त्रीसंज्ञकाः स्त्रीनामानः काकःप्रसिद्धः ऋक्षोभल्लूकः श्वानःकुक्कुरः एतेयात्रागंतुर्दक्षिणभागगाः शुभाः १०६ अथोक्तव्यतिरिक्तानांमृगपक्षिणांसामान्यतः प्रदाक्षणेनशकुनमनुष्टुभाह प्रदक्षिणगताइति रुरुव्यतिरिक्तमृगाः पक्षिणश्चयात्रायांप्रादक्षिण्येन गताश्चलि-

नद्युत्तारभयप्रवेशसमरेनष्टार्थसंवीक्षणेव्यत्यस्ताःशकुनान्नृपेक्षणविधौयात्रोदिताःशोभनाः १०४ वामांगेकोकिलापल्लीपोतकीसूकरीरला पिंगलाछुछुकाश्रेष्ठाशिवापुरुषसंज्ञिका १०५ छिक्करःपिप्पकोभासःश्रीकंठोवानरोरुरुः स्त्रीसंज्ञकाःकाकऋक्षश्वानस्युर्दक्षिणाः शुभाः १०६ प्रदक्षिणगताःश्रेष्ठायात्रायांमृगपक्षिणः

ताः श्रेष्ठाः शुभफलदाः स्युः परंतु ओजामृगाविषमसंख्यास्त्रिपंचसप्तादयश्चेद्व्रजंतोदृष्टास्तदाऽतिधन्याः स्युः वामेइति स्ववामभागेखरस्वनोगर्दभशब्दोतिधन्यः अथशकुनानांकियतांकालविशेषैर्नैर्बल्यमाह वराहः नग्रामेरण्यगोग्राह्योनारण्येग्रामसंस्थितः दिवाचरोनशर्वर्यांनिचनक्तंचरोदिवा द्वंद्वरोगार्दितस्तत्रकलहामिषकांक्षिणः आपगांतरितामत्तानग्राह्याः शकुनाः क्वचित् रोहिताश्वाजवालेयकुरंगोष्ट्रमृगाः शशाः निष्फलाः शिशिरेज्ञेयावसंतेकाककोकिलौ नतुभाद्रपदेग्राह्याः सूकराश्ववृकादयः शरद्याश्वादगौक्रौंचाः श्रावणेहस्तिचातकौ व्याघ्रर्क्षवानरद्वीप-

ओजामृगाव्रजंतोतिधन्यावामेखरस्वनः १०७ आद्येपशकुनेस्थित्वाप्राणानेकादशव्रजेत् द्वितीयेषोडशप्राणांस्तृतीयेनक्वचिद्व्रजेत् १०८

महिषासबिलेशयाः हेमंतेनिःफलाज्ञेयावालाः सर्वेविमानुषाइति प्रभग्नशुष्कद्रुमकंटकीषुश्मशानभस्मास्थितुषाकुलेषु प्राकारशून्यालयजर्जरीषु सौम्योपि पापः शकुनः प्रकल्प्यः दैवज्ञमनोहरे वरंश्रयेद्दुर्जनकालसर्पौवरंक्षिपेद्व्याघ्रमुखेस्वमंगं वरंतरेद्वारिनिधिंभुजाभ्यांनोल्लंघयेद्दुःशकुनंकदापि १०७ अथावश्यककार्येविरुद्धशकुनेजातेपिपरिहारमनुष्टुभाह आद्यइति आवश्यककार्येविरुद्धशकुनेजातेएकादशप्राणान् स्थित्वाएकादशप्राणपरिच्छेद्यंकालंस्थित्वेत्यर्थः ततः समीचीनेशकुनेव्रजेत् तत्रापिविरुद्धेशकुनेसंवृत्ते-षोडशसंख्याकान् प्राणान् स्थित्वाशुभशकुनेव्रजेत् तत्रापिपुनस्तृतीयेविरुद्धेशकुनेसंवृत्तेक्वचिदपिनव्रजेत् किंतु परिवृत्यगृहमागच्छेत् दश

गुर्वक्षरैः प्राणइतिकश्यपेनतुप्राणायामत्रयमेवप्रतीक्ष्यमित्युक्तम् यायीविरुद्धंशकुनमादौदृष्ट्वाप्रयत्नतः प्राणायामत्रयंकुर्याद्द्वितीयेद्विगुणंचरेत् त्रितीयेपुनरावृत्त्यशांत्यायायाद्दिनांतं इति १०८ अथयात्रानिवृत्तौगृहप्रवेशमुपजात्याह यात्रानिवृत्ताविति मृदूनिचित्रानुराधामृगरेवत्यः ध्रुवाणिरोहिण्युत्तराश्च एभिर्नक्षत्रैः राज्ञोयात्रानिवृत्तौप्रवेशनंशुभदम् क्षिप्रचरैर्नक्षत्रैः अश्विनीपुष्यहस्ताभिजिद्भिः श्रवणधनिष्ठाशततारापुनर्वसुस्वातीभिश्चप्रवेशनेपुनरपिगमोयात्रास्यात् तस्मादेतानिमध्यमानिद्वीशादिनक्षत्रेषुप्रवेशेक्रमात् स्त्र्यादीनांनाशः यथा विशा

यात्रानिवृत्तौशुभदंप्रवेशनंमृदुध्रुवैःक्षिप्रचरैःपुनर्गमः द्वीशेऽनलेदारुणभेतथोग्रभेस्त्रीगेहपुत्रात्मविनाशनंक्रमात् १०९

खायांप्रवेशेस्त्रियोराज्ञांनाशः कृत्तिकायांप्रवेशेगृहनाशोगृहंदग्धंस्यात् दारुणभेमूलज्येष्ठार्द्राश्लेषासुप्रवेशेपुत्रस्यनाशः उग्रभेपूर्वात्रयभरणीमघासुप्रवेशेआत्मनः स्वस्यैवराज्ञोनाशः स्यादित्यर्थः लग्नादिविचारोगृहप्रवेशप्रकरणाज्ज्ञेयः अत्रेदंविचार्यम् यत्रमासेयात्राकृतातन्मासान्नवमेमासियात्रादिनान्नवमदिनेचप्रवेशोनविधेयः गुरुः निर्गमान्नवमेमासिप्रवेशोनैवशोभनः नवमेदिवसेचैवप्रवेशोनैवकारयेदिति १०९ अथविवाहप्रकरणोक्तदोषातिदेशंप्रागुक्तदोषांश्चशिष्याणामविस्मयार्थंमंजुभाषिण्याह अयनर्क्षेति एतेअयनशूलादयोदोषाविवाहप्रकरणोक्तदोषाश्चयात्रायांनेष्टाः तत्रायनशूलः सौम्यायनेसूर्यविधूतदोत्तरामिति मासोद्भवः शूलोद्विविधः ग्रंथांतरोक्तः वृषादित्रि

त्रिराशिष्वर्केप्राच्यादिदिक्षुनगंतव्यमित्येकः कपाटकंठकादिश्चद्वितीयः स्वरोदयेत्रयस्त्रयोवृषाद्याश्चपूर्वाशादिबुधैःक्रमात् राशयोद्वादशैवंतु मेषांताः सृष्टिमार्गतः यत्रपूर्वादिकाष्ठायांवृषराश्यादिगोरविः सादिशास्तमिताज्ञेयातिस्रः शेषाःराहोर्हिताइति कपाटकंटकादिर्यथाकपाटपूर्वतोज्ञेयंकार्तिकादित्रिकंतथा नभस्यतोवास्तुमधोरेकेरर्केन कंटकइतिज्योतिषार्कवचनात् नक्षत्रशूलः नपूर्वाविधिशक्रभेनाविधुसौरिवारेतथेति तिथिशूलःयोगिनी नवभूम्यइति सम्मुखसितज्ञादिक्पाः संमुखःशुक्रः संमुखोबुधः संमुखोदिक्स्वामीललाटी भृगुवक्रतादि आदि

अयनर्क्षमासतिथिकालवासरोद्भवशूलसंमुखसितज्ञादिक्पाः भृगुवक्रतादिपरिधाख्यदंडकस्त्र्यृतुजाद्यशौचमपिचोत्सवादिकम् ११० मृतपक्षरिक्तरवितर्कसंख्यकास्तिथयश्चसौरिरविभौमवासराः

शब्दात् क्षीणत्वास्तमितत्वपराजितत्वबाल्यादिकम् वक्रास्तनीचेत्युक्तम् परिघाख्यदंडःकःपूर्वादिषुचतुर्दिक्ष्वित्युक्तः स्त्र्यृतुजाद्यशौचम् स्वस्त्रीऋतुजं आतर्वस्नातकालपर्यंतम् आशौचंजननाशौचंमरणाशौचंच उत्सवोदीपोत्सवः आदिशब्देनविवाहव्रतबंधादिरिति ११० अन्यदपिमंजुभाषिणीछंदसाह मृतपक्षेति मृतःपक्षः तमोभुक्ततारा: स्मृताविश्वसंख्याइत्याद्युक्तः रिक्तरवितर्कसंख्यकाः चतुर्थीनवमीचतुर्दशीद्वादशीषष्ठ्यस्तिथयः उपलक्षणत्वादष्टमीपूर्णिमामावास्या शुक्लपक्षप्रतिपदः सौरिभौमरविवाराः वामपृष्ठगविधुः अजवृषभमिथुनकुलीराइत्यादिजातकोक्ताः वामपृष्ठराशिगतःआ

डलोरवेर्भतोंङ्कभ्भोन्मितिरिति भ्रमणामपिज्ञेयम् वसुपंचकंधनिष्ठोत्तरार्द्धात्पंचनक्षत्राणि अभिजिन्मुहूर्त्तश्चदक्षिणेवर्ज्यः एतेपंचांगदोषाः १११अ
थलग्नदोषान् स्रग्धरयाह लग्नेइति जन्मराशेर्जन्मलग्नाद्वाऽष्टमगृहे अहितर्क्षाच्छत्रुजन्मराशेर्जन्मलग्नाद्वाषष्ठम् जन्मलग्नंवायात्रालग्नेतदीशाः
तेषांजन्मराशिजन्मलग्नाभ्यामष्टमभवनयोःस्वामिनः रिपुजन्मराशिजन्मलग्नाभ्यांषष्ठभवनयोः स्वामिनोर्वायात्रालग्नेकुंभमीनयोर्नवलवोनव
मांशंलग्नंचपृष्ठोदयागोजाश्विकर्किमिथुनाः समृगानिशाख्याः पृष्ठोदयाविमिथुनाइत्याद्युक्ताः पृष्ठाशासंस्थमृक्षंगंतव्यदिग्विलोमलग्नम् द

अपिवामपृष्ठगविधुस्तथाडलोवसुपंचकाभिजिदथापिदक्षिणे १११ लग्नेजन्मर्क्षतन्वोर्मृतिगृहमदितर्क्षाच्चषष्ठंतदीशावालग्ने
कुंभमीनर्क्षनवलवतनूचापिपृष्ठोदयंच पृष्ठाशामृक्षसंस्थंदशमशनिरथोसप्तमेचापिकाव्यः केंद्रेवक्राश्चवक्रीग्रहदिवसविवाहोक्तदो
षाश्चनेष्टाः ११२ इतिश्रीमुहूर्त्तचिंतामणौयात्राप्रकरणंसमाप्तम् ७ अथवास्तुप्रकरणप्रारंभः

शमेशनिः सप्तमेकाव्यः
शुक्रः केंद्रेवक्राः वक्रिणोग्रहाः वक्रिग्रहवाराश्च एतेदोषाः विवाहोक्तदोषाःउत्पातान् सहपातदग्धतिथिभिरित्याद्युक्ताः तेसर्वेयात्रायांवर्ज्याः तत्रस
सप्तमशुक्रव्यतिरिक्तोजामित्रदोषोनास्तीतिज्ञेयं ११२ इतिप्रमिताक्षरायांयात्राप्रकरणंसमाप्तम् ७ अथवास्तुप्रकरणंव्याख्यायते गृहनिर्मा
णप्रयोजनंभविष्यपुराणे गृहस्थस्यक्रियाः सर्वानसिद्ध्यंतिगृहंविना यतस्तस्माद्गृहारंभप्रवेशसमयौब्रुवे गृहंस्वसत्ताकम् नासिद्ध्यंतिनिःफ

लाभवंतीत्यर्थः इत्याद्यर्थमनस्यालोच्यग्रामादिषुस्वस्यशुभाशुभंलाभालाभादिविचारंशार्दूलविक्रीडितेनाह यद्भमिति नामभात् व्यावहारिकनामभात् व्यवहारिकनामराशेर्वृश्चिकाख्या यस्यग्रामादेर्भंयथा चरणाद्रिसंज्ञकोग्रामराशिः मीनाख्यः सचेद्वितीयोनवमः पंचमः एकादशसंख्योदशमश्चस्यात्तदासौग्रामः स्वस्यशुभः स्यात् अन्यथानशुभइत्यर्थः यथानीलकंठराशेर्वृश्चिकाख्या पंचमोमीनराशिश्चरणाद्रेरतश्चरणाद्रिर्नीलकंठस्यवासयोग्यः नामर्क्षेउक्तंच अत्रनामराशेरेवग्राह्यः काकिण्यांवर्गशुद्धौचवादेद्यूतेस्वरोदये मंत्रेपुनर्भूवरणेनामराशेः प्रधानताइति अथग्रामात्मनोरुत्तमर्णाधमर्णत्वंचाह स्वंवर्गमिति वर्गास्तु अकचटतपयशवर्गाः खगेशमार्जारसिंहशुनांसर्पाखुमृगावी

यद्भंद्व्यंकसुतेशदिङ्मितमसौग्रामःशुभोनामभात्स्वंवर्गंद्विगुणंविधायपरवर्गाढ्यंगजैः शेषितम्

नांनिजपंचमवैरिणामष्टौइत्युक्ताः तत्रयस्यपुंसोयत्संख्याकोवर्गोगरुडादिस्तद्वर्गसंख्यांद्विगुणांविधायपरस्यग्रामादेर्वर्गसंख्ययाढ्यांच कृत्वातैरष्टभिः शेषितमवशिष्टंताः पुंसः काकिण्योज्ञेयाः एवंग्रामादेरपिवर्गसंख्याद्विगुणीकृत्वापरस्यपुंसोवर्गसंख्ययाढ्यांकृत्वागजैर्भजेदवशिष्टाः ग्रामस्यकाकिण्योभवंति एवमनयोः पुरुषग्रामयोः काकिणीनांविवराद्यस्याधिकाअवशिष्यंतेसोर्थदः परस्यलाभदः यथा नीलकंठस्यवर्गः सर्पः तत्संख्या ५ द्विगुणः १० चरणाद्रिवर्गः सिंहः ३ तत्संख्यययायुक्ता १३ गजभक्तावशेषं ५ नीलकंठस्यकाकिण्यः एवंग्राम

वर्गसंख्या ३ द्विगुणाः ६ नीलकंठवर्ग ५ संख्ययायुक्ताः ११ अष्टभक्ताशेषं ३ ग्रामस्यकाकिण्यः तयोरंतरशेषं २ नीलकंठस्याधिकत्वेनदातृत्वा
द्द्रव्यहानिरित्यर्थः उक्तंच स्वंवर्गंद्विगुणीकृत्यपरवर्गेनयोजयेत् अष्टभिस्तुहरेद्भागंयोधिकः सऋणीभवेदिति अथद्वारनिवेशनमाह अथेति
द्विजादिराशीनांपुंसांक्रमेणपूर्वतः प्राच्यादिदिक्चतुष्टयेद्वारंहितम् यथा द्विजराशीनांकर्कवृश्चिकमीनानांपूर्वदिशि वैश्यराशीनांवृषक
न्यामकराणांदक्षिणदिशि शूद्रराशीनांमिथुनतुलाकुंभानांपश्चिमदिशि नृपराशीनांमेषसिंहधनुषांउत्तरदिशिद्वारंहितम् १ अथराशिप

काकिण्यस्त्वनयोश्चतद्विवरतोयस्याधिकाःसोर्थदोथद्वारंद्विजवैश्यशूद्रनृपराशीनांहितंपूर्वतः १ गोसिंहनक्रमिथुनंनिव
सेन्नमध्येग्रामस्यपूर्वककुभोलिझषांगनाश्च कर्कोधनुस्तुलभमेषघटाश्चतद्वद्वर्गाःस्वपंचमपराबलिनःस्युरैंद्र्याः २

रत्वेनग्रामनिवासेनिषिद्धस्थानानि वसंततिलकयाह गोसिंहेति वास्त्वाभीष्टस्यग्रामस्यवस्त्रविभागवन्नवधाविभागंकृत्वामध्येमध्यविभागे
गोसिंहनक्रमिथुनंननिवसेत् वृषसिंहमकरमिथुनराशिमंतः पुरुषानवसेयुः अथपूर्वककुभः पूर्वदिशातोऽष्टदिग्गतोष्टदिक्षु अलिर्वृश्चिकः
तदादिराशिमंतः पुरुषानवसेयुः यथा पूर्वस्यांवृश्चिकः आग्नेय्यांझषोमीनः दक्षिणस्यांकन्या नैर्ऋत्यांकर्कः पश्चिमायांधनुः वायव्यांतु
लाउत्तरस्यांमेषः ईशान्यांकुंभः नवसेदित्यर्थः यथा अवर्गः पूर्वस्याम् कवर्गआग्नेय्याम् चवर्गोदक्षिणस्याम् टवर्गोनैर्ऋत्याम् तवर्गःपश्चिमा

याम् पवर्गोवायव्याम् यवर्गउत्तरस्याम् शवर्गईशान्याम् बलीइत्यर्थः कीदृशः वर्गाः स्वंपञ्चमपराः स्वस्मात्पंचमः परः शत्रुर्येषांते यथा अवर्गः पूर्वस्यांबली
अनेनपश्चिमायांद्वारंनिवासोनविधेयः एवंकवर्गादीनामपि वायव्यादौद्वारंनिवासोवानविधेयः २ अथस्वेष्टनक्षत्राभ्यांइष्टभूम्याविस्तारायामिंद्रवज्रें
द्रवंशापूर्वार्द्धेनाह एकोनितेति स्वेष्टायेतिच तत्रराशिकूटादिदंपत्योरिवचिंतयेदितिवसिष्ठोक्तेः यदेवनक्षत्रंव्यवहारनाम्नाविवाहोक्तमेलापकविधिना
शुभदंस्यात् तदेवंस्वेष्टभंकल्प्यम् यश्चध्वजाद्यष्टायेविषमआयईप्सितः स्यात्सएवेष्टायः कल्प्यः ताभ्यांविस्तारायामज्ञानम् यथानीलकंठस्या
नुराधानक्षत्रंतस्यरोहिण्यासहमेलापकः संभवतीतीष्टभंरोहिणीकल्पितम् तत्संख्या ४ एकोनितेष्टर्क्षं ३ अनेनद्वितिथ्यो १५२ हताः ४५६ इष्टा

एकोनितेष्टर्क्षहताद्वितिथ्योरूपोनितेष्टायहतेंदुनागैः युक्ताघनै[१७]श्चापियुताविभक्ताभूपाश्विभिःशेषमितोहिपिंडः ३

यः सिंहः कल्पितः तृतीयः रूपोनितइष्टायः २ अनेनेंदुनागाः ८१ गुणिताः १६२ युताः ६१८ घनैश्च १७ युताः ६३५ भूपाश्विभि २१६ र्विभक्ताः २०३ इद
मेवक्षेत्रफलं गृहस्यइष्टायनक्षत्रभवम् अथकल्पितदैर्घ्यं २१ अनेनभक्तेलब्धोविस्तारः ७ अथकल्पितविस्तृतिः ७ भक्तोलब्धंदैर्घ्यं २१ अत्रगो
पीराजाचार्यकृतंसूत्रम् विष्णुर्व्येकायगोभू १९ हतिभयुजिफलंगोपिराजोभशेषात्सायंवेष्टाष्टिहृग्भ्या २१६ युतमहि ८ हताद्दकु २ भकृत्या २१
स्व्याविश्वे १३ बाणाः ५ सिद्धा २४ ष्टि १६ नागो ८ द्व २७ तिधृति १९ गिरिश ११ त्र्या ३ कृतीं २२ द्र १४ तु ६ तत्वा २५ त्यष्ट्यं १७ क ९ क्ष्मा १ नखे २० ना १२ र्णव ४ वि

कृति २३ दिना १५ ग्या ७ कृती २६ भेंदु १८ काष्ठा १० गोपीराजः कथयतिविष्णुम् गोभूहतियुजिसति अहिहताद्दकृ प्रकृत्याख्याविश्वादयः फलंआह विगतः
एकोयस्मात्सव्येकः सचासौ आयश्चव्येकायः ध्वजादिरिष्टायः सचगोभुवश्च एषांपरस्परगुणानांव्येकायगोभूहतिश्च भंचव्येकायगोभूहति भेतयोर्युक्
व्येकायगोभूहति भयुकूतस्मिन् सति भशेषात् भै २७ र्भक्तेसति यच्छेषम् तस्माद्विष्णुनामानंशिष्यं अहिहता अष्टगुणिताद्दकृद्वौ प्रकृत्याख्याएकविंशतिः
विश्वेत्रयोदशेत्यादियत् गृहक्षेत्रफलम् सायंइष्टायसहितम् आहवदति अत्रोदाहरणम् इष्टायः ३ व्येकः २ गोभू १९ अतिः ३८ इष्टर्क्षे
रोहिणीतत्संख्यया ४ युतम् ४२ अस्माद्भैः २७ शेषं १५ एतत्संख्याफलम् २५ अहि ८ हतम् २०० सायम् २०३ इदंस्वेष्टायनक्षत्रभवंक्षेत्रफलंपूर्व

स्वेष्टायनक्षत्रभवोथदैर्घ्यंहृत्स्याद्विस्तृतिर्विस्तृतिहृच्चदीर्घता

सममेव महद्दृह प्रमाणमाह वेतिवा अथवा इष्टायसहितंजातंयत् क्षेत्रफलं अष्टिदृग्ध्येषुयुतं अष्टिश्चदशश्च अष्टिदशः अष्टिदिग्भिःषोडशाधिक
द्विशत्या २१६ हतोगुणितोयइष्टः एकाद्वित्र्याद्यंकः तेनयुक्तंकार्यमित्यर्थः अत्रैवाचार्यप्रपौत्रगोपिराजस्यापिपद्यम् इष्टर्क्षाढ्यमुनींदवोद्विरहि ८
हृच्छेषात्यजेत्स्वायतोनोचेच्छुद्ध्यति शोध्यमष्टसहिताच्छेषंत्रिहृत्साग्रकम् चेत्स्यादिष्टयुतंयथातुतदशेषंस्यादथोरामहृत्प्रासघ्नाद्विकरान्वि
ताः फलमभीष्टायर्क्षजंजायते सिद्धैर्भक्तः स्यात्करादिष्टदीर्घमानार्थंचैकादितिघ्नान् भभोगान् तावद्यावत्प्रक्षिपेदिष्टभानिविस्तारः स्यादिष्टदै

घ्येणभक्ते ३ अथोत्तरार्द्धेनध्वजाद्यायानाह आयैर्वर्णपरत्वेनच्चद्वारनिवेशनमुपजात्याह आयाइतिध्वजादिकाइति पिंडेक्षेत्रफलेअष्टशेषिते
यदवशिष्टंतत्परिमिताध्वजादिका आयाः स्युः ध्वजधूमौप्रसिद्धौ हरिः सिंहः श्वाकुक्कुरः गौर्वृषः खरोगर्दभः इभोहस्तीध्वांक्षः काकः स्वार्थेकः ४
सर्वदिशीति ध्वजाख्येआयेसर्वदिशिदिक्चतुष्टयेपिगृहद्वारंकार्यमूहरौसिंहायेपूर्वदक्षिणोत्तरेदिक्षुद्वारंकार्यं नपश्चिमांदिशि तथावृषाख्येप्राच्यांदिश्येवद्वारंकार्यं
नान्यदिक्षु गजाख्ये आयेप्राग्यमयोः पूर्वदक्षिणादिशोगृहद्वारंकार्यम् आयानांप्रयोजनमाह विश्वकर्मा वृषंसिंहंगजंचैवखेटेकर्पटकोटयोःद्वीपेपुनःप्रयोक्तव्यो

आयाध्वजोधूमहरिश्वगोखरेभध्वांक्षकाःपिंडइहाष्टशेषिते ४ ध्वजादिकाःसर्वदिशिध्वजेमुखंकार्यंहरौपूर्वयमोत्तरेतथा
प्राच्यांवृषेप्राग्यमयोर्गजेथवापश्चादुदक्पूर्वयमेद्विजादितः ५

वापीकूपसरःसुच मृगेंद्रमासनेदद्याच्छयनेषुगजंपुनः वृषंभोजन
पात्रेषुछत्रादिषुपुनर्ध्वजम् अग्निवेश्मसुसर्वेषुगृहेवन्ह्युपजीविनाम् धूमंनियोजयेत्केचित्स्थानेंम्लेंच्छादिजातिषु खरोवेश्यागृहेशस्तोध्वांक्ष-
श्चापिकुटीषुच वृषसिंहध्वजश्चापिप्रासादपुरवेश्मनि गजायेवाध्वजायेवागजानांसदनंशुभम् अश्वालयंध्वजायेचखरवायेवृषभेपिवा अमत्रशस्त्रवस्त्राणांवृषायेवाध्वजेपिवा पादुकोपानहौकार्येसिंहाख्येप्यथवाध्वजे उक्तानामप्यनुक्तानांसर्वेषांचध्वजःशुभइति अथब्राह्मणादिवर्णपर
त्वेनद्वारनिवेशनमाह अथवेति द्विजादितोब्राह्मणादिवर्णविभागेनपश्चादुदक्पूर्वयमेयथा ब्राह्मणस्यपश्चान्मुखम् क्षत्रियस्योदङ्मुखम् वैश्य

स्यपूर्वमुखम् शूद्रस्यदक्षिणामुखमित्यर्थः श्रीपतिः ध्वजेप्रतीचीमुखमग्रजानामुदङ्मुखंभूमिभृतांचसिंहे विशोवृषेप्राग्वदनंगजेतु शूद्रस्यया
म्याननमामनंतीति ५ अथगृहारंभेविशिष्यकालनिषेधमुपजात्याह गृहेशेति अर्केंद्वीज्यशुक्रेविबलेनिर्बलेअस्तेअस्तंगतेनीचेनीचराशिग
तेसतिक्रमात् गृहेशतत्स्त्रीसुखवित्तनाशोभवति यथा सूर्येनिर्बलेनीचस्थितेवागृहेशस्यनाशः इंदौचंद्रेनिर्बलेअस्तमितेनीचगतेवागृहेशस्य-
स्त्रीनाशः गुरौइज्येनिर्बलेऽस्तगेनीचगतेवागृहेशस्यसुखनाशः शुक्रेनिर्बलेऽस्तगेनीचगतेवावित्तनाशः वसिष्ठस्तु नीचेशत्रुगतेजीवेशु
क्रेचंद्रेऽथवारवौ निर्मितंसदनंशश्वदतिनिःस्वत्वमाप्नुयादिति अस्तदोषोऽत्रनग्राह्यः प्रातिदैवज्ञिकोबुधैः नास्तिदोषः सदाचंद्रेनमैत्रेऽत्र-

गृहेशतत्स्त्रीसुखवित्तनाशोऽर्केंद्वीज्यशुक्रेविबलेऽस्तनीचे कर्त्तुःस्थितिर्नोविधुवास्तुनोर्भेपुरःस्थितेपृष्ठगतेखनिःस्यात् ६

स्यनीचतइति कर्त्तुरिति यन्नक्षत्रेदिनचंद्रस्तद्विधुभम् यद्गृहस्यविस्तारायामवशादुत्पन्नंभंतद्गृहभंतस्मिन्पुरःस्थितेसतिकर्तुर्गृहनिर्माणकर्त्तुस्त
द्गृहेस्थितिर्निवासोनस्यात् पृष्ठगतेवाविधुवास्तुनोर्भेसतिखनिः खननंचोरकृतापद्वारंतद्वशात्सर्वस्वहानिःस्यादित्यर्थः पुरःपृष्ठस्थितत्वंचदि
ग्द्वारभक्रमेण यथा गृहद्वारंयस्यांदिशिविधित्सितंतद्दिङ्नक्षत्रेचगृहारंभोनकार्यः वामदक्षिणनक्षत्रेषुगृहारंभः सुखेनकार्यः यदुक्तंब्रह्मशंभु
ना गृहायलब्धऋक्षेंचयन्नक्षत्रेचचंद्रमाः शलाकासप्तकेदेयंकृत्तिकादिक्रमेणच वामदक्षिणभागेतत्प्रशस्तंशांतिकारकम् अग्रपृष्ठंनदातव्यंय

दीच्छेच्छ्रेय आत्मनः ऋक्षश्चंद्रस्यवास्तोश्च अग्रपष्ठेनशस्यतइति अयमाशयः कृत्तिकादिसप्तनक्षत्रेषु अनुराधादिसप्तसुवागृहनक्षत्रेचंद्रनक्षत्रेचसतिपूर्वद्वारंपश्चिमद्वारंवानकार्यम् तत्रचंद्रः पृष्ठस्थितोऽग्रस्थितोवाभवति एवमघादिसप्तसुधनिष्ठादिसप्तसुवाग्रहनक्षत्रेचंद्रनक्षत्रेवासति दक्षिणद्वारमुत्तरद्वारंवानकार्यमित्यर्थः ६ इदानींव्ययकथनपूरःसरंफलमंशकज्ञानंउपजात्याह भमिति प्रागुक्तदिशाकल्पितंयद्गृहभंत न्नागैरष्टभिस्तष्टंअवशिष्टंव्ययईरितः यथारोहिणीभं ४ अयमेवव्ययः असौव्ययःध्रुवादिनामाक्षरयुक्ध्रुवादिनामान्यधुनैववक्ष्यति यत्यानिदिक्षुनामानिदिक्षुद्वाराणिचिकीर्षिता

भंनागतष्टंव्ययईरितोसौध्रुवादिनामाक्षरयुक्सपिंडः तष्टोगुणैरिंद्रकृतांतभूपाद्यंशाभवेयुर्नशुभौऽतकोत्र ७ दिक्षुपूर्वादितःशाला
ध्रुवाभूर्द्वौकृतागजाः शालाध्रुवांकसंयोगःसैकोवेश्मध्रुवादिकम् ८

नितदनुरोधेनयदागतंध्रुवादिनामतदक्षरसंख्ययायुक्तःततःसपिंडः प्रागानीतपिंडाद्युक्तःगुणैस्त्रिभिस्तष्टोभक्तावशिष्टः एकद्वित्रिशेषेणइंद्रयमराजसंज्ञकास्त्रयोंऽशाःस्युः अत्रगृहारंभेऽतकोयमाख्योंऽशकोनशुभः अर्थादिंद्रराजानौशुभफलदौ ७ अथशालाध्रुवाद्यानयनमनुष्टुभाह दिक्ष्विति प्राच्यांद्वारंचिकीर्षितेशालाध्रुवांकएकः दक्षिणस्यांद्वौ पश्चिमायांकृताश्चत्वारः उत्तरस्यांगजाअष्टौ अथदिकूपरत्वेनयावंतिद्वाराणिएकंद्वेत्रीणिचत्वारिवाचिकीर्षितानितावतांशालाध्रुवांकानांसंयोगःसैकःएकयुतःसन्ध्रुवादिकंवेश्मगृहंस्यात् यथा पूर्वस्यांपश्चिमायांद्वारेअभीष्टेशालाध्रुवौ १।४ अनयोर्योगः ५ सैकः ६ गृहंजातंकांताख्यम् एवंपूर्वदक्षिणोत्त

रदिक्षुशालाध्रुवाणां १। २। ८ संयोगः ११ सैकः १२ धनदाख्यंगृहम् दिक्षुचतुष्टयेविजयाख्यंगृहं षोडशमिति ८ अथध्रुवादीनांनामाक्षरसंख्यायथाचक्रंछंदसा
ह तिथ्यर्क्षैति दिक्षुपूर्वादितइत्यादिनायत् ध्रुवादिवेश्मसमागतशालाध्रुवांकसंयोगः सैकोवेश्मेत्युक्तदिशासंख्यामवधारयेत् साचेत्संख्यापंचदशीद्वाद-
शीअष्टमीषोडशीनवमीएकादशीचतुर्दशीवास्यात्तदागृहनामाक्षरंत्रयात्मकंस्यात् १५ १२ ८ १६ ९ ११ १४ अत्रत्रीण्येवाक्षराणिसैवसंख्या प्रथमाद्वि-
तीयाचतुर्थीपंचमीषष्ठीदशमीतृतीयात्रयोदशीवास्यात् तदागृहनामद्वौअक्षरद्वयात्मकंस्यात् सासंख्यासप्तमीस्यात् तदाब्ध्यश्चतुरक्षरंगृहना-
म ९ अथयद्यपिध्रुवादिनामाक्षरसंख्याज्ञानंप्राक्पद्येनैवजातंतथापितन्मध्येकानिशुभानिकान्यशुभानीत्यसदृशफलसूचनार्थंषोडशगृहाणांनामा

तिथ्यर्काष्टाष्टिगोरुद्रशक्रेनामाक्षरंत्रयम् भूद्व्यब्धीष्वंगदिग्वन्हिविश्वेषुद्वौनगाऽब्धयः ९ ध्रुवधान्येजयनंदौखरकांतमनोरमंसुमु
खंदुर्मुखोग्रम्

नि अयोगीति छंदसाह ध्रुवधान्येति अत्रार्यागीतिलक्षणंवा आर्यापूर्वार्द्धेयदिगुरुणैकेनाधिकेननिधनेयुक्तं इतरंतद्वन्निखिलं
यदीयमुदितेयमार्यागीतिरिति अत्रार्यासापूर्वार्द्धे ॥ऽऽ॥ऽऽ॥ऽ।॥ ॥।।ऽ।ऽ।उत्तरार्द्धे ऽ।ऽ॥ऽ।ऽ॥ऽ।ऽ।॥।।ऽ।ऽ।ऽऽऽ।सामान्यलक्षणमप्यनुसंधेयम् विशेष
लक्षणस्यसामान्यलक्षणाधीनत्वात् निधनेप्रांतेध्रुवमूर्ध्वमुखंप्रथमंगृहम् धान्यंपूर्वद्वारंद्वितीयंजयंदक्षिणद्वारंतृतीयम् नंदंप्राक्दक्षिणद्वारंचतु-
र्थम् खरंपश्चिमद्वारंपंचमम् कांतंप्राक्पश्चिमद्वारंषष्ठम् मनोरमंदक्षिणपश्चिमद्वारंसप्तमम् सुवक्त्रंप्राग्दक्षिणपश्चिमद्वारमष्टमम् दुर्मुखमुत्तरद्वारंन

वमम् क्रूरंपूर्वोत्तरद्वारंदशमम् रिपुदंदक्षिणोत्तरद्वारमेकादशम् वित्तदंपूर्वदक्षिणोत्तरद्वारंद्वादशम् नाशाख्यंपश्चिमोत्तरद्वारंत्रयोदशम् आक्रंदंप्राक्पश्चिमोत्तरद्वारंचतुर्दशम् विपुलाख्यंदक्षिणपश्चिमोत्तरद्वारंपंचदशम् विजयंचतुर्दिग्द्वारंषोडशम् १० अथकेषांचिन्मत्तेनगृहस्यायादिनवकमुपजातिकोपपथ्यावक्त्राख्याभ्यामाह पिंडइति आयइति पिंडेक्षेत्रफलेनवधास्थापितेक्रमेणनवादिरंकैर्गुणितेक्रमेणनागादिभिरंकैर्भक्तेन्च सतियदवशिष्टंतदायादिकंस्यात् यथा क्षेत्रफलंनवभिर्गुणितंअष्टभिर्भक्तंशिष्टमायःस्यात् तद्यथापिंडः २०३ नवगुणितः १८२७ अष्टभक्ते

रिपुदंवित्तदंनाशौंचाक्रंदंविपुलंविजयाख्यंस्यात् १० पिंडेनवांकांगगजाग्निनागनागाब्धिनागैर्गुणितैःक्रमेण विभाजितैर्ना
गनगांकसूर्यनागर्क्षतिथ्यर्क्षखभानुभिश्च ११

शेषं ३ सिंहायोजातः एवंसर्वेप्यानीताः इमेवाराः ७ अंशकः ५ द्रव्यम् ४ ऋणम् १ नक्षत्रम् ४ रोहिणीतिथिश्चतुर्थी ४ योगः २ प्रीतिः आयुः ६४ उक्तंच गों ९ क ९ खं ६ ष्ट ८ गुणा ३ ष्ट ८ नाग ८ जलधि ४ व्यालैः ८ हृतं भूफलंनागा ८ द्यं ७ क ९ दिवाकरा १२ ष्ट ८ भ २७ तिथी १५ योगैः २७ खसूर्यै १२ भजेत् ११ आयंवारमथांशकंधनमृणंतारांतिथिंचिंतयेद्योगंचायुरितीहशेषकपदेभागेहृतेतांत्रिकैरिति अथैषांप्रयोजनं विषमायः शुभायैवसमायः शोकदुःखदः वाराणांसूर्यवारराश्यंशाः सदावन्हिभयप्रदाः यथागणितागतोभौमवारः सनिंद्यःतद्राशीमेषवृश्चिकौतौनिंद्यौ तदंशायस्मिकस्मिश्चिल्लग्नेमेषवृश्चिकनवांशानिषिद्धाः एवंसूर्यवारोपि अन्येषांवारराश्यंशाःशुभाः

अंशानांच गृहस्यागतनक्षत्रंतद्द्विराश्यात्मकंयदि तन्नवांशवशात्तत्रज्ञातव्यंसर्वदागृहमिति कृत्तिकाद्विराश्यात्मिकावशेषेमेषः द्व्यादिशेषेवृषः मृगेद्व्यधिकेशेषेमिथुनम् अन्यथावृषः पुनर्वसावप्यंशकत्रयंयावन्मिथुनम् अन्यथाकर्कः एवमुत्तरफाल्गुन्यादिषुद्विराश्यात्मकेषूहनीयम् ननुनिः संदिग्धेष्वश्विन्यादिषु धनर्णयोश्च धनादिकंगृहंवृद्धौनिर्धनंयदृणाधिकमिति नक्षत्रस्य विपत्प्रदाविपत्ताराप्रत्यरीप्रतिकूलदा निधनाख्यातारकातुसर्वदानिधनप्रदा अस्यार्थः गृहकर्त्तुर्नक्षत्राद्गृहभसंख्यानवभक्तावशिष्टंयदिविपत्तारादिकंस्यात् तदातद्गृहमनिष्टंस्यात् अन्यथा शुभानिकश्यपः दत्तेदुःखंतृतीयर्क्षेपंचमर्क्षेयशः क्षयम् आयुःक्षयंसप्तमर्क्षेकर्त्तृभाद्यादिपद्मभमिति यदातुगृहकर्त्तुर्गृहस्यचैकमेवनक्षत्रं

आयोवारोंशकोद्रव्यमृणमृक्षंतिथिर्युतिः आयुश्चाथगृहेशर्क्षगृहभैक्यंमृतिप्रदम् १२

तत्रस्वयमेवनिर्णयमाह

गृहेति गृहेशर्क्षस्वामिनक्षत्रंप्रागुक्तप्रकारेणानीतंगृहभंचतयोरैक्यं एकमेवचेद्भंस्यात्तद्गृहकर्त्तुर्मरणप्रदंस्यात् गृहस्यतत्पतेस्त्वेकंधिष्ण्यंचेन्निधनप्रदमितिवसिष्ठोक्तेः वास्तुशास्त्रेद्विराश्यात्मकभेषु राश्यादिनिर्णयोऽन्यथाभिहितः अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघात्रयम् मूलादित्रितयंचापेशेषेषुनवराशयइति अयंपक्षोवास्तुशास्त्रेनवांशानुक्तैरुक्तः गृहस्यनक्षत्रराशिज्ञानेवर्णोवश्यमित्याद्युक्तप्रकारेणगृहस्वामिनक्षत्रराशिवशाद्घटिकादिविचारोविधेयः तत्रनाडीवेधेप्राशस्त्यमुक्तंचिंतामणौ सेव्यसेवकयोश्चैवगृहतत्स्वामिनोरपि परस्परंमित्रयोश्चेदेकना-

डीप्रशस्यतइति तिथिप्रयोजनंदर्शंरिक्तांचवर्जयेदिति योगानामपिदुष्टयोगाश्चवर्ज्याः आयुःप्रयोजनंतावत्कालंगृहावस्थितिरिति अत्राभीष्टांशा
दिसिध्यर्थंअंगुलादिकंप्रक्षिप्यविशोध्यवाक्षेत्रफलंसाध्यम् १२ अथगृहारंभेवृषवास्तुचक्रंशालिनीभ्यामाह गेहाद्यारंभइति लाभोरामैरिति गे
हंगृहं आदिशब्देनप्रासादग्रामादितदारंभे सतिअर्कभात् सूर्याक्रांतनक्षत्रात् रामैस्त्रिभिर्भैः वृषस्यवत्सस्यशीर्षस्थितैः सद्भिःदाहःफलंस्यात्
ततोवेदभैः अग्रपादेपुरस्थितपादद्वयस्थितैः शून्यगृहंजनवासरहितंस्यात् ततश्चतुर्भैः पृष्ठपादद्वयस्थैःस्थिरत्वंगृहकर्त्तुः ततोरामैः पृष्ठस्थैःश्रीः

गुणकाः ९ १ ६ ८ ३ ८ ८ ४ ८ भाजकाः ८ ७ ९ १२ ८ २७ १५ २७ १२० गेहाद्यारंभेऽर्कभाद्वत्सशीर्षेरामैर्दाहोवेदभैरग्रपादे शून्यंवेदैःपृ
ष्ठपादेस्थिरत्वंरामैःपृष्ठेश्रीर्युगैर्दक्षकुक्षौ १३ लाभोरामैःपुच्छगैःस्वामिनाशोवेदैर्नैःस्वं वामकक्षौमुखस्थैः रामैःपीडासंततंवार्कधिष्ण्या
दश्वैरुद्रैर्दिग्भिरुक्तंह्यसत्सत् १४

स्यात् ततोयुगैश्चतुर्भिःदक्षिणकुक्षिस्थितैःलाभःततस्त्रिभिःपुच्छगैःस्वामिनोगृहकर्तुर्नाशः ततोवेदैःवामकु
क्षौस्थितैःनैःस्वंदारिद्र्यम् ततस्त्रिभिर्मुखस्थैः गृहकर्त्तुःपीडासंततं अनवरतंस्यात् उक्तंच भ्रातृचरणैः त्रिवेदवेदाग्नियुगाग्निवेदत्रिकेषु भानोः शशिभंगृ
हेषु दाहोविनाशःस्थिरताधनंश्रीःशून्यंचदारिद्र्यमृतिःक्रमेणेति अथैतस्यनिष्कृष्टार्थमाह वेति अर्कधिष्ण्यादश्वैः सप्तभैरसत्फलम् ततोरुद्रैरेकादशधि
ष्ण्यैः सत्फलम् ततोदिग्भिर्दशनक्षत्रैरसत्फलंस्यादितिनिष्कृष्टोर्थःउक्तंच रविभात्सप्तनेष्टानिशुभान्येकादशाष्टभात् दशशेषाण्यनिष्टानिसाभिजिद्वृष

वास्तुनीति १३ १४ अथसूर्यचंद्रमासंबन्धेनप्रागादिदिक्षुद्वाराणिगृहनिर्माणनक्षत्राणिचस्रग्धरयाह कुंभेर्कइति कुंभस्थेसूर्येफाल्गुनेचमासिप्रागपरमुखंगेहं प्राङ्मुखपश्चिममुखंवागृहंसत् शुभफलंस्यात् श्रावणेमासिसिंहकर्किसंक्रांत्योश्च प्राङ्मुखपश्चिममुखंवागृहंस्यात् पौषेमासिनक्रेमकरसंक्रांतौच प्रागपरमुखंगृहंस्यात् अथगोजगेऽर्केवृषमेषगेसूर्येराधेवैशाखेमासियाम्योत्तरमुखंसदनंशुभंस्यात् मार्गेमार्गशीर्षेजूकालिगेतुलावृश्चिकगतेसूर्येसति याम्योत्तरमुखंसदनंदक्षिणमुखमुत्तरमुखंवासदनंगृहंस्यात् नारदः गृहसंस्थापनंसूर्येमेषगेशुभदंभवेत् वृषस्थेधनवृद्धिःस्यान्मि-

कुंभेर्केफाल्गुनेप्रागपरमुखगृहं श्रावणेसिंहकर्क्योः पौषेनक्रेचयाम्योत्तरमुखसदनंगोजगेऽर्केचराधे मार्गेजूकालिकेसत् ध्रुव
मृदुवरुणस्वातिवस्वर्कपुष्यैः सूतीगेहंत्वदित्यांहरिभविधिभयोस्तत्रशस्तः प्रवेशः १५

थुनेमरणंध्रुवम् कर्कटेशुभदंप्रोक्तंसिंहेभृत्यविवर्द्धनम् कन्यारोगंतुलासौख्यंवृश्चिकेधनवर्धनम् कार्मुकेचमहाहानिमकरेस्याद्धनागमः कुंभेतुरत्नलाभःस्यान्मीनेसद्मभयावहमिति चांद्रमासानाह श्रीपतिः शोकोधान्यंमृतिपशुहृतीद्रव्यवृद्धिर्विनाशोयुद्धंभृत्यक्षतिरथधनंश्रीश्चवन्हेर्भयंच लक्ष्मीप्राप्तिर्भवति भवनारंभकर्तुः क्रमेणचैत्रादूचेमुनिभिरितिफलंवास्तुशास्त्रोपदिष्टमिति अत्रसौरचांद्रमासानांमहान् शुभाशुभफलविरोधः अत्रचिकीर्षितगृहद्वारानुकूलरविसंक्रमसमीचीनविहितमासेष्वेववैशाखादिषुगृहारंभः कार्यइतिविरोधाभावइतितथैवोपनिबद्धम् द्वारनियममाह श्रीपतिः कर्किनक्रहरिकुंभ

गतेऽर्केपूर्वपश्चिममुखानिगृहाणि तौलिमेषवृषवृश्चिकयोगेदक्षिणोत्तरमुखानिचकुर्यात् अन्यथायदिकरोतिदुर्मतिर्व्याधिशोकधननाशमश्नु
ते मीनचापमिथुनांगनागतेकारयेत्तुगृहमेवभास्करेइति तत्रकुंभार्कसहितेफाल्गुनेप्रागपरमुखंगृहंकार्यम् उभयोर्विहितयोरेकवाक्यताश्रयणा
त् एवमग्रेपिसर्वत्रजगन्मोहने पाषाणेष्टका दिगेहानिनिंद्यमासेनकारयेत् तृणदारुगृहारंभेमासदोषोनविद्यतइति अथनक्षत्राण्याह ध्रुवेति ध्रु
वाणिरोहिण्युत्तरात्रयं मृदूनिमृगरेवतीचित्रानुराधाः वरुणःशततारकास्वाती वसुर्धनिष्ठा अर्कोहस्तःपुष्यश्च एषुभेषुगृहनिर्माणंसत् शुभस्यात्
गर्गः त्र्युत्तरेपिचरोहिण्यांपुष्येमैत्रेकरद्वये धनिष्ठाद्वितयेपौष्णेगृहारंभःप्रशस्यतइति अत्रमृगोनोक्तः तदुक्तिश्चमहेश्वराद्युक्तेःसूतीगेहमिति
आदित्यांपुनर्वसौसूतिकागृहनिर्माणंप्रशस्तम् तत्रेति तत्रसूतीगृहेहरिभविधिभयोः श्रवणाभिजितयोर्नक्षत्रयोः प्रवेशःशस्तःलघुःपुनर्व-
सौनृपादीनांकर्त्तव्यंसूतिकागृहं श्रवणाभिजितोर्मध्येप्रवेशंतत्रकारयेदिति अत्रनृपपदोपादानात् ब्राह्मणानांपूर्वोक्तनक्षत्रमेवकार्यम् आव
श्यकत्वेतुश्रवणाभिजितोर्मुहूर्त्तः तदुदयोवाग्राह्यः तच्चसूतीगृहंनैर्ऋत्यांकार्यम् नैर्ऋत्यांसूतिकागृहमितिवसिष्ठोक्तेः वराहेणात्रानेकनक्षत्रा
ण्यभिहितानि हस्तादित्यशशांकपुष्यपवनब्राह्मंचमित्रोत्तराचित्राश्विश्रवणेषुवृश्चिकघटौहित्वाविरिक्तेतिथौ शुक्राचार्यशनैश्चरज्ञशशिनांवारेनुकू
लेविधौसद्भिर्वेश्मनिसूतिकागृहविधिक्षेमंकरःकीर्त्यतइति नवममासिसूतिकागृहप्रवेशःकार्यः गर्गः मासेतुनवमेप्राप्ते पूर्वपक्षेशुभेदिने सूतिका
संभवेकालेसद्यएवप्रवेशयेत् रोहिण्यैंदवपौष्णेषुस्वातीवारुणयोरपि पुष्येपुनर्वसौहस्तेधनिष्ठात्र्युत्तरासुच मैत्रेत्वाष्ट्रेतथाश्विन्यांसूतिकागार

वेशनम् सर्वैशुभग्रहाःकेंद्रेपापाश्चत्रिषडायगाः शुभांशेशुभसंदृष्टौसूतिकावेशनंशुभमिति १५ अथप्रागभिहितानांसौराणांचांद्राणांमासानांप्रकारांतरेणैकवाक्यतांशार्दूलविक्रीडितेनाह कैश्चिदिति पूर्वदिग्द्वारवशेनैकवाक्यतोक्ता इदानींमेषस्थेरवौमधौचैत्रमासेगेहंप्रारब्धंशुभंस्यात् तथावृषस्थेसूर्येज्येष्ठमासेकर्कस्थेशुचावाषाढेसिंह गतेर्केभाद्रपदेमासि घटेतुलास्थेरवौ आश्वयुज्या श्विनेमासे अलौवृश्चिकस्थेऽर्के ऊर्जेकार्तिकेमासेमृगेमकरस्थेऽर्के पौषेमासेनक्रघटेमकरेकुंभेर्केमाघेप्रारब्धंगृहंशुभंस्यादित्यर्थइतिकैश्चिन्निगदितम् अनेनमेषेर्केचैत्रेपिशुभं गृहं यस्तुचैत्रनिषेधः समीनार्कविषयः वृषस्थेर्केज्येष्ठेपिशुभम् यस्तुज्येष्ठनिषेधः समिथुनार्कविषयः कर्कस्थेर्केआषाढेपिशुभम् आषाढनिषेधस्तुमिथुनार्कविषयः सिंहेर्केभाद्रेपिशुभम् भाद्रनिषेधस्तुकन्यार्कविषयः श्रावणस्तुतत्रविहितत्वादेवशुभः वृश्चिकेर्केकार्तिकेपिशुभंनिषेधविषयंस्त्वयमेवचवक्ष्यति मार्गशीर्षस्तुविहितएव मकरस्थेर्केपौषेपिशुभंधनुरर्कसाहित्येसोप्यशुभः मकरकुंभस्थेर्केमाघेपिशुभम् निषेधस्तुधनुरर्कविषयः अतएवसौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः मासाःस्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाइतिनारदवाक्यम् मासे तपस्येतपसिमाधवेनभसित्विषे ऊर्जेचगृहानिर्माणंपुत्रपौत्रप्रवर्द्धनमितिवसिष्ठवाक्यंच आश्विनकार्तिकमाघानांशुभत्वप्रतिपादकंतुलावृश्चिकमकरकुंभार्कराहित्येप्राशस्त्यपरंवचनांत रबोधितनिषेधः प्रागुक्तविषयएव एवंफाल्गुनस्यशुभत्वंकुंभार्कविषयम् कुंभार्कराहित्येतुनिषिद्धः ननुकार्तिकमाघमासौश्रीपतिनानिषिद्धौ तयोःकोविषयइत्यतआह अथेतिऊर्जःकार्तिकोमासःकन्यायांकन्यागतेर्केनसत् नशुभःचपुनःतथामाघमासःधनुष्यपि धनु

रर्केनसत् नन्वेतदयुक्तम् यतः शुक्लादिचांद्रमासेचैत्रादिमाससंज्ञाः संति तत्रकार्तिकेकन्यासंक्रांतिर्माघे धनुः संक्रांतिश्चकदापिनसंभवति अतआह कृष्णादिमासादिति मासोद्विविधः शुक्लादिः कृष्णादिश्च तत्रचैत्रशुक्लप्रतिपदारभ्यामावास्यापर्यंतशुक्लादिः कृष्णप्रतिपदमारभ्यपूर्णिमापर्यंतंकृष्णादिः उभयत्रापिशास्त्रेव्यवहारः आश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिनेइति मासिभाद्रपदेऽष्टम्यांकृष्णपक्षेऽर्द्धरात्रके भवेत्प्रौष्ठपदेमासिजयंतीनामसास्मृतेतिच अत्रयदिदर्शांतोमासोविवक्ष्यतेतदाभाद्रपदकृष्णपक्षेश्रावणेमासेचेत्येवंब्रूयात् तदेतन्मासस्यकृष्णादित्वेप्रमाणम् तत्राश्विन

कैश्चिन्मेषरवौमधौवृषभगेज्येष्ठेशुचौकर्कटेभाद्रेसिंहगतेघटेऽश्वयुजिचोर्जेलौमृगेपौषके माघेनक्रघटेशुभंनिगदितंगेहेतथो
जैनसत्कन्यायांचतथाधनुष्यपिनसत्कृष्णादिमासाद्भवेत् १६ पूर्णेंदुतःप्राग्वदनंनवम्यादिषूत्तरास्यंत्वथपश्चिमास्यम् दर्शा
दितःशुक्लदलेनवम्यादौदक्षिणास्यंनशुभंवदंति १७

पूर्णिमातः कार्तिकपूर्णिमांतंकृष्णादित्वेनव्यवहारात्तत्रकन्यासंक्रांतिसंभवान्निषेधउपपन्नोभवति अतएवमाघेमासिधनुरर्कसंभवेननिषेधसार्थक्यमित्यलम् १६ अथतिथिपरत्वेनद्वारनिषेधमुपजातिकयाह पूर्णेंदुतइति पूर्णेंदुतः पूर्णिमातः कृष्णाष्टमीपर्यंतंप्राङ्मुखंगृहंशुभंनवदंति कृष्णनवमीतः चतुर्दशीपर्यंतंक्रियमाणमुत्तरास्यंनशुभम् अथदर्शादितः शुक्लाष्टमीपर्यंतपश्चिमास्यंगृहंनशुभं शुक्लनवमीतश्चतुर्दशीपर्यंतंदक्षिणास्यंगृहंशुभंनवदंति तासुतासुतिथिषुतत्तद्दिङ्मुखंगृहंनकर्तव्यमित्यर्थः व्यवहारोच्चये

पूर्णिमातोऽष्टमीयावत्पूर्वास्यंवर्जयेद्गृहम् उत्तरस्यंनकुर्वीतनवम्यादिचतुर्दशीम् अमायाश्चाष्टमींयावत्पश्चिमास्यंविवर्जयेत् नवम्यादौदक्षिणास्यंयावच्छुक्लचतुर्दशीमिति वेधादिविचारोनलिखितः ग्रंथगौरवात् १७ अथपंचांगशुद्धिंलग्नशुद्धिंचानुष्टुभाह भौमार्केति भौमार्कवारौरिक्ताश्चप्रसिद्धाः अमावास्याआदितःयत् उपलक्षणात्वादष्टम्यपि एतैरूनेकालेतथाचरराशिभिर्मेषकर्कतुलामकरैः रहितेलग्नेस्थिरेद्विस्वभावे तथाविपंचके रुगनलनृपचोरमृत्युसंज्ञकपंचकरहितेइत्यर्थः उक्तंच दारिद्र्यंप्रतिपत्कुर्याच्चतुर्थीधनहारिणी अष्टम्युच्चाटनंचैवनवमीशस्त्रघातिनी दर्शेराजभयंज्ञेयं

भौमार्करिक्तामाद्यूनेचरोनेंगेविपंचके व्यष्टांत्यस्थैः शुभैर्गेहारंभस्त्र्यायारिगैःखलैः १८ देवालयेगेहविधौजलाशयेराहोर्मुखं
शंभुदिशोविलोमतः मीनार्कसिंहार्कमृगार्कतस्त्रिभेखातेमुखात्पृष्ठविदिक्शुभाभवेत् १९

भूतेदारविनाशनमिति मांडव्येनस्तंभोच्छ्राये धनिष्ठापंचकेचैवकुर्यात्स्तंभसमुच्छ्रयः सूत्रधारशिलान्यासप्राकारादिसमारभेदिति व्यष्टांत्यइति अष्टमद्वादशस्थानव्यतिरिक्तस्थैः शुभैः पापैस्तृतीयैकादशषष्ठस्थानस्थैश्चोपलक्षितेलग्नेगृहारंभःकार्यः १८ अथदेवालयादौविदिक्षुराहुमुखमिंद्रवंशयाह देवालयइति अत्रयथासंख्यंसंबंधः देवालयप्रारंभेराहुमुखंमीनार्कतस्त्रिराश्यवस्थितेसूर्येऐशानीतोविलोमतोविपरीतंविदिक्षु वायव्यादिषुराहुमुखंस्यात् यथामीनमेषवृषराश्यवस्थितेसूर्येईशान्यांराहुमुखम् मिथुनकर्कसिंहस्थितेर्केवायव्याम् कन्यातुलावृश्चिकस्थितेर्केनैर्ऋत्याम् धनुर्मकरकुंभस्थेऽर्केआग्नेय्यांराहुमु

खमित्यर्थः एवंगृहारंभेपिसिंहार्कतस्त्रिराश्यवस्थितेर्केविलोमतः ईशान्यांराहुमुखंस्यात् वृश्चिकादित्रिभेवायव्यांकुंभादित्रिभेनैर्ऋत्यां वृषादित्रिभेआग्नेय्यांराहुमुखमित्यर्थः तथा जलाशयप्रारंभेपि मकरतस्त्रिराश्यवस्थितेर्के विलोमतऐशान्यांराहुमुखंस्यात् मेषादित्रिभेवायव्याम् कर्कादित्रिभेनैर्ऋत्याम् तुलादित्रिभे आग्नेय्यांराहुमुखंस्यादित्यर्थः फलमाह खातेइति देवालयादिविषयकेखाते भूमिशोधनेकर्तव्येसति राहुमुखाक्रांतदिशः सकाशात्पृष्ठवर्तिनीविदिक्शुभाभवेत् यथैशान्यांराहुमुखंतत्पृष्ठदिगाग्नेयी तस्यांप्रथमखातारंभः शुभफलदः एवंवायव्यांराहुमुखंतत्पृष्ठविदिगैशानीतस्यांखातारंभः एवंसर्वत्र उक्तंच ईशानतः सर्पति कालसर्पो विहायसृष्टिंगणयेद्विदिक्षु शेषोस्य वास्तोर्मुखमध्यपुच्छंत्रयंपरित्यज्य-

कूपेवास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौपुष्टिरैश्वर्यवृद्धिः सूनोर्नाशःस्त्रीविनाशोमृतिश्चसंपत्पीडाशत्रुतःस्याच्चसौख्यं २०

खनेच्चतुर्थम् वृषार्कादित्रयेवेद्यांसिंहादिगणयेद्गृहे देवालयेच्चमीनादितडागेमकरादिकमिति खातारंभादिनक्षत्राण्याह मांडव्यः अधोमुखैर्भैर्विदधीतखातंशिलास्तथैवोर्ध्वमुखैश्चपट्टम् तिर्यङ्मुखैर्द्वारिकपाटदानंगृहप्रवेशोमृदुभिर्ध्रुवर्क्षैरिति १९ अथगृहेकूपनिर्माणादिगवस्थित्याफलंशालिन्याह कूपेइति वेश्मभूर्वास्तुरस्त्रियामितिवास्तुशब्दःपुल्लिंगः वास्तोर्गृहस्यमध्यभागेकूपेजलकूपेसति स्वामिनोऽर्थनाशःस्यात् अथैशान्यादिषुसृष्टिमार्गेणाष्टदिक्षुपुष्टिरित्यादिफलं यथैशान्यांकूपेपुष्टिः पूर्वस्यामैश्वर्यवृद्धिः आग्नेय्यांपुत्रनाशः दक्षिणस्यांस्त्रीविनाशः

नैर्ऋत्यांगृहपतेर्मृतिः पश्चिमायांसंपत् वायव्यांशत्रुतः सकाशात्पीडास्यात् उत्तरस्यांकूपेसुखंगृहस्वामिनएव वसिष्ठः ऐश्वर्यपुत्रहानिश्चस्त्रीनाशोनिधनंभवेत् संपच्छत्रुभयंसौख्यंपुष्टिःप्रागादितःक्रमात् कूपेकृतेमध्यमेतुधनहानिर्हिवास्तुनीति अथकूपारंभेचक्रमाह कूपेर्कभान्मध्यगतस्त्रिभिर्भैः स्वादूदकंपूर्वदिशित्रिभिर्भैः खंडंजलंखादुजलंजलक्षयंस्वादूदकंक्षारजलंशिलाश्चमिष्टंजलंक्षारजलं क्रमाद्द्वेद्वासूर्यभात्रिर्मितैः शुभाशुभमिति २० अथदिक्परत्वेनउपकरणगृहाणिवसंततिलकयाह स्नानस्येति पूर्वतः पूर्वाद्यष्टदिक्षुस्नानतःगृहाणिस्युः

स्नानाग्निपाककशयनास्त्रभुजेश्चधान्यभांडारदैवतगृहाणिचपूर्वतःस्युः तन्मध्यतस्तुमथनाज्यपुरीषविद्याभ्यासाख्यरोदनरतौषधसर्वधाम २१

यथा पूर्वस्यांस्नानगृहम् अग्नेय्यांपाकगृहम् दक्षिणस्यांशयनगृहम् नैर्ऋत्यांशस्त्रगृहम् पश्चिमायांभोजनगृहम् वायव्यांधान्यसंग्रहगृहम् उत्तरस्यांभांडारंकोशगृहम् ऐशान्यांदैवतगृहम् वसिष्ठः ऐंद्र्यांदिशिस्नानगृहमाग्नेय्यांपचनालयम् याम्यायांशयनंवेश्मनैर्ऋत्यांशस्त्रमंदिरम् वारुण्यांभोजनगृहंवायव्यांधान्यमंदिरम् उदीच्यांहाटकंसद्मऐशान्यांदेवमंदिरमिति नारदस्तु भांडागारंतूत्तरस्यांवायव्यांपशुमंदिरमिति पूर्वाद्यष्टदिक्तन्मध्यतः तयोर्दिग्विदिशोर्मध्येऽष्टसंख्याकेमथनाद्यष्टौगृहाणिस्युः यथा पूर्वाग्नेययोर्मध्येदध्याद्यालोडनस्यगृहंस्यात्आग्नेयीदक्षिणयोर्मध्येआज्यस्यघृतसंग्रहस्य दक्षिणनैर्ऋत्योर्मध्येपुरीषस्यविष्ठात्यागस्यगृहम् नैर्ऋतीपश्चिमयोर्मध्येविद्या

भ्यासस्य पश्चिमवायव्ययोर्मध्येरोदनस्यगृहम् वायव्योत्तरयोर्मध्येरतस्यसंभोगस्यगृहम् उत्तरैशान्ययोर्मध्ये औषधस्यगृहम् ऐशानीप्राच्योर्मध्येउक्तव्यतिरिक्तसर्ववस्तूनांधामगृहंकार्यस्यादित्यर्थः वसिष्ठः इंद्राग्न्योर्मथनंमध्येयाम्याग्न्योर्घृतमंदिरम् यमराक्षसयोर्मध्येपुरीषत्यागमंदिरम् राक्षसांबुपयोर्मध्येविद्याभ्यासस्यमंदिरम् तोयेशानिलयोर्मध्येरोदनंमंदिरंततः कामोपभोगसदनंवायुकौवेरमध्यमे कौबेरैशानयोर्मध्येचिकित्सामंदिरंसदा गृहंहरीशयोर्मध्येसर्ववस्तुषुसंग्रहम् सदनेकारयेदेवंक्रमादुक्तानिषोडशेति २१ अथविशेषमुपजाति

जीवार्कविच्छुक्रशनैश्चरेषुलग्नारिजामित्रस्फरवत्रिगेषु स्थितिःशतंस्याच्छरदांसितार्कारेज्येतनुत्र्यंगसुतेशतेद्वे २२ ल
ग्नांबरायेषुभृगुज्ञभानुभिः केंद्रेगुरौवर्षशतायुरालयम् बंधौगुरुर्व्योम्निशशीकुजार्कजौलाभेतदाशीतिसमायुरालयम् २३

कयाह जीवार्केति अत्रयोगद्वयेग्रहस्थानयोर्यथासंख्यंसंबंधः यथाजीवोलग्ने अर्कोऽरौषष्ठे विद्बुधोजामित्रेसप्तमे शुक्रश्चतुर्थे शनिस्तृतीये एवंविधेलग्नेप्रारब्धस्यगृहस्यस्थितिरब्दशतंवर्षशतंस्यात् अयमेकोयोगः सितेति शुक्रोलग्ने अर्कस्तृतीये आरःषष्ठे ईज्यःपंचमे एवंविधे प्रारब्धस्यगृहस्यस्थितिद्वेशतेवर्षेशतद्वयंस्यात् २२ अथान्ययोगद्वयमिंद्रवंशयाह लग्नांबरायेष्विति अत्रापियोगद्वयेस्थानग्रहयोर्यथासंख्यंसंबंधःलग्नेशुक्रःदशमेबुधः एकादशेसूर्यःलग्नव्यतिरिक्तकेंद्रेगुरुः तदैवंविधेयोगेप्रारब्धआलयःगृहंवर्षशतमायुरवस्थानंयस्यतादृशं-

स्यात् अथद्वितीयः बंधाविति चतुर्थेगुरुः दशमेचंद्रः मंगलशनैश्चरावेकादशेतदागृहमशीतिसमावर्षाण्यायुर्यस्यतादृशंस्यात् २३ अथान्ययोगत्रयमनुष्टुभाह स्वोच्चइति स्वोच्चस्थेमीनस्थेशुक्रेलग्नगते अथवा स्वोच्चस्थे कर्कस्थेगुरौचतुर्थस्थानगतेसति अथवास्वोच्चस्थेतुलास्थेशनौ एकादशस्थानगतेसति चिरंलक्ष्म्यायुक्तंगृहंस्यात् यदासमुदायोभवेत् तदायतनावधिलक्ष्म्यायुतंस्यात् २४ अथगृहस्यपरहस्तगामित्वयोगमनुष्टुभाह द्यूनांबरेइति एकोपिग्रहोत्युत्कृष्टशुभफलदातापरांशस्थः सन् यदिद्यूनेसप्तमेस्यात् अथवा अंबरेदशमेस्यात् तदासग्रहः तद्गृहंप्रारब्धंअब्दांतः वर्षमध्येएवपरहस्तस्थं अन्यहस्तगामिकुर्यात् चेद्वर्णपः ब्राह्मणादिवर्णस्वामी विप्राधीशौभार्गवेज्यावित्याद्यभिहितः सचेदबलःस्यात् यदास्ववर्णाधीशःसबलःस्यात्तदापरहस्तगामिनस्यादित्यर्थः २५ अथान्यंविशेषंवसंततिलकयाह पुष्येति पुष्यः ध्रुवाणि प्रसिद्धानि इंदुर्मृगः हरिःश्रवणः सर्पोआश्लेषा जलंपूर्वाषाढा एतैर्नक्षत्रैः सजीवैः गुरुयुक्तैः तद्वासरेणगुरुवासरेणकृतंकर्त्तुमारब्धंगृहंसुतान् पुत्रान् राज्यंचददातितादृशंस्यात् अत्रसंमतिर्वसिष्ठनारदवाक्यतः द्वीशेति द्वीशांविशाखा अश्विनीतक्षःचित्रा वसुर्धनिष्ठा पाशीशतभम् शिवआर्द्रा एतैर्नक्षत्रैः सशुक्रैःशुक्रसहितैःसि

स्वोच्चेशुक्रेलग्नगेवागुरौवेश्मगतेथवा शनौस्वोच्चेलाभगेवालक्ष्म्यायुक्तंचिरंगृहम् २४ द्यूनांबरेयदेकोपिपरांशस्थोग्रहोगृहम् अब्दांतःपरहस्तस्थंकुर्याच्चेद्वर्णपोऽबलः २५ पुष्यध्रुवेंदुहरिसर्पजलैःसजीवैस्तद्वासरेणचकृतंसुतराज्यदंस्यात्

तस्यशक्रस्यवासरेचकृतंगेहम् धनानिस्वर्णानि धान्यानिव्रीह्यादीनिददातितादृशंगृहंस्यात् तथाचनारदः श्रवणाषाढयोश्चैवरोहिण्यांचोत्तरात्रये गुरुवारेकृतंवेश्मराजयोगमिहोच्यते तद्गृहेजातपुत्रस्यराज्यंभवतिनिश्चयात् अत्रवसिष्ठवाक्येनक्षत्राधिक्यंतदनुसारेणमूलेनक्षत्राभिधानंईज्योत्तरात्रयाह्रींदुविष्णुधातृजलोडुषु गुरुणासहितेष्वेषुकृतंगेहंश्रियान्वितमितिवसिष्ठोक्तेः अश्विनीशततारासुविशाखाचार्द्राचित्रके धनिष्ठाशतभेशुक्रसंयुक्तेशक्रवासरे तद्वेश्मनिप्रजातस्तुकुबेरसदृशोभवेत् अत्रापिनक्षत्रभेदःप्राग्वत्समाधिः २६ अथान्यंयोगद्वयमिंद्रवज्रयाह

द्वीशाश्वितक्षवसुपाशिशिवैःसशक्रैर्वारेसितस्यचगृहंधनधान्यदंस्यात् २६ सारैःकरेज्यांत्यमघांबुमूलैःकौजेन्हिवेश्माग्निसु
तार्तिदंस्यात् सज्ञैःकदास्त्वार्यमतक्षहस्तैर्ज्ञस्यैववारेसुखपुत्रदंस्यात् २७ अजैकपादहिर्बुध्न्यशक्रमित्रानिलांतकैः

सारैरिति हस्तपुष्यरेवतीमघापूर्वाषाढामूलैः सारैर्मंगलसहितैः कौजेभौमसंबंधिनिअन्हिवारेकृतंगृहं अग्निसुतार्त्तिदं अग्निपीडांसुतपीडांददातितादृशंस्यात् उक्तंच मूलंचरेवतीचैवकृत्तिकाषाढमेवच एषुभौमेनयुक्तेषुवारेतस्यैवनिर्मितम् अग्निनादह्यतेकृत्स्नंपुत्रनाशश्चजायतइति सज्ञैरिति रोहिण्यश्विन्युत्तराफाल्गुनीचित्राहस्तैःसज्ञैःबुधयुक्तैः ज्ञस्यचवारेकृतंगृहंसुखदंपुत्रदंचस्यात् उक्तंच हस्तार्यमत्वाष्ट्रदास्रउत्तरास्वोडुभेपिवासबुधेबुधवारेचधनपुत्रसुखप्रदमिति २७ अथान्यंयोगमनुष्टुभाह अजैकपादिति पूर्वाभाद्रपदोत्तराभाद्रपदाज्येष्ठानुराधास्वातीभरणी

नक्षत्रैः समंदैः शनैश्चरयुक्तैः मंदस्यैववारेचप्रारब्धंगृहंरक्षोभूतैश्चयुतंस्यात् उक्तंच अजपाद्दितयेयाम्यमिंद्रं द्रानिलभेपिवा समंदेमंदवारेचगृह्यते यक्षराक्षसैः पुत्रेजातेथवातस्मिन् गृह्यतेयक्षराक्षसैरिति अत्रायंनिष्कृष्टोर्थः पूर्वंगृहारंभनक्षत्राण्यवधेयानि ततोवृषवास्तुचक्रेशोध्यानिपश्चादिदंयोगपंचकंविचार्यम् एवंगृहारंभःशुभफलदोभवेत् २८ अथकेषांचिन्मतेनद्वारचक्रंसफलंशार्दूलविक्रीडितेनाह सूर्यर्क्षादिति सूर्याधिष्ठितनक्षत्रात् युगभैश्चतुर्भिर्नक्षत्रैः शिरसिउपरिअवस्थितैः फलंकर्तुः लक्ष्मीप्राप्तिःस्यात् ततःनागभैः अष्टभिःकोणगैः कोणेष्ववस्थितैः उद्वसनं जनावासरहितंस्यात् तदग्रभैर्गजमितैरष्टमितैर्द्वारशाखावस्थितैर्गृहस्वामिनः सौख्यंस्यात् तदग्रिमैः गुणभैस्त्रिभिर्नक्षत्रैर्देहल्यामवस्थितैर्गृहस्वामिनोमृतिःस्यात् ततस्तदग्रिमैर्वेदभैश्चतुर्भिर्नक्षत्रैः मध्यरूपेअवकाशेस्थितैः सौख्यंस्यात् फलितार्थमाह चक्रमिति इदंचक्रंविलोक्यसुधियाशुभंसुभफलदंद्वारंविधेयंकर्तव्यमिति अनेनोपसंहरति २९ इति श्रीमुहूर्त्तचिंतामणिटीकायांप्रमिताक्षरायांद्वादशगृहारंभप्रकरणंसमासम् १२ ६ अथगृहप्रवेशप्रकरणंव्याख्यायते तत्रप्रवेशश्चतुर्धा अपूर्वप्र-

समंदैर्मंदवारेस्याद्रक्षोभूतयुतंगृहम् २८ सूर्यर्क्षाद्युगभैः शिरस्यथफलंलक्ष्मीस्ततःकोणभैर्नागैरुद्वसनंततोगजमितैः शाखासुसौख्यंभवेत् देहल्यांगुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यंचक्रमिदंविलोक्यसुधियाद्वारंविधेयंशुभं २९ इतिमुहूर्त्तचिंतामणौवास्तुप्रकरणंसमासम् छ

वेशः सपूर्वप्रवेशः द्वंद्वाभयप्रवेशः वधूप्रवेशश्चेति तत्रवधूप्रवेशस्यान्वर्थसंज्ञकत्वाल्लक्षणंनोक्तम् सचप्रागभिहितः अन्येषांलक्षणमाह वसिष्ठः अपूर्वसंज्ञः प्रथ
मप्रवेशोयात्रावसानेतुसपूर्वसंज्ञः द्वंद्वाभयस्त्वग्निभयादिजातस्त्वेवंप्रवेशस्त्रिविधः प्रदिष्टइति नवंगृहंनिर्माययः प्रथमः प्रवेशः सोपूर्वसंज्ञः प्रवेशः यस्तु
यात्रानिवृत्त्यनंतरंगृहप्रवेशः ससपूर्वसंज्ञः यस्तुअग्निभयेनाग्निंदाहेन आदिशब्देननद्यादिजलप्लावनेन क्रुद्धेन राज्ञापातितेन गृहनाशस्तद्गृहं यदापु
नः संपाद्यतेतस्मिन् यः प्रवेशः सद्वंद्वाभयइत्युच्यते अन्वर्थसंज्ञाचेयं द्वंद्वंशीतोष्णाम् अत्रशीतशब्देनजलम् ऊष्णाशब्देनाग्निरुच्यते लक्षणयाजला

अथगृहप्रवेशप्रकरणप्रारंभः   सौम्यायनेज्येष्ठतपोंत्यमाधवेयात्रानिवृत्तौनृपतेर्नवेगृहे स्याद्वेशनंद्वास्थमृदुध्रुवोडु
भिर्जन्मर्क्षलग्नोपचयोदयेस्थिरे १

प्लावेनानवरतवृष्टिपातेनवागृहपातस्तुजलभय-
मू अग्निकृतदाहेनयोगृहनाशस्तदग्निभयम् तस्माच्छीतोष्णरूपात् द्वंद्वात्पुनरुत्थापनेन यदुभयमित्युच्यते द्वंद्वोभयंविद्यतेयस्मिन्नित्य
र्थः आदिभ्योजितिमत्वर्थीयोच्प्रत्ययः तादृशः प्रवेशोद्वंद्वाभयइति तत्रापूर्वसपूर्वप्रवेशयोः कालशुद्ध्यादिकमिंद्रवंशयाह सौम्यायनेइति एषुसौम्या
यनेइत्यादिकेषुपदार्थेषुसत्सुनृपतेर्यात्रानिवृत्तौ अथवानवनूतनोत्थापितेगृहेवेशनंप्रवेशनंस्यात् अत्रसौम्यायनइति मंदबुद्धीनांशीघ्रप्रतिपत्त्यर्थं
ज्येष्ठेति ज्येष्ठमाघफाल्गुनवैशाखेषुप्रवेशनंशुभम् नारदः अपिसौम्यायनेकार्यंनववेश्मप्रवेशनम् राज्ञायात्रानिवृत्तौचेति तथा माघफाल्गुनवैशाखज्येष्ठ

मासेषुशोभनः प्रवेशोमध्यमोज्ञेयः सौम्यकार्तिकमासयोरिति मध्यमोक्तिरावश्यकविषया ह्यास्येति यस्मिन्गृहप्रवेशः कर्तुमिष्यतेतस्ययस्यांदिशिमुखंताद्दिङ्नक्षत्रैः पूर्वादिषुचतुर्दिक्षु सप्तसप्तानलर्क्षतइत्याद्युक्तैः मृदुध्रुवनक्षत्रैः प्रवेशनंस्यात् यद्दिक्द्वारंमंदिरंतद्दिगृक्षैरुतर्क्षैस्यात्सप्रवेशोनसर्वैर्रिति वसिष्ठोक्तेः अन्यदपितत्रैव अर्कानिलार्यादितिदस्रविष्णुत्र्यक्षेप्रविष्टंनवमंदिरंयत् अब्दत्रयात्तत्परहस्तयातं शेषेषुधिष्ण्येषुचमृत्युदंस्यादिति जन्मर्क्षेति जन्मर्क्षजन्मराशिःजन्मलग्नंप्रसिद्धम् ताभ्यामुपचयंतृतीयषष्ठदशमैकादशस्थानंतस्मिन् उदयेलग्नेस्थिरेस्थिराख्येवृषसिंहवृश्चिककुंभाख्येलग्नेप्रवेशनंशुभम् नारदः कर्तुर्जन्मभलग्नेवा ताभ्यामुपचयेपिवा प्रवेशलग्नेस्याद्वृद्धिरन्यभेशोकनिस्वतेति सौम्येस्थिरेभेशुभदृष्टियुक्तेलग्नेऽथवाद्व्यंग गृहेवि

जीर्णेगृहेग्न्यादिभयान्नवेपिमार्गोर्जयोःश्रावणिकेपिसत्स्यात् वेशोंबुपेज्यानिलवासवेषुनावश्यमस्तादिविचारणाऽत्र २

लग्ने इतिचसौम्यग्रहयुक्तेद्व्यंगेद्विस्वभावराशौ १ अथजीर्णगृहप्रवेशेविशेषमिंद्रवज्रयाह जीर्णेगृहइति जीर्णेपुरातनेऽन्यनिर्मितेगृहे अग्निभयात् अग्निनादाहात् आदिशब्देनबहुवृष्टिराजकोपाद्युपद्रवात्पतिते गृहेपुनरपिसम्यगेवकृतेउत्थापितेपूर्वोक्ताः सर्वेपिमासाज्ञेयाः किंचमार्गोर्जयोःमार्गशीर्षकार्तिकयोःचश्रावणिकेपि श्रावणेपिवेशःप्रवेशःसन् शुभफलदःस्यात् सनत्कुमारःगृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद्गृहमिति अत्रसामान्यतोगृहारंभोदितामासागृहप्रवेशेऽभिहिताःतेच सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाःमासाःस्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाइति

नारदोक्तेर्मार्गशीर्षफाल्गुनश्रावणकार्तिकर्विहिताः तत्रोत्तरायणएवगृहप्रवेशस्यवाक्यांतरविहितत्वात् श्रावणकार्तिकमार्गशीर्षाणामुत्तरायणत्वाभावात् विरोधेनूतनजीर्णगृहप्रवेशाभ्यांव्यवस्थाकथंप्रागभिहित नारदवाक्येनउत्तरायणसाहचर्येणनूतनगृहप्रवेशसपूर्वप्रवेशयोर्विधानात् गृहारंभोदितैर्मासैरित्यनेनतुसामान्यतस्त्रिविधस्यापिप्रवेशस्यविधानादुत्तरायणीयमासास्त्रिविधगृहप्रवेशेशुभाः दक्षिणायनीयमासाः श्रावणादयस्तुजीर्णगृहप्रवेशविषयाः अतएवनारदोमार्गशीर्षकार्तिकयोर्नूतनप्रवेशेमध्यमत्वमाह अर्थादेवजीर्णगृहप्रवेशेउत्कृष्टमध्यत्वेस्याताम् अंबुपेति अंबुपः शततारकाईज्यः पुष्यः अनिलः स्वातीवासवं धनिष्ठाएषुभेषुजीर्णगृहे अग्न्यादिभयान्नवेपिगृहप्रवेशः शुभः प्राक्पद्योक्तनक्षत्रेषुतुशुभएवेति कैमुतिकन्यायादवगम्यते ज्योतिः प्रकाशेप्रवेशोनूतनेहर्म्ये ध्रुवैर्मैत्रैः सुरवासये पुष्यस्वातीयुतैस्तैस्तुजीर्णेस्याद्वासवद्वयेति नावश्यमिति अत्रैवंविधेजीर्णगृहे अग्न्यादिभयान्नवेपि आवश्यकमस्तादिविचारणाशुक्रास्तगुर्वस्तबाल्यवार्द्धकसिंहस्थगुर्वादिदोषाणांविचारणाविचारोनास्ति अस्तादयः कालदोषाः संतुमावासंतु तथापिगृहप्रवेशः कार्यः सोपिपंचांगशुद्धिमात्रमंगीकृत्यविहितनक्षत्रेष्वेवकार्यः ज्योतिः प्रकाशेनित्ययानेगृहेजीर्णेप्राशनेपरिधानके वधूप्रवेशेमांगल्येनमौढ्यंगुरुशुक्रयोरिति वसिष्ठः नवप्रवेशेह्यथकालशुद्धिर्नद्वंद्वसौपूर्तिकयोः कदाचित् प्रवेशपंचांगदिनेसुलग्नेवास्त्वर्चनंपूर्ववदेवकुर्यात् पूर्ववदेवनूतनप्रवेशेयथावास्तुपूजातथाद्वंद्वसौपूर्विकयोरपिकार्येत्यर्थः नारदेनतुयात्राविधेर्निवृत्तिप्रवेशेकालशुद्धिरपेक्षितैवेति तद्वाक्यंप्रागभिहितंतदेवतयोर्वाक्ययोरावश्यकानवश्यत्वेनव्यवस्था अत्रत्रिविधेपिप्रवेशेप्रवेशनक्षत्रंक्रूराक्रांतंक्रू

रविद्धंवासर्वथावर्ज्यम् वसिष्ठः क्रूरग्रहाधिष्ठितविद्धभंचविवर्जनीयंत्रिविधप्रवेशइति २ अथगृहप्रवेशदिनात्प्राक्कर्त्तव्यवास्तुपूजांविवक्षुस्तन्नक्षत्राणि उपजातिकापूर्वार्द्धेनाह मृदुध्रुवेति एषुसप्तदशसुनक्षत्रेषुवास्तुपुरुषस्यार्चनंभूतबलिंचकारयेत् गृहपतिर्वास्तुपूजांचकुर्यात् पुरोहितोवास्तुपूजांकारयेत् हृक्रोरन्यतरस्यानित्यणौकर्त्तुः कर्मत्वम् वास्तुपूजाप्रकारमाह वसिष्ठः निर्माणेमंदिराणांचप्रवेशेत्रिविधेपिच वास्तुपूजाप्रकर्त्तव्या यस्मात्तांकथयाम्यतः गृहमध्येहस्तमात्रंसमंतात्तंडुलोपरि एकाशीतिपदंकार्यंपलैस्तुल्यैंसुशोभनम् एकद्वित्रिपदाःपंचचत्वारिंशत्सुरार्चिताः द्वात्रिंशद्बाह्यतोवक्ष्यमाणाश्चांतस्त्रयोदश तेषांस्थानानिनामानिवक्ष्याम्यीश्वरकोणतः तत्राग्निःशंभुकोणस्थस्त्वसौचैकपदेश्वरः आकाशवायुपरतः क्रमादेकप

मृदुध्रुवक्षिप्रचरेषुमूलभेवास्त्वर्चनंभूतबलिंचकारयेत् त्रिकोणकेंद्रायधनत्रिगैःशुभैर्लग्नेत्रिषष्ठायगतैश्चपापकैः ३

देश्वरौ एवंप्राच्यांनवज्ञात्वात्वेवमेवान्यदिक्षुच आद्यश्चांत्यावेकपदौद्विपदाः पंचमध्यगाः शिख्याद्यष्टावाकाशांताः अमराः पूर्वभागगाः आद्यश्चांत्यावेकपदौद्विपदाः पंचमध्यगाः पूषाद्यष्टौयमांताः स्युरमरायाम्यभागगा आद्यश्चांत्यावेकपदौद्विपदाःपंचमध्यगाः अष्टौपितृगणाधीशात्पापांताःपश्चिमेसुराः आद्यंतौद्वावेकपदौद्विपदाःपंचमध्यगा रोगादिदित्यंतसुराः सप्तसौम्यादिशिक्रमात् तत्राधस्थचतुःकोणेत्वीशानादिषुचक्रमात् आपः सावित्रविजयरुद्राश्चैकपदेश्वराः मध्येनवपदोब्रह्मातस्यैशानादिकोणगाः आपवत्सोमसविताविबुधाधिपसंज्ञकाः राजयक्ष्माचचत्वारः सुराश्चैकप-

देश्वराः ब्राह्मणाःपूर्वतोदिक्षुत्रिपदाश्चामराअमी अर्यमाचविवस्वांश्चमित्रःपृथ्वीधरःक्रमात् स्वस्वस्थलेषुदेवेषुस्थापितेष्वीदृशंभवेत् कोणेषुपंचपंचैवचतुर्थैकपदाःसुराः प्रागादिदिक्षुद्विपदाःपंचपंचयथाक्रमम् ब्रह्मणःपूर्वतोभूयादिपिनेष्वीदृशंभवेत् कोणेषुपंचपंचौदिक्षुत्रिपदाःस्युः समीपगाः हिरण्यरेताःपर्जन्योजयंतःपाकशासनः सूर्यःसत्योभृशाकाशौवायुःपूषाचवैतथा गृहर्क्षतःपितृपतिर्गंधर्वोभृंगराजकः यमःपितृगणाधीशस्तथादौवारिकाह्वयः सुग्रीवःपुष्पदंतश्चजलाधीशोनिशाचरः शोषःपापश्चरोगोहिर्मुखो भल्लाटएवच सोमसूर्यौदित्यदितीद्वात्रिंशदमराःस्मृताः आपश्चैवापवत्सश्चजयोरंध्रस्तथैवच मध्येनवपदोब्रह्मातस्यैतस्यसमीपगाः प्राच्याद्यंतरितादेवाःपरितोब्रह्मणःस्मृताः अर्यमासवितान्चैवविवस्वान्विबुधाधिपः मित्रोथराजयक्ष्माचतथापृथ्वीधरःक्रमात् आपवत्सोऽष्टमःपंचचत्वारिंशत्सुरोत्तमाः ज्ञात्वैवंस्थानमानानिब्रह्मणासहितान्यजेत् वास्तुज्ञोवास्तुमंत्रेणगंधपुष्पाक्षतादिभिः प्रणवेनार्चयेद्वापि अथवास्वस्वनामभिः शुक्लवस्त्रयुगंदद्याद्धूपदीपफलैःसह अपूपैर्भूरिनैवेद्यैर्वाद्यैःसहसमर्चयेत् तांबूलंचततोदद्याद्देवेभ्यश्चपृथक्पृथक् दत्वापुष्पांजलिंकर्ताप्रार्थयेद्वास्तुपूरुषम् वास्तुपुरुषनमस्तेस्तुभूशय्यानिरतप्रभो मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा इतिप्रार्थ्यततोदद्याद्दक्षिणामर्चकायच विप्रेभ्योभोजनंदत्वास्वयंभुंजीतबंधुभिः एवंयःकुरुतेसम्यग्वास्तुपूजांप्रयत्नतः आरोग्यंपुत्रपौत्रादिधनंधान्यंलभेन्नरः वास्तुपूजामकृत्वायःप्रविशेन्नवमंदिरम् रोगान्नानाविधान्क्लेशानश्नुतेबहुसंकटम् इतिवसिष्ठसंहितायांवास्तुशांतिः नारदादयः पंचांगशुद्धिमात्रयुक्तेपूर्वदिनेएववास्तुपूजामाहुः विधायपूर्वदिवसेवास्तुपूजांबलिक्रिया

मितितृतीयस्लोकार्द्धस्यटीका ३ अथलग्नशुद्धिंतिथिवारशुद्धिंचोपजातिकोत्तरार्द्धेनेंद्रवज्रयाह त्रिकोणेति शुद्धांबुरंध्रइति नवमपंचमप्रथमचतुर्थसप्तमदशमैकादशद्वितीयतृतीयस्थानानामन्यतमस्थानस्थितैः शुभै रुपलक्षिते तथातृतीयषष्ठैकादशस्थानस्थैःपापग्रहै रुपलक्षितेच तथांबुचतुर्थस्थानंरंध्रमष्टमस्थानंतस्मिन्शुद्धेसर्वग्रहरहितेअंबुरंध्रेयस्मिन्तादृशेलग्नेगृहंविशेत् कीदृशेलग्ने जनुर्भमृत्यौ भंराशिर्लग्नंचजनुषिजन्मकालेभंजनुर्भंताभ्यां मृत्युरष्टमभवनं जनुर्भमृत्युः विगतोजनुर्भमृत्युर्यस्मिन् स्वजन्मलग्नात् स्वजन्मराशेर्वाऽष्टमराशिः प्रवेशलग्नेनप्रेक्षितइत्यर्थः पुनःकीदृशेलग्नेव्यर्कारिरिक्ताचरदर्शचैत्रे अर्कारौप्रसिद्धौवारौरिक्ता ४ ९ १४ उपलक्षणत्वाद्दग्धतिथयोपि चरलग्नानि मेषकर्कतुलामकराख्यानितदंशाश्चदर्शोऽमा

शुद्धांबुरंध्रेविजनुर्भमृत्यौव्यर्कारिरिक्ताचरदर्शचैत्रे अग्रेंबुपूर्णकलशंद्विजांश्चकृत्वाविशेद्वेश्मभकूटशुद्धम् ४

वास्याचत्रैमासः

विगताअर्कादयोयस्मिन् अर्कादयःप्रवेशादिनेनिषिद्धाइत्यर्थः अग्रइति गृहप्रवेशसमयेजलपूर्णकलशंस्वसंमुखंकृत्वाद्विजान्ब्राह्मणांश्चाग्रेकृत्वावेश्मगृहंविशेत् वसिष्ठः कृत्वाशुक्रंपृष्ठतोवामतोऽर्कंविप्रान्पूज्यानग्रतःपूर्णकुंभम् रम्यंहर्म्यंतोरणस्रग्वितानैः स्त्रीभिःस्रग्वीगीतवाद्यैर्विशेत्तदिति अयंविधिःप्रवेशेसाधारणःकीदृशंवेश्म भकूटशुद्धं भकूटंषष्ठाष्टकादि उपलक्षणत्वाद्विवाहप्रकरणोक्तंवर्णोवश्यंतथातारेत्यादिकंचतेनापिशुद्धम् वसिष्ठःराशिकूटादिकंसर्वंदंपत्योरिवचिंतयेदिति ४ अथवामगतार्कज्ञानंपूर्वादिमुखगृहप्रवेशंचेंद्रवंशयाह वामोरविरिति अष्टमपंचमद्वितीयैकादशस्थानेभ्यःपंचसुस्था

नेषु स्थिते रवौ सति प्राग्वदनादिके मंदिरे प्रवेष्टव्ये गृहप्रवेशकर्त्तुर्वामो रविर्ज्ञेयः यथा तस्मिँल्लग्ने गृहप्रवेशः कर्तुमिष्यते तस्मादष्टमं यत्स्थानं ततः पंचसु स्थानेष्वर्के सति पूर्वाभिमुखे गृहे प्रवेशकर्तुर्वामः सूर्यः स्यात् तथा लग्नाद्यत्पंचमस्थानं ततः पंचसु स्थानेषु रवौ स्थिते दक्षिणाभिमुखे वामोर्कः तथैव लग्नाद्यद्द्वितीयस्थानं ततः पंचसु स्थानेषु रवौ स्थिते पश्चिमाभिमुखे वामोर्कः तथैव लग्नाद्यदेकादशस्थानं ततः पंचसु स्थानेषु सूर्ये स्थिते उत्तराभिमुखे गृहे प्रवेशकर्त्तुर्वामः सूर्य इत्यर्थः उक्तं च रंध्रात्पुत्राद्धनादायात्पंचस्वर्के स्थिते क्रमात् पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः इति पूर्णातिथाविति प्राग्वदने पूर्वाभिमुखे गृहे पूर्णातिथौ पंचम्यां दशम्यां पूर्णिमायां वा प्रवेशः नंदादिके तिथिगणे याम्यजलोत्तरानने गृहे प्रवेशः शुभः यथा दक्षिणाभिमुखे गेहे नंदायां प्रतिपदि षष्ठ्यामेकादश्यां वा प्रवेशः शुभः जलं पश्चिमादिक् तद्दिङ्मुखे गृहे भद्रायां द्वितीयायां सप्तम्यां द्वादश्यां वा प्रवेशः शुभः उत्तराभिमुखे गृहे जयायां तृतीयायामष्टम्यां त्रयोदश्यां वा प्रवेशः शुभः गुरुः नंदायां दक्षिणद्वारं भद्रायां पश्चिमामुखं जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत् इति ५ अथ गृहप्रवेशकलशवास्तुचक्रं शार्दूलविक्रीडितेनाह वक्त्रे भूरिति गृहप्रवेशसमय इति सर्वत्रापि संबध्यते कुंभे कलशाकृतिवास्तौ रविभात् सूर्याक्रांतनक्षत्रात् ल्यब्लोपे पंचमी रविभमारभ्य कलशस्य मुखे भूरेकं सूर्याक्रांतनक्षत्रमेव स्थाप्यम् तत्फलं गृहस्याग्निदाहः ततः सूर्यभात्कृताः अग्रिमा

वामो रविर्मृत्युसुतार्थलाभतोऽर्के पंचभे प्राग्वदनादिमंदिरे पूर्णातिथौ प्राग्वदने गृहे शुभो नंदादिके याम्यजलोत्तरानने ५

णिचत्वारिभानिप्राच्यांस्थाप्यानि फलमुद्वसनंजनवासशून्यंगृहंस्यात् ततःकृतायमगताः तदग्निमाणिचत्वारिभानिदक्षिणेस्थाप्यानि फलंगृहपतेर्लाभः द्रव्यप्राप्तिः ततःकृताःपश्चिमेतदग्निमाणिचत्वारिभानिपश्चिमायांस्थाप्यानि फलंगृहपतेःश्रीप्राप्तिः ततोवेदाउत्तरे तदग्निमाणिचत्वारिभानिउत्तरस्यांस्थाप्यानिफलंकलिःलोकैःसहगृहसंबंधीनिरर्थकोवादःझकटःस्यात् ततोयुगमितास्तदग्निमाणिचत्वारिभानिगर्भेकलशमध्येस्थाप्यानि फलंविनाशोगर्भस्यैवेत्यर्थः ततोरामास्तदग्निमाणित्रीणिभानिगुदेबुध्न्येस्थाप्यानि फलंस्थैर्यंगृहपतेर्बहुकालंतत्रनिवासः ततोऽनलास्तदग्निमाणित्रीणिभानिकंठेस्थाप्यानिफलंस्थिरत्वंगृहपतेर्भवेत् एवमभिहितानिसप्तविंशतिभानिस्युः ज्योतिःप्रकाशे भूर्वेदपंचकंत्रिस्त्रि १४४४४३३ प्रवेशेकलशेर्कभात् मृतिर्गतिर्निर्धनं श्रीःस्याद्वैरंसुखंस्थिरतासुखमिति अत्रकलशचक्रेशुभफलस्थानपतौसत्येवविहितनक्षत्राणांपरिग्रहोयुक्तस्तत्रापियद्दिङ्मुखेप्रवेशोविधित्सितेतद्दिङ्मुखनक्षत्रपरिग्रहः यथापूर्वस्यांप्रवेशेविधित्सितेरोहिणीमृगोवाग्राह्यः दक्षिणमुखगृहप्रवेशेउत्तराफाल्गुनीचित्रेएव पश्चिमाभिमुखेअनुराधोत्तराषाढेएवउत्तराभिमुखेउत्तराभाद्रपदारेवत्यौग्राह्येइतिनिष्कृष्टोर्थः अतएवोक्तंवसिष्ठेन यद्दिग्द्वारंमंदिरंतद्दिगृक्षैरुक्तर्क्षैःस्यात्सन्निवेशोनसर्वैरिति तद्दिगृक्षैरितिवानयोःसामानाधिकरण्येनान

वक्त्रेभूरविभात्प्रवेशसमयेकुंभेग्निदाहःकृताःप्राच्यामुद्वसनंकृतायमगतालाभःकृताःपश्चिमे श्रीर्वेदाःकलिरुत्तरेयुगमितागर्भेविनाशोगुदेरामास्थैर्यमतःस्थिरत्वमनलाःकंठेभवेत्सर्वदा ६

न्वयः भिन्नवाक्येतुचकारः कर्तव्यः स्यात् अतएव अर्कानिलार्यादितिदस्रविष्णुऋक्षेप्रविष्टंनवमंदिरंयत् अब्दत्रयात्तत्परहस्तमेति शेषेषुधिष्ण्येषुचमृत्युदंस्यादितिनिषेधोप्युपपन्नोभवति ६ अथगृहप्रकरणप्रवेशोपसंहारंसूचयन्प्रवेशोत्तरकालीनकर्तव्यविधिमुपजात्याह एवंसुलग्नइति एवंप्रागुक्तप्रकारेणविचारितसुलग्नेशोभनगुणयुतेस्थिरराज्यादिकेराजावितानपुष्पश्रुतिघोषयुक्तं वितानानिचसुवस्त्रमंडपाः पुष्पाणिस्वकालर्तुजानिमालत्यादीनिश्रुतिघोषोवेदध्वनिश्चतैर्युक्तं उपलक्षणत्वात्तोरणाद्यनेकमांगल्यवस्तुसहितमेतादृशंस्वसत्ताकंगृहंप्रविश्यपश्चात् शिल्पज्ञान् गृहोत्थापकान् स्थपतिर्वर्द्ध

एवंसुलग्नेस्वगृहंप्रविश्यवितानपुष्पश्रुतिघोषयुक्तम् शिल्पज्ञदैवज्ञविधिज्ञपौरान्राजाऽर्चयेद्भूमिहिरण्यवस्त्रैः ७ इतिश्रीदैवज्ञ॰मुहूर्त्तचिंतामणौ॰ त्रयोदशंगृहप्रवेशप्रकरणंसमाप्तम् १३ छ

क्यादीन् दैवज्ञान्ज्योतिर्विदः विधिज्ञान्वास्तुपूजाभूतबलिगृहप्रवेशविधिज्ञान्पुरोहितप्रभृतीन् पौरान्नागरिकान् पंडितदीनानाथांधकृपणांश्च भूमिहिरण्यवस्त्रैर्यथाशक्त्याव्यस्तैः समस्तैर्वा उपलक्षणत्वादश्वादिभिर्वाअर्चयेत्पूजयेत् अत्रविशेषमाह वसिष्ठः यद्वास्तुपूजारहितंत्वदत्तबलिंत्वनाच्छन्नगृहंविरूपम् कपाटहीनंनविशेद्यतस्तत्सर्वाऽपदामालयमेवतत्स्यादिति तस्मात्सकपाटमुपरिष्टात् छादितंकृतवास्तुपूजादत्तबलिमेवगृहंप्रविशेत् प्रवेशोत्तरविधिमाह श्रीपतिः ततोनृपोविप्रसुहृत्पुरोधसः शिल्पज्ञभूगोलविदश्चलिंगिनः धनैश्चरत्नैः पशुभिःसमर्चयन् सदांधदीनान्पुरवासिनस्तथेति ७ इतिश्रीमुहूर्त्तचिं॰गृहप्रवेशप्रकरणंसमाप्तं

अथग्रंथसमासौपितामहवर्णनंशार्दूलविक्रीडितेनाह आसीदिति धर्मपुरेनर्मदातीरग्रामविशेषेप्रसिद्धश्चिंतामणिरासीत् किंभूतेधर्मपुरे षडंगानिशि
क्षादीनितानिविद्यंतेयस्यएतादृशोयोनिगमोवेदस्तदध्येतारोयेद्विजाब्राह्मणादयस्तैर्मंडितेभूषिते कीदृशश्चिंतामणिः ज्योतिर्वित्तिलकइवतिलकः ज्योति
र्विच्छ्रेष्ठइत्यर्थः पुनःकीदृशः फणींद्रः शेषनागः तद्रचितेभाष्येमहाभाष्येकृतोतिश्रमोऽत्यभ्यासोयेन पुनःकीदृशश्चिंतामणिः तत्तज्जातकसंहितागणितकृ
त् तानितानिस्वल्पबृहदादिभेदेनानेकविधजातकानिजातकशास्त्राणिसंहिताः संहिताशास्त्राणिकरोतितादृशः गणितानिगणितशास्त्राणिकरोतितादृशः

आसीद्धर्मपुरेषडंगनिगमाध्येतृद्विजैर्मंडितेज्योतिर्वित्तिलकः फणींद्ररचितेभाष्येकृतातिश्रमः तत्तज्जातकसंहितागणितकृन्मान्योम
हाभूभुजांतर्कालंकृतिवेदवाक्यविलसद्बुद्धिः सचिंतामणिः ८

पुनःकीदृशः महाभूभुजांमान्यः पूज्यः पुनःकीदृशः तर्कालंकृतिवेदवाक्यविलसद्बु
द्धिः तर्कोन्यायशास्त्रं अलंकृतिः अलंकारशास्त्रम् वेदवाक्यंवेदवाक्यविचारप्रतिपादकोग्रंथोमीमांसाशास्त्रंवेदांतशास्त्रंचतेषुविलसतीतिविलासयुक्तान्
बुद्धिर्यस्यसः ८ अथक्रमप्राप्तंतातवर्णनंतेनैववृत्तेनाह ज्योतिर्विदिति तत्सूनुस्तस्यचिंतामणिदैवज्ञस्यसूनुः पुत्रोऽनंतइतिनाम्नाप्रथांख्यातिमधिगतः
प्राप्तआसीत् कीदृशः ज्योतिर्विद्गणवंदितांघ्रिकमलः ज्योतिर्विदांगणेनसमूहेनवंदितचरणकमलंयस्यसः पुनःकीदृशः भूमंडलेऽहस्करइवअध्यापनद्वा
राप्रकाशकइत्यर्थः पुनःकीदृशः कृतीकुशलः ग्रंथकरणसमर्थइतिशेषः ग्रंथकर्त्तृत्वमेवोत्तरार्द्धेनप्रकाशयति योरम्यामिति जनिपद्धतिंजातकपद्धतिंदुष्टाशयन-

ध्वंसिनीं दुष्टाः जन्मपद्धतिमार्गसंप्रदायानभिज्ञास्तेषामाशयमभिप्रायं ध्वंसयति इतिदुष्टाशयध्वंसिनी तामकरोत् तथा उत्तमे ब्रह्मपक्षार्यपक्षप्रति
पादके कामधेनुगणिते ग्रंथविशेषे टीकां च सतां प्रीतयेऽकार्षीत् कृतवानित्यर्थः ९ अथ स्वनामकथनपूर्वकं ग्रंथसमाप्तिं पृथ्वीछंदसाह तदात्मज इति
तस्यानंतस्यात्मजो रामाभिधो गिरीशनगरे वाराणस्यां मुहूर्त्तचिंतामणिं मुहूर्त्तचिंतामणिनामधेयं ग्रंथं भुजभुजेषुचंद्रै १५२२ मितेशके द्वाविंशत्य

ज्योतिर्विद्गणवंदितांघ्रिकमलस्तत्सूनुरासीत्कृतीनाम्नाऽनंतइतिप्रथामधिगतो भूमंडलाहस्करः योरम्यांजनिपद्धतिंसमकरो
दुष्टाशयध्वंसिनींटीकांचोत्तमकामधेनुगणितेऽकार्षीत्सतांप्रीतये ९ तदात्मजउदारधीविबुधनीलकंठानुजोगणेशपदपंकजं
हृदिनिधायरामाभिधः गिरीशनगरे वरे भुजभुजेषुचंद्रै १५२२ मितेशके विनिरमादिमं खलु मुहूर्त्तचिंतामणिम् १० इतिश्री
दैवज्ञरामविरचितमुहूर्त्तचिंतामणिःसमाप्तः ॥ ॥श्रीगजाननार्पणमस्तु॥ छ ॥ शुभंभवतु ॥ ॥छ॥

धिकपंचदशशतमितेशाके विनिरमात् अकार्षीत् शेषंस्पष्टम् १० इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचितायांस्वकृतमुहूर्त्तचिंतामणि-
टीकायांप्रमिताक्षरायांत्रयोदशंगृहप्रवेशप्रकरणंसमाप्तम् १३ ॥छ॥ ॥श्रीकृष्णार्पणमस्तु॥ छ॥ शुभंभवतु ॥ समाप्तोऽयंग्रंथः॥
हें पुस्तक मुंबईंत महादेव गोपाळ शास्त्री अमरापुरकर यांनीं आपले ज्ञानदर्पण छा॰ छा॰ शके १८०२ चैत्रमासे कृष्णपक्षः॥ ॥तारीख १ मे॰ सन १८८० इसवी॥

इतिश्री मुहूर्त्तचिंतामणिः समाप्तः

```
[OrderDescription]
,CREATED=27.07.20 11:30
,TRANSFERRED=2020/07/27 at 14:15:39
,PAGES=443
,TYPE=STD
,NAME=S0003385
,Book Name=M-2824-MUHURTCHINTAMANI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
```

```
FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
```

```
FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
```

```
FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
```

```
FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
```

```
FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
```

```
FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
```

```
FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
```

```
FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
```

FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF

```
FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
```

```
FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
```

```
FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
```

```
FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
```

```
FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
```

```
FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
```

```
FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
```

```
FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
```

```
FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
```

FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF

```
FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
```

```
FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
```

```
FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
```

```
FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
```

```
FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
```

```
FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
```

```
FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,
```